Kārikās 8 and 9 speak of the four classes of beings born out of the different kinds of matrices, *viz.*, *aṇḍa* (eggs), *jarāyu* (foetus), *sveda* (secretion), and *upapāduka* (self-born). The *Vyākhyā* (p. 16) recounts a few mythological stories to show that human beings and animals are born in the abovementioned four ways. Incidentally it refers to Maskarī as a teacher, who denies the force of *karma*. It (p. 17) points out that Suparṇas and Nāgas are self-born, but there are some Garuḍas and Nāgas, which are *aṇḍaja*, *saṃsvedaja* and *jarāyuja*.

Beings reappearing in hells are said to be self-born, so also are beings in *antarābhava* (intermediary existence) while *pretas* may be either self-born or born of foetus.

Kārikā 10 defines *antarābhava* as the state of existence after death and before rebirth while kārikās 11 and 12 discuss the relation of death to rebirth. The relation, it says, is one of continuity (*santāna*) like that of the transplantation of paddy-tufts from one spot to another, and not like reflections on a mirror; as in the latter case, there are two causes, the object and the mirror, and the two exist at the same moment. In this connection, reference is made to the *Āgamas*, in which the existence of *antarābhava* is admitted. The *Vyākhyā* (p. 22) remarks that if, in the Āgamas of any schools (*Nikāyas*), this reference does not occur, it is due to the loss of the

[1] ईश्वर-पुरुष-प्रधानादिकमिति । आदिशब्देन काल-स्वभाव-परमाणवादि गृह्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

original *Tripiṭaka* (*mūlasaṅgītibhraṃśena samāropitasūtrāśaṅkitatvāt*). The existence of *antarābhava* is then established by references to the five stages of sanctification, known as *antarāparinirvāyī, upapadya-parinirvāyī*, etc. mentioned by the teacher in the *Sapta-satpuruṣagati-sūtra* delivered at Śrāvastī. The *Vyākhyā* (pp. 22-8) quotes in *extenso* the *sūtra*, in which all the seven stages, including *anupādāya-nirvāṇa*, are explained in detail with the help of similes as also their relation with the *dhyānas*. It refers the readers for further treatment to the eighth *Kośasthāna* on '*pudgala-nirdeśa*'. As against the authority of this *sūtra*, there may be some who on the authority of *Dusīmāra-sūtra* may deny *antarābhava* but the *Vyākhyā* (p. 29) explains away this anomaly. Kārikās 13 and 14 dilate on the behaviour and characteristics of the *antarābhava*, referring incidentally to a Vinaya text on dreams and to the opinion of Ācārya Saṅghabhadra. In kārikā 15 the mental state of the *antarābhava*, just before its conception in the mother's womb is analysed, but the analysis does not appeal to our reasoning very much. The question of the existence serves as a bone of contention among the various Buddhist sects, the Sarvāstivādins and Sāṃmitīyas, supporting its existence in Kāma and Rūpa-lokas, while the Theravādins and Mahāsaṅghikas rejecting it altogether.

Karikās 16 and 17 tell us all beings enter into, stay in, and come out, of the womb unknowingly[1] (*asamprajānan*) except that the Cakravartins enter into the womb knowingly (*samprajānan*) while Pratyekabuddhas do the same and stay there also knowingly. Buddhas, however, enter into, stay in, and come out of, the womb knowingly. These differences are due to the different degrees of attainment of merits and knowledge.

Kārikās 18 and 19 take up the fundamental doctrine of Buddhism that there is no soul, and that the *skandhas* only come into existence through acts and their results, and the continuity of births is maintained by means of the *antarābhava*. Acts and their results make the body grow and pass from one existence to another in this endless series of existences. There is no God the Creator (*īśvara*).

Kārikās 20-25 explain the famous formula of *Pratītyasamutpāda* (chain of causation), which the text says is composed of twelve links, divided into three sections, the eight middle links *vijñāna* to *bhava* forming the second section. The first two links at the beginning are the cause of the following five from *vijñāna* to *vedanā*, while the last two *jāti* and *jarāmaraṇa* are the effects of the preceding

1 Cf. *Dīgha*, iii. 103 with Buddhaghosa's commands.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

three, viz. *tṛṣṇā*, *upādāna* and *bhava*. So we may say that the first seven links are *paurvāntika* and the remaining five *aparāntika*. The first section is meant to counteract the wrong view 'I was' and the second to counteract 'I am' and the third to dispel the speculation 'I shall be'.

The text then proceeds to explain the items thus: *avidyā* implies the existence of ten impurities (*kleśas*). *Saṃskāras* are the results of past life, *vijñāna* includes the five *skandhas* at the moment of inception into the womb. It is concomitant with *nāmarūpa* and cannot appear independently, and is immediately followed by *nāmarūpa*, which are really the five *skandhas* after the inception and are socalled as long as the six organs of sense do not become manifest. Of the six organs of sense, *manas* and *kāya* appear immediately after *vijñāna*. *Sparśa* appears on the contacts (*sannipāta*) of the sense-organs with their objects and the consequential perceptions, and it remains so unless and until the child realises the happy, unhappy and neutral feelings when it is transformed into *vedanā* (feeling). *Vedanā* remains so until the grown up man enjoys sexual pleasure, or the *paryavasthānas*[1] appear when it is transformed into *tṛṣṇā* (thirst). *Tṛṣṇā* leads to fourfold *kleśas* (see *Kośa*, V. 38 and 40) when it is called *upādāna*. The acts performed and accumulated for repeating the joy lead to re-existence (*bhava*). The period of repetition is called *bhava*. *Jāti* is reincarnation. It is really the *vijñāna*, explained above. From *jāti*, i.e., *vijñāna*, up to *vedanā* all apply to the future existence which is expressed by a general term as *jarāmaraṇa*. *Jarā* is maturity and *maraṇa* is disintegration.

In the *Prakaraṇagrantha*, the links of the *Pratītyasamutpāda* are shown to be momentary (*kṣaṇika*), progressively (*prākarṣika prabandhayukta*) and inter-related (*sambandhika*) and includes both *sattva* (beings) and *asattva* (non-beings) but according to the Vaibhāṣikas, the *Pratītyasamutpāda* is static (*āvasthika*) and includes only *sattva* (beings) and each link is a composite of five *skandhas*, and their names are given after the predominant feature in each.

Kārikās 26 and 27 carry on the analysis of the links further thus: *avidyā*, *tṛṣṇā* and *upādāna* are the three impurities (*kleśa*); *saṃskāra* and *bhava* are acts (*karma*); the remaining seven, viz., *vijñāna*, *nāmarūpa*, *ṣaḍāyatana*, *sparśa*, *vedanā*, *jāti* and *jarāmaraṇa* form the bases (*vastu*, *adhiṣṭhāna*) of *kleśa* and *karma*. *Vijñāna*, *nāmarūpa*, *ṣaḍāyatana*, *sparśa* and *vedanā* are the fruits of *avidyā* and

1 The *Paryavasthānas* are *āhrīkya*, *anapatrāpya*, etc.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

saṃskāra, while *jāti* and *jarāmaraṇa* are the fruits of *tṛṣṇā*, *upādāna* and *bhava*. So in all, five of the links can be called causes (*hetu*) and the remaining seven, fruits (*phala*).

Out of impurities (*kleśāt*) appear impurity (*kleśa*) and acts (*kriyā*), and out of acts appear the bases (*vastu*). Out of *vastu* reappear both impurity and bases.[1]

After this, the *Vyākhyā* (pp. 43 ff.) contributes a long discussion on the problem that *ayoniśomanaskāra* (improper thoughts)[2] is the cause of *avidyā* and vice-versa,[3] and gives the opinion of Vasubandhu, Manoratha and Śrīlābha.

In Kārikā 28 is taken up the distinction between *pratītyasamutpāda* and *pratītyasamutpanna*. The former is equated to *hetu* and the latter to *phala*. This raises the question whether the formulae should be regarded as static as held by some of the schools. In this connection the controversy among the different schools, particularly, the Mahīśāsakas, Sautrāntikas and the Vaibhāṣikas is given in detail. The opinions of Vasuvarmā (p. 52), Śrīlābha (p. 54) and other ancient teachers (*ācāryā iti pūrvācāryāḥ* p. 53) are also quoted and discussed. It raises some of the crucial points of differences among the schools and deserve an exhaustive treatment.[4] It repeatedly refers to the *Pratītyasamutpādasūtra*, and gives an exposition of each of the links from its *Vibhaṅga* (vide p. 55). This exposition is similar to that given in the Pāli texts. It explains *upādāna* as attachment to the *saṃyojanas*, *kāma*, *dṛṣṭi*, *śīlavrata*, and *ātmavāda*. Each of these terms is explained in detail.

Kārikā 29 is devoted to the exposition of *avidyā*. It is a wrong view (*darśana*) and is neither absence (*abhāva*) of *vidyā*, nor wrong knowledge (*ku-prajñā*). It is associated with *dṛṣṭi* and it corrupts the *prajñā* (knowledge). Bhadanta Śrīlābha[5] equates *avidyā* to *sarva-kleśa* (all impurities) on the basis of the *Buddhasūtra*. But this opinion is refuted in the *Vyākhyā* (pp. 57-8), which also objects to the interpretation of *avidyā* as *asamprakhyānaṃ* (non-knowledge). It then discusses the meaning of *avidyā* as given by Bhadanta Dharmatrāta and the Sautrāntikas (p. 58).

Kārikās 30 and 31 are devoted to the exposition of *nāma*, in which is included *sparśa*. *Rūpa* is explained in the first kārikā, so it is not

1 For the *aṅgas* of *kleśa*, *kriyā* and *vastu*, see above.

2 La Vallee Poussin says 'Incorrect judgment.'

3 For references to the Pāli texts, see Poussin's *Kośa*, iii, 27 fn.

4 See for details, La Vallee Poussin's *Kośa*, iii, 28

5 Bhadanta Śrīlābha is a teacher of the Sautrāntika school. Poussin's *Kośa*, iii, p. 98

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

dealt with here. *Nāma* is a collective term for all the *skandhas* excepting *rūpa*,. The *Vyākhyā* then comments on the etymology of *nāma* (p. 59). Incidentally it tells that the dead is disposed of by cremation or burial or by throwing into water while the *vijñāna* of one who practised *śraddhā*, *śīla* and *prajñā* passes upwards to heaven.

It then takes up the exposition of *sparśa* which, it says, are six in number and develop out of contact (*sannipāta*) of the sense-organs with their respective objects and the corresponding perception (see above, 1, 9 and 16). The Sarvāstivādins define *sparśa* as a separate entity, an outcome of the threefold contact, while the Sautrāntikas assert that the threefold contact (*sannipāta*) is *sparśa*, but it is not a separate entity. The *Vyākhyā* explains the two positions and supports the former.

The text then explains the two kinds of *manaḥsaṃsparśa* viz., *adhivacana* (denominative) and *pratigha* (obstructive). *Sparśa* may also be of three kinds, *pure* when associated with knowledge (*vidyā*), *impure* when associated with ignorance (*avidyā*), and *indifferent* when associated with good but impure knowledge. Again, *sparśa* may be associated with *vyāpāda* (antipathy) or *anunaya* (sympathy). Then again it may be pleasant (*sukhavedanīya*), unpleasant (*duḥkhavedanīya*), and indifferent (*aduḥkhasukha-vedanīya*). In all therefore there are sixteen kinds of *sparśa* (p. 63), including the six kinds of contact by means of the six sense-organs.

Kārikās 32-35 are devoted to the exposition of *vedanā* (feeling). Commonly there are as many *vedanās* as there are sense-organs, i.e., six in all, of which five are physical and one mental. The *Vyākhyā* (pp. 63-4) then enters into the controversy whether *vedanā* is concomitant (*sahabhū*) with *sparśa*, or *vedanā* follows *sparśa*, as the produced (*janya*) follows the producer (*janaka*). The latter position is upheld by Bhadanta Śrīlābha of the Sautrāntikas and the former by the Vaibhāṣikas.

The controversy leads to an exposition of the *Citta-mahābhūmikas*, viz., *Savitarka-savicāra*, *avitarka-vicāramātra*, etc., *kuśala*, *akuśala* and *avyākṛta*; *śaikṣī*, *aśaikṣī* and *naivaśaikṣīnāśaikṣī*. For this, it has quoted extracts from the texts, *Pañcaskandhaka* and *Prakaraṇapāda*, which, however, are not recognised as authoritative by the Sautrāntikas who recognised the *Sūtras* only and not the *Śāstras*.

The text then passes on to the exposition of mental feelings, which, it says, are of eighteen kinds, viz., six happy (*saumanasya*) six unhappy (*daurmanasya*) and six indifferent (*upekṣā*). These divisions depend on *manopavicāra* (i.e. the bases on which mind roam about). In the Kāmadhātu only, there is scope for all the 18

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

manopavicāras, while in the Rūpadhātu there is scope for twelve and in the Arūpadhātu for three.

In the first two *dhyānas*, there is scope for 12 *manopavicāras*, by the exclusion of the six *daurmanasyas*. All these twelve may function in the Kāmadhātu, eight in the Rūpadhātu and two in the Arūpadhātu.

In the third and fourth dhyānas, there is scope for six *manopavicāras*, of which all six may function in Kāma, four in Rūpa and one in Arūpa.

In the four higher *dhyānas* (i.e. *samāpattis*), there is scope for only four *manopavicāras*, of which all four may function in Rūpa and one only in Arūpa.

In conclusion, the text remarks that all the eighteen *manopavicāras* are *sāsrava* (impure), but this opinion is not accepted by bhadanta Anantavarmā (vide p. 73).

The text passes over other items of the *Pratītyasamutpāda* formulæ, saying that these have either been already treated or will be treated later on.[1]

Kārikās 36 and 37 take up the point mentioned in kārikā 36 *viz.*, the twelve links of the formulæ can be classified under three heads thus:

Kleśa=*avidyā*, *tṛṣṇā*, and *upādāna*
Karma=*saṃskāra* and *bhava*
Vastu=*Vijñāna*, *nāmarūpa*, *ṣaḍāyatana*, *sparśa*. *vedanā*, *jāti*, and *jarāmaraṇa*.

In kārikā 36, *kleśa* is compared to seed (*bīja*), root (*mūla*), tree (*vṛkṣa*) and husk (*tuṣa*), while in kārikā 37, *karma* is compared to husked rice, herbs and flowers and *vastu* to cooked rice and drinks. The *Vyākhyā* (p. 74) does not comment on these two kārikās.

In kārikā 38 is discussed the meaning of *bhava*, mentioned in the previous kārikā. It says that there are four kinds of *bhavas*, *viz*., *antarābhava*, *upapattibhava*, *pūrvakālabhava*, and *maraṇabhava*. Of these four, *upapattibhava* (birth) is always impure, being corrupted by all the impurities of the respective spheres of existence while the other three may be pure, or impure or neither pure nor impure. The *Bhāṣya* adds that in *maraṇabhava*, the impurities remain in a weak state. In the Arūpadhātu, it should be remembered that there is no *antarābhava*, so there are only three kinds of *bhava* in this dhātu. With this the *Vyākhyā* ends its exposition of the *Pratīyasamutpāda* and passes on to the next problem that the world depends on food (*āhārasthitikaṃ jagat*).

1 *Vijñāna* and *ṣaḍāyatana* are explained in ch. I, 16, 9, *saṃskāras* and *bhava* in ch. IV, *tṛṣṇā* and *upādāna* in ch. V

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Kārikā 39 tells us that beings of the Kāmadhātu draw sustenance from material food taken by mouth, nose or throat. It is of three kinds, *gandha*, *rasa* and *spraṣṭavya*. Those spiritually advanced, viz., Anāgāmis and Arhats, when engaged in meditation, directing their vision inwardly, do not take those food which are included in *rūpāyatana* i.e., object seen by the eyes.

The above-mentioned three kinds of food, viz., *gandha*, *rasa* and *spraṣṭavya* are always impure (*sāsrava*).

In kārikā 40 it is pointed out that when *sparśa* (contactual effects) *sañcetanā* (mental acts) and *vijñāna* in the three dhātus are impure (*sāsrava*), these also are food. The reason for qualifying these by *sāsrava* is that it is only *sāsrava* food that can become the cause of existence, and not *anāśrava* food which lead only to the cessation of existence. The three kinds of food viz., *sparśa*, *sañcetanā* and *vijñāna* are taken by the beings while in *antarābhava*, seeking a fresh existence (*sambhavaiṣī*).

This kārikā also analyses the constituents of the beings while in *antarābhava*, which, it says is produced out of mind only (*manomaya*), always seeks a worldly existence (*sambhavaiṣī*), nourishes itself by odour only (*gandharva*),and seeks its cessation and not continuity (*abhinirvṛtti*).

Of the four kinds of food, viz., *kavaḍīkāra*, *sparśa*, *manaḥsañcetanā*, and *vijñāna*, the first two serve to maintain and grow the body and its organs, while the last two nourish the causes for future existence. The above problem is put in the fourfold proposition (*catuṣkoṭika*) and the Bhāṣyakāra refers in his support to passages in the *Saṅgītiparyāya* and *Prakaraṇagrantha*. Incidentally he introduces the question of food taken by the Bodhisattva while meditating in the Kṛṣigrāma under the Jambu tree.

In kārikā 42 are discussed the characteristics of *manovijñāna* at the time of birth and death, or when it is in an indifferent state (*upekṣā*). The characteristics are *cheda* (destruction of good states by means of wrong view), *sandhāna* (aquisition of good states by right view), *vairāgya* (detachment from the worlds and *dhyānas*), *parihāṇi*, (decline on account of improper thoughts: *ayoniśo manasikāra*), *cyuti* (death by the stoppage of the functions of the five sense-organs) and *upapatti* (birth of those with obsessed thoughts —*viparyastamati*).

The two *manovijñānas*, *cyuti* and *upapatti*, are not applicable to those who are engaged in meditation, though they belong to Kāmadhātu, not to speak of those who are in *asaṃjñi-samāpatti*, or *nirodhasamāpatti* i.e. who are almost *acittaka*. For such different

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

classes of men, *maraṇabhava* is described as of three kinds: good, bad and indifferent (see *Vyākhyā*, p. 82).

Kārikā 43 (first line) says that out of the four *avyākṛta* mental states, viz., *vipākaja*, *airyāpathika*, *śailpasthānika* and *nairmāṇika* (see *Kośa*, II.71), the Arhats obtain nirvāṇa while in one of the first two states.

The same kārikā (second line) then tells us that *cyuti* (death) of *citta* takes place in the *legs* of those beings who are destined to lower regions, in the *navel* of those who are destined to be human beings, in the *heart* of those who are destined to the world of gods. In the case of Arhats, *cyuti* of *citta* takes place according to some in the heart, and according to others, in the head. The end of life is brought about by watery (*śleṣma*), bilious (*pitta*) or firy or windy (*vāyu*) elements and not by earth.

The second line of kārikā 44 refers to those who are predestined: one who is in the *samyaktvaniyāma* is destined to attain Nirvāṇa while one who is guilty of one of the four extreme offences is destined to hell.

Kārikās 45-57 deal with the cosmological conceptions. At the bottom of the universe is a circle of air, over it is a circle of water. supporting a circle of gold. Then there are the mountains Meru, Yugandhara etc. Between the mountains are the seven oceans- Around the Nimindhara mountain are the continents, viz. Uttarakuru, Pūrvavideha, Jambudvīpa, and Aparagodānīya. There are eight sub-continents, viz., Deha, Videha (of Pūrvavideha), Kuru, Kaurava (of Uttarakuru), Cāmara, Avaracāmara (of Jambudvīpa), Śāṭha and Uttaramantrin (of Godānīya). In Jambudvīpa there are mountain ranges, the last on the north is the Himavat. Then there are deep lakes. From the lake Anavatapta flow the four rivers, Gaṅgā, Sindhu, Vakṣu and Sītā.

Kārikās 58 and 59 furnish us with a detailed account of the hells.

Kārikās 60-62 speak about the size of the Sun and the Moon and their visibility in the different continents, and the lengths of days and nights in the different seasons.

Kārikās 63-77 deal with the distribution of heavenly spheres as also with some of the characteristics of their denizens.

Kārikās 78-81 give an account of the lengths of lives of beings in heavens, hells, as also of human beings, Nāgas, Pretas etc.

Kārikā 85 tells us that the material unit is called *paramāṇu*, the minutest word is '*akṣara*'. In the following Kārikās 85-90 are given the methods of calculation of material units, and units of time.

Kārikās 89-93 pass on to the enumeration of *kalpas* and their

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

characteristics. At the end of the account of the *kalpas*, the text discusses the meaning of the common statement that Bodhisattvas exert for attainment of *bodhi* through *asaṃkhya kalpas* (vide *Vyākhyā*, p. 101). This leads to a comparison of the Buddhas with Pratyekabuddhas and Śrāvakas.

In Kārikā 94 is discussed the time (*kalpa*) of the advent of Buddhas, who it is said appear only when there are five *kaṣāyas* (impurities) in the world, viz., *āyukaṣāya*, *kalpakaṣāya*, *kleśakaṣāya*, *dṛṣṭikaṣāya* and *sattvakaṣāya*. The first shortens the length of life, the second lessens the material wealth of the world, the third makes the householders fond of worldly pleasures (*kāmasukhallikānuyoga*), the fourth leads the recluses to wrong views and self-[illegible] (*ātmaklamathānuyoga*) and the fifth deteriorates the beings in [illegible] sique, mental applications, energy, intelligence and memory.

In the same kārikā is discussed the time of appearance of Praty[illegible] buddhas. The text says that there are two classes of Pratyekabudd[illegible] one mixes with the society and is called *vargacārin* and the o[illegible] which remains alone and avoids society altogether and is ca[illegible] *khaḍgaviṣāṇakalpa*. The former appears in the *utkarṣa kalpas*, wh[illegible] the latter in the *apakarṣa-kalpas*. According to the text, t[illegible] *vargacārins* were in their previous lives *śrāvakas*, who had attained some spiritual advancement at the time of past Buddhas, while the *khaḍgaviṣāṇakalpas* exerted during one hundred *mahākalpas* for attaining *bodhi*. In discussing why the Pratyekabuddhas do not preach, the *Vyākhyā* (pp. 102-3) brings in the question of *laukika-vītarāga* and *lokottara-vītarāga*.

Kārikās 95-96 and the first line of kārikā 97 are devoted to the appearance and characteristics of Cakravartins. There are, the text says, four classes of Cakravartins, the disc of the first is of gold, that of the second is of silver, that of the third is of copper, and that of the fourth is of iron. This information is taken from the *Prajñapti-śāstra*. Then it refers to the legend that two Cakravartins like two Buddhas cannot appear at the same time, according to some in one world, and according to others in the universe. In this connection there is a reference to the opinion of the Mahāsaṅghikas (p. 105). The four classes of Cakravartins had four ways of conquering the world. All of them are endowed like Buddha with the 32 *mahā-puruṣalakṣaṇas* but these are not as prominent and full as in the case of Buddhas.

In the second line of kārikā 96 and in kārikā 97 is described how beings appeared in this world. At the beginning of their existence they were constituted like the gods of the Rūpaloka, but gradually

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

they dwindled on account of their taste for food. They became careless (*ayoniśo manasikāra*) in obtaining their food, and ultimately on account of idleness, they made a division of the crop producing lands and elected a king. They declined further and further by their act until their life became as short as ten years.

Kārikā 99 relates how the *kalpas* are brought to an end by weapon, disease and famine, which, according to the text, appear simultaneously, and according to others, one after another (vide *Vyākhyā*, p. 105).

Kārikās 100 and 101 speak of the destruction of *saṃvartakalpas* by means of fire, water and wind. In this connection the *Bhāṣya* brings in the opinion of the Vaiśeṣikas, who hold that as the atoms ar[illegible]ernal, these remain though the world is destroyed, otherwise [illegible] elements would appear without cause. The Buddhists maintain [illegible]bove p. 58 bottom) that the *bīja* of a fresh world is 'air': The [illegible]āsakas maintain that air brings the five kinds of '*bīja*' from [illegible]other world. There is an interesting controversy over this theory [illegible] appearance of the world, and incidentally, of beings.

[illegible]he kārikā further states that the heaven attainable by the first [illegible]*āna* is destroyed by fire, as *vitarka* and *vicāra*, the imperfections of the first *dhyāna*, are similar to fire. The heaven attainable by the second *dhyāna* is destroyed by water, because *prīti* and *prasrabdhi*, the imperfections of the *dhyāna* which make the body tender and supple, may be compared to water. The heaven attainable by the third *dhyāna* is destroyed by wind, as inhalation and exhalation, the special features of this *dhyāna*, are comparable to wind. The heaven attainable by the fourth *dhyāna* are not subject to destruction. Opinions however differ relating to the above statement.

Kārikā 102 also speaks of the order of these destructions of the world. It says that the world will be destroyed seven times by fire and then seven times by water. Again it will be destroyed seven times by fire and seven times by wind (see *Visuddhimagga*, p. 421).

I take this opportunity of acknowledging with thanks the valuable help and co-operation that I have received in the editing of this volume from Dr. Nalinaksha Dutt, Head of the Department of Pali and Buddhism in the University of Calcutta, and Prof. Durgamohan Bhattacharyya, Head of the Department of Sanskrit in the Scottish Church College, Calcutta.

96, Amherst Street,
CALCUTTA.

8th February, 1949.

NARENDRA NATH LAW

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्फुटार्थाभिधर्मकोशव्याख्यायाम्

प्रथमं कोशस्थानम्

नमो मारबलप्रमथनाय ।[1]

महावलो ज्ञानसमाधिदन्तो यः पञ्जरं जन्ममयं विदार्य ।
विवेश [2]निर्वृत्यटवीं प्रशान्तां तं शास्तृनागं शिरसा नमामि ॥

परमार्थशास्त्रकृत्या कुर्वाणं शास्तृकृत्यमिव लोके ।
यं बुद्धिमतामग्र्यं द्वितीयमिव बुद्धमित्याहुः ॥

तेन वसुबन्धुनाम्ना भविष्य-परमार्थबन्धुना जगतः ।
अभिधर्मप्रत्यासः कृतोऽयमभिधर्मकोशाख्यः ॥

अभिधर्मभाष्यसागरसमुद्धृतस्यास्य शास्त्ररत्नस्य ।
व्याख्या मया कृतेयं यथार्थनामा स्फुटार्थेति ॥

गुणमति-वसुमित्राद्यैर्व्याख्याकारैः पदार्थ-विवृतिर्या ।
सुकृता साभिमता मे लिखिता च तथायमर्थ इति ॥

सिद्धान्तार्थापसृता क्वचित् क्वचिद्या तु तैः कृता व्याख्या ।
तामुद्भाव्य यथावद्विहितेह मयान्यथा व्याख्या ॥

अभिधर्मविभाषायां कृतश्रमा येऽभिधर्मकोशे च ।
प्रविचार्यतामियं तैर्व्याख्या युक्ता न वा युक्ता ॥

---

1 B. adds नमो रत्नत्रयाय.   2 B. निर्हत्ता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

युक्ता चेद्ग्राह्येयं न चेदपोह्यान्यथा विधातव्या ।
न हि विषमेऽर्थे स्खलितुं न सम्भवेन्मादृशां बुद्धिः ॥

यः सर्वथासर्वहतान्धकारः संसारपङ्काज्जगदुज्जहार ।
तस्मै नमस्कृत्य यथार्थशास्त्रे शास्त्रं प्रवक्ष्याम्यभिधर्मकोशम् ॥

इत्यस्य श्लोकस्यार्थं विवृएवान आचार्य आह। **शास्त्रं प्रणेतुकामः स्वस्य शास्तुर्माहात्म्यज्ञापनार्थं गुणाख्यानपूर्वकं तस्मै नमस्कारमारभत** इति। शास्त्रम् अभिधर्मकोशम्। प्रणेतुकामः कर्तुकामः। स्वस्य शास्तुः आत्मीयस्य शास्तुः। स हि भगवानाचार्यस्यात्मीयः शास्ता तच्छासनप्रतिपन्नत्वात्। तेन वा शास्त्रा महाकरुणापरतन्त्रेण सकलो लोकः स्वत्वेन परिगृहीतः' तस्मादाचार्यस्यापि स्वत्वेन गृहीतस्य स भगवान्स्वः शास्ता भवति। माहात्म्यज्ञापनार्थमिति महात्मत्वं माहात्म्यं स्वपरार्थप्रतिपत्तिसम्पत्' तज्ज्ञापनार्थं तदवबोधार्थम्। गुणाख्यानपूर्वकं गुणकथनपूर्वकम्। तस्मै नमस्कारमारभते तस्मै प्रणामं करोतीत्यर्थः। अतीतकालत्वादारब्धवानिति वक्तव्ये वर्तमानकाले पदप्रयोगः' अद्यापि नमस्कारारम्भाभिप्रायात्' शिष्यपरम्परया वा नमस्कारारम्भाविरामात्। शब्दशास्त्रेऽपीदृश एव शब्दप्रयोगो दृश्यते' अथ शब्दानुशासनम्[1]' अथ इत्ययं शब्दोऽधिकारार्थः प्रयुज्यत इति। गुणाख्यानमात्रेण माहात्म्यावबोधो न नमस्कारेणेति चेत्' न' तस्य तत्सूचकत्वात्' नमस्कारेण हि माहात्म्यं सूच्यते। अथवा गुणाख्यानेनैव माहात्म्यं ज्ञाप्यते न नमस्कारेण' नमस्कारारम्भस्तु स्वपुण्यप्रसवार्थं सदाचारानुवृत्तिप्रदर्शनार्थं वा' कृताभिमतदेवतापूजास्तुतिनमस्कारा हि सन्तः क्रियामारभत इति सतामाचारात्। तत्र माहात्म्यज्ञापनं किमर्थमित्याचक्ष्महे' तद्गौरवोत्पादनार्थम्' गौरवोत्पादनं पुनस्तत्प्रवचन[2]-सत्कृत्यश्रवणार्थम्' सत्कृत्यश्रवणं क्रमेण श्रुत-चिन्ता-भावनामयप्रज्ञोत्पादनार्थम्' तदुत्पादनं क्लेशप्रहाणार्थम्' तत्पुनः सर्वदुःखोपशमलक्षणनिर्वाणप्रापणार्थमिति प्रयोजननिष्ठा। माहात्म्यज्ञापनं त्वेकमाचार्येण प्रयोजनमुक्तम्' साक्षात्प्रयोजनत्वात्। तदितराणि त्वभ्यूहितुं शक्यानीति नोक्तानि।

य इति बुद्धं भगवन्तमधिकृत्याह इति। सामान्यशब्दोऽपि यच्छब्दो

---

1 Mahābhāṣya, I, 1, 1. 2 B., p. 2 प्रवचनं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विहितविशेषणत्वाद्विशेषवृत्तिर्भवति' तद्यथा य एषां ब्राह्मणानां गौरः शुक्लवासाः स देवशर्मेति। तद्वदिहापि'

यः सर्वथासर्वहतान्धकारः संसारपङ्काज्जगदुज्जहार।
तस्मै नमस्कृत्य

इति बुद्ध एव भगवति यच्छब्दो वर्तते। न हि बुद्धादन्य एवंगुणविशिष्टः संभवतीत्यतो व्याचष्टे' य इति बुद्धं भगवन्तमधिकृताहेति। बुद्ध इति कर्तरि क्तविधानम्। बुद्धेर्विकसनाद्बुद्धः' विबुद्ध इत्यर्थः' विबुद्धं पद्ममिति यथा। [1]अविद्यानिद्राद्वयापगमाद्बुद्धः प्रबुद्ध इत्यर्थः। प्रबुद्धपुरुष इति यथा। कर्मकर्तरि क्तविधानमित्यपरे' स्वयं बुध्यत इति बुद्ध इत्यर्थः। कर्मण्यपि क्तविधानमप्यदोषं पश्यामः' सर्वगुणसम्पत्सम्पन्नतया सर्वदोषविनिर्मुक्ततया च बुद्धैरन्यैर्वा बुद्धो ज्ञात इत्यर्थः। भगवन्तम् इति द्वितीयपदोपादानमनादरसम्भावनानिवृत्त्यर्थम्। निरुपपदानामभिधानानां हि लोकेऽनादरो दृश्यते। देवदत्तो दत्त इति[2]। विनयविभाषाकारास्तु चतुष्कोटिकं कुर्वन्ति। अस्ति बुद्धो न भगवान्। प्रत्येकबुद्धः स्वयंभूत्वाद्बुद्ध इति शक्यते वक्तुम्' न तु भगवानपरिपूर्णदानादिसम्भारत्वात्। यो हि माहात्म्यवान् स भगवानुच्यते। अस्ति भगवान्न बुद्धश्चरमभविको बोधिसत्त्वः परिपूर्णदानादिपारमितत्वादनभिसम्बुद्धत्वाच्च। अस्त्युभयथा बुद्धो भगवान्। अस्ति नोभयथा। एतानाकारान्स्थापयित्वेति। अतो बुद्धं भगवन्तमित्युभयविशेषणम्।

हतमस्यान्धकारमनेन वेति हतान्धकारः। षष्ठीबहुव्रीहौ' मार्गेण हतमिति कर्तृभूतो मार्गोऽध्याहार्यः। तृतीयाबहुव्रीहौ तु मार्गेणेति करणमध्याहार्यम्। अपर आह। विग्रहद्वयप्रदर्शनं हन हिंसागत्योरिति[3] हन्त्यर्थद्वयपरिग्रहार्थम्। यदा हतमस्यान्धकारमिति विग्रहस्तदा गत्यर्थो हन्तिर्गृह्यते' गतमस्यान्धकारमित्यर्थः। यदा पुनस्तृतीयाबहुव्रीहिस्तदा हिंसार्थो हन्तिर्गृह्यते' हिंसितमनेनान्धकारमित्यर्थः। एवमुत्तरयोः पदयोरैकपद्यं कृत्वा पश्चात् सप्तमीतत्पुरुषं करोति। सर्वस्मिन् हतान्धकारः सर्वहतान्धकार इति। तथा च सति हतशब्दोऽत्र न पूर्वं निपतति। सप्तमीसमासस्त्विह केन लक्षणेन भवतीति चिन्त्यम्। सप्तमी शौण्डैरिति[4] समासः। हतान्धकारशब्दः शौण्डा-

---

1 B., 3: अथवाविद्यानिशा

2 B., p. 3; T., p. 3: देवदत्त इति

3 Dhā., 2, 2.

4 Pā., II, 1, 40.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दिषु पठ्यते। शौण्डादीनामाकृतीकृतत्वात्तत्रास्यानुप्रवेशोऽवगन्तव्यः। सप्तमीति योगविभागाद्वा। उत्सर्गेण वा समासः। सह सुपेति[1]' सुबिति[2] वर्तमाने सुबन्तं सुबन्तेन सह समस्यते यत्रेष्टमिति अकृतलक्षणो वा तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्य[3] इत्यनेन वा। कथमुपसर्जनीभूतमन्धकारं सर्वस्मिन्नित्यनेनाभिसम्बध्यते' सत्यम्' नान्धकारमनेनाभिसम्बध्यते' अन्धकारघातस्त्वनेनाभिसम्बध्यते' येन ह्यन्धकारघातेन योगाद्भगवान्हतान्धकारः' स तस्यान्धकारघातः सर्वाधारोऽवगन्तव्यः। यथाक्षेषु धूर्त इति' येन धौर्त्यलक्षणेन गुणेन योगादसौ धूर्तः सोऽक्षाधारः' एवमिहाप्यवगन्तव्यम्। अन्यथापि चेह सम्भवन्तं समासं पश्यामः। सर्वस्मिन् हतं सर्वहतम्' सर्वेण प्रकारेण सर्वहतं सर्वथासर्वहतम्' सर्वथासर्वहतमस्यान्धकारम् अनेन वेति **सर्वथासर्वहतान्धकारः**। एवं हतशब्दस्यान्धकारेण सामानाधिकरण्यं न च पूर्वनिपात इति। **सर्वेण प्रकारेणेति** क्लिष्टाक्लिष्टान्धकारविगमतः। **सर्वस्मिन्**[4] ज्ञेये द्वादशायतनलक्षणे। सर्वं सर्वमिति ब्राह्मण यावदेव द्वादशायतनानीति सूत्रे वचनात्। किमत्र शार्वरं तमोऽन्धकारशब्देनोच्यते। नेत्याह। **अज्ञानं हि भूतार्थदर्शनप्रतिबन्धादन्धकारम्** इत्यवगन्तव्यम्। अन्धकारशब्दो हि नैशे तमसि प्रसिद्धः। अन्धमिव जनं करोतीत्यन्धकारम्। सद्भूतघटपटादिरूपदर्शनप्रतिबन्धात्तत्साधर्म्यादज्ञानमप्यन्धकाराख्यां लभते। भूतार्थदुःखादिसत्यदर्शनप्रतिबन्धात्। **तच्च** इति तदज्ञानम्। **प्रतिपक्षलाभेने**त्यार्यमार्गलाभेन। विपक्षः क्लेशः। विपक्षप्रतिघाताय पक्षः प्रतिपक्ष इति कृत्वा। अथवा ज्ञानमनास्रवमज्ञानप्रतिपक्षः' तस्य लाभेन। **अत्यन्तं** सर्वथा। **सर्वत्र ज्ञेये। पुनरनुत्पत्तिधर्म**त्वाद्धतमसमुदाचारप्रहाणीकृतमित्यर्थः। **अतोऽसौ** इति भगवान्। **प्रत्येकबुद्धश्रावका अपि**। अभ्यर्हितत्वात्प्रत्येकबुद्धशब्दपूर्वनिपातः। **कामम्** इत्यनुज्ञायाम्। **न तु सर्वथा** इत्यक्लिष्टसंमोहानत्यन्तविगमात्। ननु च सर्वं सास्रववस्तु श्रावकप्रत्येकबुद्धानामपि बुद्धवत्प्रहीणम्। किमिदमुच्यते। **क्लिष्टसंमोहस्य तेषामत्यन्तविगम** इति। तथा ह्युक्तम्' नाहमेकधर्ममप्यनभिज्ञायापरिज्ञाय दुःखस्यान्तक्रियां वदामीति। तथा नाहमेकधर्ममप्यपरिज्ञायाप्रहाय दुःखस्यान्तक्रियां वदामीति। तस्माच्छ्रावकप्रत्येकबुद्धानामपि तदक्लिष्टमज्ञानं

1 Pā., II, 1,4. 2 B., p. 4 सुप इति

3 See Kāśikāvṛtti on Pā., II, 1, 72.

4 Mss. and B., p,4: सर्वस्मि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्षुरादिवच्छन्दरागप्रहाणात् प्रहीणमेव। अन्यथा हि श्रावकप्रत्येकबुद्धानां दुःखान्तक्रिया न भवेत्। सत्यम्। अस्त्येतदेवम्। प्रहीणमेव तेषां क्लिष्टवदक्लिष्टमप्यज्ञानम्। तत्तु तेषां चक्षुरादिवत्प्रहीणमपि समुदाचरति। बुद्धस्य तु प्रहीणं सन्न समुदाचरति। अत एव च विशेषितम्। पुनरनुत्पत्तिधर्मत्वाद्धतमिति। अन्यथा तत् सर्वथा सर्वत्र ज्ञेये प्रहीणमित्येवावक्ष्यत्। ये तु व्याचक्षते श्रावकप्रत्येकबुद्धानां क्लिष्टसंमोहमात्रविगमात्संक्लेशविनिवृत्तिरिति तदपव्याख्यानमेषां यथोक्तमिति प्रत्याचक्ष्यते।

तथा ह्येषामिति विस्तरः। तथा हीति यस्मादित्यर्थः। अथवा तथेति यथा न सर्वथा तथेति। हिशब्दो हेतौ। एषामिति श्रावकप्रत्येकबुद्धानाम्। **बुद्धधर्मेषु** आवेणिकादिषु। **अतिविप्रकृष्टदेशकालेषु चार्थेषु**। अतिविप्रकृष्टदेशेष्वतिविप्रकृष्टकालेषु च। **अनन्तप्रभेदेषु च** [1] अबुद्धधर्मस्वभावेष्वपि रूपादिष्वर्थेषु। **भवत्येवाक्लिष्टमज्ञानम्**। समुदाचरत्येव तदित्यर्थः। तत्र ये बुद्धधर्मा आवेणिकादयस्तेषु स्वभावपरमसूक्ष्मगम्भीरत्वाद्बुद्धादन्येषामज्ञानम्। यथोक्तम्। जानीषे त्वं शारिपुत्र तथागतस्य शीलस्कन्धं समाधिस्कन्धं प्रज्ञास्कन्धं विमुक्तिज्ञानदर्शनस्कन्धमिति भगवता पृष्टेन स्थविरशारद्वतीपुत्रेणोक्तम्। नो हीदं भगवन्निति। ये त्वन्येऽर्था रूपिणः परमाणुसंचितास्तेऽतिविप्रकृष्टदेशा यदि भवन्ति। येऽप्यविज्ञप्त्यरूपिणस्तेऽपि यद्यतिविप्रकृष्टदेशाधारत्वादतिविप्रकृष्टदेशा भवन्ति। तेष्वपि तेषामज्ञानम्। अनेकलोकधात्वन्तरितदेशत्वात्। श्रूयते हि स्थविरमौद्गल्यायनस्यातिविप्रकृष्टदेशमरीचिलोकधातुजातस्वमातृदेशापरिज्ञानम्। अतिविप्रकृष्टकालेष्वप्यतीतेष्वनागतेषु वा तेष्वर्थेष्वतिबहुकल्पान्तरान्तरितविनाशप्रादुर्भावत्वात्तेषां भवत्येवाज्ञानम्। श्रूयते हि स्थविरशारिपुत्रेण मोक्षभागीयकुशलमूलादर्शनात् [2] प्रव्रज्यापेक्ष्यपुरुषप्रत्याख्यानम्। भगवता तु तस्य मोक्षभागीयं दृष्टमुक्तं च।

मोक्षबीजमहं ह्यस्य सुसूक्ष्ममुपलक्षये।
धातुपाषाणविवरे निलीनमिव काञ्चनम्॥ इति।

स च पुरुषः [3] प्रव्राजित इति। अनन्तप्रभेदेष्विति धातुगतियोन्यु[4]पपत्त्यादिप्रभेदे दुर्बोधिष्वर्थेषु। तेषामज्ञानं भवत्येव। तथा ह्याह।

सर्वाकारं कारणमेकस्य मयूरचन्द्रकस्यापि।
नासर्वज्ञैर्ज्ञेयं सर्वज्ञज्ञानबलं हि तज्ज्ञानम्॥ इति।

---

1 A बुद्धधर्मं०
2 B., p 5 प्रव्रज्यापेचि०
3 B., p. 5 प्रव्रजित
4 B., p. 5 जात्यु

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तान्येतानि चत्वार्यज्ञानकारणानि भवन्ति । तेषां क्वचिदेकं क्वचिद्द्वे क्वचित्त्रीणि क्वचिच्चत्वारीति सम्भवतो योज्यानि ।

इत्यात्महितप्रतिपत्तिसंपद् इति विस्तरः । आत्महिताय प्रतिपत्तिरात्महितप्रतिपत्तिः । आत्महितप्रतिपत्तेः सम्पदात्महितप्रतिपत्तिसम्पत् । फलनिष्पत्तिरित्यर्थः । सा चेयं सम्पद् ज्ञानप्रहाणसम्पत्स्वभावा वेदितव्या । **परहितप्रतिपत्तिसम्पद्** अपि तथैव वचनीया[1] । अपरे व्याचक्षते । आत्महितप्रतिपत्तिरात्महितप्रतिपादनमात्महितोपग्रह इत्यर्थः । तस्याः सम्पदात्महितप्रतिपत्तिसम्पत् । एवं परहितप्रतिपत्तिसम्पदपि व्याख्येया । सा पुनः सर्वदुःखोपशमनिर्वाणपरिप्रापणस्वभावा ।

संसारपङ्काज्जगदुज्जहार

इति वचनात् । संसरणं संसार आजवंजवीभावो जन्ममरणपरम्परेत्यर्थः । अथवा संसरन्त्यस्मिन्सत्त्वा इति संसारस्त्रैधातुकम् । संसारः पङ्क इव संसारपङ्कः पङ्कसाधर्म्यात् । अत आह । **संसारो हि जगदासङ्गस्थानत्वाद्दुरुत्तरत्वाच्च पङ्कभूत** इति । पङ्को हि लोकेऽवसादात्मकत्वादासङ्गस्य स्थानम् । अत एव च दुरुत्तरः । चञ्चलत्वाद्वा पराश्रयोत्तरणीयत्वाद्वा दुरुत्तरः । संसारोऽपि हि तृष्णाभिष्यन्दितत्वादासङ्गस्थानम् । दुरुत्तरश्च[2] दृष्टिविचिकित्साविष्यन्दितेन[3] । बुद्धापाश्रयोत्तरणीयत्वेन वा दुरुत्तरः । **तत्रावमग्नं** तादात्म्यानुप्रवेशतः समुदायावयवरूपतो वा । **जगत्** सत्त्वलोकः । **अत्राणम्** अनाक्रन्दम् । **अनुकम्पमानः** करुणायमानो **भगवान्** । **सद्धर्मदेशनाहस्तप्रदानैः** । सद्धर्मदेशनैव हस्ताः । तेषां प्रदानानि ।[4] उत्तारणीयबहुत्वाद्बहुवचनम् । तैः । **यथाभव्यमभ्युद्धृतवान्** । यथाभव्यमित्यनुच्यमानमपि गम्यते । लोके तथा दृष्टत्वात् । तद्यथा ब्राह्मणानानीय भोजयामासेत्युक्ते ये तत्र भोजयितुं शक्या ग्रामे नगरे वा सन्निहितास्तानेव भोजयामासेति गम्यते । सर्वलोकब्राह्मणानां भोजयितुमशक्यत्वात् । एवमिहापि यो जनो[5] भव्योऽभ्युद्धर्तुं तमेवाभ्युद्धृतवानिति । अतो यथाभव्यमिति व्याचष्टे ।

तस्मै नमस्कृत्य

इति **शिरसा प्रणिपत्य** । क्रियासपदीभूतत्वान्नमःशब्दस्य प्रणिपत्यार्थो नमस्कृत्यशब्दो भवति । प्रणिपातश्च लोके शिरसा प्रतीत इति शिरसेत्याह । वाङ्मनोनमस्कारोऽप्यत्रानुक्तसिद्धो गुणाख्यानपूर्वकत्वान्मनस्कर्मपूर्वकत्वाच्च कायकर्मणः ।

---

1 B., p. 6; T., p. 5 चर्चनीया

2 B. following Tibetan supplies here तस्मादेव.

3 B. adds ना. 4 B. उत्तरणीय० 5 B., p. 6 शक्यो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्मै इति किं लक्षणेयं चतुर्थी । अत्र बहवो व्याख्यानकारा मुह्यन्ति । आचार्यगुणमतिस्तच्छिष्यश्चाचार्यवसुमित्र आहतुः । नमःशब्दयोगे चतुर्थी' नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च[1] इति । तदेतदयुक्तम् । स्वतन्त्रस्य नमःशब्दस्य योगे सा चतुर्थी भवति । अस्वतन्त्रश्चायं नमःशब्दः क्रियास्पदीभूतत्वात् । अत एव चानेनैवाचार्येण व्याख्यायुक्तौ

नमस्कृत्य मुनिं मूर्ध्ना

इति कर्मलक्षणा द्वितीया प्रयुक्ता । तस्मान्न नमःशब्दयोगे चतुर्थीति । द्वितीयायाः स्थाने चतुर्थी प्रयुक्तेत्यपरे । तदिदमेषामिच्छामात्रम् । न हि लक्षणमस्यास्तीति । केन तर्हीयं चतुर्थी । सम्प्रदानलक्षणेयं चतुर्थीति व्याचक्ष्महे । कथं सम्प्रदानसंज्ञा । कर्मणा यमभिप्रैति स सम्प्रदानम्[2] इति । चूर्णिकारेण कर्मशब्द उभयथा वर्ण्यते' पारिभाषिकं कर्म लौकिकं चेति । तत्र यदा कर्तुरीप्सिततमं कर्म[3] इति पारिभाषिकं कर्माश्रीयते तदा कर्तुरीप्सिततमेन यमभिप्रैति स संप्रदानसंज्ञो भवति' ब्राह्मणाय गां प्रयच्छतीत्येतत्सिद्धं भवति । यदा तु कर्म क्रियेति लौकिकं कर्माश्रीयते तदा क्रियया यमभिप्रैति स सम्प्रदानसंज्ञो भवतीति' तदेतत्सिद्धं भवति' युद्धाय संनह्यति' पत्ये शेत इति । संनहनक्रियया युद्धमभिप्रैति कर्ता' शयनक्रियया पतिमिति' युद्धादीनां सम्प्रदानसंज्ञा सिद्धा भवति । तथेहापि नमस्कारक्रियया शास्तारमभिप्रैत्याचार्यः । तस्माच्छास्तरि संप्रदानसंज्ञा' सम्प्रदानसंज्ञायां सत्यां संप्रदाने चतुर्थी[4] इति चतुर्थी भवति । एवं च कृत्वा

पूर्वं प्रणम्य वदतां प्रवराय शास्त्रे ।
प्रमाणभूताय जगद्धितैषिणे
प्रणम्य शास्त्रे सुगताय तायिने ॥

इत्येवमादीनि काव्यशास्त्रान्तरोक्तानि शब्दरूपाणि सुनीतानि भवन्ति । यदि तर्हि सम्प्रदानसंज्ञैवेष्यते'

नमस्कृत्य मुनिं मूर्ध्ना

इत्यत्र द्वितीया न प्राप्नोति । नैष दोषः । विवक्षातः कारकाणि

---

1 Pā., II, 3, 16. 2 Pā., I, 4, 32. 3 Pā., I, 4, 49.
4 Cāndra, II, 17.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भवन्ति। यदा कर्मविवक्षा तदा द्वितीया' यदा संप्रदानविवक्षा तदा चतुर्थीत्युभयमपि सिद्धं भवति।

यथार्थशास्ता

इति शास्त्रित्यौणादिकः शब्दस्तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटाविति[1] तृन्प्रत्ययान्तोऽनिट् शास्तेति भवति। ननु च संज्ञायां शास्तेति भवति' न चेयं संज्ञा। संज्ञैवेयम्। द्विविधा हि संज्ञा' विशेषसंज्ञा सामान्यसंज्ञा च। विशेषसंज्ञा देवदत्तो यज्ञदत्त इति' सामान्यसंज्ञा माता पितेत्येवमादिका। मात्रादयोऽपि हि तत्र संज्ञायामेव निपात्यन्ते। नप्तृनेष्टृत्वष्टृक्षत्तृ[2]होतृपोतृभ्रातृजामातृमातृपितृदुहित्रिति। तेन यथा सर्वासां मातॄणामियं संज्ञा मातेति सर्वेषां च पितॄणां पितेति' एवं सर्वेषां च शास्तॄणामियं संज्ञा शास्तेति। स तु शास्ता द्विविधो भवति' अयथार्थो यथार्थश्च। अयथार्थश्च पूरणादिः' यथार्थश्च तथागत इति। अतो विशिनष्टि' **यथार्थमविपरीतं शास्तीति यथार्थशास्ता**। एतच्च विशेषणं परहितप्रतिपत्त्युपायसूचनार्थम्। अत एवाह' **परहितप्रतिपत्त्युपायमस्याविष्करोति** इत्येवमादि। **न त्वृद्धिवरप्रदानप्रभावेण** इति प्रभावशब्दः प्रत्येकमभिसम्बध्यते' ऋद्धिप्रभावेण वरप्रदानप्रभावेणेति। ऋद्धिप्रभावस्तद्यथा' विष्णोर्विश्वरूपसंदर्शनम्। वरप्रदानप्रभावस्तद्यथा' महेश्वरो वरं प्रयच्छतीति प्रवादः। अथवा त्रिपदो द्वन्द्वः' ऋद्धिश्च वरप्रदानञ्च प्रभावश्चेति। प्रभावः शक्तिविशेषः। ननु च बुद्धा अपि कदाचिदृद्धिप्रातिहार्यं विनेयानामुपदर्शयन्ति। अस्त्येतदेवम्' अपि त्वावर्जनमात्रं तु तेषाम्। अनुशासनीप्रातिहार्येण तु रागादिप्रतिपक्षभावनाक्रमेण संसारोत्तरणं भवति।

किं करिष्यतीति प्रश्नः। नमस्कृत्येति क्त्वाविधिः क्रियान्तरापेक्षत्वात्। समानकर्तृकयोर्हि पूर्वकाले क्त्वाविधिर्भवति।

शास्त्रं प्रवक्ष्यामि

इति। अर्थविशेषाभिद्योतको नामसमूहः शास्त्रम्। क्षणिकत्वात्समूहानुपपत्तिरिति चेत्' न' तद्ग्राहकबुद्धिरूपसमूहकल्पनात्। **शिष्यशासनाच्छास्त्रम्** इति। **किं शास्त्रम्** इति। किं नामधेयमित्यभिप्रायः।

अभिधर्मकोशम्

इत्यस्य निर्वचनं वक्ष्यते। आस्तां तावदेतत् ॥१॥

---

1 Uṇ., 2, 93. 2 B. and T. omit क्षत्तृ.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अवयवार्थाववोधपूर्वकः समुदायार्थाववोध इत्यवयवार्थं तावत् पृच्छति। **कोऽयमभिधर्मो नाम** इति।

[प्रज्ञामला सानुचराभिधर्मस्तत्प्राप्तये यापि च यच्च शास्त्रम्।
तस्यार्थतोऽस्मिन् समनुप्रवेशात् सो वाश्रयोऽस्येत्यभिधर्मकोशः ॥२॥]

प्रज्ञामला सानुचराभिधर्मः

इति। धर्मप्रविचयकाले प्रज्ञा प्रधानमिति मुख्यवृत्त्या प्रज्ञाग्रहणम्। **अमलेत्यनास्रवा**, मलानामास्रवपर्यायत्वात्। **सानुचरेति सपरिवारा**। राज्ञा समं चरन्नपि भृत्यो राजानुचर इत्युच्यते तदनुवृत्तिकारित्वात्, तथेहापि समकालं चरन्तोऽपि तत्सहभुवो धर्मा अनुचरा एवोच्यन्ते। के पुनस्ते, चित्तचैत्ता अनास्रवसंवरा जात्यादयश्च चित्तविप्रयुक्ता इति। ननु च चित्तं चैत्तेभ्यः प्रधानम्। तथा हि, चित्तस्येमे चित्ते वा भवाश्चैत्ता इति। तेन प्रज्ञैव चित्तस्य परिवारोऽर्हति, न तु चित्तं प्रज्ञायाः, चैतसिकत्वात्। अस्त्येतत्, अपि तु धर्मप्रविचयकाले प्रज्ञा चैत्तस्यापि सर्वस्य कलापस्य राजायते। क्वचित्कश्चिद्धर्मः प्राधान्यमास्कन्दति। तद्यथा, अभिसंप्रत्ययकाले श्रद्धेत्येवमादि।

अनास्रवः पञ्चस्कन्धक इति। अनास्रवसंवरस्तस्मिन्कलापे रूपस्कन्धः। या वेदना स वेदनास्कन्धः। या संज्ञा स संज्ञास्कन्धः। चेतनादिजात्यादयः संस्कारस्कन्धः। विज्ञानं चात्र विज्ञानस्कन्धः।

एष तावत् इति, तावच्छब्दः क्रमार्थः। **पारमार्थिक** इति, परमार्थ एव पारमार्थिकः, परमार्थे वा भवः पारमार्थिकः, परमार्थेन वा दीव्यति चरतीति वा पारमार्थिकः। **सांकेतिकस्तु** सांव्यवहारिकः।

तत्प्राप्तये यापि च

इति प्रज्ञा सानुचरा सोऽभिधर्म इति चात्राधिकृतम्। तस्या अनास्रवायाः प्रज्ञायाः प्राप्त्यर्थं साक्षात्पारम्पर्येण वा या **श्रुतमयी चिन्तामयी च भावनामयी च प्रज्ञा सास्रवा या चोपपत्तिप्रतिलम्भिका सानुचरा** सापि सांकेतिकोऽभिधर्मः। तत्र श्रुतप्रयोगजा श्रुतमयी, युक्तिनिध्यानप्रयोगजा चिन्तामयी, भावनाप्रयोगजा भावनामयी, उपपत्तिप्रतिलम्भजोपपत्तिप्रतिलम्भिका, उपपत्तिप्रतिलम्भोऽस्यास्तीति, अत इनिठनाविति[1] ठन्विधानान्न वृद्धिः। श्रुतचिन्तामयी उपपत्तिप्रतिलम्भिका

---

1 Pā, V, 2, 115.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावनामयी चारूप्यावचरी चतुस्कन्धकोऽभिधर्मोऽनुपरिवर्तकरूपाभावात्। रूपावचरी तु ध्यानसंवरसद्भावात् पञ्चस्कन्धकोऽभिधर्मः ।

यच्च शास्त्रम्

इत्यभिधर्मशास्त्रमभिप्रेतम् । तत्तु सानुचरं न सानुचरमिति व्याख्याभेदः । केचित्तावदचित्तचैतसिककलापरूपत्वात् सानुचरमिति नानुवर्तयन्ति । जात्यादिसंभवात् केचिदनुवर्तयन्ति। एकस्कन्धको ह्यसावभिधर्मो द्विस्कन्धको वा। तस्य च जात्यादयः सन्तीति । अन्ये व्याचक्षते। शास्त्रमिति ज्ञानप्रस्थानम्। तस्य शरीरभूतस्य षट् पादाः। प्रकरणपादो विज्ञानकायो धर्मस्कन्धः प्रज्ञप्तिशास्त्रं धातुकायः संगीतिपर्याय इति । अतस्तदपि शास्त्रं सानुचरमेव पारंपर्येण पारमार्थिकाभिधर्मप्राप्तये सांकेतिकोऽभिधर्म इत्युच्यते । उपपत्तिप्रतिलम्भिका हि प्रज्ञा शास्त्रश्रवणात्तदर्थमनुसरति । तस्याः श्रुतमयी श्रुतमय्याश्चिन्तामयी चिन्तामय्याः सास्रवा भावनामयी तस्या अनास्रवा प्रज्ञा जायत इत्यनुक्रमः । **तदयम्** इति । तदिति वाक्योपन्यासः । अयं स्वलक्षणधारणत्वेन निरुक्तः[1] पारमार्थिकसांकेतिकाभिधर्मः । **परमार्थधर्मम्** इति। परमस्य ज्ञानस्यार्थः परमार्थः। परमो वार्थः परमार्थः। सर्वधर्माग्रत्वात् परमार्थः। परमार्थश्चासौ धर्मश्च परमार्थधर्मः । **धर्मलक्षणं वे**ति स्वसामान्यलक्षणं स्वक्खटलक्षणः पृथिवीधातुरनित्यं दुःखमित्येवमादि । **तत्प्रत्यभिमुखः**। प्रतिलम्भाय प्रतिवेधायावबोधाय वा प्रतिबोधाय वाभिमुखो धर्मः **अभिधर्मः**। कुगतिप्रादय[2] इति तत्पुरुषसमासः । ननु च लक्षणेनाभिप्रती आभिमुख्य[3] इत्यव्ययीभावः प्राप्नोति। यदा ह्यभिर्लक्षणेन सह समस्यते तदाव्ययीभावः । तद्यथा। अभ्यग्नि शलभाः पतन्ति। शलभपतनमग्निना लक्ष्यते। सोऽग्निरस्य लक्षणम् । न त्वयं धर्मोऽन्यस्य लक्षणम्। किं तर्हि। लक्ष्यः स्वयमेवाभिमुख्यात् । शास्त्राख्योऽपि सांकेतिकोऽभिधर्मः प्रापणायाभिद्योतनाय वा निर्वाणं धर्मलक्षणं वा प्रत्युपनिषद्भावेनाभिमुखः। किमङ्ग पारमार्थिक इत्यतस्तत्पुरुषसमासेनाभिधर्म इति सिद्धं भवति ।

उक्तो ह्यभिधर्म इति । स्वभावप्रभेदनिर्वचनतोऽवयवार्थोऽवबुद्धः। समुदायार्थस्तु न तावदित्यतः समुदायार्थं पृच्छति। **इदं तु शास्त्रं कथमभिधर्मकोशम्** इति ।

तस्यार्थतोऽस्मिन्

---

1 Mss. निरुक्ति:   2 Pā., II, 2, 18.   3 Pā., II, 1, 14.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति तस्याभिधर्मसंज्ञकस्य शास्त्रस्यानन्तरोक्तत्वाद्ग्रहणम्। **अर्थत** इति न व्यञ्जनत इति। अर्थतोऽयमनुप्रवेशो न :साकल्येन। तस्माद् **यथा-प्रधान**मित्यव्ययीभावः। **अन्तर्भूतः** प्रविष्ट इति। **एतच्छास्त्रं** मदीयं **तस्य अर्थस्य कोशस्थानीयं भवति** कोशसदृशम्। एतस्मिन्नर्थे षष्ठीतत्पुरुषसमासः। अभिधर्मस्य कोशाऽभिधर्मकोश इति। यत्र ह्यसिः प्रविशति स तस्य कोशः। अथवा

सः

अभिधर्मो ज्ञानप्रस्थानादिरेतस्य मदीयस्य शास्त्रस्य **आश्रयभूतः**। ततो ह्यार्षादभिधर्मादेतन्मदीयं शास्त्रं निराकृष्टम्। अर्थत इत्यधिकृतम्। **अतः स एवास्य अभिधर्मः कोश** इत्येतस्मिन्नर्थे बहुव्रीहिसमासः। अभिधर्मः कोशोऽस्येत्यभिधर्मकोशः। यतो ह्यसिर्निराकृष्यते स तस्य कोश इति **एतच्छास्त्रमभिधर्मकोश** इति। समुदायार्थोऽप्यस्यावगमित इति सूचयति॥ २॥

किमर्थं पुनरभिधर्मोपदेशः किं प्रयोजनमित्यर्थः। सप्रयोजनस्य हि शास्त्रस्य प्रत्यासः साधुर्भवति न निष्प्रयोजनस्य। **केन चायं प्रथमत उपदिष्टः**। केन चायमभिधर्म आदितो देशितः। आप्तोपदिष्टस्य हि शास्त्रस्य प्रत्यासोऽर्हरूपः स्यादित्यभिप्रायः। प्रथमत इति विशेषणम्। भदन्तकात्यायनीपुत्रादीनां पिण्डीकरणेन पश्चादुपदेशस्य सिद्धत्वात्। प्रथमत उपदेशे हि विवादः। **यत** इति विस्तरः। यतः कारणात्। **आचार्यः** शास्त्रकारः। **अभिधर्मकोशं** प्रत्यासशास्त्रम्। **वक्तुं** प्रणेतुम् **आद्रियते** आदरं करोतीत्यर्थः। एवं कृते प्रश्नद्वयेऽभिधर्मशास्त्रस्य सप्रयोजनतामाप्तोपदेशतां च प्रदर्शयन्नाह

[धर्माणां प्रविचयमन्तरेण नास्ति क्लेशानां यत उपशान्तयेऽभ्युपायः।
क्लेशैश्च भ्रमति भवार्णवेऽत्र लोकस्तद्धेतोरत उदितः किलैष शास्त्रा॥३॥]

धर्माणां प्रविचयम्[1]

इति विस्तरः। **यतो विना धर्मप्रविचयेन**। रूपं वेदनानित्यं दुःखमित्येवमाकारेण **नास्ति क्लेशोपशमाभ्युपायः**[2] अन्य[3] इति वाक्यशेषः।

---

1 B., T., and Mss. have प्रविचय इति. But the kārikā reads प्रविचयमन्तरेण. In the Tibetan version of the Bhāṣya (p. 7, l. 1) also प्रविचय (*rab tu rnam ḥbyed*) is followed by अन्तरेण (*med par*). The word should therefore be in the accusative.

2 T. has printed the extract as a portion of the kārikā, and pointed out in the foot-note that it differs from the original in reading. But in reality it is Bhāṣya.

3 A and C नान्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स एव तु क्लेशोपशमाभ्युपाय इत्यर्थादापन्नं भवति। तद्यथा 'नाहारेण विना प्राणसंधारणोपाय इत्युक्ते स एवाहारः प्राणसंधारणोपाय इत्यर्थादापन्नं भवति' तद्वदेतत्। यदि क्लेशोपशमो न स्यात्किं स्यादित्यत आह

क्लेशैश्च भ्रमति भवार्णवेऽत्र लोकः

इति। अनेन क्लेशोपशमस्यावश्यकर्तव्यतां दर्शयति। भवः संसार इत्येकोऽर्थः' भव एवार्णवो भवार्णवः' मज्जनस्थानसाधर्म्यात् समुद्रकल्पो भवः' एतस्मिन् भवार्णवे। अत्र 'प्रत्यक्षीकृतपञ्चोपादानस्कन्धलक्षणव्यतिरिक्तभवप्रतिषेधार्थमत्रग्रहणम्। अत्र लोको भ्रमति तादात्म्यावस्थानात्। तादात्म्यावस्थानतोऽपि ह्यधिकरणनिर्देशो दृश्यते। तद्यथा' अन्यपादपानुपयोगेन पलाशेष्वारामः स्थित इति। वृत्तौ तु हेत्वर्थतां तृतीयायाः सूचयता हेतुमरिणाचा हेत्वर्थे[1] उक्तः। क्लेशाश्च लोकं भ्रमयन्तीति। **अत** इत्युद्दिष्टहेतुप्रत्याम्नायः' यत एवमत उद्दिष्टोऽभिधर्म इत्यर्थः। धर्मप्रविचयः क्लेशोपशमोपायो नान्यो[2] धर्म इत्यभिधर्मापदेशकः संबन्ध इति। अत उक्तं

तद्धेतोः

इति। स एव हेतुस्तद्धेतुः' तस्य तस्माद्वा तद्धेतोरिति। तस्य धर्मप्रविचयस्यार्थे हि धर्मोपदेशहेतुको धर्मप्रविचयः। कथं नाम धर्मप्रविचयः स्यादिति **अभिधर्मं उपदिष्टः शास्त्रा बुद्धेनात एव। न हि विनाभिधर्मोपदेशेन शिष्यः शक्तो धर्मान् प्रविचेतुम्**[3] इति।

उदित

इति वदेर्निष्ठायां कृतसम्प्रसारणस्यैतद्रूपम्' न त्विण उत्पूर्वस्य' अर्थायोगात्। उदित इत्युक्त उपदिष्ट इत्येकोऽर्थः।

किल

इति किलशब्दः पराभिप्रायं द्योतयति' आभिधर्मिकाणामेतन्मतम्' न त्वस्माकं सौत्रान्तिकानामिति भावः। श्रूयन्ते ह्यभिधर्मशास्त्राणां कर्तारः। तद्यथा' ज्ञानप्रस्थानस्य आर्यकात्यायनीपुत्रः कर्ता। प्रकरणपादस्य स्थविरवसुमित्रः। विज्ञानकायस्य स्थविरदेवशर्मा। धर्मस्कन्धस्य आर्यशारिपुत्रः। प्रज्ञप्तिशास्त्रस्य आर्यमौद्गल्यायनः। धातुकायस्य पूर्णः। संगीतिपर्यायस्य महाकौष्ठिलः।

---

1 A अस्य; C and V जअस्य 2 A and C नाभि

3 A प्रविचतुं; B. and T. प्रविचयितु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कः सौत्रान्तिकार्थः । ये सूत्रप्रामाणिका न तु शास्त्रप्रामाणिकास्ते सौत्रान्तिकाः । यदि न शास्त्रप्रामाणिकाः कथं तेषां पिटकत्रयव्यवस्था। सूत्रपिटको विनयपिटकोऽभिधर्मपिटक इति । सूत्रेऽपि ह्यभिधर्मपिटकः पठ्यते। त्रैपिटको भिक्षुरिति । नैष दोषः । सूत्रविशेषा एव ह्यर्थविनिश्चयादयोऽभिधर्मसंज्ञा येषु धर्मलक्षणं वर्ण्यते । एतदाशङ्कानिवृत्त्यर्थमाहुः। **स तु प्रकीर्ण उक्तो भगवतेति** विस्तरः । यथा **स्थविरधर्मत्रातेन उदाना**

अनित्या वत संस्काराः

इत्येवमादिका विनेयवशात्तत्र तत्र सूत्र उक्ता **वर्गीकृता** एकस्थीकृताः। एवमभिधर्मोऽपि धर्मलक्षणोपदेशस्वरूपो विनेयवशात्तत्र तत्र भगवतोक्तः । **स्थविरकात्यायनीपुत्रप्रभृतिभिर्ज्ञानप्रस्थानादिषु पिण्डीकृत्य स्थापित** इति। **आहुर्वैभाषिकाः**। विभाषया दीव्यन्ति चरन्ति वा वैभाषिकाः। विभाषां वा विदन्ति वैभाषिकाः। उक्थादिप्रक्षेपाट् ठक्[1] ॥३॥

[सास्रवानास्रवा धर्माः संस्कृता मार्गवर्जिताः ।
सास्रवा आस्रवास्तेषु यस्मात् समनुशेरते ॥४॥]

सास्रवानास्रवा धर्माः

इति । सहास्रवैः सास्रवाः। न सन्त्यास्रवा एष्वित्यनास्रवाः। सास्रवाश्चानास्रवाश्चेति समासः । स्वसामान्यलक्षणधारणाद्धर्माः । **एष[2] सर्वधर्माणां समासनिर्देश** इति । एतावन्तो धर्मा यदुत सास्रवाश्चानास्रवाश्च । नैतद्व्यतिरिक्ता धर्माः सन्ति । तस्मादाह सर्वधर्माणामिति। समासनिर्देश इति संक्षेपनिर्देशः । विस्तरनिर्देशस्तु पश्चादा शास्त्रपरिसमाप्तेर्भविष्यति । अन्येऽपि समासनिर्देशाः सन्ति । संस्कृतासंस्कृता रूप्यरूपिणः सनिदर्शनानिदर्शना इत्येवमादयः । किमर्थमयमेव समासनिर्देश उक्तः । [3]यस्मिन्नुक्ते न पर्यनुयोगः । अथवा सांक्लेशिकव्यावदानिकपक्षप्रदर्शनार्थम्। तदर्थत्वाच्छास्त्रस्य । तत्पक्षद्वयावबोधे[4] हि संक्लेशपक्षमपहाय व्यवदानपक्षासेवनान्निःश्रेयसावाप्तिर्भवेत् ।

संस्कृता मार्गवर्जिताः

सास्रवाः

इति संस्कृता एव। नासंस्कृताः । हेतुप्रत्ययजनिता रूपादयः संस्कृताः । किं सर्वे। नेत्याह। मार्गवर्जिताः । मार्गसत्येन वर्जिताः । मार्गसत्यस्य

---

1 See Pā., IV, 2, 60. 2 B. एवं 3 Mss. कस्मि० 4 Mss. बोधो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संस्कृतत्वात् प्रसङ्ग इत्यत एव विशिनष्टि । एतदुक्तं भवति। मार्गसत्यं वर्जयित्वा सर्वे संस्कृताः सास्रवा इति ।

कथं पुनस्ते सास्रवाः । यद्यास्रवसंप्रयोगात्' क्लिष्टा एव चित्तचैत्ताः सास्रवाः स्युर्नान्ये । अथास्रवसहोत्पादात्' एकस्यां संततौ समुदाचरत्क्लेशस्य सत्त्वस्य यथासम्भवं पञ्चोपादानस्कन्धाः सास्रवाः स्युः'नासमुदाचरत्क्लेशस्य' नापि बाह्या धर्माः । अथास्रवाणां य आश्रयास्ते सास्रवा इति' षडेवायतनान्याध्यात्मिकानि सास्रवाणि स्युः । अथास्रवाणामालम्बनानि सास्रवाणि' निरोधमार्गसत्यमपि सास्रवं प्राप्नोति' [1]ऊर्ध्वा च भूमिरूर्ध्वभूम्यालम्बनैरास्रवैः सास्रवा स्यादिति । अत आह

आस्रवास्तेषु यस्मात्समनुशेरते

इति । तस्मात्सास्रवा इति पूर्वमेवाध्याहार्यस्तस्माच्छब्दः । अनुशेरत इति पुष्टिं लभन्त इत्यर्थः' प्रतिष्ठां लभन्त इत्यर्थो वा । पुष्टिलाभे प्रतिष्ठालाभे वा ते रागादयः संतायन्ते । अपरे व्याचक्षते' यथानुशेते ममायमाहार इति पथ्योऽनुगुणीभवतीत्यर्थः' तथा रागादयोऽपि तेषु धर्मेष्वनुशेरतेऽनुगुणीभवन्तीत्यर्थः । रागाद्यभिष्यन्दितकर्मनिर्वर्तिता हि सास्रवा धर्माः'

कर्मजं लोकवैचित्र्यम्[2]

इति वचनात् । प्रत्ययानुगुण्येनानुशेरते पुष्टिं लभन्त इत्यनुशयाः । अनुशेरतेऽनुगुणा वर्तन्ते प्रत्यया एष्विति वानुशयाः । अनुशयनं चैषामालम्बनतः संप्रयोगतो वा द्रष्टव्यम् । गुणमतिस्त्वाचार्य इह व्याचष्टे । किं कारणं यतसर्वधर्मेष्वास्रवाणामालम्बनीभवत्सु[3] संस्कृता एव मार्गवर्जिताः सास्रवा उच्यन्त इति' सर्वे धर्मा आस्रवाणामालम्बनमित्यनाभिधर्मिकीयमेतत्' आकाशाप्रतिसंख्यानिरोधयोरास्रवानालम्बनत्वात् । षडेव ह्यनुशया अनास्रवालम्बनाः पठ्यन्ते । ते च निरोधमार्गालम्बना एव

मिथ्यादृग्विमती ताभ्यां युक्ताविद्याथ केवला ।
निरोधमार्गदृग्घेयाः षडनास्रवगोचराः ॥[4]

इति वचनात् । तस्मान्न सुलिखितमेतदिति पश्यामः । **काममिति** यद्यपीत्यर्थः । अथवा काममिति निपातोऽभ्युपगमार्थः' अभ्युपगम्यत एव निरोध-

---

1 A सह्रा 2 Kārikā, IV, 1. 3 B. °भवेषु 4 Kārikā, V, 14.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मार्गसत्यालम्बना अपि आस्रवा[1] उपजायन्त इत्यर्थः । तत्र निरोधमार्गसत्ययोः । अनुशयनिर्देश एव ज्ञापयिष्याम इति ।

नानास्रवोर्ध्वविषया अस्वीकाराद्विपक्षतः [2]

इत्यत्र । यद्धि वस्त्वात्मदृष्टितृष्णाभ्यां स्वीकृतं भवति तत्रान्येऽप्यनुशया अनुशयितुमुत्सहन्ते । आर्द्र इव पटे रजांसि संस्थातुम् । नचैवमनास्रवम् । नाप्यूर्ध्वा[3] भूमिः । अतो न तदालम्बनास्तेष्वनुशेरते । विपक्षभूतौ च निर्वाणमार्गौ तदालम्बनानां क्लेशानाम् । ऊर्ध्वा च भूमिरधराणाम् । अतोऽपि न तेषु प्रतिष्ठां लभन्ते । तप्त इवोपले तलानि पादानामिति ॥४॥

[अनास्रवा मार्गसत्यं त्रिविधं चाप्यसंस्कृतम् ।
आकाशं द्वौ निरोधौ च तत्राकाशमनावृतिः ॥५॥]

अनास्रवा मार्गसत्यं त्रिविधं चाप्यसंस्कृतम्

इत्यर्थापत्तिसिद्धत्वान्न सूत्रयितव्यमेतदित्येवं चोद्ये आचार्यगुणमतिस्तावदाह । वक्तव्यमेवेदम् । किं कारणम् । द्विविधो हि मार्गो लौकिको लोकोत्तरश्च । अतो विशेषार्थं पुनरभिधीयते । अत एव चात्र मार्गसत्यग्रहणम् । प्रसिद्धं चार्थापत्त्या गम्यते नाप्रसिद्धम् । अप्रसिद्धं चासंस्कृतमिति । अपरे व्याचक्षते । तृतीयराश्याशङ्कानिवृत्त्यर्थमर्थापत्तिसिद्धमप्येतत् पुनरुच्यते । यथा हि तिस्रो वेदना भवन्ति सुखा दुःखा अदुःखासुखा चेति । एवं धर्मा अपि संभाव्येरन् । सास्रवा अनास्रवाः सास्रवानास्रवाश्चेति । अथवा नैव सास्रवा नानास्रवाश्चेति । तेन येऽर्थापत्त्या निरस्ताः किं तेऽनास्रवा एव । उताहो सास्रवानास्रवा एव । आहोस्विन्नोभयथेति संदिह्येत । अस्ति हि सास्रवानास्रवत्वविकल्पावकाशः । कथमिति । वैभाषिकप्रक्रियया तावत्

द्विधा सानुशयं क्लिष्टमक्लिष्टमनुशायकैः [4]

इति वचनाद्ये चक्षुरादयो बाह्या वा रूपादयोऽक्लिष्टास्तेऽनुशयानैरेवास्रवैः सास्रवाः । नाननुशयानैः । प्रहीणैस्तैरननुशयानैरास्रवैर्न सास्रवाः । अप्रहीणैस्त्वन्ततः परसंतानगतैरपि सास्रवा एवेति । दार्ष्टान्तिकप्रक्रिययापि च ।

---

1 B. सास्रवा

2 Kārikā, V, 18.

3 B. र्ध्वभूमि

4 Kārikā, V, 32.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्षुरादयोऽर्हत्संतानगता बाह्याश्च रूपादयोऽनास्रवाः' आस्रवाणामनाश्रयत्वात्' सास्रवाश्च ते' आस्रवाणामप्रतिपक्षत्वात्'इति पार्यायिकं सास्रवानास्रवत्वं चक्षुरादीनां कल्प्यत इति संदेहः। तत्संदेहविनिवृत्त्यर्थमिदमुच्यते।

अनास्रवा मार्गसत्यं त्रिविधं चाप्यसंस्कृतम्

इति निष्पर्यायमनास्रवा एवामी' न सास्रवा यथोक्तमिति पुनर्वचनम्। ते तर्ह्यर्हच्चक्षुरादयो वैभाषिकैः क्व पक्षे निक्षेप्तव्याः। किं सास्रवपक्षे' अथानास्रवपक्ष इति। सास्रवपक्ष इति त आहुः। कथं प्रहीणैरास्रवैस्ते सास्रवा व्यवस्थाप्यन्ते। येष्वास्रवा अनुशेरतेऽनुशयितवन्तो अनुशयिष्यन्ते वा ते सास्रवाः। त्रैकालिकार्थविवक्षयापि हि लोके वर्तमानकालप्रयोगो दृश्यते। यः प्रजा रक्षति स राजेति'योऽपि रक्षितवान् योऽपि रक्षिष्यति स चापि राजेति गम्यत एवेति' अत एवं व्याख्यायते। अथवा यद्यपि ते प्रहीणैरास्रवैर्न सास्रवा अप्रहीणैस्त्वपरिमितैरास्रवैरन्ततः परसंतानगतैरपि सास्रवा एव भवन्ति। ननु च समासनिर्देशादेव

सास्रवानास्रवा धर्माः[1]

इति तृतीयराश्यप्रसङ्गः' न' तत्रैकशेषनिर्देशसंभवात्। सास्रवाश्चानास्रवाश्च सास्रवानास्रवाश्चेति सास्रवानास्रवा इत्येकशेषः। असरूपाणामप्येकशेष इष्यते' गुणो यङ्लुकोरिति[2] यथा। अपरे पुनराहुः। अर्थापत्त्या सिद्धमेवैतत्' स्पष्टीकरणार्थं तु प्रपञ्च उच्यते। तद्यथा [3]विशेषणं विशेष्येण बहुलमित्यनेनैव सर्वं सिद्धम्' [4]पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेनेत्येवमादिप्रपञ्च उच्यते। तद्वदेतत्।

कतमत्[5] त्रिविधमसंस्कृतम्[6] इत्यप्रतीतत्वात् पृच्छति। त्रिविधग्रहणमियत्तावधारणार्थम्। सन्ति हि केचिदेकमेवासंस्कृतं निर्वाणमित्याहुर्यथा वात्सीपुत्रीयाः। परमाण्वादयो बहवोऽसंस्कृता इति वैशेषिकाः। तन्मतप्रतिषेधार्थमियत्तावधारणम्। कतमौ द्वौ इति प्रतिसंख्याऽप्रतिसंख्यानिरोधावेव पृच्छति' नाकाशम्' आकाशस्य लोके प्रसिद्धत्वात्।

तत्राकाशमनावृतिः

इति। तत्रेति निर्धारणे वाक्योपन्यासे वा। अवकाशं ददा-

1 Kārikā, I, 4.
2 Pā., VII, 4, 82.
3 Pā., II, I,57.
4 Pā., II, 1, 49.
5 T. कतमं
6 Tib. has no corresponding word for असंस्कृतम्.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तीत्याकाशमिति निर्वचनम् । भृशमस्यान्तःकाशन्ते भावा इत्याकाशमित्यपरे । अनावृतिरनावरणम् । कर्तृसाधनं कर्मसाधनं वा । यो धर्मोऽन्यान् धर्मान्नावृणोति । अन्यैर्वा नाव्रियते । तत् **अनावरणस्वभावमाकाशम्** । तदप्रत्यक्षविषयत्वादन्यधर्मानावृत्यानुमीयते । न त्वावरणाभावमात्रम् । अत एव च व्याख्यायते । **यत्र रूपस्य गतिरिति** । यदि यन्नावृणोति नाव्रियते वा तदाकाशम् । अप्रतिघा अपि चिदादयः संस्कारास्तथैवेत्याकाशं प्राप्नुवन्ति । न प्राप्नुवन्ति । परेषामावरणाभावात् । ऋद्धिमन्तो हि चित्तचैत्तबलेन परेषां गतिं चित्तादीन् वा विबध्नन्ति । प्रतिसंख्याऽप्रतिसंख्यानिरोधौ तर्ह्यविबन्धकत्वादाकाशं प्राप्नुतः । न । तयोः संयोगद्रव्यानुत्पत्तिधर्माणां संयोगप्राप्तिनियतरोधभूतत्वेनोत्पत्तिविघ्नरोधभूतत्वेन चावरणभूतत्वात् । अथवा यस्यानावरणमेव[1] लक्षणं नान्यल्लक्षणं तदाकाशम् । तयोश्चान्यलक्षणमस्तीति न तौ निरोधावाकाशं प्राप्नुतः । असर्वगतं तर्ह्याकाशमनित्यं वा प्राप्नोति । आवरणाभावे भावात्तद्भावे चाभावात् । कुड्यादिषु ह्यन्यस्वरूपस्यावरणं भवतीति । अत्राकाशलक्षणाभावप्रसङ्गः । कुड्याद्यपगमे च पुनस्तद्भवतीत्यनित्यं प्राप्नोति । नानित्यं प्राप्नोति । तत्रापि कुड्याद्यवकाशदानादाकाशमस्त्येव । यदि हि तत्राकाशं न स्यात् । तस्यैव कुड्यादेरनवकाशत्वादवस्थानं न स्यात् । यत्तु तत्र रूपान्तरस्यानवस्थानं तत्कुड्याद्यावरणात् । नाकाशाभावात् । उक्तं हि भगवता । पृथवी भो गौतम कुत्र प्रतिष्ठिता । पृथिवी ब्राह्मण अब्मण्डले प्रतिष्ठिता । अब्मण्डलं भो गौतम क्व प्रतिष्ठितम् । वायौ[2] प्रतिष्ठितम् । वायुर्भो गौतम क्व प्रतिष्ठितः । आकाशे प्रतिष्ठितः । आकाशं भो गौतम कुत्र प्रतिष्ठितम् । अतिसरसि महाब्राह्मण अतिसरसि महाब्राह्मण । आकाशं ब्राह्मणाप्रतिष्ठितमनालम्बनमिति विस्तरः । तस्मादस्त्याकाशमिति वैभाषिकाः ॥५॥

[प्रतिसंख्यानिरोधौ यो विसंयोगः पृथक् पृथक् ।
उत्पादात्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसंख्यया ॥६]

यो विसंयोगः

इति विशेषणेनानित्यतानिरोधोऽप्रतिसंख्यानिरोधश्च व्युदस्तौ भवतः । न हि विसंयोगलक्षणौ तौ निरोधौ । विसंयुक्तिर्विसंयोगः क्लेशविसंयुक्तिलक्षणः । संयोगप्राप्तिनियतरोधभूतो वा यो धर्मः **स प्रतिसंख्यानिरोधः** । दुःखा-

---

1 B. ०वरणेन

2 B. वायु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दीनामार्यसत्यानामिति विशेषणपरिग्रहात् **प्रतिसंख्यानम्** अनास्रवैव प्रज्ञा गृह्यते। न हि लौकिकी प्रज्ञा दुःखसत्याद्याकारा। किं तर्हि। उत्तराधरभूमिशान्ताद्युदाराद्याकारा। **प्रज्ञाविशेष** इति विशेषग्रहणं क्लेशप्रहाणानन्तर्यमार्गप्रज्ञाग्रहणार्थम्। **तेन** प्रज्ञाविशेषेण **प्राप्यो निरोध इति प्रतिसंख्यानिरोधः**। मध्यपदलोपं कृत्वा इति शाकपार्थिवादीनामुपसंख्यानम्। शाकप्रियाः पार्थिवाः शाकपार्थिवा इतीष्ट्या[1] मध्यपदलोपः। यदि [2]प्रतिसंख्ययानास्रवैव प्रज्ञा गृह्येत[3] लौकिकमार्गप्राप्यो निरोधो न गृहीत इत्यव्यापि लक्षणं प्राप्नोति। नाव्यापि। सर्वो हि त्रैधातुकसास्रववस्तुनिरोधोऽनास्रवया प्रज्ञया प्राप्यते। न स निरोधोऽस्ति यो लौकिक्यैव प्रज्ञया प्राप्यते नानास्रवयेति किं लौकिक्या प्रज्ञया प्रयोजनम्। यो हि लौकिकेन मार्गेण कश्चिन्निरोधः प्राप्यते स एव पुनर्लोकोत्तरेण प्राप्यत एवेति लोकोत्तरैव प्रज्ञा तत्र न लौकिकी। द्रव्यसन् प्रतिसंख्यानिरोधः। सत्यचतुष्टयनिर्देशनिर्दिष्टत्वात्। मार्गसत्यवदिति वैभाषिकाः।

पृथक्पृथक्

इति नानेत्यर्थः। **यावन्ति हि संयोगद्रव्याणीति**। संयुक्तिः योगः। संयोगाय द्रव्याणि संयोगद्रव्याणि सम्प्रयुज्यते तेष्विति वा संयोगाः। संयोगाश्च ते द्रव्याणि चेति संयोगद्रव्याणि। सास्रवद्रव्याणीति यावदुक्तं भवति। सास्रवं हि द्रव्यं स्तम्भस्थानीयम्। सम्प्रयोजनं रज्जुस्थानीयम्। पुद्गलस्तु बलीवर्दस्थानीय इति भगवतोक्तम्। **अन्यथे**ति यथोक्त इत्यर्थः। **सर्वक्लेशनिरोधसाक्षात्क्रिये**ति समुदयादिदर्शनभावनाहेयक्लेशनिरोधप्राप्तिरित्यर्थः। **शेषप्रतिपक्षभावनावैयर्थ्य**मिति। शेषक्लेशसमुदयादिदर्शनभावनाप्रहातव्यात्मकप्रतिपक्षमार्गोत्पादनं निष्प्रयोजनमित्यर्थः।

यत्तर्ह्युक्तमसभागो निरोध इति। क्वोक्तम्। सूत्रे। पूर्वभर्ता विशाखेन गृहपतिना पृष्टया धर्मदिन्नया भिक्षुण्योक्तम्। किं सभाग आर्ये निरोधः। असभाग आयुष्मन्विशाखेति। अप्रतिसदृशो निरोध इत्यर्थमभिसभीक्ष्य[4] पृच्छति। **अस्य कोऽर्थ** इति। बहुत्वे हि सति प्रतिसदृशोऽन्यतमो भवेदिति परस्याभिप्रायः। **नास्य कश्चित्सभागहेतु**रिति। सभागहेतुः सभाग इत्येकोऽर्थो हेतुशब्दलोपात्। दृश्यन्ते हि पदेषु पदैकदेशान् प्रयुञ्जाना वाक्येषु च वाक्यैकदेशान्। तद्यथा। सत्यभामा भामा। देवदत्तो दत्तः। प्रविश पिण्डीम्।

1 See Vārttika on Pā. II,1,60.

2 Mss. प्रतिसंख्याना॰

3 B. गृह्यते

4 B. र्थः। अभिसमीक्ष्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रविश तर्पणमिति। नित्यः खलु प्रतिसंख्यानिरोधः। तस्य किं सभागहेतुना प्रयोजनमित्यसभागहेतुरसभागः। नास्ति सभागोऽस्येत्यसभागो बहुव्रीहिसमासः। **नासौ कस्यचिदिति**। नासौ प्रतिसंख्यानिरोधः कस्यचिदन्यस्य धर्मस्य सभागहेतुरित्यधिकृतम्। किं कारणम्। संस्कृत एवेति सभागहेतुरिष्यते। तत्र न सभागोऽसभाग इति तत्पुरुषः। **न तु नास्य कश्चित्सभागोस्तीति** न त्वस्य निरोधस्य कश्चिदन्यो निरोधः सदृशो न भवतीत्यर्थः।

उत्पादात्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसंख्यया

अनागतानां धर्माणामुत्पादस्यात्यन्तं विघ्नोऽत्यन्तविघ्नोऽत्यन्तनियतरोधः। **अन्य** इत्यप्रतिसंख्यानिरोधः। स हि प्रतिसंख्यानिरोधादनन्तरोक्तादन्यः। **अप्रतिसंख्ययेति** प्रसज्यप्रतिषेधेऽयमकारः' न प्रतिसंख्यया प्राप्य इत्यर्थः। अथवा पर्युदासे' प्रतिसंख्याया यदन्यत्प्रत्ययवैकल्यं सा प्रतिसंख्या' तया प्राप्यो निरोधोऽप्रतिसंख्यानिरोधः' मध्यपदलोपात्। अयुक्तमेतत्। प्रत्ययवैकल्यं ह्यभावः' कथमभावेन स निरोधः प्राप्यत इति' औपचारिकत्वाददोषः। अथवाप्रतिसंख्यानिरोध इति न प्रतिसंख्यानिरोधोऽप्रतिसंख्यानिरोधः। प्रतिसंख्यानिरोधादन्यत्वमात्रमेवोच्यते' न तु प्रत्ययवैकल्यस्य व्यापार इति। उत्पादग्रहणमनित्यतानिरोधव्युदासार्थम्। अनित्यतानिरोधो हि धर्मस्थितेरत्यन्तविघ्नो न धर्मोत्पादस्य। अत्यन्तग्रहणमसंज्ञिनिरोधसमापत्त्यसंज्ञिकव्युदासार्थम्। तानि ह्यनागतानां चित्तचैत्तानामुत्पादविघ्नो न त्वत्यन्तम्' तावत्कालिकत्वात्तद्विघ्नभावस्य।

यथैकरूपव्यासक्तचक्षुर्मनस इति विस्तरः। यथेत्युदाहरणकथनम्। यथैकस्मिन्नीले रूपे व्यासक्तं चक्षुर्मनश्च यस्य स एकरूपव्यासक्तचक्षुर्मनाः' तस्य यानि **रूपान्तराणि** गृह्यमानान्नीलादन्यानि नीलान्तरपीतलोहितावदातादीनि वर्णरूपाणि संस्थानरूपाणि च **शब्दगन्धरसस्प्रष्टव्यानि** च सर्वाणि' **अत्ययन्ते** प्रत्युत्पन्नमध्वानमतिक्रामन्ति' अतीतमध्वानं प्रतिपद्यन्त इत्यर्थः। **तदालम्बनैरिति** तानि नीलान्तरादीन्यनन्तरोक्तान्यालम्बनान्तराणि येषां[1] ते तदालम्बनाः। के' पञ्च विज्ञानकायाः' **तैः न शक्यमुत्पत्तुमिति** भावसाधनमेतत्। **न हि ते**

1 Mss. वर्ण

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समर्था इति विस्तरः। न हि ते पञ्च विज्ञानकाया **अतीतं विषयं** स्वालम्बनमपि शक्ता ग्रहीतुं वर्तमानालम्बनत्वात्पञ्चानां विज्ञानकायानाम्। अथान्यदिदानीं नीलान्तरादिकं वर्तमानमालम्ब्य कस्मान्नोत्पद्यन्ते। न शक्यमेवं भवितुम्' सर्वधर्माणां चतुष्के नियतत्वात्। हेतौ फल आश्रय आलम्बने चेति। यस्य विज्ञानस्य यदालम्बनं तदेव तस्यालम्बनं भवेत्' भवेन्नान्यदिति। आलम्बनप्रत्ययवैकल्यात्ते पञ्च विज्ञानकाया न पुनरुत्पद्यन्ते। अत आह। **स तेषामप्रतिसंख्यानिरोध** इति विस्तरः। तेषां पञ्चानां विज्ञानकायानां **प्रत्ययवैकल्यात्प्राप्यत** आलम्बनप्रत्ययवैकल्यात्। चतुर्भिरेव हि प्रत्ययैर्हेतुसमनन्तरालम्बनाधिपतिप्रत्ययैश्चित्तचैत्ता उत्पद्यमाना उत्पद्यन्ते। तेषामन्यतरवैकल्येऽप्यनुत्पत्तिः। समनन्तरप्रत्ययवैकल्यादित्यपरे। समनन्तरप्रत्ययो हि तदानीं चित्तचैत्तलक्षण एकस्यैव तस्य नीलविज्ञानस्योत्पत्ताववकाशं ददाति' नेतरेषां नीलान्तरादिविज्ञानानाम्' युगपद्विज्ञानोत्पत्त्यसंभवात्। उदाहरणमात्रं चैतत्। एवं क्षान्तिलाभ्यादीनां पञ्चानामप्यापायिकानामनागतानां स्कन्धानां तदुत्पत्तिविरुद्धप्रत्ययसंमुखीभावेन प्रत्ययवैकल्यादप्रतिसंख्यानिरोधः प्राप्यत इत्युदाहार्यम्। अप्रतिसंख्यानिरोधमेव वाभिसंधाय स्रोतआपन्नं पुद्गलमधिकृत्योक्तं भगवता' निरुद्धा अस्य नरकास्तिर्यञ्चः प्रेता इति। तदेवंजातीयकानामनागतानां धर्माणां प्रत्ययवैकल्यात्प्रतिसंख्यामन्तरेणोत्पादस्य नियतरोधभूतो यो धर्मः सोऽप्रतिसंख्यानिरोध इत्युच्यते। न हि प्रत्ययवैकल्यमात्रादत्यन्तं तदनुत्पत्तिरुपपद्यते' पुनस्तज्जातीयप्रत्ययसांनिध्ये तदुत्पत्तिप्रसङ्गात्' को हि तदा तदुत्पत्तौ विबन्धः स्यादिति वैभाषिकाः।

चतुष्कोटिकं चात्रेति विस्तरः। अत्र प्रतिसंख्याऽप्रतिसंख्यानिरोधलक्षणनिर्देशे चतुष्कोटिकं चतुष्प्रकारं प्रश्नविसर्जनम्। किमर्थम्' व्युत्पादनार्थम्। **तद्यथातीतप्रत्युत्पन्नोत्पत्तिधर्माणां सास्रवाणा**मिति सास्रवत्वात्प्रतिसंख्यानिरोध एव लभ्यते। अतीतप्रत्युत्पन्नानामुत्पादस्य कृतत्वादुत्पत्तिधर्माणां वावश्यंभावान्नाप्रतिसंख्यानिरोधो लभ्यते। उत्पादात्यन्तविघ्नलक्षणो ह्यप्रतिसंख्यानिरोधः। **तद्यथानुत्पत्तिधर्माणामनास्रवसंस्कृताना**मिति। अत्यन्तविघ्नितोत्पादत्वादेषामनुत्पत्तिधर्मत्वम्। अतश्च तेषामप्रतिसंख्यानिरोधो लभ्यते' तद्यथा षड्भूमिकानामनागम्यध्यानान्तरध्यानभूमिकानां श्रद्धानुसारिमार्गाणामेकस्मिन्[1] संमुखीभूते शेषाणां पञ्चानामप्रतिसंख्यानिरोधो लभ्यते' न तु प्रति-

1 B. मार्ग एकस्मिन्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संख्यानिरोधोऽनास्रवत्वात् । न हि निर्दोषं प्रहाणार्हं भवति । अनुत्पत्तिधर्मग्रहणमतीतप्रत्युत्पन्नोत्पत्तिधर्मनिरासार्थम् अनास्रवग्रहणं सास्रवनिरासार्थम् । संस्कृतग्रहणमसंस्कृत[1] निरासार्थम् । असंस्कृतमपि हि स्वभावतोऽनुत्पत्तिधर्मकम् । अतस्तत्प्रसङ्गो मा भूदिति तद्विशेषणम् । केषांचिदेवं पाठः । तद्यथानुत्पत्तिधर्माणामनास्रवाणामिति । तेषां कथमसंस्कृतानां ग्रहणाप्रसङ्गः । न भवति । येषां धर्माणां प्रतिसंख्यानिरोधोऽप्रतिसंख्यानिरोधो वा संभवति तेषामधिकारः । न चासंस्कृतानां तौ निरोधौ संभवतः । उत्पादात्यन्तविघ्नो ह्यप्रतिसंख्यानिरोधः । न चासंस्कृतानामुत्पादोऽस्ति । किं चानुत्पत्तिधर्माणामिति पर्युदासेन नञ्समासः । उत्पत्तिधर्मेभ्यो येऽन्ये तत्सदृशाश्च धर्मास्तेऽनुत्पत्तिधर्माणः । के च तादृशाः । संस्कृता एव नासंस्कृता इत्यप्रसङ्गोऽसंस्कृतानामिति ब्रूवते । **सन्ति येषामुभयमिति** प्रतिसंख्यानिरोधश्चाप्रतिसंख्यानिरोधश्च । **तद्यथा सास्रवाणामिति** विस्तरः । सास्रवत्वात्तेषां प्रतिसंख्यानिरोधः प्राप्यते । अनुत्पत्तिधर्मत्वादप्रतिसंख्यानिरोधोऽपि प्राप्यते । यदा तदानयोः प्राप्तिरभिप्रेयते[2] । नावश्यमनयोर्युगपत्प्राप्तिर्भवति । केषांचिद्धि पूर्वं प्रतिसंख्यानिरोधः प्राप्यते । पश्चादप्रतिसंख्यानिरोधः । तद्यथार्हत एकरूपव्यासक्तचक्षुर्मनसस्तदन्यरूपाद्यालम्बनानां पञ्चानां विज्ञानकायानाम् । केषांचित्पूर्वमप्रतिसंख्यानिरोधः प्राप्यते । पश्चात्प्रतिसंख्यानिरोधः । तद्यथा क्षान्तिलाभिनोऽपायगतीनाम् । केषांचिद्युगपत् । तद्यथा दृष्टिप्राप्तस्याधिमात्राधिमात्रक्लेशप्रतिपक्षोदये तेषामधिमात्राणामनागतानां क्लेशानां प्रतिसंख्यानिरोधश्चाप्रतिसंख्यानिरोधश्च युगपत्प्राप्यते[3] । एवमन्येषामपि संभवतो योज्यम् ।

तद्यथातीतप्रत्युत्पन्नोत्पत्तिधर्माणामनास्रवाणामिति । अतीतादीनामेषामुत्पादस्य विघ्नयितुमशक्यत्वादप्रतिसंख्यानिरोधो न लभ्यते । अनास्रवत्वाच्चैषां प्रतिसंख्यानिरोधोऽपि न लभ्यते । असंस्कृतानां तूत्पादाभावान्नाप्रतिसंख्यानिरोधोऽस्ति । उत्पादात्यन्तविघ्नो ह्यप्रतिसंख्यानिरोध इत्युक्तं प्राक् । अनास्रवत्वाच्च प्रतिसंख्यानिरोधोऽपि नास्ति ॥६॥

[ते पुनः संस्कृता धर्मा रूपादिस्कन्धपञ्चकम् ।
त एवाध्वा कथावस्तु सनिःसारा सवस्तुकाः ॥७॥]

एवमसंस्कृतस्याल्पवक्तव्यत्वात्पुरस्तात्तत्प्रश्नान् परिसमाप्य संस्कृतान्निर्देष्टु-

---

1 B. adds ग्रहण here. 2 Mss. ०प्रीयते 3 B. प्राप्यते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

काम उपोद्घातमुत्थापयति। यदुक्तं 'संस्कृता मार्गवर्जिताः सास्रवा'[1] इति कतमे ते संस्कृता इति।

ते पुनः संस्कृता धर्माः

पुनःशब्दः प्रभेदान्तरप्रदर्शनार्थः। उक्तः पूर्वप्रभेदः

सास्रवानास्रवाः[2]

इति। अयं तु पुनःप्रभेद इति। असंस्कृतनिर्देशेन व्यवहितत्वात्पुनः संस्कृतग्रहणमसंस्कृतनिरासार्थम्। त इति तच्छब्दः पूर्वप्रकृतापेक्षः। के च पूर्वप्रकृताः। अवर्जिताश्च ये सास्रवाः। वर्जिताश्च ये मार्गसत्यस्वभावाः। उभये ह्यपेक्षिताः। कथं गम्यते।

ये सास्रवा उपादानस्कन्धास्ते[3]

इत्यनास्रवेभ्यः सास्रवनिष्कर्षवचनात्। यत्

रूपादिस्कन्धपञ्चकम्

वक्ष्यमाणलक्षणम्। तेऽमी संस्कृता द्रष्टव्याः। अन्योन्यमेषां संग्रहः। रूपादिग्रहणं शीलादिस्कन्धनिरासार्थम्। अन्येऽपि हि पञ्च स्कन्धाः सन्ति। शीलस्कन्धः समाधिस्कन्धः प्रज्ञास्कन्धो विमुक्तिस्कन्धो विमुक्तिज्ञानदर्शनस्कन्धश्चेति। स्कन्धग्रहणं रूपादिविषयनिरासार्थम्। **समेत्य संभूयेति** पर्यायावेतौ। अथवा समेत्य समागम्यान्योन्यमपेक्ष्येत्यर्थः। संभूय संजन्येत्येवं संशब्दस्यार्थं दर्शयति। **न ह्येकप्रत्ययजनित**मिति सर्वाल्पप्रत्ययत्वेऽप्यवश्यं द्वौ प्रत्ययौ स्तः।

चतुर्भिश्चित्तचैत्ता हि समापत्तिद्वयं त्रिभिः।
द्वाभ्यामन्ये तु जायन्ते[4]

इति वचनात्। [5]**दुग्धवदिति** संस्कृतशब्दस्य निष्ठान्तत्वान्निष्ठान्तशब्देनैव दृष्टान्तं दर्शयति। दुग्धवदिति दुग्धं नाम क्षीरम्। यत् स्तनान्निष्कासितं तद्दुग्धमिति न्याय्यम्। यत्तु निष्कासिष्यते यच्च नैव निष्कासिष्यते धेनुस्थमेव वर्तते तद्दुग्धमिति न प्राप्तम्। उच्यते च लोके दुग्धमिति। एवमिहापि ये संस्करिष्यन्त उत्पत्तिधर्माणोऽनागता येऽपि न संस्करिष्यन्तेऽनुत्पत्तिधर्माणस्तेऽपि संस्कृता इत्युच्यन्ते। **तज्जातीयत्वात्** स्वलक्षणसादृश्यात्।

त एवाध्वा

इति विस्तरः। सर्वाभिधर्मः सूत्रार्थः सूत्रनिकषः[6] सूत्रव्याख्यानमिति। सूत्रोक्तानामप्यध्वादीनां स्कन्धपर्यायरूपाणामिह वचनम्।

---

1 Kārikā, I,4. 2 Ibid. 3 Ibid., I,8.
4 Ibid., IV, 65. 5 A and C दुग्धेन्धनवदिति 6 B and V ०निष्कर्षः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गतगच्छद्गमिष्यद्भावादिति[1]। लोके प्रसिद्धमध्वानमपेक्ष्यायमध्वा व्याख्यातः। तथा हि लोके कथ्यते। अयमध्वा ग्रामं गतोऽयमध्वा गच्छत्ययमध्वा गमिष्यतीति। एवमिहापि गतोऽध्वा योऽतीतो गच्छति यो वर्तमानो गमिष्यति योऽनागत इति। **अद्यन्तेऽनित्यतयेति वा**, अध्वान इत्यधिकृतम्। नैरुक्तं विधानमपेक्ष्यायमर्थो दर्शितः। अद्यन्तेऽनित्यतया भक्ष्यन्त इत्यध्वान इति संस्कृता एवाध्वशब्देन भगवता देशिताः।

कथावस्तु-

शब्देनापि त एव संस्कृता भगवता देशिताः। त्रीणीमानि भिक्षवः कथावस्तून्यचतुर्थान्यपञ्चमानि यान्याश्रित्यार्याः कथाः कथयन्तः कथयन्ति। कतमानि त्रीणि, अतीतं कथावस्त्वनागतं कथावस्तु प्रत्युत्पन्नं कथावस्त्विति। **कथा वाक्यमिति** विस्तरः। कथा वाक्यं वर्णात्मकः शब्द इत्यर्थः। तस्या वस्तु नाम विषय इत्यर्थः। नाम्नः[2] पुनरर्थोऽभिधेयः। तथा हि वक्ष्यति वाङ् नाम्नि प्रवर्तते नामार्थं द्योतयतीति। यदि नामैव कथावस्तु, नामैव संस्कारस्कन्धैकदेश एवेति कथं कृत्वा कथावस्तुशब्देन संस्कृता एवोक्ता इत्यत आह। **सार्थकवस्तुग्रहणात्तु संस्कृतं कथावस्तूच्यत इति। अन्यथा हीति** विस्तरः। यदि सार्थकं वस्तु न गृह्येत **प्रकरणग्रन्थो विरुध्येत, कथावस्तून्यष्टादशभिर्धातुभिः संगृहीतानीति।** कया पुनर्युक्त्या सार्थकं वस्तु गृह्यते। द्विविधः कथाया विषयः, साक्षात् पारंपर्येण च। साक्षाद्विषयो नाम, पारंपर्येणार्थः। स हि स्वविषयभूतस्य नाम्नो विषय इति। अतस्तस्यापि विषयो व्यवस्थाप्यते। असंस्कृतं कस्मान्न कथावस्तुत्वेनोक्तम्, अध्वपतितस्य नाम्नोऽनध्वपतितेन सहार्थायोगात्, विषयो हेतुरिति वा, अर्थद्वयवाचकवस्तुशब्दपरिग्रहाद्वा। यदि कथाया विषयो हेतुः प्रत्ययश्च भवति तत्कथावस्तु। असंस्कृतं तु न हेतुप्रत्ययः कथाया इति न कथावस्तु। अथवातीतादीनां संस्कृतानामतिबहुरूपत्वेनाख्यातकरणयोग्यत्वात्। एवं चैवं च दीपंकरस्तथागतोऽभूत्। एवं चैवं च मैत्रेयस्तथागतो भविष्यति। एवं चैवं च राजा कफ्फिणो[3] भवतीति। अतः संस्कृता एव कथावस्तुत्वेनोक्ता नासंस्कृताः।

---

1 B. °षद्दिति

2 Following Tib. *mingis*, B. and T. read नाम्ना which is not supported by Mss.

3 B. कप्फिरणो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वस्य संस्कृतस्य निर्वाणमिति निरुपधिशेषनिर्वाणम्। यद्येवं सास्रवस्य तदस्तीति भवति सास्रवस्य सनिःसारत्वयोगः। मार्गसत्यस्य तु कथम्। कोलोपमं धर्मपर्यायमाजानद्भिर्धर्मा अपि प्रहातव्याः प्रागेवाधर्मा इति मार्गसत्यस्यापि निःसरणं कल्पत एवेति सर्व एव संस्कृता सनिःसारा भवन्ति।

सवस्तुका

इति। वसन्त्यस्मिन्प्राक् कार्याणि पश्चात्तत उत्पत्तिरिति वस्तुहेतुरित्यर्थः। स एषामस्तीति सवस्तुकाः। प्रवचने हि वस्तुशब्दः पञ्चस्वर्थेषु दृश्यते। स्वभाव आलम्बने संयोजनीये हेतौ परिग्रहे च। स्वभावे तावत्। यद्वस्तु प्रतिलब्धं समन्वागतः स तेन वस्तुनेति तेन स्वभावेनेति गम्यते। आलम्बने। ज्ञेया धर्माः। कतमे। आह। सर्वे धर्मा ज्ञानेन ज्ञेया यथावस्तु। यथालम्बनमित्यर्थः। संयोजनीये। यस्मिन्वस्तुन्यनुनयसंयोजनेन संयुक्ताः प्रतिघसंयोजनेनापि तस्मिन्निति। हेतौ। सवस्तुकाँ धर्माः। कतमे। सर्वे संस्कृता धर्मा इति। परिग्रहे। क्षेत्रवस्तु गृहवस्त्वापणवस्तु धनवस्तु। परिग्रहं प्रहाय ततः प्रतिविरतो भवतीति। इह हेतौ वस्तुशब्दो वेदितव्यो हेतुवचनः। किलेति किलशब्दः परमतं दर्शयति। स्वमतं त्वस्य लक्ष्यते। सवस्तुकाः सस्वभावाः संस्कृताः। असंस्कृतास्त्ववस्तुकाः। प्रज्ञप्तिसत्त्वादिति ॥७॥

[ये सास्रवा उपादानस्कन्धास्ते सरणा अपि।
दुःखं समुदयो लोको दृष्टिस्थानं भवश्च ते ॥ ८ ॥]

त एव पुनः संस्कृता इति ये सास्रवाः अनास्रवाः[1] पूर्वमुक्ता इति दर्शयति।

ये सास्रवा उपादानस्कन्धास्ते

इति तेषामित्यत्राहार्यम्। **किं सिद्धमिति।** [2]यदर्थापन्न[2] तद्विचारयति। उपादानस्कन्धादयः सूत्रे प्रूक्ताः। तेनेह ते व्याख्यायन्ते। सर्वोऽभिधर्मः सूत्रार्थ[3] इति विस्तरेणोक्तमेतत्। **तत्संभूतत्वादुपादानस्कन्धा** इति। उपादानसंभूताः स्कन्धा उपादानस्कन्धाः। मध्यपदलोपात्। **यथा** तृणसंभूतोऽग्निस्तृणाग्निः। तुषसंभूतोऽग्निस्तुषाग्निरिति। उपादानानां स्कन्धा उपादानस्कन्धा इति षष्ठीसमासेनैव मध्यपदलोपमकृत्वान्ये साधयन्ति। एवं च निदर्शयन्ति। यथा तृणानामग्निस्तृणाग्निरिति। युक्तम्।

1 B. omits अनास्रवाः

2 2 Mss. तदर्थापत्त्या

3 See p. 22, l. 27.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ये सत्त्वसंख्यातास्त उपादानस्कन्धाः क्लेशाभिष्यन्दितकर्महेतुकत्वात्। बाह्यास्तु भावाः कथमुपादानस्कन्धाः। तेऽप्युपादाननिर्वृत्ताः

कर्मजं लोकवैचित्र्यम्

इति सिद्धान्तात्। **तद्विधेयत्वाद्वा राजपुरुषवदिति।** यथा राज्ञो विधेयः पुरुष एवमुपादानानां विधेयाः स्कन्धाः, तद्वशेनालम्बनगत्यन्तरप्रवृत्तेः। **उपादानानि वा तेभ्यः संभवन्तीत्यर्थकथनमात्रमेतत्।** पदानि त्वेवं वक्तव्यानि। उपादानानां [1]संभवा हेतवो वा स्कन्धा उपादानस्कन्धाः **पुष्पफलवृक्षवत्।** यथा पुष्पाणां फलानां वा सम्भवो हेतुर्वृक्षः पुष्पवृक्षः फलवृक्ष इति वा, तद्वत्। अर्हत्स्कन्धा अपि पारसांतानिकोपादानविधेयाः, विक्रियापादनात्[2]। तेभ्योऽपि पारसांतानिकान्युपादानानि सम्भवन्तीत्यविरुद्धमेषामुपादानस्कन्धत्वम्।

रणा हि क्लेशा आत्मपरव्याबाधनादिति। ये ह्यात्मानं परांश्च व्याबाधन्ते ते रणा युद्धानीत्यर्थः। तथैव च क्लेशा रणा उच्यन्ते। **तदनुशयितत्वादिति।** तैरनुशयिता उपसेविता इत्यर्थः। अथवानुशयिनः कृतास्तैरनुशयिताः, तद्भावस्तदनुशयितत्वम्, तस्मात्। तदनुशयितत्वात्, अथवा तेषामनुशयितत्वम्, तस्मात्।

सरणाः

सास्रववत्। सास्रवत्वे यद्व्याख्यानं तदेवास्य वक्तव्यम्। **आर्याणां प्रतिकूलत्वात्**

दुःखम्

इति संस्कारदुःखतयार्याणां तत्प्रतिकूलम्। **समुदेत्यस्माद्दुःखमिति**

समुदयः

इति। हेतुभूताः स्कन्धाः समुदयः, फलभूता स्कन्धा दुःखमिति वर्णयन्ति। **[3]लुज्यत इति**

लोकः

इति। अस्मिन्नेव [4]रोहिताश्व व्याममात्रे कलेवरे लोकं प्रज्ञपयामि[5] लोकसमुदयं चेति सूत्रम्। लुज्यते प्रलुज्यते[6] तस्माल्लोक इति च भगवतैवोक्तम्। [7]लुज्यते विनश्यतीत्यर्थः। लुजिरिह गृहीतो न

---

1 B. सम्भवद्धेतवो

2 B. and To. ०र्थोत्पादनात्. Tib. gnodpa bskyed paḥi phyr.

3 A & B. लुह्यते

4 B. रोहित व्यायाममात्रे. Cf. Aṅg. N., ii, 50.

5 B. प्रज्ञापयामि

6 A & B. लुह्यते प्रलुह्यते

7 A & B. लुह्यते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लोकिः। नैरुक्तेन तु विधानेन गकारस्य स्थाने ककारः कृतः। तस्माल्लोक इति भवति। दृष्टिरस्मिंस्तिष्ठतीति। ये केचिद्भिक्षव आत्मत आत्मीयतश्च समनुपश्यन्ति त इमानेव पञ्चोपादानस्कन्धानात्मत आत्मीयतश्च समनुपश्यन्तीति वचनादुपादानस्कन्धाः

दृष्टिस्थानम्[1]।

भवतीति

भवः

इति सास्रवा एव धर्मा भवशब्देनोक्ताः। भवः कतमः। पञ्चोपादानस्कन्धा इति वचनात्। एते च दुःखादयः शब्दा मार्गसत्येऽपि प्रसज्यन्ते। मार्गसत्यमपि हि संस्कारदुःखतया दुःखम्। समनन्तरप्रत्ययादिभावेन चास्मात्सास्रवं वस्तु समुदेति। लुज्यते[2] च। दृष्टिश्च तदालम्बते। भवति च तदुत्पद्यत इत्यर्थः। नैष दोषः। रूढिं ह्यपेक्षते शब्दप्रवृत्तिः। ये धर्माः संस्कारदुःखतयार्याणां प्रतिकूला दुःखानिरोधिनः[3] तदुत्पादकाः प्रसिद्धा दृष्टिपुष्टिजनका अनादिमति च संसारे विनश्यन्ति भवन्ति तेष्वेवामी दुःखादय आर्यैः सङ्केतिताः। न मार्गसत्ये। तस्मात्सास्रवा एव धर्मा दुःखशब्दाद्यभिधेया भवन्ति। नानास्रवाः। न हि गच्छतीति गौरित्युक्ते सर्वो गन्ता गौरित्युच्यते। तस्मात्सूक्तम्

दुःखं समुदयः

इत्येवमादि ॥८॥

[रूपं पञ्चेन्द्रियाण्यर्थाः पञ्चाविज्ञप्तिरेव च।
तद्विज्ञानाश्रया रूपप्रसादाश्चक्षुरादयः ॥९॥]

रूपम्

इति रूपस्कन्धः।

पञ्च

इति मनइन्द्रियव्युदासार्थम्।

अर्थाः

विषयाः। अर्यन्ते ज्ञायन्त इत्यर्थः। पुनः

पञ्च

इति ग्रहणं धर्मायतनविषयनिरासार्थम्।

---

1 Mss. दृष्टिदानम् 2 A, B. & V लद्यते 3 B. & To. विरोधिनः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्विज्ञानाश्रयाः

इति । तच्छब्दोऽर्थानपेक्षते । तेष्वर्थेषु तेषां वा विज्ञानानि तद्विज्ञानानि । तेषामाश्रयास्तद्विज्ञानाश्रयाः ।

रूपप्रसादाः

इति । रूपाणि च तानि प्रसादाश्च त इति रूपप्रसादाः । अनेन विशेषणेन मनइन्द्रियं निरस्तं भवति । मनोऽपि हि तद्विज्ञानाश्रयः ।

पञ्चानां सहजाश्च तैः[1]

इति सिद्धान्तात् । अनुशयितास्ते, न तु मनो रूपस्वभावमित्यतो निरस्तम् । रूपग्रहणं त्विह श्रद्धाप्रसादनिरासार्थम् । तद्विज्ञानाश्रया इत्यनेन विशेषणेन[2] च श्रद्धाया अप्रसङ्ग इति चेत्, न, बहुव्रीहिकल्पनायां तत्प्रसङ्गसंभवात् । रूपग्रहणे तु बहुव्रीहिकल्पना निवर्तते । न हि रूपमयोऽस्ति प्रसादो यस्य तद्विज्ञानान्याश्रयत्वेन कल्पेरन् । प्रसादग्रहणं पुनरिन्द्रियग्राह्यवस्तुव्यतिरिक्तरूपप्रसादविशेषज्ञापनार्थम् । वैभाषिका हि ब्रुवते, भूतविकारविशेषा एवेन्द्रियाणीति । प्रवचने तु नैवम् । किं तर्हि । रूपादिविषयव्यतिरिक्तान्यच्छान्यतीन्द्रियाणि स्वविज्ञानानुमेयानीन्द्रियाणि येषां चक्षुरादीन्यधिष्ठानानि दृश्यन्ते ।

तद्विज्ञानाश्रयाः

इति च विशेषणमन्योन्यलक्षणसाङ्कर्यनिवृत्त्यर्थम् । यदि हि रूपप्रसादाश्चक्षुरादय इत्येतावदवक्ष्यच्चक्षुरपि [3]श्रोत्रादि प्रासंक्ष्यत[3] । श्रोत्रादि वा चक्षुः । यतस्त्वेवं विशेष्यते रूपविज्ञानाश्रयो यो रूपप्रसादस्तच्चक्षुरित्यतो लक्षणसाङ्कर्यं न भवति । न हि श्रोत्रमन्यद्वेन्द्रियं रूपविज्ञानस्याश्रयः । एवं यावत् [4]कायविज्ञानाश्रयो यो रूपप्रसादस्तत्कायेन्द्रियमिति वक्तव्यम् । **यथोक्तं भगवतेति** । एतद्व्याख्यानं सूत्रानुगतमित्यभिप्रायः । कथमिति । **आध्यात्मिकमिति** विज्ञानाश्रय इत्यर्थः । आत्मशब्दो हि [5]चित्तमात्मेत्युपचर्यत इति वक्ष्यते । आत्मन्यधि अध्यात्मम्, अध्यात्ममेव आध्यात्मिकम् । आत्मनि चित्तलक्षणे कर्तव्ये हेतुरित्ययमर्थ आध्यात्मिकशब्देनोच्यते । विज्ञानाश्रय इति यावदुक्तं भवति । **अथवा यानीति विस्तरः** । अथवा

तच्-

1 Kārikā, I, 43.

2 A & B. विशेषेण

3 ..3 B. omits. Mss. प्रासंक्षेत्

4 To. following Tib. स्प्रष्ट०

5 B. चित्त आ०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

छन्देनेन्द्रियाण्यभिसम्बध्यन्ते' चक्षुर्विज्ञानं श्रोत्रविज्ञानमित्येवमादि। प्रवचने प्रसिद्धमेतद्' न तु रूपविज्ञानं शब्दविज्ञानमिति। लोके तु कदाचिदेवं भवेत्। तस्मादिदं व्याख्यानान्तरमाश्रीयते। तस्मादाह। **एवं च कृत्वा प्रकरणग्रन्थोऽप्यनुवृत्त** इति विस्तरः। कथमिहासिद्धमसिद्धेन साध्यते। चक्षुरेव ह्यसिद्धम्। तदसिद्धौ चक्षुर्विज्ञानमप्यसिद्धम्। कथं तत्तेन तदाश्रयतया साध्यते। सिद्धा एवं ते[1] पञ्च [2]विशेषाः। परस्परविशेषोपलक्षणार्थं तु वयमेतैश्चक्षुरादिभिस्तान्विशेषयन्तो दर्शयामः। एतदुक्तं भवति' [3]एतस्यान्यस्यैकस्य स्वसंवेद्यस्य विज्ञानविशेषस्य य आश्रयो रूपप्रसादस्तच्चक्षुरिन्द्रियम्। एवं यावदेतस्य[4] पञ्चमस्य स्वसंवेद्यस्य विज्ञानविशेषस्य य आश्रयो रूपप्रसादस्तत्कायेन्द्रियमिति नासिद्धेनासिद्धस्य साधनम् ॥६॥

[रूपं द्विधा विंशतिधा शब्दस्त्वष्टाविधो रसः।
षोढा चतुर्विधो गन्धः स्पृश्यमेकादशात्मिकम् ॥१०॥]

रूपं द्विधा[5]

इति। चक्षुषोऽर्थो वर्णसंस्थानभेदाद् द्विप्रकारः। लोकप्रतीतत्वात्तस्य स्वलक्षणमनुक्त्वा प्रभेद एव कथ्यते' **वर्णश्चतुर्विधो नीलादिरि**ति। नीललोहितपीतावदाता वर्णाः। **तद्भेदा नान्य[6]** इत्यभ्रादयः। अपरे व्याचक्षते' तद्भेदा अन्य इति नीलादिवर्णचतुष्टयसंपर्कविशेषात्काकाण्डवर्णादयोऽपि जायन्ते' न केवलमभ्रादय इति। **संस्थान**माकृतिविशेषः' पुनस्तदेवान्तर्गणिकेन भेदेन भिद्यते

विंशतिधा

इति तद्यथा [7]नीलपीतादि। **संस्थानमष्टविधं दीर्घादिविसातान्तम्[8]।** शेषो द्वादशविधो वर्ण इति विंशतिधा। **नभश्चैकवर्णमि**ति। यद् दूरतो वैदूर्यभित्त्याकारं दृश्यते। **वृत्तं** वर्तुलम्। **परिमण्डलं** चक्रलम्। **उन्नतं** स्थूलादिरूपम्। **अवनतं** निम्नरूपम्। **यत्र रूपाणां दर्शन**मिति वचनं छायान्धकारयोर्नानाकरणप्रदर्शनार्थम्। **न विपश्चितं** न विभक्तमित्यर्थः।

इदमिह विचार्यते[9]। यदि नीलादिवर्णचतुष्टयभेदा एवाभ्रादयो न तद्व्यतिरिक्ता

---

1 To. एवैते
2 B. & To. following Tib. read [विज्ञानविशेषाः.
3 B. & To. following Tib. एतस्य प्रथमस्य॰
4 B. एकस्य
5 To. द्विविधा
6 B. & To. following Tib. अन्य
7 B. omits नीलपीतादि.
8 B. विशाता॰, V विगठसाता॰
9 B. विचार्टस्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवन्ति। यथेह काकाण्डादिवर्णा नोक्तास्तथाभ्रादयोऽपि न वक्तव्या इति। नैतद्व्याख्यानकारैर्विचारितम्। शक्यं त्वेवं भणितुम्। मायारूपसदृशत्वान्नीलादिभेदभूता अपि तेऽभ्रादयः पृथगुक्ताः। तथा हि ते दूरतो भित्तय इव लक्ष्यन्ते। अभ्याशगमने तु न दृश्यन्ते। मा कस्यचिदेवं भूत्। नैतत् किंचिदस्ति। विमतिर्वा। किमस्त्येतत्। उत भ्रान्तिमात्रमिति। तद्विपर्याससंशयनिवृत्त्यर्थमिमेऽभ्रादय उक्ताः। सन्त्येवामी रूपायतनस्वभावा इति। **दीर्घादीनां प्रदेश** इति। दीर्घादिविसातान्तप्रदेश इत्यर्थः। कतरोऽसौ प्रदेश इत्याह। **कायविज्ञप्तिस्वभाव** इति। कायविज्ञप्तिर्हि कदाचिद्दीर्घा कदाचिद्ध्रस्वा कदाचिद्यावद्विसातेति। कीदृशी पुनः सावगन्तव्या। तदालम्बनचित्तसमुत्थापितं यत्कायकर्म। अकायकर्मस्वभावं तु दीर्घादिविसातान्तं निरस्तं बोद्धव्यम्। **अस्त्युभयथा परिशिष्टमिति।** यन्निरस्तं दीर्घादि। अभ्रधूमरजोमहिकाश्च[1]। **दृश्यते हि नीलादीनां दीर्घादिपरिच्छेद** इति। नीलपीतलोहितावदातच्छायान्धकाराणां दीर्घादिसंस्थानग्रहणम्। तस्मादेषामपि तृतीयायां कोट्यामन्तर्भाव इत्यभिप्रायः।

कथं पुनरेकं द्रव्यमुभयथा विद्यत इति। कथमेकं द्रव्यं वर्णसंस्थानात्मकं भवति। वर्णरूपाद्धि संस्थानरूपं द्रव्यान्तरमिति वः सिद्धान्तः। **उभयस्य तत्र प्रज्ञानात्।** वर्णसंस्थानस्य तत्र ग्रहणात्। **ज्ञानार्थो ह्येष विदिर्न सत्तार्थ** इति। [2]विद ज्ञान इत्येतस्य धातोर्लुग्विकरणस्यैतद्रूपं विद्यत इति। न तु [3]विद सत्तायामित्येतस्य धातोः श्यन्विकरणस्यैतद्रूपमित्यर्थः। ज्ञानं तत्रोभयाकारं प्रवर्तते। न तु द्रव्यमेकमुभयलक्षणमिति वैभाषिकपरिहारः। **कायविज्ञप्तावपि तर्हि प्रसङ्ग** इत्याचार्यः। न हि कायविज्ञप्तौ गृह्यमाणायां वर्णग्रहणं न प्रवर्तते। वैभाषिकाणामयमभिप्रायः। नीलादिग्रहणमातपालोकग्रहणं वा संस्थाननिरपेक्षं प्रवर्तते। कायविज्ञप्तिग्रहणं तु वर्णनिरपेक्षम्। परिशिष्टरूपायतनग्रहणं तु वर्णसंस्थानापेक्षं प्रवर्तत इति। सौत्रान्तिकपाक्षिकस्त्वयमाचार्यो नैनमर्थं प्रयच्छतीति। न हि चाक्षुषमेतत्संस्थानग्रहणम्। मानसं त्वेतत्परिकल्पितम्। वर्णसंनिवेशविशेष एव हि संस्थानम्। न संस्थानं नाम द्रव्यं किंचिदस्ति। वर्णग्रहणे संस्थानग्रहणाभावात्। एतच्च कर्मकोशस्थाने[4] परीक्षिष्यते।

सत्त्वासत्त्वाख्यश्चेति वाग्विज्ञप्तिशब्दस्तद्व्यतिरिक्तश्चेत्यर्थः। सत्त्वासत्त्व-

---

1 Mss. ॰मह्नीकाय
2 Dhā., 2, 55.
3 Dhā., 4, 62.
4 Mss. ॰संस्थाने

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संख्यातश्चेति केचित्पठन्ति । अयमेव चेहार्थोऽभिप्रेतः । यदि हि सत्त्वासत्त्वसंतानज इत्ययमर्थोऽभिप्रेतो भवेत्' सत्त्वाख्यो वाग्विज्ञप्तिशब्दोऽसत्त्वाख्योऽन्य इत्येवं वक्ष्यमाणकं[1] विवरणं निःप्रयोजनमेव । तस्मात्सत्त्वासत्त्वख्यश्चेति पाठः स्फुटः पठितव्यः । **उपात्तमहाभूतहेतुक** इति । प्रत्युत्पन्नानीन्द्रियाविनिर्भागानि[2] भूतान्युपात्तानि अन्यान्यनुपात्तानि । उपात्तानि महाभूतानि हेतुरस्येत्युपात्तमहाभूतहेतुकः । **यथा हस्तवाक्छब्द** इति । यदि सत्त्वसंतानज इत्यभिप्रेतो बाह्योऽपि हि निर्मितो मानुषाकारो हस्तवाक्छब्दं कुर्यात्' स चानुपात्तमहाभूतहेतुकस्वभावोऽवगन्तव्य इन्द्रियविनिर्भागवर्तित्वात् । स च मानुषीमपि वाचं निर्मातृवशाद्भाषेत् । वक्ष्यति हि'

एकस्य भाषमाणस्य भाषन्ते सर्वनिर्मिताः ।
एकस्य तूष्णींभूतस्य सर्वे तूष्णींभवन्ति ते ॥

तस्य च बाह्यनिर्मितशब्दस्यानुपात्तमहाभूतहेतुक इत्यत्र ग्रहणम्' **यथा वायुवनस्पतिनदीशब्द** इति यथाशब्दस्योदाहरणार्थत्वात् । **सत्त्वाख्यो वाग्विज्ञप्तिशब्दोऽसत्त्वाख्योऽन्य** इति । सत्त्वमाचष्टे सत्त्वाख्यः । वाग्विज्ञप्तिशब्देन हि सत्त्वोऽयमिति विज्ञायते' तं वाग्विज्ञप्तिशब्दं वर्जयित्वान्यः शब्दो हस्तशब्दोऽपि यावदसत्त्वाख्य एव' किमङ्ग असत्त्वसंतानज इति व्याख्यातं भवति । तदेवमुपात्तमहाभूतेहेतुकः सत्त्वाख्यश्चासत्त्वाख्यश्च भवति । अनुपात्तमहाभूतहेतुकोऽपि निर्मितशब्दो वाग्विप्तिस्वभावः सत्त्वाख्यः । तस्यैव हस्तशब्दो वायुवनस्पत्यादिशब्दश्चासत्त्वाख्य इति चतुर्विधः शब्दो **मनोज्ञामनोज्ञभेदात्पुनरष्टविधो भवति । यथैको वर्णपरमाणुरिति न भूतचतुष्कद्वयमुपादाय वर्तते शब्दः'** उपादायरूपत्वाद्वर्णपरमाणुवदितिभावः ।

रसः षोढा

इति षण्मूलजातिमधिकृत्यैवमुक्तम् । रसषट्कस्यान्योन्यसंपर्कविशेषात्त्वतिबहुप्रकारा रसाः संभवन्ति । एककद्विकत्रिकचतुष्कपञ्चकषट्कसंपर्कयोगाद्धि चरके त्रिषष्टी रसा उपदिष्टाः ।

सुगन्धदुर्गन्धयोः समविषमगन्धत्वादिति । अनुत्कटोत्कटगन्धत्वादित्यर्थः । अस्मिन्पक्षे द्विविधो गन्ध इष्टः । **त्रिविधस्तु शास्त्र** इति ' समगन्धो

1 See below.

2 Mss. ०न्द्रियविनिर्भागानि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽन्यस्तृतीय इत्यर्थः। अपरे पुनर्व्याचक्षते। समगन्ध इति तयोरेवैकदेश इति। स एवार्थो भवति। शब्दमात्रं तु भिद्यते।

शीतमुष्णाभिलाषकृदिति संभवं प्रत्येवमुच्यते। यो धर्म उष्णाभिलाषं कुर्यात्तच्छीतं नामोपादायरूपम्। ग्रीष्मे यद्यपि तन्न कुर्यात्तज्जातीयत्वात्तु शीतमेव तदवगन्तव्यम्। **कारणे कार्योपचारादिति** अत्तुमिच्छा **जिघत्सा** चैतसिको धर्मः। तस्य कारणम्। अन्तरुदरे कायेन्द्रियेण यः स्पृश्यते सा जिघत्सा नामोपादायरूपम्। **यथा**

बुद्धानां सुखमुत्पादः

इत्यादि। अभ्युदयनिःश्रेयससुखकारणात्वाद्बुद्धोत्पादस्य स सुखमित्युच्यते तद्वत्। एवं पिपासापि वक्तव्या। **संचितानि पुनस्तुल्यन्त** इति सूक्ष्मगुरुत्वसद्भावादित्यभिप्रायः। अत्रानुमानम्[1] सगुरुत्वं रूपावचरं वस्त्रादि आधाराधेयभावात् कुण्डबदरवदिति। **अनुग्राहकं किलास्तीति** किलशब्दो वैभाषिकमतद्योतनार्थम्। स्वमतं तु समाधिरेवात्रानुग्राहकः किमत्र शीतेन परिकल्पितेनेति। **यदा तत्प्रकारव्यवच्छेद** इति यदा नीलादिप्रकारनिमित्ताभोगः। **एवं श्रोत्रादिविज्ञानमिति**। य एष बहुविधः शब्द उक्तः तत्र[2] कदाचिदेकेन द्रव्येण [3]श्रोत्रविज्ञानमुत्पद्यते यदा तत्प्रकारव्यवच्छेदो भवति कदाचिद्बहुभिर्यदा न व्यवच्छेदः। तद्यथा तूर्यशब्दसमूहमनेकाकारतारमन्द्रतादिशब्दरूपं शृण्वतः। एवं घ्राणजिह्वाविज्ञाने अपि स्वविषये योज्ये। **कायविज्ञानं तु परं पञ्चभिरिति**। कथम्। कदाचिदेकेन द्रव्येणोत्पद्यते यदा तत्प्रकारव्यवच्छेदो भवति। कदाचिद्द्वाभ्यां यावत्पञ्चभिर्यदा न व्यवच्छेदः। **एकेन च श्लक्ष्णत्वादिनेति**। किमत्र कारणम्। कर्कशत्वादीनामन्यभूतचतुष्काश्रितत्वात्।

ननु चैवम् इति विस्तरः। यथा चक्षुःश्रोत्रघ्राणजिह्वाकायविज्ञानालम्बनान्यभिसमस्य मनोविज्ञानं गृह्णातीति कृत्वा सामान्यलक्षणविषयं तद्व्यवस्थाप्यते तथा नीलपीतलोहितावदातालम्बनानां चतुर्णां चक्षुर्विज्ञानानां तानि चत्वारि बहुतराणि चालम्बनान्यभिसमस्य चक्षुर्विज्ञानमेकं गृह्णातीति सामान्यलक्षणविषयं तत्प्राप्नोति रूपायतनसामान्यलक्षणमस्यालम्बनमिति कृत्वा। तथा श्रोत्रघ्राणजिह्वाकायविज्ञानान्यपि स्वविषयेषु योज्यानि। **आयतनस्वलक्षणं प्रतीति**। स्वं

1 B. सद्गुरुत्वं 2 B. अत्र 3 B. & C श्रोत्रादिवि०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लक्षणं स्वलक्षणम्' आयतनानां स्वलक्षणमायतनस्वलक्षणम्' चक्षुर्विज्ञानविज्ञेयत्वादि रूपायतनत्वादि वा । तत्प्रत्येते पञ्च विज्ञानकायाः **स्वलक्षणविषया इष्यन्ते** प्रवचने । **न द्रव्यस्वलक्षणं प्रति**' स्वलक्षणविषया इष्यन्त इति प्रकृतम् । द्रव्याणां नीलादिकानां स्वलक्षणं नीलाद्याकारचक्षुर्विज्ञानादिविज्ञेयत्वं नीलाकारादि वा । न तत्प्रत्येते पञ्च विज्ञानकायाः स्वलक्षणविषया इष्यन्त **इत्यदोषः** । **युगपद्विषयसंप्राप्ताविति** । कायजिह्वेन्द्रिययोर्युगपद्विषयसंप्राप्तिः संभवति । द्वयोश्च विज्ञानयोर्युगपत्प्रवृत्तिर्न संभवति । अतः पृच्छति' **कतरद्विज्ञानं पूर्वमुत्पद्यत** इति । **यस्य विषयः पटीयान्** । यदि कायेन्द्रियस्य विषयः पटुतरः कायविज्ञानं पूर्वमुत्पद्यते । अथ जिह्वेन्द्रियस्य विषयः पटीयाञ्जिह्वाविज्ञानं पूर्वमुत्पद्यते । **समे[1] प्राप्ते तु** विषये तुल्य इत्यर्थः । **जिह्वाविज्ञानं पूर्वमुत्पद्यते** कस्मात् । **भोक्तुकामतावर्जितत्वात्**संततेर्भोजनेच्छाप्रवणत्वादात्मभावस्येत्यर्थः । पूर्वं जिह्वाविज्ञानमुत्पद्यत इति वचनात् । पश्चात्कायविज्ञानमुत्पत्स्यत इत्यर्थादुक्तं भवति तेनात्र विचार्यते । किं यो ऽसौ जिह्वाविषयक्षणेन सह प्राप्तः कायविषयक्षण आसीत्तत्र तत्कायविज्ञानमुत्पद्यते' [2]आहोस्विदन्यस्मिन्कायविज्ञानविषयक्षण इति । अन्यस्मिन्नित्याह । कथमालम्बननियमो न भिद्यते । नैष दोषः । यत्तद्विषयालम्बनं विज्ञानं तदप्रतिसंख्यानिरोधनिरुद्धम् । अन्यत्तु तत्सदृशं कायविज्ञानमुत्पद्यत इति । अतः पश्चात्तदुत्पद्यत इत्युच्यते' जातिसामान्येनैकत्वोपचारात् ॥१०॥

[विक्षिप्ताचित्तकस्यापि यो ऽनुबन्धः शुभाशुभः।
महाभूतान्युपादाय सा ह्यविज्ञप्तिरुच्यते ॥११॥]

अनेककथाप्रपञ्चव्यवहितत्वान्नष्ट इवाविज्ञप्तेरुद्देशाधिकार इत्यत इदमुपन्यस्यति' **उक्ताः पञ्चेन्द्रियार्था यथा च तेषां ग्रहणमिति** । कदाचिदेकेन द्रव्येण चक्षुर्विज्ञानमुत्पद्यत इत्येवमादिना । तेषां तु ग्रहणमिति कर्मणि षष्ठी । **अविज्ञप्तिरिदानीं वक्तव्येति** ।

रूपं पञ्चेन्द्रियाण्यर्थाः पञ्चाविज्ञप्तिरेव च[3]

इत्यविज्ञप्तिरेवावशिष्यते । तस्या लक्षणनिर्देशावसर इति वक्तव्या ।

विक्षिप्ताचित्तकस्य

इति केचिदेवं वृत्तिं पठन्ति । अस्मिन्पाठ एवं सूत्रविग्रहः । विक्षिप्तं नास्ति वा चित्तमस्येति विक्षिप्ताचित्तकः । अथवा विक्षिप्तं चित्तं नास्ति वा चित्त-

1 A. B & To. सम 2 Mss. & B. अहो० 3 Kārikā, I, 9.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मस्येति विक्षिप्ताचित्तकः। एकस्य चित्तशब्दस्य लोपः। केचिदेवं पठन्ति' विक्षिप्तस्येति। अस्मिन्पाठ उत्तरपदद्वयस्य बहुव्रीहिं कृत्वा पश्चादेवं विग्रहः' विक्षिप्तश्चाचित्तकश्च विक्षिप्ताचित्तकः[1]। विक्षिप्तः पुद्गलो विक्षिप्तचित्त इत्यर्थः। **विक्षिप्तचित्तस्येति तदन्यचित्तस्यापीति**। [2]अविक्षिप्तचित्तादन्यचित्तस्येत्यर्थः। तद्यथा कुशलाया अविज्ञप्तेः समुत्थापकं चित्तं कुशलम्' तदन्यचित्तोऽकुशलाव्याकृतचित्तः। स इह विक्षिप्तचित्तोऽभिप्रेतः। अकुशलायास्त्वविज्ञप्तेरकुशलं चित्तं समुत्थापकम्' तदन्यचित्तः कुशलाव्याकृतचित्तः। स चापि विक्षिप्तचित्तो वेदितव्यः' तस्य' तदन्यचित्तस्यापि। **अचित्तकस्यापीत्यसंज्ञिनिरोधसमापत्तिसमापन्नस्यापि। अपिशब्देनाविक्षिप्तसचित्तकस्यापीति विज्ञायत इति**। एतत्पुद्गलद्वयव्यतिरिक्ततृतीयस्याप्यर्थः। **योऽनुबन्ध इति प्रवाह इति**। यो धर्मो नित्यप्रवाहयुक्त इत्यर्थः। प्रवाहेण प्रवाही निर्दिश्यते प्रवाहोपलक्ष्यत्वात्। अथवानुबध्नातीत्यनुबन्धः। प्रवाह इति च व्याख्यापदं कृतबहुव्रीहिकम्। प्रवृत्तः प्रकृष्टो वा वाहोऽस्येति प्रवाहो धर्मः' स एव निर्दिश्यते' न तत्स्रोतः। [3]**कुशलाकुशल इति** कुशलाकुशल एवेत्यवधारणम्। अव्याकृतो नास्तीत्यर्थः। एतेन चक्षुरादयो व्युदस्ता वेदितव्याः[3]। **प्राप्तिप्रवाहोऽप्यस्तीदृश इति**। तत्प्राप्तिरपि विक्षिप्ताविक्षिप्ताचित्तस्यापि प्रवाहिणी कुशलाकुशलैव चेति **तद्विशेषणार्थमुच्यते**' **महाभूतान्युपादायेति**' महाभूतहेतुक इत्यर्थः' यथेन्धनमुपादायाग्निर्भवतीत्युक्ते इन्धनहेतुकोऽग्निरिति गम्यते। **जननादिहेतुभावादिति**।

जननान्निश्रयात्स्थानादुपस्तम्भोपबृंहणात्।

जननहेतुस्तेभ्य उत्पत्तेः। निश्रयहेतुर्जातस्य भूतानुविधायित्वादाचार्यादिनिश्रयवत्। प्रतिष्ठाहेतुराधारभावाच्चित्रकुड्यवत्। उपस्तम्भहेतुरनुच्छेदहेतुत्वात्। उपबृंहणहेतुर्वृद्धिहेतुत्वात्। कतमानि महाभूतान्युपादाय' किमाश्रयमहाभूतान्युताहो [4]नाश्रयमहाभूतानि। आश्रयमहाभूतानीत्याहुः। **तन्नामकरणज्ञापनार्थ इति। यस्माद्रूपक्रियास्वभावापि सती विज्ञप्तिवत् परं न विज्ञापयति**

2 Mss. चित्तकं

2 B. अविज्ञप्ति०

3 ...3 B. reads the portion marked 3...3 after तृतीयस्याप्यर्थः। and before योऽनुबन्ध etc. above.

4 Mss. नैश्रय०; To. निश्रय०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्माद्विज्ञप्तिरित्यर्थः । रूपक्रियास्वभावापीत्युभयविशेषणं किमर्थम् । यद्धि वस्तु रूपस्वभावमेव न क्रियास्वभावं तन्न परं गमयति' तद्यथा चक्षुरादयः । यदपि क्रियास्वभावमेव न रूपस्वभावं तदपि परं न गमयति' तद्यथा चेतना । यत्तूभयस्वभावं तत् परं गमयति' तद्यथा विज्ञप्तिः । विज्ञप्तिर्हि स्वसमुत्थापकं चित्तं कुशलाकुशलाव्याकृतं सौम्यं क्रूरमनुभयमिति वा परं विज्ञापयति । तेन विज्ञप्तिवदिति विपरीतदृष्टान्तप्रयोगः । **समासतस्त्विति** विस्तरः । शिष्यसुखावबोधार्थं संक्षेपतो वाक्येन तदविज्ञप्तिरूपं दर्शयत्याचार्यः । **विज्ञप्तिसमाधिसंभूतं कुशलाकुशलं रूपमविज्ञप्तिरिति ।** यथासंभवमेतद्योज्यम्' कायवाग्विज्ञप्तिसंभूतं कुशलं प्रातिमोक्षसंवरसंगृहीतं नैवसंवरनासंवरसंगृहीतं च । अकुशलं पुनरसंवरसंगृहीतं नैवसंवरनासंवरसंगृहीतं च । समाधिसंभूतं तु कुशलमेव । तद् द्विविधं सास्रवसमाधिसंभूतं ध्यानसंवरस्वभावम्' अनास्रवसमाधिसंभूतमनास्रवसंवर[1]स्वभावम्' उपादायरूपस्वभावं च न [2]चित्तचैतसिकादिस्वभावमित्यवगन्तव्यम् । ननु चैवं विज्ञप्तिरप्यविज्ञप्तिः प्राप्नोति । साप्युत्तरा सभागहेतुभूतपूर्वविज्ञप्तिसंभूता । कुशलाकुशलमेवेत्यवधारणाद्विज्ञप्तावप्रसङ्गः । विज्ञप्तिर्ह्यव्याकृतापि संभवति । अत एव दिव्यं चक्षुः श्रोत्रं च समाधिसंभूतमपि सद् विज्ञप्तिविपाकजं च[3] रूपं नाविज्ञप्तिः प्रसजति[4] इति ।

अत्राचार्यः संघभद्र इदमविज्ञप्तिलक्षणं सूत्रं दूषयति ।

न्यूनं शास्त्रापेतं हानिरतस्याः प्रसज्यते तत्त्वम् ।
अपिशब्दाधिकवचनं विशेष्यमविशेषितं चात्र ॥

अनुबन्धो हि प्रवाहस्तेनैव व्याख्यातः । न चाद्यः क्षणः प्रवाहः । मा भूदतिप्रसङ्गः । तस्मात्तस्यात्र लक्षणे नास्त्यवरोध इति न्यूनम् । प्रवाहस्य चाद्रव्यत्वादद्रव्यमविज्ञप्तिरिति शास्त्रापेतम् । समाहितायाश्च नास्ति विक्षिप्तचित्ताचित्तकस्यानुबन्ध इति सा चाविज्ञप्तिर्न प्रसज्यत इति हानिः । अविक्षिप्तचित्तकस्य तदनुबन्धान्नैष दोष इति चेत् । शुभाशुभाया विज्ञप्तेरविज्ञप्तिलक्षणप्रसङ्ग इत्यतस्याः प्रसज्यते तत्त्वम् । अचित्तकस्यापीति चापि[5]

---

1 B. omits संवर. 2 Mss. चित्तचैतसिका०

3 To. following Tib. puts विपाक after च with the reading विज्ञप्तिजं च विपाक-

4 B. प्रसज्यते 5 B. ०स्यापीत्यपि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दवैयर्थ्यम्' पूर्वेणैव कृतत्वात् । विक्षिप्तचित्तकस्यापीत्यनेन हि सर्वसचित्तकावस्थाग्रहणम् । का पुनरन्यावस्था ' या द्वितीयेनापिशब्देन संगृह्येतेत्यपिशब्दाधिकवचनम् । अचित्तकं चाधिकृत्य शुभोऽविज्ञप्त्यनुबन्धो विशेषणीयः' न च व्याख्यानेऽपि विशेषित इति विशेष्यमविशेषितम् । इदं चापरं विशेष्यमविशेषितम्' [1]अप्रतिघं रूपमिति एवमनेकदोषदुष्टत्वान्न संबद्धमेतल्लक्षणमिति । अत्र ब्रूमः । यत्तावदु 'न्यूनम्' प्रवाहस्याविज्ञप्त्युपदेशादाद्यः क्षणो नाविज्ञप्तिः स्यादिति' इदं तावदसौ प्रष्टव्यः' कोऽयं प्रवाहो नाम । बहुषु क्षणेषु प्रवाह इत्याख्या । यद्येवमाद्योऽपि क्षणः प्रवाहः सिध्यति । प्रथमक्षणप्रभृति बहुषु क्षणेषु प्रवाह इति कृत्वा । तथा ह्युत्सात्तडागाद्वा निर्गच्छतामुदकानामाद्योदकावयवप्रभृतिषु प्रवाहसंज्ञेति नास्त्यव्यापिता लक्षणस्य । यदा चानुबध्नातीत्यनुबन्ध इत्यच्प्रत्ययान्तेन पदेन द्रव्यमेव निर्दिश्यते तदा न्यूनताशङ्कापि नास्ति । अत एव शास्त्रापेततादोषोऽपि परिहृतो भवति । अथाप्यनुबन्धनमनुबन्ध इति स्रोतोऽभिधीयते' तथाप्यदोषो रूपाधिकारात् । प्रवाहवर्तित्वात्तु प्रवाहशब्देन प्रदर्श्यते । समाहिताया अप्यविज्ञप्तेरग्रहणं न भवति । सापि हि यद्यपि विक्षिप्तचित्ताचित्तकसंतानं नानुबध्नातीति । [2]अविक्षिप्तचित्तकसचित्तकसंतानं त्वनुबध्नात्येव । अविज्ञप्तिजातिसामान्येन तु विक्षिप्ताचित्तकस्यापि योऽनुबन्धः साविज्ञप्तिरित्युच्यते । यत्पुनरेतदुक्तम्' अविक्षिप्तचित्तकस्य तदनुबन्धान्नैष दोष इति चेदिति' यद्यविक्षिप्तचित्तकस्य केवलस्य योऽनुबन्धः साप्यविज्ञप्तिरिति समाहिताया अविज्ञप्तेस्त्यागो न भवतीति ब्रवीषि' विज्ञप्तिरपि कुशलाकुशला तथैव भवतीत्यविज्ञप्तिस्ते प्राप्नोतीति । स चाप्यदोषः ' शुभाशुभ एवेत्यवधारणात् । विज्ञप्तिर्ह्यव्याकृतापि संभवतीति न विज्ञप्तिरविज्ञप्तिः प्रसज्यते । अथवा प्रकर्षगतेरेष प्रसङ्गो न भविष्यति । प्रकर्षेण हि योऽनुबन्धः सैवाविज्ञप्तिः । न च विज्ञप्तिरविज्ञप्तिवत् प्रकर्षेणानुबध्नातीति' अविज्ञप्त्यनिरोधेऽपि तन्निरोधदर्शनात् । यदप्युक्तम्' अपिशब्दाधिकवचनमिति' तदप्ययुक्तमुक्तम् । तथा ह्येक एवेह सूत्रे पठितोऽपिशब्दः । वृत्तौ तु तेन पुद्गलद्वयेन तदर्थः संबध्यत इति द्विः पुनः पठितः । तेनैकेन सूत्रपठितेनापिशब्देन विक्षिप्तविपरीतमविक्षिप्तमचित्तकविपरीतं च तमेव सचित्तकं

---

1 Mss. अप्रतिमं

2 Mss. अविक्षिप्तकसचित्तक०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीयं पुद्गलमविज्ञप्त्याश्रयं ब्रुवन्नाचार्यः स्वमतञ्च[1] विक्षिप्ताचित्तकपुद्गलद्वयं जातिसामान्येनाविज्ञप्त्याश्रयं प्रदर्शयन् [2]विज्ञप्तिचित्तचैत्तेभ्योऽर्थान्तरभूतामविज्ञप्तिमाचष्टे। त्रय एव हि पुद्गला भवन्ति। विज्ञप्तिचित्तविसभागचित्तो विज्ञप्तिचित्तसभागचित्तोऽचित्तकश्च। तत्र विज्ञप्तिचित्तविसभागचित्तो विक्षिप्तचित्त इहाभिप्रेतः। तस्य सा वाक्कायविज्ञप्तिर्निरुद्धा भवति। अचित्तकस्य तु चित्तचैत्ता अपि निरुद्धा इति। तत्र विज्ञप्तेश्चित्तचैतसिककलापाच्चार्थान्तरभूतेयमविज्ञप्तिः। यत एभ्योऽनुबन्धिनीत्वेन विशिष्यते। तमेवार्थं दर्शयन्नाह।

विक्षिप्ताचित्तकस्यापि

इति। अविक्षिप्तचित्तकस्याविज्ञप्तिर्वर्तत इति नातिशयः। विज्ञप्तिरपि हि तस्य वर्तते। विक्षिप्तचित्तस्यापि[3] तु वर्तत इत्यतिशयः। विज्ञप्तिर्हि तस्य नास्ति। अविज्ञप्तिस्त्वनुबन्धिनीति विज्ञप्तेर्विशिष्यते। तथाऽविक्षिप्तचित्तकस्याविज्ञप्तिर्वर्तत इति नातिशयः। चित्तचैत्ता अपि हि तस्य वर्तन्त एव। अचित्तकस्यापि तु वर्तत इत्यतिशयः। तस्य हि चित्तचैत्ता निरुद्धाः। अविज्ञप्तिस्त्वनुबन्धिनीति चित्तचैत्तेभ्यो विशिष्यते। तदेवं धर्मान्तरविशेषणार्थमविक्षिप्तचित्तो विक्षिप्ताचित्तकतृतीयभूतस्तेनैकेन [4]अपिशब्देनाभिधीयते। अत एव चापिशब्देनाविक्षिप्तसचित्तकस्यापीत्युक्तमाचार्येण। तृतीयभूतत्वात्। इतरथा ह्यपिशब्देनाविक्षिप्तचित्तकस्यापीत्येवावक्ष्यत्। सचित्तकस्यापीति वा। तद्यथा। त्रयो लोके मनुष्याः। एको धनवानितरावपि धनमात्रवन्तौ। तावभिसमीक्ष्य विष्णुमित्रस्य धनमस्तीत्येकेनोक्तो[5] द्वितीयो वक्ता भवेद्। देवदत्तयज्ञदत्तयोरपि धनमस्तीत्यपिशब्देन विष्णुमित्रस्याप्यस्तीति देवदत्तयज्ञदत्तगतेन द्वैतमिवापन्नेनापिशब्देन स एव विष्णुमित्रो लक्ष्यते। न त्ववसृज्यत इत्यर्थः। तेन नात्रापिशब्दोऽधिक[6] एव। तद्वदिहापि द्रष्टव्यम्। यत्पुनरेतदुक्तम्। अचित्तकं चाधिकृत्य शुभोऽविज्ञप्त्यनुबन्धो विशेषणीय इति तदपि न किंचित्। अविज्ञप्तिजातिमधिकृत्यैतल्लक्षणं प्रणीतम्। सा चाविज्ञप्तिजातिरचित्तकस्य भवतीत्येतावद्विवक्षितम्। किमनेन विशेषितेन। त्वदीयेऽप्यविज्ञप्तिलक्षणे शुभोऽविज्ञप्त्यनुबन्धोऽचित्तकमधिकृत्य न विशेषितः।

1 Following Tib. B. स्वनामोक्त- ; To. स्वनामोक्त 2 Mss. ०चित्तश्चैत्तेभ्यो
3 B. ०चित्तकस्यापि 4 B. & To. following Tib. अप्यपि०
5 A, V, B. & To. नोक्ते 6 Mss. अधिकृतं omitting the following एव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृतेऽपि विसभागेऽपि चित्ते चित्तात्यये च यत् ।
व्याकृताप्रतिघं रूपं सा ह्यविज्ञप्तिरिष्यते ॥

इति । एषा च विज्ञप्तिसंभूता कुशलैवाविज्ञप्तिरचित्तकस्य संभवतीति चतुर्थे कोशस्थाने ज्ञापयिष्यते । यच्चाप्रतिघमित्यविशेषितमिति तदपि पश्चाद्दर्शयिष्यामः ।

सप्रतिघा दश ।

रूपिणः[1]

इति । अत्र दशैव धातवः सप्रतिघा इत्यवधारणादविज्ञप्तिर्धर्मधातुपरिपठिता सा त्वप्रतिघेति सेत्स्यति । तस्मादिदमास्माकीनमेवमदोषदुष्टमविज्ञप्तिलक्षणमिति । तदेवास्तु ॥११॥

[भूतानि पृथिवीधातुरप्तेजोवायुधातवः ।
धृत्यादिकर्मसंसिद्धाः खरस्नेहोष्णतेरणाः ॥१२॥]

भूतानि पृथिवीधातुः

इति विस्तरः । धातुग्रहणं वर्णसंस्थानात्मकपृथिव्यादिनिरासार्थम् । स्वलक्षणोपादायरूपधारणाद्वा[2] धातव इति । काठिन्यादिस्वलक्षणं चक्षुराद्युपादायस्वरूपं च दधतीति धातवः । अष्टादश धातवस्तु स्वसामान्यलक्षणधारणात्[3] । गोत्रार्थो वा धात्वर्थो धारणार्थमनपेक्ष्य षड्धा धातुदेशनायाम् । पुनर्भवबीजार्थो वा धात्वर्थो भवं पुष्णन्तीति कृत्वा ।

महत्त्वमेषां सर्वान्यरूपाश्रयत्वेनौदारिकत्वादिति सर्वोपादायरूपाश्रयत्वेन महत्त्वादित्यर्थः । तदुद्भूतवृत्तिष्विति । तैर्महाभूतैरुद्भूता व्यक्ता वृत्तिर्धृत्यादिका येषु त इमे तदुद्भूतवृत्तयः पृथिव्यप्तेजोवायुस्कन्धाः । तेषु । एषां महाभूतानां महासंनिवेशत्वान्महारचनत्वात् । भूतं तन्वन्तीति भूतानि ।

धृत्यादिकर्मसंसिद्धाः

इति । धृत्यादिकर्मनिर्देशः[4] पृथिव्यादिषु शेषानुमानार्थम् । उपलादिके हि पृथिवीद्रव्ये संग्रहपक्तिव्यूहनदर्शनाच्छेषाणां जलतेजोवायूनामस्तित्वमनुमीयते । अप्सु नौसंधारणोष्णतेरणकर्मदर्शनात्पृथिवीतेजोवायूनामस्तित्वम् । अग्निज्वालायां स्थैर्यसंपिण्डनचलनदर्शनात् पृथिव्युदकवायूनामस्तित्वम् । वायौ संधारणशीतोष्ण-

---

1 Kārikā. I, 29.
2 B. ०णाच्च ; To. णाद
3 B. Adds इति तदपेक्षा
4 Mss. ०निर्देशः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्पर्शदर्शनात् पृथिव्यप्तेजसामस्तित्वमिति वैभाषिकाः। व्यूहनं पुनर्वृद्धिः प्रसर्पणं वेति[1]। वृद्धिः संबन्धाधिका शरीराङ्कुराद्यवयवोत्पत्तिः। प्रसर्पणं शरीरादीनां प्रबन्धेन देशान्तरोत्पत्तिः।

उष्णता

इति। स्वभावाभिधानेऽपि भावप्रत्ययः। उष्ण एवोष्णतेति। देशान्तरोत्पादनात् प्रदीपेरणवदिति। क्षणिकानां नास्ति देशान्तरगमनम्। यत्रैवोत्पत्तिस्तत्रैव विनाशः। तेनैवमुच्यते। देशान्तरोत्पादनस्वभावा[2] भूतस्रोतस ईरणा[3] क्षणिकत्वात् प्रदीपवत्। क्षणिकानि च भूतानि रूपत्वात् प्रदीपवत्। प्रदीपश्च क्षणिकः प्रसिद्ध इत्युदाहरणम्। कर्मणास्य स्वभावोऽभिव्यक्त इति। ईरणाकर्मणा लघुत्वं विशिष्यते। यदीरणात्मकं लघुत्वं स वायुधातुरिति। लघुसमुदीरणो वायुधातुः लघ्वेव तु यत्तदुपादायरूपम् ॥१२॥

प्रवचने पृथिवीधात्वादयः पृथिव्यादयश्चोक्ता इति। अतः पृच्छति। कः पुनरेषां विशेष इति।

[पृथिवी वर्णसंस्थानमुच्यते लोकसंज्ञया।
आपस्तेजश्च वायुस्तु धातुरेव तथापि च ॥१३॥]

लोकसंज्ञया

इति। लोकसंव्यवहारेण। वात्येति। वातानां समूहो वात्या। [4]ब्राह्मणादिभ्यो यन्निति समूहार्थे यन्प्रत्ययः। स्त्रीत्वाट्टाप्प्रत्ययः[5]। तथा ह्यर्थवर्गीयेषूक्तमिति। अर्थवर्गीयाणि सूत्राणि यानि[6] क्षुद्रके पठ्यन्ते। तेषूक्तम्।

तस्य चेत्कामयानस्य[7]

इति विस्तरः। तस्य देहिनः कामयानस्य छन्दजातस्य यदि कामा विषया न समृध्यन्ते न संपद्यन्ते। शल्यविद्ध इव असौ रूप्यते बाध्यत इत्यर्थः। [8]बाधनार्थपरिच्छिन्नेनानेन रूप्यतेशब्देन रूप्यते रूप्यत इति भिक्षव इत्यत्र सूत्रे रूप्यतेशब्दो बाधनार्थ एव परिच्छिद्यते। शल्यविद्धः कामयानश्च दुःखवेदयितृत्वाद्बाध्यत इति युक्तम्। रूपं तु कथं बाध्यते। अत आह। विपरिणामोत्पाद-

---

1 B. चेति
2 B. ०वो
3 B. ०णं
4 Pā., VI, 2, 42.
5 A स्त्रीत्वात्माप्रत्ययः; B. & To. ०च्चाप्प्र०; V जाप्प्र०
6 To. omits यानि०
7 Cf. Suttanipāta, verse 767.
8 Mss. नाधनार्थ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति[1] विक्रियोत्पादनेत्यर्थः । तथा चेहार्थे सति शल्यविद्ध इव रूप्यत इत्यत्रापि यदि विक्रियत इत्यर्थो गृह्यते सुतरामर्थो युज्यते । **प्रतिघात** इति, स्वदेशे परस्योत्पत्तिप्रतिबंधः । **परमाणुरूपं तर्हीति**, द्रव्यपरमाणुरूपं न रूपं प्राप्नोति । कस्मात्, **अरूपणात्** । निरवयवत्वे सत्यरूपणादित्यभिप्रायः । पक्षद्वयेऽप्येतच्चोद्यमुपन्यस्तम्, बाधनरूपणे प्रतिघातरूपणे च द्रव्यपरमाणुर्निरवयवत्वान्न शक्यते रूपयितुमिति । **न वै परमाणुरूपमेकं पृथग्भूतमस्तीति** । एकमिति ग्रहणं द्रव्यपरमाणुसंदर्शनार्थम् । पृथग्भूतमसंघातस्थमित्यर्थः । तदीदृङ्नास्ति । संघातस्थं नित्यं भवति ।

कामेऽष्टद्रव्यकोऽशब्दः[2]

इत्यादिवचनात् । **संघातस्थं तद्रूप्यत** एवेत्यर्थादेतदभीष्टं भवति, तद्द्रव्यपरमाणुरूपं संघातस्थं रूप्यते, बाध्यते प्रतिहन्यते च ।

अतीतानागतं तर्हीति विस्तरः । अतीतानागतमदेशत्वान्न रूप्यते, न बाध्यते नापि[3] प्रतिहन्यते । **तदपीति** विस्तरः । तदपि **रूपित**मित्यतीतबाधनप्रतिघातनार्थेन । **रूपयिष्यमाण**मित्युत्पत्तिधर्मकमनागतम् । तेनैवार्थद्वयेन । **तज्जातीयं** चेत्युत्पत्तिधर्मकजातीयमनुत्पत्तिधर्मकमनागतम् । **इन्धनवत्** । यदपीद्धं यदपीन्धिष्यमाणं तज्जातीयं च तदपीन्धनम् । तज्जातीयं पुनरिन्धनं यदिन्धनार्थे कल्पितमप्राप्यैवाग्निमन्तरा नंक्ष्यति । **अविज्ञप्तिस्तर्हि न रूपं प्राप्नोति** । कस्मात्, अप्रतिघत्वात् । अप्रतिघत्वेन हि सा न बाध्यते, नापि प्रतिहन्यते । **सापि विज्ञप्तिरूपणादिति** विस्तरः । विज्ञप्तिरविज्ञप्तिसमुत्थापिका । तस्याः सप्रतिघाया रूपणाद**विज्ञप्तिरपि रूप्यते । यथा** छायासमुत्थापकस्य **वृक्षस्य प्रचलनाच्छाया प्रचलति** तद्वत्, न, **अविकारादिति** । अनेन प्रतिज्ञादोष उद्भाव्यते । परेण ह्येवं प्रतिज्ञातम् । स्वसमुत्थापकविकारानुविधायिनी अविज्ञप्तिः, समुत्थाप्यत्वात्, वृक्षच्छायावदिति । सेयं पूर्वाभ्युपगमविरोधिनी प्रतिज्ञा । अभ्युपगतो हि विज्ञप्तेर्विकारेऽप्यविज्ञप्तेरविकारः । तथा ह्यञ्जलिं भङ्क्त्वा कपोतं कुर्वतः कायविज्ञप्तिर्विक्रियत इत्यभ्युपगम्यते, न त्वविज्ञप्तिः । तस्मादसाधनमेतत् । **विज्ञप्तिनिवृत्तौ** [4]चाविज्ञप्तिनिवृत्तिः स्यादित्यनेन धर्मिविशेषविपर्ययोऽप्यस्याः

---

1 B. ॰पादेन विक्रियोत्पादेने॰

2 Kārikā, II, 23.

3 B. omits अपि.

4 To. वा॰

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतिज्ञाया उद्भाव्यते । यदि वृक्षच्छायाधर्म[1] इष्यते । **वृक्षनिवृत्तौ छायानिवृत्तिर्दृष्टेति तद्वत् स्यात्** । अत्र कश्चिद् न अविकारादिति न सम्यगेतदुक्तमिति दूषयति । विक्रियत एवाविज्ञप्तिर्विज्ञप्तिविकारे सति । मृदुमध्याधिमात्रत्वे हि विज्ञप्तेर्मृदुमध्याधिमात्रता भवत्यविज्ञप्तेरिति । तदेतदयुक्तम् । कस्मात् । उत्पत्तिरेवाविज्ञप्तेरेवं भवति मृदुर्मध्याधिमात्रा वा । न तु विकारः । उत्पन्नस्य हि धर्मस्य पुनरन्यथोत्पादनं विकारः । तच्च रूपणमभिप्रेतम् । **आश्रयभूतरूपणादित्यपर** इति वृद्धाचार्यवसुबन्धुः । भूतग्रहणमाश्रयभूतप्रदर्शनार्थम् । अतश्चेतरः प्रसञ्जयति । **एवं तर्हि चक्षुर्विज्ञानादीनामपीति** विस्तरः । चक्षुराद्याश्रयरूपणात्तद्विज्ञानानामपि **रूपत्वप्रसङ्गः** । **विषमोऽयमुपन्यास** इति । वृद्धाचार्यवसुबन्धुदेशीयः कश्चित्परिहरति । **अविज्ञप्तिर्हीति** विस्तरः । **छाया वृक्षमुपश्लिष्टाश्रित्य वर्तते । प्रभापि मणिं तथैव । उत्पत्तिनिमित्तमात्रं तानि** तेषामिति नोपश्लिष्टानीति भावः । तमितरः प्रत्याह । **इदं तावद्वैभाषिकीयमिति** विस्तरः । नैतद्वैभाषिकमतम् । **वैभाषिकमतं तु छायावर्णपरमाणुः स्वभूतचतुष्कमाश्रित्य वर्तते । न वृक्षम्** । तथा प्रभावर्णपरमाणुः स्वभूतचतुष्कमाश्रित्य वर्तते । न मणिम् । पृथग्द्रव्यत्वादिति । एवमनाश्रयकारणत्वान्मणिवृक्षयोर्न महाभूताविज्ञप्तिवदुपश्लिष्टे छायाप्रभे इत्यसामान्यं दृष्टान्तदार्ष्टान्तिकयोः । **सत्यपि च तदाश्रितत्व** इति विस्तरः । अथापि पारंपर्येण तदाश्रितत्वमभ्युपगम्यते । छाया स्वभूताश्रिता तानि तु भूतानि वृक्षमाश्रितानि । प्रभापि स्वभूताश्रिता तानि च[2] भूतानि मणिमाश्रितानि । तदनुविधायित्वात् । तथाप्यसामान्यम् । **निरुद्धेष्वप्यविज्ञप्त्याश्रयेषु महाभूतेषु तस्या अनिरोधाभ्युपगमादिति** ।

क्षणादूर्ध्वमविज्ञप्तिः कामाप्तातीतभूतजा[3]

इति सिद्धान्तात् । **तस्मान्न भवत्येष परिहार** इति । य उक्तोऽभूत् । अविज्ञप्तिर्हि छायेव वृक्षमिति विस्तरेण ।

अन्ये पुनरत्र परिहारमाहुरिति । अयमेवाचार्यस्तन्मतं समर्थयन्नाह । **आश्रयो भेदं गत** इति । द्विविध इत्यर्थः । **कश्चिद्रूप्यते चक्षुरादिः सप्रतिघत्वात्** । **कश्चिन्न रूप्यते मनो विपर्ययात्** । **तस्मादसमानः[4] प्रसङ्ग** इति । चक्षुर्विज्ञानादीनामप्याश्रयभूतरूपणाद्रूपत्वप्रसङ्ग[5] इति । **रूपणाद्रूप**मित्याश्रयरूपादित्यर्थः । अत्र चोदयन्ति । विज्ञप्तिसंभूताया अविज्ञप्तेरेवं परिकरेण

1 B. छाया वृक्षधर्म
2 To. following Tib. तु
3 Kārikā, IV, 6.
4 B. दसमान-
5 B. ०त्वाप्रसङ्ग

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपत्वं भवद्भवेत्। समाधिसंभूतायास्तु कथं रूपत्वमिति। तज्जातीयत्वात्तदपि रूपम्। किं पुनस्तज्जातीयत्वम्' महाभूतान्युपादायेति भावः। तेषामुपादायरूपजननादिहेतुभूतत्वादिति ॥१३॥

[इन्द्रियार्थास्त एवेष्टा दशायतनधातवः ।
वेदनानुभवः संज्ञा निमित्तोद्ग्रहणात्मिका ॥१४॥]

इन्द्रियार्थास्त एव

इति। भगवतो विनेयवशात्तिस्रो देशनाः' स्कन्धायतनधातुदेशनाः' तासु च ये स्कन्धेषु देशिता धर्मास्त एवायतनधातुषु देशिताः। असंस्कृतास्त्वत्र केवलमतिरिक्ताः। सर्वश्चाभिधर्मः सूत्रव्याख्यानम्। अत इदमुक्तम्'इन्द्रियार्थास्त एवेति विस्तरेण[1]। लाघविकश्चायमाचार्यः। वेदनादिस्कन्धलक्षणमनुक्त्वैव लाघवेन रूपस्कन्धस्वभावान् धर्मानायतनधातुषु दर्शयति। इन्द्रियाणि च इन्द्रियार्थाश्च इन्द्रियार्थाः। त एवेति विशेषणमन्येन्द्रियनिरासार्थमन्यार्थनिरासार्थं च। **आयतनव्यवस्थायां तु** यथासंख्येन **दशायतनानि चक्षुरायतनं रूपायतनं यावत्कायायतनं स्प्रष्टव्यायतन**मिति। **धातुव्यवस्थायां** त एव **दश धातवः। चक्षुर्धातू रूपधातुर्यावत्कायधातुः स्प्रष्टव्यधातु**रिति।

उक्तो रूपस्कन्धस्तस्य चायतनधातुव्यवस्थानमिति। न सकलस्य रूपस्कन्धस्यायतनधातुव्यवस्थानमुक्तम्'अविज्ञप्तिरूपस्य वक्ष्यमाणत्वात्। कथमिदमुच्यते'उक्तमिति। बाहुलिको निर्देशः। बाहुल्येन रूपस्कन्धस्यायतनधातुव्यवस्थान[2]मुक्तमित्यर्थः। कतिपयमुद्गगुलिकासंभवेऽपि माषराशिव्यपदेशवत्। **त्रिविधोऽनुभव** इति। अनुभूतिरनुभव उपभोगः। कस्य' चित्तस्य पुद्गलस्य वा। स च त्रिविधः'**सुखो दुःखोऽदुःखासुखश्च**। वस्तुनो ह्लादपरितापतदुभयविनिर्मुक्तस्वरूपसाक्षात्करणस्वभावः। अनुभूयते वानेन विषय इत्यनुभवः। अनुभवतीति वानुभवः। कायचित्तोपचयापचयतदुभयविनिर्मुक्तावस्थाप्रवृत्तश्चैतसिकविशेषस्पर्शानुभव इत्यपरे। अनुर्लक्षणे[3]' स्पर्शचिह्नः। स्पर्शनिमित्तोऽनुभव इत्यर्थः। स वेदनास्कन्धः।

निमित्तोद्ग्रहणात्मिका

इति। निमित्तं वस्तुनोऽवस्थाविशेषो नीलत्वादि' तस्योद्ग्रहणं परिच्छेदः'

---

1 Mss. विस्तर:
2 Mss. व्यवदान०
3 Pā., I, 4,84.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदात्मिका तत्स्वभावा। दुःखादीत्यादिशब्देन लोहितादीनां ग्रहणम्। **असौ संज्ञास्कन्धः**। यदि परिच्छेदात्मिका संज्ञा' तत्संप्रयोगे निमित्त-मुद्गृह्णन्तीति पञ्चापि विज्ञानकाया विकल्पकाः स्युः। न स्युः। न हि पञ्चविज्ञानसंप्रयोगिणी संज्ञा पट्वी। मनोविज्ञानकायसंप्रयोगिणी तु पट्वीति तदेव विकल्पकमुक्तम्। **षट् संज्ञाकाया वेदनावदिति**। यथा चक्षुःसंस्पर्शजा वेदनेति विस्तरेणोक्तं तथा चक्षुःस्पर्शजा संज्ञेति विस्तरेण वक्तव्यम् ॥१४॥

[चतुर्भ्योऽन्ये तु संस्कारस्कन्ध एते पुनस्त्रयः।
धर्मायतनधात्वाख्याः सहाविज्ञप्त्यसंस्कृतैः ॥१५॥]

चतुर्भ्योऽन्ये

इति। चतुर्भ्यः स्कन्धेभ्यः' स्कन्धाधिकारात्। रूपस्कन्धादिभ्यस्त्रिभ्य उक्तेभ्यो विज्ञानस्कन्धाच्चोद्दिष्टवक्ष्यमाणकाच्चतुर्भ्योऽन्ये संस्काराः

संस्कारस्कन्धः।

सूत्रे षट् चेतनाकाया इत्युक्तमिति। संस्कारस्कन्धः कतमः' षट् चेतनाकाया इति। **अभिसंस्करणे प्रधाना** इति। एवं चैवं च स्यामित्य-भिसंस्करणे प्रधानाः' कर्महेतूपपत्तय इति वचनात्। छन्दप्राप्त्यादयस्तु चेतनानुविधायित्वात्तदाकारहेतुभावानुविधानतः संस्कारस्कन्ध एव वेदितव्याः। तदेवं सति संस्करणे प्रवृत्तो धर्मराशिः संस्कार इत्युक्तं भवति। अपरे पुनराहुः। संस्कृताभिसंस्करणे चेतनायाः प्राधान्यमुक्तम्' अतः सूत्रे चेतनाग्रहणम्। संप्रयुक्तविप्रयुक्तसंस्कृतधर्मसंग्रहेण तु प्राधान्यादयमेव स्कन्धः संस्कारस्कन्ध उक्तः। [1]संस्कृतराशिरिति कृत्वा। **संस्कृतमभिसंस्करोतीति** भाविन्या संज्ञयानागतं स्कन्धपञ्चकं संस्कृतमित्युक्तम्। **अन्यथा हीति**[2] विस्तरः। यदि यथासूत्र-निर्देशं चेतनैव केवला संस्कारस्कन्ध इष्यते नान्ये' **शेषाणां** छन्दादीनां **चैतसिकानां** प्राप्त्यादीनां **च** चित्तविप्रयुक्तानां **स्कन्धासंग्रहात्**' रूपादिषु स्कन्धेषु रूपणादिलक्षणाभावेनासंग्रहात्' संस्कारस्कन्धे चैवं सूत्रे यथारुतग्रहणे-नासंग्रहादिति स्कन्धेष्वसंग्रहात्[3]' **दुःखसमुदयसत्यत्वं न स्यादिति परिज्ञा-प्रहाणे न स्याताम्**। परिज्ञा दुःखस्य' प्रहाणं समुदयस्य। अनभिज्ञाय लौकि-

---

1 B. संस्काररा०

2 Mss. हि विस्तरः

3 Mss. omit इति स्कन्धेष्वसंग्रहात्.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

केन मार्गेण। अपरिज्ञाय लोकोत्तरेण। अथवानभिज्ञाय दर्शनमार्गेण। अपरिज्ञाय भावनामार्गेण। एवमप्रहायेत्युक्तमिति सूत्रान्तरम्। **नाहमेकधर्ममप्यपरिज्ञायाप्रहाय दुःखस्यान्तक्रियां वदामीति।** दुःखनिरोधं वदामीत्यर्थः। ननु चाकाशाप्रतिसंख्यानिरोधौ लोकोत्तरेण मार्गेण न परिज्ञायेते अथ च दुःखस्यान्तक्रियेष्यते[1]। संक्लेशवस्त्वभिसंधिवचनात्। सौत्रान्तिकदर्शनेन च प्रज्ञप्तिसत्त्वाददोषः। न हि तौ संक्लेशवस्तु[2]। किमनयोः परिज्ञेयत्वेन। निरोधमार्गसत्ये अपि तर्हि न संक्लेशवस्तु[2]। इति न परिज्ञेये स्याताम्। दुःखसमुदयसत्यसंबन्धसद्भावात्तयोः परिज्ञेयत्वं व्यवस्थाप्यते। तथा हि योगिन एवं विचारयन्ति। अस्य सहेतुकस्य दुःखस्य को निरोधः। केन चोपायेन स निरोधः प्राप्यत इति निरोधमार्गसत्ये अपि परिजानन्ति। न त्वाकाशाप्रतिसंख्यानिरोधयोर्दुःखेन संबन्ध इति न तौ परिजानन्ति। प्रयोगावस्थायां तु लौकिकेन ज्ञानेन तावपि सामान्यरूपेण सर्वधर्मा अनात्मान इति भावयन्ति।

धर्मायतनधात्वाख्याः

इति। आयतनं च धातुश्चायतनधातुः[3]। धर्मश्चासावायतनधातुश्च धर्मायतनधातुः। तदाख्यैषां। त इमे धर्मायतनधात्वाख्याः। के। **वेदनासंज्ञासंस्कारस्कन्धाः**

सहाविज्ञप्त्यसंस्कृतैः

इति। सहाविज्ञप्त्या सहासंस्कृतैश्चाकाशादिभिः। आयतनदेशनायां धर्मायतनमिति। धातुदेशनायां च धर्मधातुरिति। **सप्त द्रव्याणीति।** अविज्ञप्तिः। वेदनास्कन्धः। संज्ञास्कन्धः। संस्कारस्कन्धः। आकाशम्। प्रतिसंख्यानिरोधः। अप्रतिसंख्यानिरोधश्चेति ॥१५॥

[विज्ञानं प्रतिविज्ञप्तिर्मन आयतनं च तत्।
धातवः सप्त च मताः षड्विज्ञानान्यथो मनः ॥१६॥]

विज्ञानं प्रतिविज्ञप्तिः

इति। विज्ञानस्कन्धः प्रतिविज्ञप्तिरित्यर्थः। स्कन्धाधिकारात्। प्रतिर्वीप्सार्थः। विषयं विषयं प्रतीत्यर्थः। **उपलब्धिर्वस्तुमात्रग्रहणम्।** वेदनादयस्तु चैतसा[4] विशेषग्रहणरूपाः। **षड् विज्ञानकाया इति।** षड् विज्ञानसमूहाः।

---

1 ०ग्रेष्यते
2 To. ०वस्तू
3 To. ०धातू
4 B. चैतसिक ; To. following Tib. adds विशेषाः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षड् विज्ञानान्यथो मनः

इति। षड् विज्ञानधातवो यथासंख्येन' यच्चक्षुर्विज्ञानं स चक्षुर्विज्ञानधातुः' एवं यावद्यन्मनोविज्ञानं स मनोविज्ञानधातुः' समस्तानि त्वेतानि **षण्मनोधातु**रिति वेदितव्यम् ॥१६॥

[षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः।
षष्ठाश्रयप्रसिद्ध्यर्थं धातवोऽष्टादश स्मृताः ॥१७॥]

षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः

इति। षण्णामिति निर्धारणे षष्ठी। तेषामेव मध्ये नान्यदित्यर्थः। अनन्तरग्रहणमन्यविज्ञानव्यवहितनिवृत्त्यर्थम्। यद्धि यस्यानन्तरमन्यविज्ञानाव्यवहितं तत्तस्याश्रयः। व्यवहितं तु न तस्याश्रयः। अन्यस्यासावाश्रयो यस्य तदव्यवहितम्। अत एवाचित्तिकावस्थायां चिरातीतमपि समापत्तिप्रवेशचित्तं व्युत्थानचित्तस्याश्रयो भवति' विज्ञानान्तराव्यवधानात्। अतीतग्रहणं प्रत्युत्पन्ननिरासार्थम्' मनोविज्ञानं ह्याश्रयि तस्यामवस्थायां प्रत्युत्पन्नम्' अतस्तदतीतमिष्यते। तदेव चैतदुच्यते षष्ठाश्रयप्रसिद्ध्यर्थमिति। विज्ञानग्रहणं वेदनाद्यनन्तरातीतनिवृत्त्यर्थम्। यद्धि तन्मन इति जातिनिर्देशान्न वीप्साप्रयोगः। वृत्तौ तु द्रव्यपदार्थाभिधित्सया वीप्साप्रयोगः' **यद्यत्समनन्तरनिरुद्धं विज्ञानं तत्तन्मनोधातुरिति**। **तद्यथा स एवेति** विस्तरः। **तद्यथा स एव पुत्रोऽन्यस्य पित्राख्यां लभते तदेव फलमन्यस्य बीजाख्याम्**। **तथे**हापि स एव चक्षुरादिविज्ञानधातुरन्यस्याश्रय इति **मनोधात्वाख्यां लभते**।

सप्तदश धातवो भवन्ति द्वादश वेति। य एव षड्विज्ञानधातवः स एव मनोधातुः। य एव च मनोधातुस्त एव च षड् विज्ञानधातव इतीतरेतरान्तर्भावः। यदि षड् विज्ञानधातवो गृह्येरन् नार्थो मनोधातुनेति सप्तदश धातवो भवन्ति। यदि मनोधातुर्गृह्येत नार्थः षड्विज्ञानधातुभिरिति द्वादश धातवो भवन्ति।

षष्ठाश्रयप्रसिद्ध्यर्थम्

इति। पञ्चानां विज्ञानधातूनामाश्रयप्रसिद्धिर्नाङ्गीक्रियते[1]। चक्षुरादिस्वाश्रयसंभवात्। **मनोविज्ञानाश्रयो नास्तीति तदाश्रयप्रसिद्ध्यर्थं मनोधातुर्व्यवस्थाप्यते**। आश्रयादि-षट्कव्यवस्थानेन[2] **अष्टादश धातवो भवन्ति**। आश्रय-

1 B. नं क्रियते 2 B. ०व्यवस्थापनेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षट्कं चक्षुरादिमनोऽन्तकम्। आश्रितषट्कं चक्षुर्विज्ञानादिमनोविज्ञानान्तम्। आलम्बनषट्कं रूपादिधर्मान्तमिति। योगाचारदर्शनेन तु षड्विज्ञानव्यतिरिक्तोऽप्यस्ति मनोधातुः। ताम्रपर्णीया अपि हृदयवस्तु मनोविज्ञानधातोराश्रयं कल्पयन्ति। तच्चारूप्यधातावपि विद्यत इति वर्णयन्ति। आरूप्यधातावपि हि तेषां रूपमभिप्रेतम्। आरूप्य इति च ईषदर्थे आङ्' आपिङ्गलवदिति। **चरमं चित्तमिति।** निरूपधिशेषनिर्वाणकाले। **न मनो भविष्यतीति।** न मनोधातुर्भविष्यतीत्यर्थः। **न हि तदस्तीति'** नोत्पद्यत इत्यर्थः। **न। तस्यापि मनोभावेनेति** विस्तरः' नैतदेवम्। कस्मात्' तस्यापि चरमचित्तस्य मनोभावेनाश्रयत्वेनावस्थितत्वात्। **अन्यकारणवैकल्यादिति।** पौनर्भविककर्मक्लेशकारणवैकल्यात्। **नोत्तरविज्ञानसंभूतिरिति'** न पुनर्भवप्रतिसंधिविज्ञानमित्यभिप्रायः।

इदमिह विचार्यते। उक्तमेतत्' आश्रयाश्रितालम्बनषट्कव्यवस्थानादष्टादश धातवो भवन्तीति। आश्रितषट्कं तावद्व्यवस्थाप्यते' चक्षुर्विज्ञानधातुर्यावन्मनोविज्ञानधातुरिति। किमस्याश्रितषट्कस्य यथासंख्यमाश्रयषट्कं व्यवस्थाप्यते' चक्षुर्विज्ञानधातोराश्रयश्चक्षुर्धातुर्यावन्मनोविज्ञानधातोर्मनोधातुराश्रय इति। ओमित्याह। यदा ताह चक्षुस्तत्सभागं भवति तत् कस्याश्रयः' न कस्यचित्। कथं तर्हीदमुक्तं' चक्षुर्विज्ञानधातोश्चक्षुर्धातुराश्रय इत्यादि। आश्रय एव चक्षुः' यस्तु किंचिदनाश्रयस्तत्सभागं चक्षुस्तदपि तज्जातीयत्वाच्चक्षुर्धातुत्वेन व्यवस्थाप्यत एव। एवं यावत्कायधातुर्वक्तव्यः। मनोधातुरपि किं मनोविज्ञानधातोरेवाश्रयः' नेत्याह। चक्षुर्विज्ञानधात्वादीनामपि हि स आश्रय इष्यते। तथा हि वक्ष्यति।

चरमस्याश्रयोऽतीतः पञ्चानां सहजश्च तैः[1]

इति। किं तर्हीदमुक्तम्

षष्ठाश्रयप्रसिद्ध्यर्थं धातवोऽष्टादश स्मृताः

इति। नान्येषामाश्रयः स इति कृत्वा षष्ठाश्रयप्रसिद्धिर्न भवति। षष्ठस्याप्ययमाश्रयो भवति संभवतः। आलम्बनषट्कमपि' चक्षुर्विज्ञानधातोरालम्बनं रूपधातुर्यावन्मनोविज्ञानधातोर्धर्मधातुरालम्बनमिति। तदिदं विचार्यते। किं यथा चक्षुर्विज्ञानधातोर्यावन्ति रूपाण्यालम्बनं स रूपधातुः' एवं यावत्कायविज्ञानधातोर्यावन्ति स्प्रष्टव्यान्यालम्बनं स स्प्रष्टव्यधातुः' एवं [2]मनोविज्ञानधातोर्यावन्तो

1 Kārikā, I, 44. 2 B. adds यावत्.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धर्मा आलम्बनं स[1] धर्मधातुरिति। अत्र स्थविर आह' सर्वधर्मस्वभावो धर्मधातुः' अष्टादशधातुस्वभाव इत्यर्थः। कथमस्याध्यात्मिकबाह्यधातुव्यवस्था सिध्यति। चक्षुरादयो हि द्वादशाध्यात्मिका इष्यन्ते। षड् बाह्या इति। यदि हि तेऽपि धर्मधातावन्तर्भाव्येरन्' सांकर्यं प्राप्नोति। स्थविर आह। पार्यायिकमेषामाध्यात्मिकबाह्यत्वम्। विज्ञानानामाश्रयास्ते चक्षुरादय इत्याध्यात्मिकाः। मनोविज्ञानविषयत्वात्तु बाह्या इति। तदेवं नेच्छन्ति वैभाषिकाः' सूत्रविरोधात्। एवं हि सूत्र उक्तम्'धर्मा भिक्षो बाह्यमायतनमेकादशभिरायतनैरसंगृहीतमनिदर्शनमप्रतिघमिति। तस्मात् सप्तद्रव्यको धर्मधातुरेष्टव्यः'अविज्ञप्तिवेदनासंज्ञासंस्कारस्कन्धाकाशप्रतिसंख्यानिरोधाप्रतिसंख्यानिरोधस्वभावत्वात्। अपरिपूर्णस्तर्हि मनोविज्ञानधातोरालम्बननिर्देशः' न च चक्षुर्विज्ञानादीनामपरिपूर्ण आलम्बननिर्देश इष्यते। अस्त्वेतदेवम्। किं तु चक्षुरादीनां षण्णामाश्रयत्वेन निर्देशात्' चक्षुर्विज्ञानादीनां चाश्रितत्वेन[2] रूपादीनां च पञ्चानां पञ्चविज्ञानकायालम्बनत्वेन निर्देशात्[3]। न तेषां मनोविज्ञानविषयत्वेऽपि धर्मधातौ प्रक्षेप इति वर्णयन्ति ॥१७॥

[सर्वसंग्रह एकेन स्कन्धेनायतनेन च।
धातुना च स्वभावेन परभाववियोगतः ॥१८॥]

समासतस्तु ज्ञातव्यः[4] **सर्वसंग्रह** इति। आयतनादिभिरपि सर्वसंग्रहः' न तु समासतः' किं तर्हि विस्तरतः[5]। अयं तु देशनालयान्निष्कृष्य समासत उक्तः। **रूपस्कन्धेन** रूपस्कन्धः संगृहीतः' दश चेन्द्रियार्थस्वभावान्यायतनानि धातवश्च' धर्मायतनधात्वेकदेशश्चाविज्ञप्तिः[6]। **मनआयतननेन** विज्ञानस्कन्धः' तदेव च मनआयतनम्। सप्त चित्तधातवश्च संगृहीताः। **धर्मधातुना** वेदनासंज्ञासंस्कारस्कन्धाः संगृहीता धर्मायतनं धर्मधातुश्च। अविज्ञप्तिरिह द्विः संगृहीता। **तद्यथा चक्षुरिन्द्रियमिति**। चक्षुरिन्द्रियं वेदनादिस्कन्धश्रोत्राद्यायतनधातुनिरोधसत्यमार्गसत्यस्वभावेन वियुक्तम्। अत[7] एतदुक्तम्'**चक्षुरिन्द्रियं रूपस्कन्धेन चक्षुरायतनधातुभ्यां दुःखसमुदयसत्याभ्यां च संगृहीतं** तत्स्वभावत्वात्' **नान्यैः स्कन्धादिभिस्तद्भाववियुक्तत्वादिति**। महतालाल्पकं संगृहीतम्। न तु

1 B. ते सर्वेऽपि
2 B. adds निर्देशात्
3 To. ०लम्बन-निर्देशात्
4 B. ज्ञातव्य
5 Mss. विस्तरः
6 A & C ०स्याविज्ञप्तिः
7 B. adds एव.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महदल्पकेन। कथमिति। रूपस्कन्धो महान् सर्वरूपसंग्राहकत्वात्' चक्षुरिन्द्रियमल्पकं रूपस्कन्धैकदेशत्वात्। रूपस्कन्धेन चक्षुरिन्द्रियं संगृहीतं न तु चक्षुरिन्द्रियेण रूपस्कन्धः' चक्षुरिन्द्रियव्यतिरिक्तरूपस्कन्धसद्भावात्। तद्यथा हस्तिपदेन पक्षिपदं संगृहीतम्' न तु पक्षिपदेन हस्तिपदं संगृहीतम्' तद्वत्। समेन तु सममन्योन्यं संगृहीतम्। तद्यथा चक्षुरिन्द्रियं चक्षुरायतनेन' चक्षुरायतनमपि चक्षुरिन्द्रियेणेत्ययमभिधर्मनयो वेदितव्यः। **यथा संग्रहवस्तुभिः**[1]**पर्षदामिति।** चत्वारि संग्रहवस्तूनि' दानं प्रियवादितार्थचर्या समानार्थता च। चतस्रः पर्षदः[2]' भिक्षुभिक्षुण्युपासकोपासिकाः' तैस्तासां संग्रहः। **स तु कादाचित्कः।** कदाचिद्भवः कादाचित्कः। कदाचिदासां दीयते प्रियं चोच्यते' न च संग्रह इति। **सांकेतिकः** सांव्यवहारिकः। स्वभावसंग्रहस्तु पारमार्थिक इत्युक्तम्[3] ॥१८॥

[जातिगोचरविज्ञानसामान्यादेकधातुता।
द्वित्वेऽपि चक्षुरादीनां शोभार्थं तु द्वयोद्भवः ॥१९॥]

जातिगोचरविज्ञानसामान्यादेकधातुता।
द्वित्वेऽपि चक्षुरादीनाम्

इति। अर्थादेतदुक्तम्' जात्यादिभेदाद्यथासंभवं धातुभेदव्यवस्थानम्' न त्वधिष्ठानभेदादिति। तत्र चक्षुर्धात्वादीनामन्योन्यं जातिगोचरविज्ञानभेदो भवति। रूपधात्वादीनां जातिविज्ञानभेदः। विज्ञानधातूनां जातिगोचरभेदः। मनोविज्ञानस्यापि हि धर्मधातुरसाधारणो गोचरः। **एवं श्रोत्रघ्राणयोरपि योज्यमिति।** जातिसामान्यमुभयोः श्रोत्रस्वभावत्वात्। गोचरसामान्यमुभयोः शब्दविषयत्वात्। विज्ञानसामान्यमुभयोरेकश्रोत्रविज्ञानाश्रयत्वात्। तस्मादेक एव श्रोत्रधातुः। एवं घ्राणस्यापि योज्यम्।

कार्यान्तराभावात्तर्हि द्वयानुत्पत्तिप्रसङ्गः स्यादित्यत आह'

शोभार्थं तु द्वयोद्भवः

इति। **एकचक्षुःश्रोत्राधिष्ठानैकनासिकाबिलसंभवान्महद्वैरूप्यं स्यादित्येकस्य** चक्षुःश्रोत्राधिष्ठानस्य एकस्य च नासिकाबिलस्य संभवान्महद्वैरूप्यं स्यात्। **ननु चोष्ट्रमार्जारोलूकप्रभृतीनां चक्षुरादिद्वयोद्भवेऽपि न भवत्याश्रयशोभा।** जात्यन्तरापेक्षया न तेषामाश्रयशोभा। स्वजात्यपेक्षया तु यस्य चक्षुरादिद्वयमस्ति तस्य तस्यां स्वजातावाश्रयशोभा। यस्य नास्ति तस्य वैरूप्यमिति' अदूष्यमेतत्। आचार्यसंघभद्रस्त्वस्य सूत्रस्यार्थं विवव्रे' शोभार्थमित्याधिपत्यार्थ-

---

1 B. पार्षदा०   2 B. पार्षदः   3 B. ०क्तः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मित्यर्थः। आधिपत्यसंपन्नो हि लोके [1]शोभत इत्यपदिश्यते। येषां चेन्द्रियाणाममून्यधिष्ठानानि[2] तेषां परिशुद्धदर्शनश्रवणघ्राणाद्याधिपत्यं[3] स्यात्। न हि यथा द्वाभ्यां चक्षुर्भ्यां परिशुद्धं दर्शनं भवति तथैकेन। एवमितरयोरपि[4]। एवं चैषामिन्द्रियत्वं हीयेत तदर्थमेतदुक्तं स्यादिति। [5]स्फुटोपलब्ध्यर्थमित्यर्थः। इहापि शक्यमेवं वक्तुम्' एकमेव परिस्फुटोपलब्ध्याश्रयभूतं विस्तीर्णं कर्मणोत्पाद्यताम्' किमाश्रयविच्छेदेनेति। विभाषायां तु लिखितमेतत् पक्षद्वयम्। शोभार्थं द्वयोर्द्भव इत्येको व्यक्त्यर्थमित्यपर इत्यलं प्रसङ्गेन। ननु च कर्मवशादिन्द्रियद्वयोत्पत्तिः' किमन्यदेवोच्यते शोभार्थं व्यक्त्यर्थं चेति। कर्मवशादेवात्रेन्द्रियद्वयोद्भव उक्तः। कथमिति' एवं विभक्तावयवाश्रयेणानादिकालाभ्यस्तः शोभाभिमानः सत्त्वानां प्रवर्तते। अतस्तदभिलाषपूर्वकेण स्फुटोलब्ध्यभिलाषपूर्वकेण च कर्मणा तदिन्द्रियद्वयमभिनिर्वर्त्यमानं शोभार्थं व्यक्त्यर्थं चोद्भवतीत्युच्यते ॥१९॥

[राश्यायद्वारगोत्रार्थाः स्कन्धायतनधातवः।

मोहेन्द्रियरुचित्रैधात्तिस्रः स्कन्धादिदेशनाः ॥२०॥]

राश्यायद्वारगोत्रार्थाः स्कन्धायतनधातवः

इति। यथाक्रमं राशिरायद्वारं गोत्रं चार्थ एषां त इमे रश्यायद्वारगोत्रार्थाः। के' स्कन्धायतनधातुशब्दाः। अथवा राश्यायद्वारगोत्रशब्दानामर्थाः के। स्कन्धायतनधातवः। **सूत्रे वचनात्।** सूत्रे राश्यर्थः स्कन्धार्थ इति राशेर्योऽर्थः स स्कन्धस्यार्थः। तं सूत्रेण दर्शयति। **यत्किंचिद्रूपमतीतानागतप्रत्युत्पन्नम्**इति विस्तरः। **ऐकध्यम्**इति' एकधैवैकध्यम्। **अनित्यतानिरुद्धम्**इति। अनित्यतया संस्कृतलक्षणेन निरुद्धमित्यर्थः। अनित्यताग्रहणमन्यनिरोधनिरासार्थम्। पञ्चविधो हि निरोधः' लक्षणनिरोधः समापत्तिनिरोध उपपत्तिनिरोधः प्रतिसंख्यानिरोधोऽप्रतिसंख्यानिरोधश्च। तद्यद्यतीतं रूपं निरुद्धमित्येवं[6] ब्रूयात्' अविशेषितत्वात् समापत्तिनिरोधादीनामपि प्रसङ्गः स्यात्। न च तैरतीतार्थतेष्यते। समापत्तिनिरोधो ह्यनागतानामेव चित्तचैत्तानाम्। उपपत्तिनिरोधोऽप्येषामेव। प्रतिसंख्यानिरोधः

---

1 To. & Mss. शोभतीत्यप 2 B. adds विकलानि.
3 To. घ्राणाद्याधि० ; B. adds न. 4 B. adds योज्यम्.
5 Mss. स्पर्शोप० 6 T. following Tib. एव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सास्रवाणामेव । अप्रतिसंख्यानिरोधो ह्यनुत्पत्तिधर्माणामेवानागतानाम् । [1]तस्माल्लक्षणनिरोधग्रहणार्थमिदमनित्यताग्रहणम् । **अनागतमनुत्पन्नमिति** । प्रत्युत्पन्नतामसंप्राप्तम् । **प्रत्युत्पन्नमुत्पन्नानिरुद्धमिति** । उत्पन्नग्रहणमनागतविशेषणार्थम्' अनिरुद्धग्रहणमतीतविशेषणार्थम् । अनागतं यद्यप्यनिरुद्धं न तूत्पन्नम् । अतीतमपि यद्यप्युत्पन्नं न त्वनिरुद्धमिति । **आध्यात्मिकं स्वासान्तानिकमिति**' चक्षुरादिकं रूपादिकं च । **बाह्यमन्यदिति**' तदेव पारसान्तानिकमसत्त्वसंख्यातं च । **आयतनतो वेति** । आध्यात्मिकं चक्षुरादिपञ्चकं स्वपरसंततिपतितम् ।

द्वादशाध्यात्मिकाः[2]

इति वचनात् । बाह्यमन्यद् रूपादिकं विषयपञ्चकं स्वपरसंततिपतितम्' असत्त्वसंख्यातं चाविज्ञप्तिश्च' बाह्यायतनस्वभावमिति कृत्वा । **औदारिकं सप्रतिघमिति** । परमाणुसञ्चयस्वभावम् । **सूक्ष्ममप्रतिघम्**' अविज्ञप्तिरूपम् । **आपेक्षिकं वेति** । अपेक्षया वौदारिकं सूक्ष्मं च भवति । तद्यथा लिक्षामपेक्ष्यौदारिकी यूका । यूकामपेक्ष्य सूक्ष्मा लिक्षेति । तदेवं सति सप्रतिघमेवौदारिकं च सूक्ष्मं भवति' अप्रतिघं तु सूक्ष्ममेवासञ्चितत्वात् । **आपेक्षिकत्वादसिद्धमिति** । सैव सूक्ष्मा लिक्षा वातायनरजोऽपेक्ष्यौदारिकी' सैव चौदारिकी यूकामपेक्ष्य सूक्ष्मेत्यव्यवस्थितमौदारिकसूक्ष्मत्वं पारापारवत् । कथं हि नामौदारिकं सूक्ष्मं भवति सूक्ष्मं चौदारिकमिति । न' **अपेक्षाभेदादिति** । अपेक्षया भेदोऽपेक्षाभेदः' तस्मान्नासिद्धम् । **यदेवापेक्ष्यौदारिकं न जातु तदपेक्ष्य सूक्ष्मम्** । न कदाचित्तदेवापेक्ष्यमित्यर्थः[3] । **पितृपुत्रवदिति** । तद्यथा देवदत्तस्य पुत्रो यज्ञदत्तः । यज्ञदत्तस्य पुत्रो विष्णुमित्रः । स यज्ञदत्तो विष्णुमित्रमपेक्ष्य पिता देवदत्तमपेक्ष्य पुत्रः । न चापेक्षिकत्वादस्य पितृपुत्रभावो न सिध्यति' अपेक्षाभेदात् । न हि स यज्ञदत्तस्तमेव विष्णुमित्रमपेक्ष्य पुत्रो नापि तमेव देवदत्तमपेक्ष्य पितेति ' तद्वत् । **हीनं क्लिष्टम्** ' सद्भिस्त्यक्तमिति कृत्वा । **प्रणीतमक्लिष्टम्**' क्लेशादूषितत्वात् । **दूरमतीतानागतम्**' सन्तानप्रच्युतत्वात्' तदसंप्राप्तत्वाच्च । **अन्तिकं प्रत्युत्पन्नम्**' सन्तानसंनिहितत्वात् । **एवं यावद्विज्ञानमिति** । या काचिद्वेदना अतीतानागतप्रत्युत्पन्ना आध्यात्मिकी वा बाह्या वा औदारिकी वा सूक्ष्मा[4] या वा दूरे या वा

---

1 Mss. तस्मात्लक्षणं

2 Kārikā, I, 39.

3 To. °मित्यर्थम्

4 B. adds वा.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्तिके तां सर्वामैकध्यमभिसंक्षिप्य वेदनास्कन्ध इति संख्यां गच्छति। एवं यावद्विज्ञानं वक्तव्यम्। यावत्सर्वमैकध्यमभिसंक्षिप्य विज्ञानस्कन्ध इति संख्यां गच्छतीति। अतीतादित्वमेषां वेदनादीनां यथा रूपस्य। **अयं तु विशेषो** वेदनादीनाम्। **औदारिकं पञ्चेन्द्रियाश्रयं** वेदनादिचतुष्कम्। अमूर्तत्वात्स्वगतमौदारिकत्वं नास्ति। **सूक्ष्मं मानसम्।** आश्रयस्याप्यमूर्तत्वात्। **भूमितो** वेति। औदारिकं सूक्ष्मं च वेदनादिकम्। औदारिकी कामावचरी वेदना। सूक्ष्मा प्रथमध्यानभूमिका। औदारिकी प्रथमध्यानभूमिका। सूक्ष्मा द्वितीयध्यानभूमिका। एवं यावदौदारिक्याकिंचन्यायतनभूमिका। सूक्ष्मा भवाग्रभूमिकेति। यथा वेदना। एवं यावद्विज्ञानं वक्तव्यम्।

भदन्त इति स्थविरः। कश्चित्सौत्रान्तिकस्तन्नामा वा। भगवद्विशेषस्त्वाह। स्थविरधर्मत्रातोऽसाविति। अत्र वयं ब्रूमः। यदि धर्मत्रातोऽतीतानागतास्तित्ववादी स इति न सौत्रान्तिकः। न दार्ष्टान्तिक इत्यर्थः। तथा हि वक्ष्यति। भावान्यथिको[1] भदन्तधर्मत्रातः। स किलाह। धर्मस्याध्वसु प्रवर्तमानस्य भावान्यथात्वं भवति। न द्रव्यस्यान्यथात्वमिति। सौत्रान्तिकदर्शनावलम्बी चायं भदन्तो विभाषायां लिखितः। भदन्त आहेत्येवमादि। भदन्तधर्मत्रातोऽपि स्वनाम्नैव विभाषायां लिखितः। भदन्तधर्मत्रात आहेत्येवमादि। तेन लक्ष्यते भदन्तधर्मत्रातादन्योऽयं सौत्रान्तिकः कश्चित्स्थविरो भिक्षुरिति। **पञ्चेन्द्रियग्राह्यमिति।** रूपादिपञ्चकम्। **सूक्ष्ममन्य-** **चक्षुरादिपञ्चकम्।** अविज्ञप्तिश्च। **मनापमिति।** मन आप्नोतीति मनआपं[2] मनोज्ञमित्यर्थः। पुनः संधिकरणं चात्र द्रष्टव्यम्। [3]पूर्वत्रासिद्धमिति [4]ईषदर्थे नञ्परिग्रहात्किंचित्सिद्धमित्येकसवर्णदीर्घत्वम्। **दूरमदृश्यदेश-** मिति। आधारदेशमाश्रयाधारदेशं चाधिकृत्य। द्रष्टुं शक्यो दृश्यः। दृश्यो देशोऽस्येति दृश्यदेशं दृश्याधारदेशं दृश्याश्रयाधारदेशं वा। तद्यथा कुण्डे बदरम्। चक्षुरादि वा। **तदन्तिकम्।** अदृश्यदेशं तु तद्विपरीतं दूरम्। दूरमदृश्यमिति नोक्तम्। आसन्नमपि हि किंचिदतिसूक्ष्मत्वान्न 52
दृश्यते। न च तद्दूरमिष्यते दृश्यदेशत्वात्। किमर्थं पुनरेवं भदन्तेन व्याख्यायते। **अतीतादीनां स्वशब्देनाभिहितत्वात्।** अन्यथा हि पुनरुक्तदोषः

---

1 B. ०न्यथात्वं ; C ०न्यघिकी, but corrected in the margin to ०न्यथैको(?) ; U ०न्यधिको ; To. ०न्यत्विको

2 To. मनापं 3 Pā., VIII, 2, 1. 4 To. ईषदर्थेन ञ०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्यात् । **दूरान्तिकत्वं तु तेषामाश्रयवशादिति** । तेषां वेदनादीनाम्, अमूर्तत्वेनादेशस्थत्वात् । तस्मादेवं वक्तव्यम्, दूरेऽदृश्यमानाश्रया वेदनादयः, अन्तिके दृश्यमानाश्रया इति । **औदारिकसूक्ष्मत्वं पूर्ववदिति**, औदारिकं पञ्चेन्द्रियाश्रयम्, सूक्ष्मं मानसमिति ।

चित्तचैत्तानामायमुत्पत्तिं तन्वन्तीत्यायतनानि । द्वयं प्रतीत्य विज्ञानस्योत्पत्तिरिति [1]सर्वेषामायतनत्वसिद्धिः । **एकस्मिन्नाश्रये संताने वेति**, आश्रये समुदायलक्षणे शरीरे, सन्ताने वा चित्तादीनां प्रवाहलक्षणे । **स्वस्या जातेः** । किम्, आकरा इति प्रकृतम् । **सभागहेतुत्वात्**, पूर्वोत्पन्नं चक्षुः पश्चिमस्य सभागहेतुरित्याकरो धातुः । यतो हि सुवर्णाद्युत्पत्तिस्ते तेषामाकराः[2] । **असंस्कृतं न धातुः स्यात्** । न ह्यसंस्कृतमसंस्कृतस्यान्यस्य वा सभागहेतुः । **चित्तचैत्तानां तर्हीति** । किम्, आकरा इति प्रकृतम् । द्वयं प्रतीत्य विज्ञानस्योत्पत्तिरिति सर्वे धातवो विज्ञानस्य ससंप्रयोगस्य प्रत्ययोऽवश्यमालम्बनमधिपतिश्चेत्याकराः ।

राशिपुद्गलवदिति । प्रज्ञप्तिसन्तः, स्कन्धा राशिशब्दवाच्यत्वात्, धान्यराशिवत्, पुद्गलवद्वा । स हि प्रज्ञप्तिसन्पुद्गलः रूपादिप्रज्ञप्तिकारण[3]निरपेक्ष्याग्रह्यमाणस्वभावत्वात्, धान्यराशिवत् । **कार्यभारोद्वहनार्थ इति** । कार्यमेव भारः कार्यभारः, तदुह्यते तेनेत्युद्वहनम्, कार्यभारस्योद्वहनं कार्यभारोद्वहनम् । **शरीरप्रदेशः स लोके स्कन्ध इत्युच्यते** । अनेनापि कार्यभार उह्यते, नामरूपप्रत्ययं षडायतनमित्यादिवचनात् । तस्मात् स्कन्ध इव स्कन्ध इत्यौपचारिकशब्दः । **प्रच्छेदार्थो वा** । अवध्यर्थो वेत्यर्थः । रूपप्रच्छेदो यावद्विज्ञानप्रच्छेद इति । **तदेतदुत्सूत्रमिति** । तदेतदुभयं कार्यभारोद्वहनार्थः प्रच्छेदार्थश्चेति । उत्क्रान्तं सूत्रादुत्सूत्रम् । **सूत्रं हीति** विस्तरेण तत्प्रतिपादयति । **प्रत्येकमिति** विस्तरः । कथमित्याह, **सर्वमेतदतीतादिरूपमेकश एकैकं रूपस्कन्ध इति** । समुदायेन समुदायिद्रव्यमुक्तम्, तेषां ह्यतीतादीनां रूपाणां स राशिरित्यभिप्रायः । सूत्रेऽप्येवमेवोक्तम्, पृथिवीधातुः कतमः, केशा रोमाणीति विस्तरः । एकैकं केशादिद्रव्यं पृथिवीधातुरिति विज्ञायते । अयं च परिहारः कार्यभारोद्वहनार्थप्रच्छेदार्थपक्षयोरपि शक्यते वक्तुम् । **न शक्यमेवमिति** विस्तरः । ऐकध्यमभिसंक्षिप्येति वचनातिरेकादेकैकं रूपस्कन्ध इति न शक्यते विज्ञातुम् । यदि ह्येवमर्थोऽभविष्यत्तत्सर्वं रूपस्कन्ध इत्येवावक्ष्यत्, नार्थम्, ऐकध्यमभिसंक्षिप्येति वचनेन ।

---

1 B. सर्वायतनसिद्धिः 2 B. ०माकरः

3 To. निरपेक्षा०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्माद्राशिवदेव स्कन्धाः प्रज्ञप्तिसन्त इति स्थापनापक्ष आचार्यस्य। द्रव्यसद्रूपप्रतिपत्तिस्तु स्कन्धनिर्देशे तत्समुदायित्वादित्यवगन्तव्यम्। **रूपीण्यपीति** विस्तरः। रूपिग्रहणमरूपिविशेषणार्थम्। अरूपि हि मनआयतनमसंहतमपि कारणभावं बिभर्ति। रूपीण्यपि चक्षुरादीन्यायतनानि समुदितान्येव चित्तचैत्ताय्द्वारतां गच्छन्ति नासमुदितानीति समुदायलक्षणत्वात् स्कन्धवत्प्रज्ञप्तिसन्ति स्युः। संचिताश्रयालम्बना हि पञ्च विज्ञानकाया इति। **न' एकशः समग्राणां कारणभावादिति**। नैतदेवम्। कस्मात्' एकशः प्रत्येकं समग्राणां समुदितानां कारणत्वात्। यस्माद्बहूनामेषां चक्षुरादिपरमाणूनां परस्परमपेक्षमाणानामेकैकशः कारणभावः' न [1]त्वसंहतानाम्। तद्यथा दार्वाकर्षणे बहूनामाकृष्टॄणां प्रत्येकमसामर्थ्यम्' समुदितानां तु परस्परमपेक्ष्यमाणानां सामर्थ्यम्। यथा वा केशाः पृथक्पृथगवस्थिता न समर्थास्तैमिरिकचक्षुर्विज्ञानकरणे' समुदितास्त्वसंयुक्ता अपि समर्थाः' तद्वच्चक्षुरादीन्द्रियपरमाणवो रूपादिविषयपरमाणवश्च चक्षुरादिविज्ञानोत्पादने प्रत्येकमसमर्थाः' समुदितास्तु समर्थाः। शक्तिर्हि भावानां तादृश्यवगन्तव्या। **विषयसहकारित्वाद्वेति**। यदि बहूनामायद्वारभाव इति समुदायायतनत्वं स्यात्' न द्रव्यायतनत्वम्' इन्द्रियविषयपरमाणूनां समुदितानामायद्वारभाव इति तत्समुदायायतनत्वं स्यात्' न पृथगायतनत्वं स्यात्। इष्यते च पृथगायतनत्वम्' द्वादशायतनानीति सूत्रात्। साधनं चात्रोपतिष्ठते। ये सहकारिणो न तैः सह समुदायात्मकायतनभूताश्चक्षुरायतनसमुदायद्रव्यपरमाणवः' चक्षुर्विज्ञानकारणत्वात्' चक्षुरायतनरूपायतनसमुदायद्रव्यपरमाणुवत्। यथा चक्षुरायतनसमुदायद्रव्यपरमाणव एवं यावत्कायायतनसमुदायद्रव्यपरमाणवो योज्याः। **विभाषायां तूच्यत** इति। अनेनापि प्रज्ञप्तिसन्तः स्कन्धा इति व्याचष्टे। अयं तु विशेषः' अद्रव्यसन्तोऽपि ते तत्रोपचारेण प्रदर्श्यन्त इति विशेषार्थस्तुशब्दः। **स्कन्धप्रज्ञप्तिमपेक्षत** इति। स्कन्ध इति प्रज्ञप्तिमपेक्षते। राशिरिति प्रज्ञप्तिमपेक्षत इत्यर्थः। **परमाणुरेकस्य धातोरिति**। दशानां चक्षुरादीनां रूपिणां धातूनामन्यतमस्य प्रदेशः। एवमायतनानामेषामेवान्यतमस्य रूपस्कन्धस्य च प्रदेशः। कस्मात्' न हि प्रज्ञप्तावपेक्षितायां[2] प्रदेशिनि वृत्तः[3] शब्दः प्रदेशे व्यवस्थाप्यते। **अथ [4]नापेक्षते**। किम्'

---

1 To. omits तु
2 Mss. & B. प्रज्ञप्त्यानपेक्षितायां
3 B. प्रदेशिप्रवृत्तः ; To. प्रदेशिनि प्रवृत्तः
4 Mss. अथानपेक्षते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्कन्धप्रज्ञप्तिमित्यधिकृतम् । स आह[1] ' परमाणुरेको धातुरिति विस्तरः । स एकैकस्तेषामायतनधातूनां योऽन्यतम उक्तो रूपस्कन्धश्च । **भवति हि प्रदेशेऽपि प्रदेशिवदुपचार** इति । प्रदेशेऽपि परमाणावन्यतमरूपायतनधातुवद्रूपस्कन्धवच्चोपचारः । तत्र तस्येवेति[2] वतिः । **यथा पटैकदेशे दग्धे पटो दग्ध** इति । यथा पटशब्दः समुदाये प्रवृत्तः प्रदेशेऽप्युपचर्यते पटैकदेशे' तद्वत्स्कन्धशब्दोऽतीतादिरूपसमुदाये वृत्तः[3]प्रदेशेऽपि परमाणावुपचर्यत इति । स्कन्धा एव प्रज्ञप्तिसन्तो नायतनधातव इति । रूपादीनां स्कन्धा इति कृत्वा । यदा तु रूपाण्येव स्कन्धा इति समासस्तदा द्रव्यसन्तः स्कन्धा इत्यभिप्रायः ।

इदमिह विचार्यते । किमत्र कारणं यदिन्द्रियपरमाणूनां विषयपरमाणूनां च विज्ञानोत्पत्तये तुल्येऽप्यन्योन्यसापेक्षत्वे न द्वयानामेषां केवलेन्द्रियपरमाणुवदेकायतनत्वं व्यवस्थाप्यते । यस्माच्चक्षुरिन्द्रियादिपरमाणवः सर्वे स्वविज्ञानोत्पत्तौ साधारणानि कारणानि भवन्ति । न तु तथा विषयपरमाणवः । तथा हि चक्षुरिन्द्रियपरमाणवो नीलविषयविज्ञानोत्पत्तावपि कारणं भवन्ति' पीतादिविज्ञानोत्पत्तावपि[4] । नीलविषयपरमाणवस्तु स्वविज्ञानोत्पत्तावेव कारणं भवन्ति' न पीतादिविज्ञानोत्पत्तौ'इत्यतश्चक्षुरिन्द्रियपरमाणुभिस्तद्विषयपरमाणूनामतुल्यवर्तित्वात् पृथक्स्थानावस्थितत्वात्' न चक्षूरूपपरमाणूनामेकायतनत्वव्यवस्थानत्वं युज्यते । एवं यावत्कायेन्द्रियस्प्रष्टव्यपरमाणूनामेकायतनत्वव्यवस्थानं न युज्यत इति वक्तव्यम् ।

मोहेन्द्रियरुचित्रैधात्

इति । संमोहप्रज्ञाधिमोक्षत्रैधादित्यर्थः[5] । **त्रयः प्रकारास्त्रैधमिति** । त्रिधैव त्रैधमिति स्वार्थेऽण्प्रत्यय इत्येके । त्रिधाभावस्त्रैधमिति भावेऽण्प्रत्यय इत्यपरे । मोहेन्द्रियरुचीनां त्रैधम्' तस्मादिति । **पिण्डात्मग्रहणत** इति । केचिच्चैत्तान् पिण्डतो गृहीत्वा तानेवात्मतो[6] गृह्णन्ति' पिण्डग्राहे सत्यात्मग्राहप्रवृत्तेः । तेषां स्कन्धदेशना । तस्यां हि वेदनासंज्ञासंस्कारभेदेन त्रिधा चैत्ता देशिताः । नायमेकः पिण्डः' चैत्तविशेषा इहेत्यात्मग्राहः प्रतिपक्षितो भवति । अथवा पिण्डरूपोऽयमात्मभावः' स चात्मा वेदयिता संज्ञाता चेतयितेति केचित्

---

1 B. स तर्हि 2 Pā., V, 1, 116 3 B. ०दायप्रवृत्तः. To. ०दाये प्रवृत्तः
4 B. adds साधारणानि कारणानि भवन्ति. 5 Mss. ०मोक्ष्य०
6 B ०त्मना

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संमूढाः। तेषां स्कन्धदेशना। नायमात्मरूपः पिण्डः' चैत्ता इमे वेदनासंज्ञासंस्काराः प्रवर्तन्त इत्यात्मग्राहः प्रतिपक्षितो भवति। **केचिद्रूप एवेति**' पिण्डात्मग्रहणतः संमूढा इत्यधिकृतम्। तेषामायतनदेशना। तस्यां हि रूपं चक्षुरादिभेदेन बहुधा विभक्तम्' चैत्तास्त्वेकधैव[1] धर्मायतनत्वेन ' चित्तं च मनआयतनत्वेनेति। **केचिद्रूपचित्तयोरिति**' संमूढाः पिण्डात्मग्रहणात इत्यधिकृतमेव। तेषां धातुदेशना। तस्यां हि रूपं चक्षुरादिभेदेन बहुधा विभक्तम्' चित्तं चक्षुर्विज्ञानादिधातुभेदेन। न तु चैत्ताः' धर्मधातुत्वेनैव देशितत्वादिति। तया रूपचित्तपिण्डग्राहसंमोहः प्रतिपक्षितो भवति।

इन्द्रियाण्यपीति विस्तरः। त्रिविधः पुद्गलस्तीक्ष्णमध्यमृद्विन्द्रियत्वात्। अथवा त्रिविधः पुद्गल उद्घटितज्ञोऽविपञ्चितज्ञः पदपरम[2] इति। तत्र तीक्ष्णेन्द्रियाणां स्कन्धदेशना। ते हि तीक्ष्णेन्द्रियत्वात् स्कन्धभेदेनैवायतनधातुभेदं प्रतिपत्तुं शक्नुवन्ति। यथोक्तम्। यद्भिक्षो न त्वं स ते धर्मः प्रहातव्य इति ' आज्ञातं भगवन्नित्याह। यथा कथमस्य भिक्षो संक्षिप्तेनोक्तस्यार्थमाजानासि' रूपं भदन्त नाहम् ' स मे धर्मः प्रहातव्य इति विस्तरः। मध्येन्द्रियाणामायतनदेशना। ते हि मध्येन्द्रियत्वान्मध्येनैव नातिविस्तीर्णेनायतनप्रभेदेन धातुप्रभेदं प्रतिपत्तुं शक्नुवन्ति। न तु संक्षिप्तेन स्कन्धप्रभेदेन। मृद्विन्द्रियाणां धातुदेशना। ते हि मृद्विन्द्रियत्वान्नाविभक्तं स्वबुद्धिसामर्थ्येन प्रतिपत्तुं शक्नुवन्ति। **रुचिरपि त्रिविधेति**। पूर्वाभ्यासयोगाद्रुचेस्त्रैविध्यम्। अथवा शमथचरितानां संक्षिप्ता रुचिः। शमथविपश्यनाचरितानां मध्या रुचिः। विपश्यनाचरितानां विस्तीर्णा रुचिरिति ॥२०॥

[विवादमूलसंसारहेतुत्वात् क्रमकारणात्।
चैत्तेभ्यो वेदनासंज्ञे पृथक् स्कन्धौ निवेशितौ ॥२१॥]

किं पुनः कारणमिति विस्तरः। ननु च कारणमुक्तम्। पिण्डात्मग्रहणतश्चैत्तसंमूढानां स्कन्धदेशनेति। सत्यमुक्तम् ' चैत्तास्तेषां विभक्ता इति।

वेदनासंज्ञे

एव तु संस्कारस्कन्धात्

पृथक्

स्कन्धीकृते[3] 'न पुनरन्य इति किमत्र कारणम्' **कामाध्यवसानमिति** विस्तरः।

---

1 Mss. ०स्त्वेकधैव ; To ०स्त्वेकध्यमेव
2 B. & C पदंपरम
3 To स्कन्धीकृतः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कामेषु च दृष्टिषु चाभिष्वङ्गः। **तयोर्विवादमूलयोरध्यवसानयोर्वेदनासंज्ञे यथाक्रमं प्रधानहेतुरिति।** प्रधानग्रहणादविद्यादयोऽप्रधानहेतव इत्यर्थत उक्तं भवति। **वेदनास्वादवशाद्धि कामानभिष्वजन्ते गृहिणः। विपरीत-संज्ञावशाच्च दृष्टीः**' किम्' अभिष्वजन्त इत्यधिकृतम्। अधर्मे धर्मसंज्ञिनो धर्मे चाधर्मसंज्ञिनोऽनात्मादिषु चात्मसंज्ञिनस्तास्ता दृष्टीः[1] शीलव्रतपरामर्शा-दीरभिष्वजन्ते। के ते' प्रायेण प्रव्रजिताः। **वेदनागृद्धो हीति** विस्तरः। वेदनासक्तश्चतुर्भिर्विपर्यासैर्विपर्यस्तः संसारे जन्मपरंपरां करोति।

क्रमकारणात्

इति। चत्वारि कारणानि स्कन्धानुक्रमे वक्ष्यन्ते।

यथौदारिकसंक्लेशभाजनाद्यर्थधातुतः[2]

इति। रूपं हि सप्रतिघत्वात् सर्वौदारिकम्' अरूपिणां वेदना 'प्रचारौदारिकतया। तथा हि व्यपदिशन्ति ' हस्ते मे वेदना' पादे मे वेदनेति। द्वाभ्यामौदा-रिकतरा संज्ञा' विज्ञानात् संस्कारा इत्यतो यथौदारिकं तत्पूर्वमुक्तमिति प्रथमं कारणम्। अथवानादिमति संसारे स्त्रीपुरुषा अन्योन्यं रूपाभिरामाः। ते च वेदनास्वादगर्धात्। तद्गर्धः संज्ञाविपर्यासात्। तद्विपर्यासः क्लेशैः। चित्तं च तत्संक्लिष्टमिति यथासंक्लेशं क्रम इति द्वितीयम्। भाजनाद्यर्थेन वा भाजन-भोजनव्यञ्जनपक्तृभोक्तृभूता हि रूपादयः स्कन्धा इति तृतीयम्। धातुतो वा। कामगुणरूपप्रभावितो हि कामधातुः। वेदनाप्रभावितानि ध्यानानि। संज्ञा-प्रभावितास्त्रय आरूप्याः। संस्कारमात्रप्रभावितं भवाग्रम्। एता विज्ञानस्थितयः' तासु च प्रतिष्ठितं विज्ञानमिति क्षेत्रबीजसंदर्शनार्थः स्कन्धानुक्रम इति चतुर्थं कारणम्। अत एव च क्रमकारणाद् वेदनासंज्ञे पृथक् स्कन्धीकृते यत एते औदारिकतरे संक्लेशानुक्रमहेतू भोजनव्यञ्जनभूते ' तत्प्रभावितं च धातुद्वय-मिति ॥२१॥

---

1 To ०स्ता दृष्टी:

2 Kārikā, I, 22.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[स्कन्धेष्वसंस्कृतं नोक्तमर्थायोगात् क्रमः पुनः ।
यथौदारिकसंक्लेशभाजनाद्यर्थधातुतः ॥२२॥]

न तावदेष्वेवान्तर्नेतुं शक्यते ।

अर्थायोगात्

इति । रूपणादेरर्थस्यायोगादसंभवात् । रूपस्वभावं यावद्विज्ञानस्वभावमिति वा न शक्यमेष्वेव पञ्चस्कन्धेष्वन्तर्नेतुम् । अतत्स्वाभाव्यात् । न चापि षष्ठस्कन्धो वक्तुं शक्यते। कुतः । अर्थायोगात् । अतीताद्यर्थायोगादित्यर्थः । ननु च बहुत्वादसंस्कृतानामसंस्कृतस्कन्धोऽन्यो योच्यते । किमतीताद्यर्थेनेति । एतच्चायुक्तम् । असंस्कृतानां देशसंनिकर्षाभावेनाभिसंक्षेपायोगात् । संक्लेशवस्तुज्ञापनार्थमिति विस्तरः । न संक्लेशवस्तु । अनास्रवत्वात् । न व्यवदानवस्तु । असंस्कृतत्वात् । व्यवदानहेतुर्हि व्यवदानवस्त्वित्यभिप्रायः । अथवा रूपस्कन्ध इत्युक्ते यावद्विज्ञानस्कन्ध इत्युक्ते संक्लेशवस्तु व्यवदानवस्तु च रूपस्कन्धो यावद्विज्ञानस्कन्ध इति विज्ञायते । न त्वसंस्कृतस्कन्ध इत्युक्ते संक्लेशव्यवदानवस्तु विज्ञायते । इति न संभवति असंस्कृतस्कन्ध इति । तेषां धात्वायतनेष्वप्येष प्रसङ्ग इति । तेषामेवंवादिनाम् । यथा घटोपरमो न घटः । एवं धातूपरमो न धातुः । आयतनोपरमो नायतनमिति धर्मधात्वायतनयोरप्यसंस्कृतं न व्यवस्थापितं स्यात् । सर्वधर्मसंग्रहश्च धात्वायतनेष्वभिप्रेत [1]इत्ययुक्तमेतत् ।

उक्तः स्कन्धानामन्यः प्रकारः ।

क्रमः पुनः

इत्यन्यप्रकारवचनापेक्षः पुनःशब्दोपन्यास इति दर्शयति । सर्वौदारिकमिति । सर्वेभ्यो वेदनादिभ्य औदारिकं रूपम् । सनिदर्शनसप्रतिघत्वादियोगात् । अरूपिणां वेदनादीनाम् । निर्धारणे षष्ठी । वेदना औदारिकी । प्रचारौदारिकतया समुदाचारौदारिकतयेत्यर्थः । द्वाभ्यां संस्कारविज्ञानाभ्यामौदारिकी संज्ञा । निमित्तपरिच्छेदेन सुज्ञातत्वात् । विज्ञानात्संस्कार औदारिकः । सुखी स्यां न दुःखी स्यामित्यभिसंस्कारलक्षणत्वात् । विज्ञानं तु सर्वसूक्ष्मम् । उपलब्धिमात्रलक्षणत्वात् । यथौदारिकं च विनेयानामर्थप्रतिपादनं न्याय्यमित्येवं

1 B. इत्यप्ययुक्ता०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्कन्धानुक्रमः। **ते च वेदनास्वादगर्धात्** । ते च स्त्रीपुरुषा वेदनास्वादसक्तै-रन्योन्यं रूपाभिरामा भवन्ति। **तद्गर्ध** इति। वेदनागर्धः। **संज्ञाविपर्यासा-दिति**। [1]नित्यादिकान्निमित्तोद्ग्रहणात्। सुखापि हि[2] वेदना संस्कारविपरिणाम-दुःखतया दुःखा। **भाजनभोजनमिति** विस्तरः। रूपं भाजनभूतं वेदनाश्रय-त्वात्। वेदना भोजनभूता आस्वाद्यत्वात्। संज्ञा व्यञ्जनभूता। वेदनां तन्नि-मित्तोद्ग्रहणेन व्यञ्जयतीति कृत्वा। संज्ञावशेन वा वेदना रोचत इति कृत्वा व्यञ्जनभूता संज्ञा। [3]वेदनाकर्तृभूता विपाकवेदनामभिसंस्कृत्योपनयनात्। विज्ञानं भोक्तृभूतं तदनुग्रहादिति भाजनाद्यर्थेन वानुक्रमः। **धातुतो वेति** विस्तरः। **कामगुणा एव रूपाणि**। **तैः प्रभावितः** प्रकर्षितः[4] **कामधातुः**। **वेदनाप्रभा-वितानि ध्यानानि**। सौमनस्यसुखेन्द्रियप्रभावितं प्रथमं ध्यानम्। सौमनस्येन्द्रिय-प्रभावितं द्वितीयम्। सुखेन्द्रियप्रभावितं तृतीयम्। उपेक्षेन्द्रियपरिशुद्धिप्रभावितं चतुर्थं ध्यानम्। **संज्ञाप्रभावितास्त्रय आरूप्याः**। आकाशसंज्ञाप्रभावितमा-काशानन्त्यायतनम्। विज्ञानसंज्ञाप्रभावितं विज्ञानानन्त्यायतनम्। आकिंचन्य-संज्ञाप्रभावितमाकिंचन्यायतनम्। **संस्कारमात्रप्रभावितं भवाग्रम्**। तत्र हि चेतना अशीतिं कल्पसहस्राण्यायुराक्षिपति। विज्ञानं कस्मात्सर्वेषां पश्चादुक्तमित्यत आह। **एता विज्ञानस्थितय** इति विस्तरः। चतस्रो विज्ञानस्थितयः। रूपो-पगा विज्ञानस्थितिः कामधातुः। वेदनोपगा चत्वारि ध्यानानि। संज्ञोपगा [5]त्रय आरूप्याः। संस्कारोपगा भवाग्रम्। **तासु चतसृषु** विज्ञानस्थितिषु **प्रतिष्ठितं विज्ञानम्**। तदाश्रितत्वात् [6]सर्वपश्चादुक्तम्। **इत्येवं क्षेत्रबीजसंदर्शनार्थः स्कन्धानुक्रम** उक्तो भवति **अत एव च पञ्च स्कन्धा नाल्पीयांसो न भूयांस** इति। यथादारिकादिभिः कारणैर्नाल्पीयांसो न भूयांस इत्यर्थः ॥२२॥

[प्राक् पञ्च वर्तमानार्थ्याद् भौतिकार्थ्याच्चतुष्टयम्।
दूराशुतरवृत्त्यान्यद् यथास्थानं क्रमोऽथ वा ॥२३॥]

पञ्च वर्तमानविषयत्वात् पूर्वमुक्तानीति। यानि वर्तमानविषयाणि तानि परिस्फुटविषयाणि। परिस्फुटविषयाणि च सुगमानीति पूर्वमुक्तानि। वर्तमान-विषयाणि च पूर्ववृत्तीनि भवन्त्येवं च पूर्वमुक्तानि। **मनस्त्वनियतविषयमित्या-**

---

1 B. नित्यादिकनिमित्तो°

2 B. omits हि.

3 B. & To. following Tib. चेतनापक्त्°

4 A and V. प्रकुर्वित:

5 Mss. °स्त्रय

6 B. सर्वेषां ; C सर्वं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुलविषयत्वादसुगमं पश्चाद्वृत्त च प्रायेण। कथमित्याह। **किंचिद्वर्तमानविषयं किंचिद्यावत्त्र्यध्वानध्वविषयमिति**। यावच्छब्देन किंचिदतीतविषयं किंचिदनागतविषयं किंचित्त्र्यध्वविषयम्। सर्वधर्मा अनात्मान इति यथा। किंचिदनध्वविषयमसंस्कृतविषयमित्यर्थः। एवमनियतविषयं मनः। तथा च न तत्सुगममिति पश्चादुक्तम्। सुगमं हि लोके पूर्वमुपदिश्यमानं दृश्यते।

[1]भौतिकार्थ्याचतुष्टयम्

इति। चक्षुरादिचतुष्टयं [2]रूपाद्युपादायरूपविषयम्। तस्मात्तत्कायात् पूर्वमुक्तम्। **कायस्य त्वनियतो विषयः। कदाचिद् भूतानि कदाचिद् भौतिकं** यदि व्यवच्छेदग्रहणम्। **कदाचिदुभयं** यद्यव्यवच्छेदग्रहणम्। **शेषं पुनरितरस्माद्यथायोगम्**

दूराशुतरवृत्त्या

पूर्वमुक्तमिति। शेषं चक्षुरादि। तदितरस्मात्सम्भवतो दूराशुतरवृत्त्या। दूरवृत्त्या दूरतरवृत्त्या आशुतरवृत्त्येति विभज्य। द्वयं द्वयात्। एकं चैकस्मात्। पुनरेकं चैकस्मादिति योज्यमित्यर्थः। कथमित्याह। **चक्षुःश्रोत्रं हि दूरविषयम्**। तत्पूर्वमुक्तं द्वयाद् घ्राणजिह्वातः। **तयोरपि** चक्षुःश्रोत्रयो**श्चक्षुषो दूरतरे वृत्तिः। पश्यतोऽपि दूरान्नदीं तच्छब्दाश्रवणात्। अतस्तत** पूर्वमुक्तमिति वर्तते। [3]तच्चक्षुः श्रोत्रात्पूर्वमुक्तम्। **तयोराशुतरवृत्तित्वा**दिति। तयोर्घ्राणजिह्वयोर्घ्राणं **पूर्वमुक्तं** जिह्वायाः। कथमित्याह। **अप्राप्तस्यैव जिह्वां भोज्यस्य गन्धग्रहणादिति**।

इदमिह विचार्यते। घ्राणजिह्वे प्राप्तविषयग्राहिण्यौ। कथम्। भोज्यस्थो गन्धस्तेन घ्राणेन गृह्यते। न त्वभोज्यस्थो[4] गृह्यते। वायोस्तु गन्धान्तरमुद्भवति। भोज्यावयवेन वा सूक्ष्मेण सहागतो गन्धो गृह्यते। निरुच्छ्वासस्य गन्धाग्रहणात्। न तर्हीदं वक्तव्यम्। अप्राप्तस्यैव जिह्वां भोज्यस्य गन्धग्रहणादिति[5]। यत्तत्पिण्डरूपं भोज्यं तज्जिह्वामप्राप्तमित्यभिसंधायवचनाददोषः। एवं ह्याशुतरवृत्ति घ्राणं यद्भोज्यावयवसहागतमपि गन्धं जिघ्रति। जिह्वा तु भोज्यावयवसहागतं रसं नास्वादयति। पिण्डभोज्यसहागतमेव तु रसमास्वादयतीति न साशुतरवृत्तिरित्यवगन्तव्यम् ॥२३॥

---

1 B. and To. भौतिकार्थाः०

2 B. omits रूपादि.

3 To. omits तच्च.

4 Mss. ०भौज्यस्थौ B. तेनाभौज्यस्थो

5 B. adds चेत्.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[विशेषणार्थं प्राधान्याद् बहुधर्माग्रसंग्रहात् ।
एकमायतनं रूपमेकं धर्माख्यमुच्यते ॥२४॥]

कथं

विशेषणार्थम्

इति । प्रतिपादयन्नाह ' यथा गम्येत प्रत्येकमिति विस्तरः । यथा विज्ञायेत' एकैकश एषां दशानामायतनत्वम् 'चक्षुरादीनां पञ्चानां विषयित्वेन रूपादीनां च पञ्चानां विषयत्वेन व्यवस्थानात् । न समस्तानामायतनत्वम्' रूपायतनमित्येकमेवेति । तथा च परस्परतो विशेषणं न स्यात् । यदि विशेषणार्थं नामान्तराण्युच्यन्ते नवानाम्' चक्षुरायतनस्य यावत्कायायतनस्य शब्दायतनस्य यावत्स्प्रष्टव्यायतनस्येति ' रूपायतनस्यापि कस्मान्नामान्तरं नोच्यते । अत आह । चक्षुरादिभिश्च विशेषितैर्यन्न चक्षुरादिसंज्ञकं रूपं च तद्रूपायतनं ज्ञास्यत इत्यस्य नामान्तरं नोच्यते । तद्यथा सर्वासु गोष्वङ्कितासु या गौर्नाङ्किता तस्या अनङ्कनमेवाङ्कनं भवति ' तद्वत् ।

प्राधान्यात्

इति । त्रिभिः कारणैः रूपायतनस्य प्राधान्यम् । [1]पाण्यादिसंस्पर्शैर्बाधनालक्षणाद्रूपणात् । इदमिहामुत्रेति देशनिदर्शनरूपणात्[2] । इदमेव रूपमिति लोकप्रतीतत्वाच्च । विशेषणार्थमेकैकं[3] धर्मायतनमुक्तमिति । कथं विशेषणार्थम् । यथा गम्येत प्रत्येकमेषां द्वादशानामायतनत्वम् ' विषयिविषयत्वेन व्यवस्थानाद् ' न समस्तानामिति । चक्षुरादिभिश्च विशेषितैर्यन्न चक्षुरादिसंज्ञकं धर्मश्च तद्धर्मायतनं ज्ञास्यत इति तस्य नामान्तरं नोच्यते । वेदनादीनामिति 'आदिशब्देन संज्ञासंस्काराविज्ञप्त्यसंस्कृतानां ग्रहणम् । विंशतिप्रकारत्वेनेति ।

रूपं द्विधा विंशतिधा[4]

इति वचनात् । चक्षुस्त्रयगोचरत्वाच्च । मांसचक्षुरस्मदादीनाम् । दिव्यं चक्षुर्देवानाम् । [5]आर्यं प्रज्ञाचक्षुरार्याणाम्' अनास्रवं ज्ञानं सत्यचतुष्टयालम्बनम् । अतो रूपमेव चक्षुस्त्रयगोचरं न चक्षुरादयः । तस्मात्तदेव रूपायतनमुक्तं नान्यानि ॥२४

---

1 B. रूपपाण्यादिसंस्पर्शै बाधना
2 B. adds च
3 B. and To. following Tib. ०मेवैकम्
4 Kārikā, I, 10.
5 B. आर्यप्रज्ञा०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

**[धर्मस्कन्धसहस्राणि यान्यशीतिं जगौ मुनिः ।
तानि वाङ्नाम वेत्येषां रूपसंस्कारसंग्रहः ॥२५॥]**

येषां वाक्स्वभावं बुद्धवचनमिति। येषां सौत्रान्तिकानां वाग्विज्ञप्तिस्वभावं तेषां **तानि रूपस्कन्धसंगृहीतानि**। [1]शब्दायतनस्य रूपस्कन्धसंगृहीतत्वात्। **येषां नामस्वभावमिति।** येषां निकायान्तरीयाणां चित्तविप्रयुक्तं नामास्ति **तेषां संस्कारस्कन्धेन संगृहीतानि**। संस्कारस्कन्धसंगृहीतत्वान्नाम्नः। आभिधार्मिकाणां तूभयस्वभावं बुद्धवचनमिष्टम्। तथा हि ज्ञानप्रस्थान उक्तम्। कतमद्बुद्धवचनम्। तथागतस्य या वाग् वचनं व्यवहारो गीर्निरुक्तिर्वाक्पथो वाग्घोषो वाक्कर्म वाग्विज्ञप्तिः। बुद्धवचनं कुशलं वक्तव्यम्। [2]अव्याकृतं वक्तव्यम्। स्यात् कुशलम्। स्यादव्याकृतम्। कतरत्कुशलम्। कुशलचित्तस्य तथागतस्य वाचं भाषमाणस्य या वाग्यावद्वाग्विज्ञप्तिः। कतरदव्याकृतम्। अव्याकृतचित्तस्य तथागतस्येति पूर्ववत्। पुनस्तत्रैवानन्तरमुक्तम्। बुद्धवचनं नाम क एष धर्मः। नामकायपदकायव्यञ्जनकायानां या अनुपूर्वरचना अनुपूर्वस्थापना अनुपूर्वसमायोग इति। तेषामाभिधार्मिकाणां रूपस्कन्धेन संस्कारस्कन्धेन च [3]तान्यशीतिर्धर्मस्कन्धसहस्राणि संगृहीतानि। सातिरेकाणि मेऽ[4]शीतिर्धर्मस्कन्धसहस्राणि भगवतोऽन्तिकात्संमुखमुद्गृहीतानीति सूत्रवचनम्। [5]चतुरशीतिर्धर्मस्कन्धसहस्राणीति निकायान्तरे सूत्रपाठः ॥२५॥

**[शास्त्रप्रमाण इत्येके स्कन्धादीनां कथैकशः ।
चरितप्रतिपक्षस्तु धर्मस्कन्धोऽनुवर्णितः ॥२६॥]**

शास्त्रप्रमाण इत्येके

इति। शास्त्रस्य प्रमाणं शास्त्रप्रमाणम्। शास्त्रप्रमाणं प्रमाणमस्य सोऽयं धर्मस्कन्धः शास्त्रप्रमाण इत्येके तावदाहुः। **तच्च षट्सहस्राणीति।** तच्च शास्त्रं धर्मस्कन्धसंज्ञकं ग्रन्थप्रामाण्येन षट्सहस्राणीति। तानि त्वशीतिर्धर्मस्कन्धसहस्राण्यन्तर्हितानि। एकं त्वेतदवशिष्यत इति कथयन्ति।

स्कन्धादीनां कथैकशः

अपर आहुरिति वाक्याध्याहारः। स्कन्धादीनामेकैका कथा धर्मस्कन्धः।

---

1 B. शब्दायतनरूप०   2 B. अथाव्याकृतं   3 To. तान्यशीतिधर्म०
4 To. शीतिधर्म०   5 To. चतुरशीतिधर्म०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ते च धर्मस्कन्धा अशीतिसहस्रसंख्या व्याख्यायन्ते। प्रतीत्यसमुत्पादादीनि चेह व्याख्यास्यन्ते। [1]प्रणिधिज्ञानारणादीनामिति' आदिग्रहणेन संग्रहवस्तु-कर्मपथाशुभानापानस्मृत्यादीनि गृह्यन्ते।

चरितप्रतिपन्नस्तु धर्मस्कन्धोऽनुवर्णितः

इति। तुशब्दः पूर्वोक्तपक्षनिराकरणार्थोऽवधारणार्थो वा। **रागद्वेषमोहमानादिचरितभेदेनेति।** आदिशब्देन दृष्टिविचिकित्सादीनां ग्रहणम्। केचित्सत्त्वा रागचरिताः केचिद्द्वेषचरिताः। केचिन्मोहचरिताः। केचिन्मानचरिताः। केचिद्दृष्टिचरिताः। केचिद्विचिकित्साचरिताः। केचिद्रागद्वेषचरिताः। केचिद्रागद्वेषमोहचरिताः। केचिद्रागाशया द्वेषप्रयोगाः केचिद्द्वेषाशया रागप्रयोगाः। केचित्कृत्रिमरागा निगृह्यद्वेषाः। केचित्कृत्रिमद्वेषा निगृह्यरागा इति। **तेषां प्रतिपक्षेण भगवता तान्युक्तानीति** ॥२६॥

[तथान्येऽपि यथायोगं स्कन्धायतनधातवः।
प्रतिपाद्या यथोक्तेषु सम्प्रधार्य स्वलक्षणम् ॥२७॥]

येऽप्यन्ये

स्कन्धायतनधातवः

इति विस्तरः। येऽपि स्कन्धायतनधातवस्तेऽप्येष्वेव स्कन्धायतनधातुषु

प्रतिपाद्याः

प्रवेशयितव्याः। **स्वं स्वं स्वभावमेषां यथा व्यवस्थापितमस्मिन् शास्त्रे विमृश्य** ' स्कन्धाः स्कन्धेषु प्रतिपादयितव्याः ' आयतनान्यायतनेषु ' धातवो धातुषु। **शीलस्कन्धो रूपस्कन्धसंगृहीत** इति ' कायवाग्विरतिरूपस्वभावत्वाच्छीलस्कन्धस्य। **शेषाः संस्कारस्कन्धेनेति** ' समाध्यादीनां चैतसिकत्वात्। विमुक्तिरिहाधिमोक्षोऽभिप्रेतः ' विमुक्तिज्ञानदर्शनं च प्रज्ञाविशेष एवेति। **अष्टावलोभस्वभावत्वाद्धर्मायतनेनेति।** कतमान्यष्टौ। पृथिव्यप्तेजोवायुनीलपीतलोहितावदातकृत्स्नायतनानि तानि चालोभस्वभावान्यपदेक्ष्यन्ते'

अलोभोऽष्टौ[2]

इति। अलोभश्च धर्मायतनेऽन्तर्भवति। तेन तत्संग्रहः। **सपरिवाराणि तु पञ्चस्कन्धस्वभावत्वान्मनोधर्मायतनाभ्याम्**' किम्' संगृहीतानि। तस्यालोभस्य परिवारोऽनुपरिवर्ति रूपं रूपस्कन्धः ' वेदनासंज्ञे वेदनासंज्ञास्कन्धौ ' [3]चेतना-

1 Mss. प्रणिधिज्ञानां   2 Kārikā, VIII, 36.   3 B. वेदनादयः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दयः संप्रयुक्ता जात्यादयश्च विप्रयुक्ताः संस्कारस्कन्धः । विज्ञानं चात्र कलापे विज्ञानस्कन्ध इति पञ्चस्कन्धस्वभावानि तानि भवन्ति । नवमदशमे त्वाकाशानन्त्यायतनविज्ञानानन्त्यायतनकृत्स्ने पश्चाद्वक्ष्येते । **तथाभिभ्वायतनानीति** । तान्यलोभस्वभावत्वाद्धर्मायतनेन। सपरिवाराणि तु पञ्चस्कन्धस्वभावत्वान्मनोधर्मायतनेन[1] पूर्ववद्व्याख्यातव्यानि । **आकाशविज्ञानानन्त्यायतनकृत्स्ने चत्वारि चाकाशानन्त्यायतनादीनि** । [2]आकाशविज्ञानाकिंचन्यनैवसंज्ञानासंज्ञायतनानि । **चतुःस्कन्धस्वभावत्वान्मनोधर्माभ्यां संगृहीतानि** । न हि तत्र रूपस्कन्धोऽस्ति । **पञ्च विमुक्त्यायतनानीति** विस्तरः । सूत्र उक्तम् । पञ्चेमानि विमुक्त्यायतनानि । कतमानि पञ्च । इह भिक्षो[3] शास्ता धर्मं देशयति अन्यतरान्यतरो वा विज्ञो गुरुस्थानीयः सब्रह्मचारी । यथा यथास्य शास्ता अन्यतरान्यतरो वा विज्ञो गुरुस्थानीयः सब्रह्मचारी धर्मं देशयति तथा तथा तेषु धर्मेष्वर्थप्रतिसंवेदी भवति धर्मप्रतिसंवेदी च । तस्यार्थप्रतिसंवेदिनो धर्मप्रतिसंवेदिनश्चोत्पद्यते प्रामोद्यम् । प्रमुदितस्य प्रीतिर्जायते । प्रीतमनसः कायः प्रस्रभ्यते । प्रस्रब्धकायः सुखं वेदयते । सुखितस्य चित्तं समाधीयते । समाहितचित्तो यथाभूतं प्रजानाति यथाभूतं पश्यति । यथाभूतं प्रजानन् यथाभूतं पश्यन्निर्विद्यते । निर्विण्णो विरज्यते । विरक्तो विमुच्यते । इदं प्रथमं विमुक्त्यायतनम् । यत्र स्थितस्य भिक्षोर्वा भिक्षुण्या वा अनुपस्थिता स्मृतिरुपतिष्ठते । असमाहितं चित्तं समाधीयते । अपरिक्षीणाश्चास्रवाः परिक्षीयन्ते । अननुप्राप्तं चानुत्तरं योगक्षेमं निर्वाणमनुप्राप्नोति । पुनरपरं न[4] हैव भिक्षो[5] शास्ता धर्मं देशयति अन्यतरान्यतरो वा विज्ञो गुरुस्थानीयः सब्रह्मचारी । अपि तु यथाश्रुतान् धर्मान् यथोपदिष्टान् यथापर्यवाप्तान्[6] विस्तरेण स्वरेण स्वाध्यायं करोति । यथा यथा तान् यथाश्रुतान् यथोपदिष्टान् यथापर्यवाप्तान्[6] विस्तरेण स्वरेण स्वाध्यायं करोति । तथा तथा तेषु धर्मेषु[7] अर्थप्रतिसंवेदी भवति पूर्ववत् । इदं द्वितीयं विमुक्त्यायतनम् । यत्र स्थितस्येति पूर्ववत् । पुनरपरं न[8]हैव भिक्षो[9] शास्ता धर्मं देशयति अन्यतरान्यतरो वा विज्ञो गुरुस्थानीयः सब्रह्मचारी । नापि यथाश्रुतान् धर्मान् यथोपदिष्टान् यथापर्यवाप्तान् विस्तरेण स्वाध्यायं करोति । अपि तु यथाश्रुतान् धर्मान् यथोपदिष्टान् यथापर्यवाप्तान् विस्तरेण परेभ्यः संप्रकाश-

---

1 B. ०धर्मायतनाभ्याम्

2 B. ०विज्ञानानन्त्यायनाकिञ्चन्यायतननैव०

3 B. भिक्षु

4 B. नै०

5 B. भिक्षु

6 Mss. पर्याप्तान्

7 To. omits धर्मेषु.

8 B. नै

9 B. भिक्षु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यति। यथा यथा यथाश्रुतान् धर्मान् यथोपदिष्टान् यथापर्यवाप्तान् विस्तरेण परेभ्यः संप्रकाशयति' तथा तथा तेषु धर्मेष्वर्थप्रतिसंवेदी भवतीति पूर्ववत्। इदं तृतीयं विमुक्त्यायतनम्। यत्र स्थितस्येति पूर्ववत्। पुनरपरं न[1] हैव भिक्षो[2] शास्ता पूर्ववत्। नापि स्वाध्यायम्' नापि परेभ्यः संप्रकाशयति' अपि तु यथाश्रुतान् यावद्यथापर्यवाप्तांश्चिन्तयति तुलयति उपपरीक्षते। यथा यथा यथाश्रुतान् यावद्यथापर्यवाप्तांश्चिन्तयति यावदुपपरीक्षते' तथा तथा तेषु धर्मेष्वर्थप्रतिसंवेदी[3] पूर्ववत्। इदं चतुर्थं विमुक्त्यायतनम्। यत्र स्थितस्येति पूर्ववत्। पुनरपरं न[1] हैव भिक्षो[2] शास्तेति पूर्ववत्। नापि स्वाध्यायं करोति नापि परेभ्यः संप्रकाशयति नापि चिन्तयति' अपि त्वनेनान्यतमं[4] भद्रकं समाधिनिमित्तं साधु च सुष्ठु च सूद्गृहीतं भवति सुमनसिकृतं सुभावितं सुजुष्टं सुप्रतिविद्धम्' तद्यथा विनीलकं वा विपूयकं वा व्याध्मातकं वा विपडुमकं वा विलोहितकं वा विखादितकं वा विक्षिप्तकं वा अस्थि वा अस्थिसंकलिका वा। यथा यथा खल्वनेनान्यतमान्यतमं भद्रकं समाधिनिमित्तं पूर्ववद्यावत्सुप्रतिविद्धम्' तथा तथा तेषु धर्मेष्वर्थप्रतिसंवेदी[5] भवति पूर्ववत्। इदं पञ्चमं विमुक्त्यायतनम्। यत्र स्थितस्येति पूर्ववत्। विमुक्तेरायद्वारं प्रज्ञाविशेषः। **प्रज्ञा च धर्मायतनेन संगृहीता। सपरिवाराणि शब्दमनोधर्मायतनैः।** देशनास्वाध्यायपरसंप्रकाशनेषु शब्दग्रहणाच्छब्दायतनमस्ति। मनोधर्मायतने तु प्रज्ञापरिवारभूते सर्वत्रस्थे इति त्रिभिः संग्रहः। **द्वयोरायतनयोरि**ति। सूत्र उक्तम्' रूपिणः सन्ति सत्त्वा असंज्ञिनोऽप्रतिसंज्ञिनः। तद्यथा देवा असंज्ञिसत्त्वा इदं प्रथममायतनम्। अरूपिणः सन्ति सत्त्वाः' सर्वश आकिंचन्यायतनं समतिक्रम्य नैवसंज्ञानासंज्ञायतनमुपसंपद्य विहरन्ति। तद्यथा देवा नैवसंज्ञानासंज्ञायतनोपगाः। इदं द्वितीयमायतनमिति' अनयोर्द्वयोरायतनयो**रसंज्ञिसत्त्वा दशभिरायतनैः संगृहीताः' गन्धरसायतनयोरेवं** तत्राभावात्। भवति हि च्युत्युपपत्तिकालयोस्तेषां मनआयतनमिति। **नैवसंज्ञानासंज्ञायतनोपगा मनोधर्मायतनाभ्यां संगृहीता** इत्यधिकृतम्' तेषामरूपित्वात्। **बहुधातुकेऽपि द्वाषष्टिर्धातव** इति। सूत्र उक्तम्। आयुष्मानानन्दो भगवन्तमेतदवोचत्' कियता भदन्त पण्डितो धातुकुशलो भवति। भगवानाह। पण्डित आनन्द अष्टादश धातूञ्जानाति पश्यति यथाभूतम्। चक्षुर्धातुं रूपधातुं चक्षुर्विज्ञानधातुम्' एवं यावन्मनोधातुं धर्मधातुं

1 B. नै
2 B. भिक्षु
3 B. adds भवतीति.
4 B. ०नान्यतमान्यतमं
5 Mss. and To. प्रतिवेदी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनोविज्ञानधातुमिति । [1]इतीमानानन्द अष्टादश धातूञ्जानाति पश्यति यथाभूतम्' षडपि धातूञ्जानाति पश्यति यथाभूतम्' पृथिवीधातुमब्धातुं तेजोधातुं वायुधातुमाकाशधातुं विज्ञानधातुमिति। अपरानपि षड् धातूञ्जानाति पश्यति यथाभूतम्। कामधातुं व्यापादधातुं विहिंसाधातुं नैष्क्रम्यधातुमव्यापादधातुमविहिंसाधातुमिति। अपरानपि षड् धातूञ्जानाति पश्यति यथाभूतम्। [2]सुखधातुं दुःखधातुं सौमनस्यधातुं दौर्मनस्यधातुमुपेक्षाधातुमविद्याधातुमिति। चतुरोऽपि धातूञ्जानाति पश्यति यथाभूतम्। वेदनाधातुं संज्ञाधातुं संस्कारधातुं विज्ञानधातुमिति। [3]त्रीनपि धातूञ्जानाति पश्यति यथाभूतम्। कामधातुं रूपधातुमारूप्यधातुमिति। अपरानपि त्रीन्धातूञ्जानाति पश्यति यथाभूतम्। रूपधातुमारूप्यधातुं निरोधधातुमिति। अपरानपि त्रीन्धातूञ्जानाति पश्यति यथाभूतम्। अतीतं धातुमनागतं धातुं प्रत्युत्पन्नं धातुम्। अपरानपि त्रीन्धातूञ्जानाति पश्यति यथाभूतम्। हीनं धातुं मध्यमं धातुं प्रणीतं धातुमिति। अपरानपि त्रीन्धातूञ्जानाति पश्यति यथाभूतम्। कुशलं धातुमकुशलं धातुमव्याकृतं धातुमिति। अपरानपि त्रीन्धातूञ्जानाति पश्यति यथाभूतम्। शैक्षं धातुमशैक्षं धातुं नैवशैक्षनाशैक्षं[4] धातुमिति। द्वावपि धातू जानाति पश्यति यथाभूतम्। सास्रवं धातुमनास्रवं धातुमिति। अपरावपि द्वौ धातू जानाति पश्यति यथाभूतम्। संस्कृतं धातुमसंस्कृतं धातुमिति' इमौ द्वौ धातू जानाति पश्यति यथाभूतम्। इयता चानन्द पण्डितो धातुकुशलो भवतीति' इतीमान्यत्र[5] हि निर्भेदीनि[5] वाक्यानि प्रत्येकं मध्येऽपि पठितव्यानि' विस्तरभयात्तु मया न लिखितानीति वोद्धव्यम्। **यथायोगं संग्रहो वेदितव्य** इति। अष्टादश तावद्धातवः' त[6] एव त इत्येभिस्ते **संगृहीता एव** [7]**अष्टादशसु धातुषु** ये तु [7] पृथिवीधात्वादयः [8]षट्। तेषामाद्यानां चतुर्णां स्प्रष्टव्यधातौ संग्रहः। आकाशधातो रूपधातौ' आलोकतमःस्वभावत्वात्। विज्ञानधातोः सप्तसु चित्तधातुषु संग्रहः। कामधात्वादीनां तु षण्णाम्' कामधातुः कामराग इहाभिप्रेतः' स च चैतसिकः' व्यापाद-

---

1 B. यद्दोमा०

2 A भूधातुं

3 Mss. and To. त्रीण्यपि

4 B. नैवशैक्षनाशैक्षं

5...5 Mss. त्राह्नि न भेदीनि ; To. त्राभिसंवन्धीनि

6 B. ऐवेत्येभिः

7..7 B. reads तथाहि ये instead of अष्टाशसु धातुषु ये तु and To. following Tib. reads यत्र instead of ये तु.

8 B. षड्क्तः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धात्वादयोऽपि चैतसिका एवेति तेषां धर्मधातौ[1] संग्रहः। सुखधात्वादीनामपि षण्णां तस्मिन्नेव संग्रहः। वेदनाधात्वादीनां चतुर्णां त्रयाणां धर्मधातौ विज्ञानधातोः सप्तसु विज्ञानधातुषु। कामधात्वादीनां त्रयाणां कामधातोरष्टादशसु धातुषु रूपधातोश्चतुर्दशसु विना गन्धरसघ्राणजिह्वाविज्ञानधातुभिः आरूप्यधातोर्मनोधर्ममनोविज्ञानधातुषु। रूपधात्वादीनां तु त्रयाणां द्वयोरुक्तः संग्रहः निरोधधातोर्धर्मधातौ। अतीतधात्वादीनां त्रयाणां प्रत्येकमष्टादशसु धातुषु संग्रहः। हीनादयस्त्रयो धातवः कामधात्वादय एवेत्येषामुक्तः संग्रहः। कुशलादीनां त्रयाणां कुशलाकुशलधात्वो रूपशब्दधर्मधातुषु सप्तसु च चित्तधातुषु अव्याकृतधातोरष्टादशसु धातुषु[2]। शैक्षाशैक्षधात्वादीनां त्रयाणां द्वयोर्मनोधर्ममनोविज्ञानधातुषु तृतीयस्याष्टादशसु धातुषु। सास्रवानास्रवधात्वोराद्यस्याष्टादशसु धातुषु। द्वितीयस्य मनोधर्ममनोविज्ञानधातुषु। संस्कृतासंस्कृतधात्वोराद्यस्याष्टादशसु धातुषु द्वितीयस्य धर्मधातौ संग्रहः। त एते द्वाषष्टिर्धातवः ॥२७॥

[छिद्रमाकाशधात्वाख्यमालोकतमसी किल।
विज्ञानधातुर्विज्ञानं सास्रवं जन्मनिश्रयः ॥२८॥]

य इमे तत्रेति बहुधातुके। एतेषां द्वयोर्लक्षणमनुक्तमिति। पृथिवीधात्वादीनामुक्तं लक्षणम्। अमी

धृत्यादिकर्मसंसिद्धाः खरस्नेहोष्णतेरणाः[3]

इति।[4] ननु च विज्ञानधातोरप्युक्तं[5] लक्षणम्

विज्ञानं प्रतिविज्ञप्तिः[6]

इति वचनात्। सत्यम् उक्तं सर्वेषां विज्ञानानां लक्षणम्। विज्ञानधातुस्तु किमिह किंचिदेव विज्ञानमित्यभिप्रेतमुताहो सर्वमिति न विवेचितम्। असंस्कृतं चाकाशमुक्तलक्षणम नत्वाकाशधातुः।

1 Mss. and To. धर्मधातु

2 B. reads अष्टादशधातुषु and adds संग्रहः.

3. Kārikā, 1.12.

4 B. adds ननु चाकाशधातुरप्युक्तलक्षणः। तवाकाशमनावृतिरिति.

5 Mss. धातुरप्युक्त

6 Kārikā, 1. 12.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अवश्यं ह्ययमन्य[1] आकाशात्। तथाहि षड्धातुरयं भिक्षो पुरुष इति[2] सूत्रान्तरमुक्तम्। इत्यनया बुद्ध्याभिहितं द्वयोर्लक्षणमनुक्तमिति। अत [3]एवमाह। **तत्किमाकाशमेवाकाशधातुर्वेदितव्यः** । **सर्वं च विज्ञानं विज्ञानधातुरिति।** **मुखनासिकादिष्विति।** आदिशब्देन श्रोत्रादीनां ग्रहणम्।

आलोकतमसी किल

इति। किलशब्दः परमतद्योतनार्थः। स्वमतं तु सप्रतिघद्रव्याभावमात्रमाकाशमित्यभिप्रायो लक्ष्यते। **रात्रिंदिवस्वभाव** इति। रात्रिवर्तिनस्तमसो भास्करातपलक्षणस्य[4] चालोकस्याभिप्रेतत्वात्। वाहुलिको वायं[5] निर्देशः। [6]**अघं किल चितस्थं रूपमिति।** चितस्थं संघातस्थम्। अत्यर्थं हन्ति हन्यते वेत्यघम्[7]। नैरुक्तेन विधिना अत्यर्थशब्दस्य [8]अकारादेशः कृतो हन्तेश्च घादेशः। **तस्य तत्सामन्तकमिति।** तस्याघस्य कुड्यादिकस्य सामन्तकं समीपस्थम्। तदपेक्ष्य व्यवस्थापितमित्यर्थः। अत्रापि व्याख्याने किलशब्दो वैभाषिकव्याख्यानप्रदर्शनार्थः। स्वमतं तु यत्तत्पश्चादुच्यते। तदाह। **अघं च तत्।** **अन्यस्य रूपस्य तत्राप्रतिघातात्** । न प्रतिहन्यतेऽन्यद्रूपमस्मिन्निति कृत्वा। **सामन्तकं चान्यस्य रूपस्येति** चितस्थस्य। अस्मिन्पक्षे कर्मधारयः समासः। अघं च तत्सामन्तकं च तदित्यघसामन्तकम्।

विज्ञानं सास्रवम्

इति। जन्मनो हेतोर्विज्ञानस्याभिप्रेतत्वात्। **कुत** इति चेत्। अत आह। **यस्मादिमे षड् धातव इष्टा जन्मनिश्रयाः।** षड्धातुरयं भिक्षो पुरुष इति। षट् खलु धातून्प्रतीत्य मातुः कुक्षौ गर्भस्यावक्रान्तिरिति वचनात्। **एते हि जन्मन** इति विस्तरः। एते हि जन्मनो जनकपोषकसंवर्धकत्वादाधार**भूताः।** जनको ह्यत्र विज्ञानधातुः । प्रतिसंधिवीजत्वात्। पोषकाणि भूतानि । तत्संनिश्रयभावात्[9]। संवर्धकमाकाशधातुरवकाशदानात्। अत एवैषां धातुत्ववचनम्। प्रतिसंधिं दधत इति धातवः। **अनास्रवास्तु धर्मा नैवमिति।** न जन्मनिश्रयाः। जन्मनिरोधित्वात् ॥२८॥

---

1 Mss. ०मन्यदाकाशात्

2 B. सूत्र इतरदु०

3 To. following Tib. एवाह

4 Mss. लक्षस, To. लक्षस्य

5 B. ०कश्चायं

6 B. आघं

7 B. वेत्याघम्, To. चेत्यघम्

8 B. आकारा०

9 B. ०श्रयभूतत्वात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[सनिदर्शन एकोऽत्र रूपं सप्रतिघा दश ।
रूपिणोऽव्याकृता अष्टौ त एवारूपशब्दकाः ॥२९॥]

सनिदर्शन एकोऽत्र रूपम्

इति । किमिदं निदर्शनं नाम । येन विशेषेण योगात्तद्वस्तु तथा निदर्शयितुं शक्यते स विशेषो निदर्शनमित्युच्यते । वचनेन [1]परस्य चक्षुर्विज्ञानमुत्पन्नं वा[1] निदर्शनम् । तेन सह वर्तते सनिदर्शन एको रूपधातुरत्राष्टादशसु धातुषु । रूपधातुरेवैकः सनिदर्शन इत्यवधारणादुक्तं भवति । **अनिदर्शनाः शेषा** इति । अनेन चास्य सनिदर्शनत्वेन प्राधान्यमुक्तमिति । न पुनरुक्तदोषप्रसङ्ग इति तत्सिद्धेः । एते च सनिदर्शनत्वादयः प्रभेदाः प्रायेण सूत्रोक्ता एव प्रदर्श्यन्ते । तथा हि सूत्र उक्तम् । चक्षुर्भिक्षो आध्यात्मिकमायतनम् । चत्वारि महाभूतान्युपादायरूपप्रसादो रूप्यनिदर्शनं सप्रतिघम् । यावत्कायो भिक्षो आध्यात्मिकमायतनं पूर्ववत् । मनो भिक्षो आध्यात्मिकमायतनमरूप्यनिदर्शनमप्रतिघम् । रूपाणि भिक्षो बाह्यमायतनं चत्वारि महाभूतान्युपादायरूपि सनिदर्शनं सप्रतिघम् । शब्दा हि भिक्षो बाह्यमायतनं चत्वारि महाभूतान्युपादायरूप्यनिदर्शनं सप्रतिघम् । यावत्स्प्रष्टव्यानि भिक्षो बाह्यमायतनं चत्वारि महाभूतानि चत्वारि च महाभूतान्युपादायरूप्यनिदर्शनं सप्रतिघम् । धर्मा भिक्षो बाह्यमायतनमेकादशभिरायतनैरसंगृहीतमरूप्यनिदर्शनमप्रतिघमिति । एते च प्रभेदा धातूनामेवा प्रथमकोशस्थानपरिसमाप्तेः कथ्यन्ते । रूपविज्ञानविभागत्वात् ।

सप्रतिघा दश

रूपिणः

इति । रूपिग्रहणमरूपिनिरासार्थम् । रूपणं रूपं तदेषामस्तीति रूपिणः । **दशेति** चक्षुर्धात्वादयः पञ्च । तद्विषयधातवश्च पञ्चेति[2] । धर्मधातोर्निरासः कथं कृतः । स चापि हि रूपीति शक्यते वक्तुम् । तत्राविज्ञप्तिरूपसद्भावात् । रूपिण एवेत्यवधारणात्तन्निरासः कृतो भवति । ये हि धातवो रूपिस्वभावा एव ते ग्रहीतव्याः । धर्मधातुस्तु रूप्यरूपिस्वभाव इति । **स्वदेशे परस्योत्पत्तिप्रतिबन्ध** इति विस्तरः । यत्रैकं सप्रतिघं वस्तु तत्र द्वितीयस्योत्पत्तिर्न भवति । **यथा हस्तो**

1...1 Mss. परः । चक्षुर्विज्ञानं वा

2 Mss. and To. पञ्च चेति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हस्तेनाहतः प्रतिहन्यत उपले वा। हस्तो हस्तस्थान उपलस्थाने वा नोत्पद्यते। उपलोऽपि। तयोर्हस्तोपलयोः स्थान उपलोऽपि नोत्पद्यते। जले प्रतिहन्यत इति। जले स्वविषये प्रवर्तत इत्यर्थः। प्रायेण मनुष्याणामिति। प्रायग्रहणं कैवर्तादिनिवृत्त्यर्थम्। अस्ति नोभयत्रेति। गर्भे नियतमृत्यूनाम्। एतानाकारानित्येतान् प्रकारानित्यर्थः। [1]तितीला वद्दुलयः[1]। मार्जारादीनामिति। आदिग्रहणेन चौरमुनष्यादीनां व्याघ्रादीनां च ग्रहणम्। यस्मिन् यस्य कारित्रं स तस्य विषय इति। कारित्रं पुरुषकारः। चक्षुःश्रोत्रादीनां रूपशब्दादिष्वालोचनश्रवणादि कारित्रम्। तच्च स्वचित्तचैत्तान् प्रत्याश्रयभावशक्तिविशेषलक्षणं वेदितव्यम्। यच्चित्तचैत्तैर्गृह्यते दण्डावस्तम्भनयोगेन। तदालम्बनं रूपादि। तदेवं सति चित्तचैत्तानामेवालम्बनम्। विषयः पुनश्चक्षुरादीनामपि। न केवलं चित्तचैत्तानाम्। तस्मात् परेणाप्रवृत्तेरिति। यो हि लोके यतः परेण न प्रवर्तते स तत्र प्रतिहन्यते। काष्ठे कुड्ये वा। तथा चक्षुरादि विषयात्परेण न कारित्रं करोति। विषय एव तु करोति। तस्मात्तत्र प्रतिहन्यत इत्युच्यते[2]। निपातो वात्र प्रतिघात इति विस्तरः। अत्र विषये निपतनं निपातः। या स्वविषये प्रवृत्तिः कारित्रमित्यर्थः। तदिहावरणप्रतिघातेनेति विस्तरः। सप्रतिघा दशेत्यत्रावरणप्रतिघातेन ते दश धातवः सप्रतिघा अभिप्रेताः। तत्र विषयालम्बनप्रतिघाताभ्यां चित्तचैत्तानामपि सप्रतिघत्वप्रसङ्गाच्चतुःकोटिकः प्रश्नः। [3]चतुष्कोणश्चतुःप्रकार इत्यर्थः। पश्चात्पादक इति। यदि प्रश्नस्य पश्चाद्भागं गृहीत्वा विसर्जनायोत्तिष्ठते स पश्चात्पादकः। यदि पूर्वं भागं गृहीत्वा स पूर्वपादकः। विषयप्रतिघातेनापि त इति चित्तचैत्ताः। ते हि विषयप्रतिघातेनालम्बनप्रतिघातेन च सप्रतिघाः। पञ्चेन्द्रियाणि नालम्बनप्रतिघातेन सप्रतिघानि। अनालम्बनत्वात्।

यत्रोत्पित्सोर्मनस इति विस्तरः। यत्राश्रय आलम्बने वा उत्पत्तुकामस्य मनसः प्रतिघातोऽनुत्पत्तिः शक्यतेऽन्यैः[4] कर्तुमन्तरावरणेन तदेव सप्रतिघम्। तेनान्तरावरणलक्षणेन प्रतिघेन सप्रतिघत्वात्। स्वदेशे परस्योत्पत्तिप्रतिबन्धलक्षणेन प्रतिघातेन सप्रतिघत्वादित्यपरे। किं पुनस्तत्। पञ्चेन्द्रियपञ्च-

---

1...1 A तितीलो वद्दुलपः; B. तित्तिला पदुलपः; C तितीलावद्दुलयः; V ततीला वद्दुलयः. Cf. Bengali वादुड. To. has emended it as जतुन्यः.

2 B. omits इत्युच्यते.

3 The last letter of the word is illegible in C; V reads चतुस्कोण, A चतुस्को and B. चतुस्कोटि.

4 To. परैः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयधातुस्वभावम् । विपर्ययादप्रतिघमिष्टम् । यत्रोत्पित्सोर्मनसः प्रतिघातो न शक्यते परैः कर्तुम् । यथा मनोधातोर्धर्मधातोश्च मनोविज्ञानोत्पत्तावन्तरावरणं न शक्यते परैः कर्तुम् । अतः सप्तचित्तधातुधर्मधातुस्वभावमप्रतिघमिति सिद्धम् ।

अव्याकृता अष्टौ

इति । अव्याकृता एवाष्टावित्यवधारणम् । **कुशलाकुशलभावेनाव्याकरणाद्व्याकृताः** । ये कुशलाकुशलव्यतिरिक्तास्त एवाव्याकृता इहाभिप्रेताः । न तु कुशला अकुशलाव्याकृताव्याकरणात् । नाप्यकुशलाः कुशलाव्याकृताव्याकरणात् । कुशलाकुशलानां कुशलाकुशलभावेन व्याकृतत्वात् । संकेतरूढ्यपेक्षा हि शब्दप्रवृत्तिः ॥२९॥

[त्रिधाऽन्ये कामधात्वाप्ताः सर्वे रूपे चतुर्दश ।
विना गन्धरसघ्राणजिह्वाविज्ञानधातुभिः ॥३०॥]

त्रिधान्ये

इति । धातव इत्यधिकृतम् । त्रैधैवान्ये नैकधा न द्विधेत्यवधारणम् । **अलोभादिसंप्रयुक्ताः कुशला** इति विस्तरः । अलोभाद्वेषामोहह्र्यपत्रपासंप्रयुक्ताः सप्त चित्तधातवः कुशलाः । लोभद्वेषमोहाह्र्यनपत्राप्यसंप्रयुक्ता[1] अकुशलाः । कुत्सिताश्छलिता[2] गता[3] अपक्रान्ता इति कुशलाः । प्रज्ञा वा कुश इव तीक्ष्णेति कुशः । तं लान्ति आददत इति कुशलाः । [4]तद्विपरीता अकुशलाः[4] **अन्ये** त्वलोभादिलोभाद्यसंप्रयुक्ता **अव्याकृताः** । **धर्मधातुरिति** विस्तरः । **अलोभादिस्वभावो** योऽयमुक्तः । अलोभादिसंप्रयुक्तो वेदनादिः[5] । अलोभादिसमुत्थो विप्रयुक्तः प्राप्तिजात्यादिः[6] अविज्ञप्तिश्च । **प्रतिसंख्यानिरोधश्चापर** इति चतुर्विधः **कुशलो** धर्मधातुः । **लोभादिस्वभावसंप्रयुक्तसमुत्थोऽकुशलः** । **अन्योऽव्याकृतः**[7] यो नालोभादिस्वभावसंप्रयुक्तसमुत्थः । नापि लोभादिस्वभावसंप्रयुक्तसमुत्थः । आकाशमप्रतिसंख्यानिरोधः । तेषां च यथासंभवं प्राप्तिजात्यादयः । एषोऽव्याकृतो धर्मधातुः । **तदन्यावव्याकृताविति** । ताभ्यां **कुशलाकुशलचित्तसमुत्थाभ्यां रूपशब्दधातुभ्यामन्यौ**[8] रूपशब्दधातू अव्याकृतचित्तसमुत्थौ कायवाग्विज्ञप्तिसंगृहीतौ विज्ञप्त्यसंगृहीतौ चाव्याकृतौ ।

---

1 B. ०नपत्रपा०
2 Mss. च्छलिभा
3 B. दुर्गतः
4...4 This portion is omitted in B.
5 B. & Mss. वेदनादि
6 B. ०दि
7 B. adds इति.
8 Mss. धातुभ्यां यौ.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कामधात्वाप्ताः सर्वे

इति। कामधात्वाप्ताः सर्व एवेत्यवधार्यते। अष्टादशधातुत्वमात्रसंग्रहात्। न तु प्रत्येकम्। साकल्यतः। तत आह।

रूपे चतुर्दश

इति। **तयोः कवलीकाराहारत्वादिति**। तयोर्गन्धरसयोः। गन्धोऽपि हि कवलीकाराहारः सूक्ष्मः। **तत्राभावप्रसङ्ग** इति। तत्र रूपधातौ स्प्रष्टव्यधातोरभावप्रसङ्गः। कवलीकाराहारत्वात्।

कवलीकार आहारः कामे[1] त्र्यायतनात्मकः[2]

इति सिद्धान्तात्। **गन्धरसयोरप्येष प्रसङ्ग** इति। यौ नाहारस्वभावौ तौ तत्र स्यातामित्यर्थः। **अस्ति[3] तु स्प्रष्टव्यस्येति**। किम्। परिभोगः। **इन्द्रियाश्रयाभावेन आधारभावेन प्रावरणभावेन च। अन्ये पुनराहुरिति** भदन्तश्रीलाभः[4]। प्रश्रब्धिसहगतेनेति। प्रश्रब्धिसहोत्पन्नेन कायकर्मण्यतासहगतेनेत्यर्थः। अत्राचार्यो भदन्तश्रीलाभ[4]-मतमनादृत्य वैभाषिकमतं सावकाशं दृष्ट्वा विनिश्चयमारभते। **एवं तर्हीति** विस्तरः। वैभाषिकैरर्थत एतत्प्रतिज्ञातम्। न स्तो रूपधातौ गन्धरसौ। निःप्रयोजनत्वात्। [5]स्त्रीपुरुषेन्द्रियविषयवदिति। तं पक्षमाचार्यो दूषयति। दुष्टोऽयं पक्षः। धर्मिविशेषविपर्ययापत्तत्वात्। रूपधातौ गन्धरसाख्यो हि धर्मी विद्यमानस्वग्राहकोऽभिप्रेतः। तस्याविद्यमानस्वग्राहकत्वं प्राप्नोति। यथाहि स्त्रीपुरुषेन्द्रियविषयो निःप्रयोजनत्वेनाविद्यमानस्वग्राहको भवति तथा गन्धरसाख्योऽपि विषयः प्राप्नोति। स्फुटमप्यनुमानमस्ति[6] येनैष धर्मिविशेषविपर्ययो व्यज्यते। न स्तो रूपधातौ घ्राणजिह्वेन्द्रिये निःप्रयोजनविषयत्वात् [7]स्त्रीपुरुषेन्द्रियविषयवदिति। वैभाषिकदेशीयः कश्चित्प्रतिविधत्ते। **अस्ति प्रयोजनमिति** विस्तरः। ताभ्यां घ्राणजिह्वेन्द्रियाभ्यां **विना शरीरशोभैव न स्यात्**। वाग्विज्ञप्तिश्च। अनेन दृष्टबाधेन[8] प्रसङ्गं निवर्तयति। अनुमानं ह्यत्र दृष्टं बाधते। किं तदित्युच्यते। स्तो रूपधातौ घ्राणजिह्वेन्द्रिये सप्रयोजनत्वाच्-

---

1 Mss. काये
2 Kārikā, III. 39.
3 A प्रष्टितु; B. परिविष्टिस्तु
4 To. ०श्रीलात०
5 B. drops स्त्री.
6 Mss. & B. ०मानयन्ति
7 Mss. drop स्त्री.
8 Mss. & B. बाधया

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्षुरिन्द्रियवदिति । आचार्य आह । **यद्येतत्प्रयोजनमिति** विस्तरः । **अधिष्ठानेनैवाश्रयशोभावचनं च भवति नेन्द्रियेणे**ति सप्रयोजनत्वस्य हेतोरसिद्धतां दर्शयति । वैभाषिकदेशीय आह । **नानिन्द्रियमधिष्ठानमिति** विस्तरः । न रूपधातौ संभवत्यनिन्द्रियं घ्राणजिह्वेन्द्रियाधिष्ठानम्' इन्द्रियाधिष्ठानत्वात्' **पुरुषेन्द्रियाधिष्ठानवदिति** । एतेन सप्रयोजनत्वस्य सिद्धतां स्थापयति । आचार्य आह । **युक्तस्तदसंभव** इति विस्तरः । युक्तस्तत्र पुरुषेन्द्रियाधिष्ठानस्यासंभवो निःप्रयोजनत्वात् । **घ्राणजिह्वेन्द्रियाधिष्ठानं** त्वाश्रयशोभाभिव्याहारप्रयोजनत्वात् **सप्रयोजनम् । अतोऽस्य विनापीन्द्रियेण युक्तः संभवः ।** साधनं [1]त्वत्रोच्यते । संभवति रूपधातावनिन्द्रियं घ्राणजिह्वेन्द्रियाधिष्ठानम्' सप्रयोजनत्वात्' चक्षुरिन्द्रियाधिष्ठानवदिति । अनेन तामेव सप्रयोजनत्वस्यासिद्धतां व्यवस्थापयति । एवमत्र सप्रयोजनत्ववादिनि वैभाषिकदेशीये कस्मिंश्चिन्निषिद्धे यदेतदादावुक्तम्' एवं तर्हि घ्राणजिह्वेन्द्रिययोरप्यभावप्रसङ्गो निःप्रयोजनत्वादिति तद्दूषणाभासतां दर्शयन्तो वैभाषिका आहुः' **निःप्रयोजनापीति** विस्तरः । **यथा गर्भे[2] नियतमृत्यूनां** निःप्रयोजनाभिनिर्वृत्तिः 'न हि तेषां रूपदर्शनादिर्भवति 'एवं रूपधातौ घ्राणजिह्वेन्द्रियाभिनिर्वृत्तिर्निःप्रयोजनापि भविष्यतीति । तेन न स्तो रूपधातौ घ्राणजिह्वेन्द्रिये निःप्रयोजनत्वात् पुरुषेन्द्रियवदिति निःप्रयोजनत्वमनैकान्तिकं प्रदर्श्यते । आचार्य आह । **स्यान्नाम निःप्रयोजने**ति विस्तरः । भवेन्निःप्रयोजनेन्द्रियाभिनिर्वृत्तिः । **न तु निर्हेतुका**' संस्कृतानां सहेतुकत्वात् । **यश्च विषयाद्वितृष्णः स नियतमिन्द्रियादपी**त्यनेन हेत्वभावः प्रदर्श्यते । ततश्चैवं साधनमुच्यते । न स्तो रूपधातौ घ्राणजिह्वेन्द्रिये निर्हेतुकत्वात्' निर्हेतुकाङ्करवत्' पुरुषेन्द्रियवद्वा । **पुरुषेन्द्रियमपि वा किं न निर्वर्तेत** इत्याचार्य एव विकल्पं वाहयति । कोऽभिप्रायः । यदि निःप्रयोजना हेतुमन्तरेणापि वा घ्राणजिह्वेन्द्रिययोरुत्पत्तिः पुरुषेन्द्रियमपि वा किं न निर्वर्तेत । वैभाषिकाणां ह्ययं पक्षः' सघ्राणजिह्वेन्द्रियो रूपधातुसत्त्वसन्तानो रूपिप्राणित्वात् कामावचरसत्त्वसन्तानवदिति । आचार्यस्तु 'पुरुषेन्द्रियमपि किं न निर्वर्तेत इत्यनेन तस्य पक्षस्य धर्मिविशेषविपर्ययं दर्शयति । अविद्यमानपुरुषेन्द्रियो रूपधातुसत्त्वसन्तानो धर्मी' तस्य विपर्ययो विद्यमानपुरुषेन्द्रियत्वमिति । वैभाषिकाः परिहरन्ति । **अशोभा-**

---

1 To. following Tib. तत्र   2 B. गर्भ

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

करत्वादिति। कथमिति न रूपधातौ पुरुषेन्द्रियमस्ति' अशोभाकरत्वात्' काणकुण्ठत्ववत्। तदनुमानबाधनान्न[1] विपर्येत्यस्माकमेषा प्रतिज्ञा' यदि दृष्टं न बाधत इति नैयायिकसिद्धान्तादित्यभिप्रायः। आचार्य आह। **कोशगतवस्तिगुह्यानां किं न शोभते।** वस्तौ गुह्यं वस्तिगुह्यम्। वस्तिर्येन तत्पुरुषेन्द्रियं वेष्टितम्। गुह्यं पुरुषेन्द्रियम्। कोशो यत्र तद्वस्तिगुह्यं तिष्ठति। कोशगतं वस्तिगुह्यं येषां त इमे कोशगतवस्तिगुह्याः। तेषां किं न शोभते। [2]शोभत एवेत्यर्थः। अनेनाशोभाकरत्वमसिद्धं दर्शयति। **न च प्रयोजनवशादुत्पत्तिरिति** विस्तरः। वैभाषिकैरशोभाकरत्वादिति ब्रुवद्भिरर्थापत्त्यैतत्प्रतिज्ञातं भवति'प्रयोजनवशोत्पाद्यं पुरुषेन्द्रियमिति। स च पक्षोऽनुमानबाधितः'[3] [4]धर्मिस्वरूपविपर्ययापक्षालत्वात्। कथमिति'उच्यते। न प्रयोजनवशोत्पाद्यं पुरुषेन्द्रियम्'**स्वकारणोत्पाद्यत्वात्**' काणकुण्ठत्ववत्। वैभाषिका आहुः। **सूत्रं तर्हि विरुध्यत** इति विस्तरः। योऽयमविद्यमानघ्राणजिह्वेन्द्रियो रूपधातुसत्त्वसन्तान इति पक्षः स सापक्षालः' प्राक्पक्षविरोधात्। तथा हि भगवता रूपावचराः सत्त्वा [5]**अविकला अहीनेन्द्रिया** इत्युक्ताः[6] काणकुण्ठत्वाभावत्वात्[7]। अहीनेन्द्रियाश्चक्षुरादिभिरहीनत्वात्। आचार्य आह। **यानि तत्रे**ति विस्तरः। यानि तत्र रूपधातौ घ्राणेन्द्रियादिरहितानि चक्षुरादीनि **तैरहीनेन्द्रिया** इति सूत्रार्थपरिग्रहादविरोधः। **एवं तु वर्णयन्ति** वैभाषिकाः' **स्त एवे**ति विस्तरः। भवत एव तत्र रूपधातौ **घ्राणजिह्वेन्द्रिये न तु गन्धरसौ। आत्मभावमुखेन हि** स्वसन्तानमुखेन **षडायतने** चक्षुरादिके **तृष्णासमुदाचारः** प्राणिनां प्रवर्तते' तदभिष्यन्दितं च कर्मेति सहेतुके रूपधातौ घ्राणजिह्वेन्द्रिये। ततश्च सहेतुकत्वात्'स्त एव ते रूपधातौ' सहेतुकाङ्कुरादिवदिति। अनेन च' न स्तो रूपधातौ घ्राणजिह्वेन्द्रिये निर्हेतुकत्वादिति यत्साधनमुक्तं तदसिद्धमिति प्रतिपादयन्ति। **पुरुषेन्द्रिये तु मैथुनस्पर्शमुखेन**' किम्' **तृष्णासमुदाचार** इति प्रकृतम्। मैथुनस्पर्शवीतरागाश्च रूपावचराः सत्त्वाः' तस्मात्तत्र न तृष्णापूर्वकं कर्म भवति। तस्मादहेतुकत्वात्तत्र पुरुषेन्द्रियं नास्ति' निर्हेतुकाङ्कुरादिवदिति। **सिद्धं रूपधातौ चतुर्दशैव धातव** इति॥३०॥

---

1 B. व्याघातान्न

2 Mss. शोभितेत्यर्थः

3 Mss. अनुमानपतितः

4 Mss. धर्मस्वरूपं

5 B. अविकलाहीनेन्द्रियाः

6 B. adds अविकलेन्द्रियाः.

7 Mss. ०भावात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[आरूप्याप्ता मनोधर्ममनोविज्ञानधातवः ।
सास्रवानास्रवा एते त्रयः शेषास्तु सास्रवाः ॥३१॥]

आरूप्याप्ताः[1]

इति विस्तरः ।

मनोधर्ममनोविज्ञानधातवः

एवारूप्याप्ता इत्यवधारणादन्ये धातवो न सन्तीत्युक्तं भवति । यस्मादूरूपवीतरागाणां तत्रोपपत्तिरतो दश रूपस्वभावा धातवः' चक्षुरादयः पञ्च रूपादयश्चापि पञ्च न सन्ति' तदाश्रयालम्बनाश्च पञ्च विज्ञानधातवो न सन्तीति । ते चक्षुरादयो रूपादयश्च यथाक्रममाश्रया आलम्बनानि च येषां त इमे तदाश्रयालम्बनाः । आश्रयाणां चक्षुरादीनामालम्बनानां च रूपादीनामभावात् तेऽपि चक्षुर्विज्ञानादिधातवस्तत्र न सन्ति ।

सास्रवानास्रवा एते त्रयः

इति । एत एव त्रयः सास्रवानास्रवा इत्यवधारणम् ।

शेषास्तु सास्रवाः

इति । किमर्थमिदमुच्यते । [2]नन्वेत एव त्रयः सास्रवानास्रवा इत्यवधारणाच्छेषाः सास्रवा इति सिद्धम् । न सिद्धम् । कथम् ' शेषाः[3] सास्रवा एवानास्रवा एव वा स्युरित्याशङ्का ' तन्निवृत्त्यर्थमिदमुच्यते ' शेषाः सास्रवा एवेति ॥३१॥

[सवितर्कविचारा हि पञ्च विज्ञानधातवः ।
अन्त्यास्त्रयस्त्रिप्रकाराः शेषा उभयवर्जिताः ॥३२॥]

सवितर्कविचारा हि पञ्च विज्ञानधातवः

इति । सवितर्कसविचारा एवेति[4] ' हिशब्दोऽवधारणे ।

अन्त्यास्त्रयस्त्रिप्रकाराः

इति । अन्त्या एव त्रिप्रकारा इत्यवधारणम् । अन्यत्र वितर्कविचाराभ्यामिति ' वितर्कविचारौ संप्रयुक्तकधर्मधातुस्वभावौ · तयोरत्र ग्रहणप्रसङ्ग इति परिवर्ज्येते । वितर्को हि द्वितीयप्रकारान्तरे[5]ऽन्तर्भविष्यति ' विचारोऽपि ध्यानान्तरजस्तृतीये प्रकारेऽन्तर्भवति ' तदन्यस्तु त्रिष्वपि प्रकारेषु नान्तर्भवतीति वक्ष्यति । त एते मनोधात्वादयः संप्रयुक्तधर्मधातुपर्यन्ताः कामधातौ प्रथमे च ध्याने ससामन्तके

---

1 Mss. आरूप्याप्त
2 Mss. नन्वेत
3 To. शेषां
4 B. adds न विनिश्चयधातव इति.
5 B. ०प्रकारे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मौले सवितर्काः सविचारा वितर्कविचारसंप्रयोगात् । अत एव ध्यानान्तरेऽवितर्का वितर्काभावात्, विचारमात्रा विचारसंप्रयोगात् । अत एव द्वितीयात्प्रभृति यावद्भवाग्र'[1] तयोरभावादवितर्का अविचाराः । सर्वश्चासंप्रयुक्तो धर्मधातुरिति यथासंभवं त्रैधातुकरूपचित्तविप्रयुक्ता असंस्कृताश्च, ध्यानान्तरे च विचारोऽवितर्को वितर्काभावात्, अविचारो द्वितीयविचाराभावात् । विचार एषु त्रिषु प्रकारेषु नान्तर्भवतीति । कामधातुप्रथमध्यानभूमिको विचारः प्रथमे तावत्प्रकारे नान्तर्भवति, सवितर्कः सविचार इति । स हि सवितर्कः संभवति, न तु सविचारो विचारासंप्रयोगात्, द्वितीयेऽपि नान्तर्भवति । अवितर्को विचारमात्र इति, वितर्कसंप्रयोगाद् द्वितीयविचाराभावाच्च, तृतीयेऽपि नान्तर्भवति, अवितर्कोऽविचार इति । स हि यद्यप्यविचारो द्वितीयविचाराभावात्, न त्ववितर्को वितर्कसंप्रयोगात् । स कथं वक्तव्य इत्यत आह, अविचारो वितर्कमात्र इति । द्वितीयविचाराभावादविचारः, वितर्कसंप्रयोगाद् वितर्कमात्रः । अत एवेति, यस्मात्सवितर्कसविचाराणां भूमौ विचार एव चतुर्थप्रकारो भवति, अविचारो वितर्कमात्र इति ।

शेषा उभयवर्जिताः

इति । शेषा दशरूपिणो धातव उक्ताः[2] । तेऽवितर्का विचारमात्रा वा अवितर्का अविचाराः स्युरित्याशङ्कायामवधार्य तदुभयवर्जिता एव, शेषा अवितर्का अविचारा एवेत्यर्थः ॥३२॥

[निरूपणानुस्मरणविकल्पेनाविकल्पकाः ।
तौ प्रज्ञा मानसी व्यग्रा स्मृतिः सर्वैव मानसी ॥३३॥]

कथम्

अविकल्पकाः

इत्युच्यन्त इति, चक्षुर्विज्ञानसंसर्गी[3] नीलं विजानाति नो तु नीलमिति वचनात् । त्रिविधः किल विकल्प इति । किलशब्दः परमतद्योतनार्थः । स्वाभिप्रायस्तु, चेतनाप्रज्ञाविशेष एव वितर्क इति, न स्वभावविकल्पोऽन्यो धर्मोऽस्तीति । तथा ह्यनेन पञ्चस्कन्धक उक्तम् । वितर्कः कतमः । पर्येषको मनोजल्पश्चेतनाप्रज्ञाविशेषो या चित्तस्यौदारिकता । विचारः कतमः । प्रत्यवेक्षको मनोजल्पस्तथैव या चित्तस्य सूक्ष्मता ।[4] अनभ्यूहावस्थायां चेतना, [4]अभ्यूहावस्थायां

1 Mss. omit यावद्भवाग्र
2 Mss. धातवोऽनुक्ताः
3 To. °समङ्गी
4 B. °तूहा°

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रज्ञेति व्यवस्थाप्यते। तदेषां स्वभावविकल्पोऽस्तीति। तदिति वाक्योपन्यासे निपातः। तस्मादर्थे वा। स्वभावेनैव विकल्प औदारिकलक्षणत्वात्। **स्वभावविकल्पो** वितर्कः। स एषां पञ्चानां विज्ञानकायानां संप्रयोगतोऽस्ति। तस्मात् सविकल्पा[1] उक्ताः। नेतरावभिनिरूपणानुस्मरणविकल्पावेषां स्तः। **तस्मादविकल्पा** उच्यन्ते। यथैकपादकोऽश्वोऽपादक इति। पादत्रये छिन्न एकस्मिन्नपि पादे सत्यपादक इत्युच्यते। तद्वदेकविकल्पा अविकल्पका इति। **सा ह्यभिनिरूपणा-विकल्प इति।** सा मानस्यसमाहिता

प्रज्ञा

श्रुतचिन्तामय्युपपत्तिप्रतिलम्भिका च। सा हि मनसि भवा

मानसी।

व्यग्रा

विविधाग्रा व्यग्रा विविधालम्बनेत्यर्थः। विगतप्रधाना[2] वा। मुहुर्मुहुरालम्बना-न्तराश्रयणाद् व्यग्रा। कस्मादभिनिरूपणाविकल्प इत्युच्यते। तत्र तत्रा-लम्बने नामापेक्षयाभिप्रवृत्तेः। रूपं वेदना अनित्यं दुःखमित्याद्यभिनिरूपणाच्च। समाहिता तु भावनामयी [3]नामानपेक्ष्यालम्बने[3] प्रवर्तत इति। नैषाभिनिरूपणाविकल्प इत्युच्यते। **मानस्येव सर्वा स्मृतिरिति।** समाहिता चासमाहिता च। सा किल नामानपेक्षानुभूतार्थमात्रालम्बना प्रवर्तते। स्मृतिः कतमा। चेतसोऽभिलाष इति लक्षणात्। पञ्चविज्ञानकाय-संप्रयुक्ता तु नानुभूतार्थाभिलाषप्रवृत्तेति नानुस्मरणविकल्प इतीष्यते ॥३३॥

[सप्त सालम्बनाश्चित्तधातवोऽर्धं च धर्मतः।
नवानुपात्तास्ते चाष्टौ शब्दश्चान्ये नव द्विधा ॥३४॥]

सप्त सालम्बनाः

इत्युभयावधारणम्। सप्तैव सालम्बनाः सालम्बना एव च सप्तेति।

अर्धं च धर्मतः

सालम्बनमित्युक्तव्यतिरेकेणेदमुच्यते। अत्राप्युभयावधारणम्। धर्मार्धमेव सा-लम्बनं सालम्बनमेव च धर्मार्धमिति। यस्माच्च सप्तैव सालम्बना धर्मार्धं चैव सालम्बनमित्यवधारणमस्ति तस्माच्छेषा दश रूपिणो धातवो धर्मधातुप्रदेशश्चा-

---

1 B. ०कल्पका   2 Mss. प्राधाना
3...3 B. नामानपेक्षतालम्बने To. नामाननपेक्ष्यालम्बने

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संप्रयुक्तो[1]ऽनालम्बना इति सिद्धमित्युक्तम्। तथा ह्यनवधारणे ह्ययमर्थो न सिध्येत्।

नवानुपात्ताः

इति। नवानुपात्ता एवेत्यवधारणम्।

ते चाष्टौ

इति। ते च[2] सप्त चित्तधातवो धर्मधातुश्च यस्यार्धं सालम्बनमुक्तम्। [3]अष्टमस्यार्धेन सार्धमिति। सहेति यावत्।[3] अष्टग्रहणं सकलधर्मधातुग्रहणार्थम्। मा धर्मधात्वर्धग्रहणं[4] विज्ञायीति[5]। ते चाष्टौ शब्दश्चापर इति नवानुपात्ता इत्युक्ताः।

अन्ये नव द्विधा

इति। चक्षुरादयः पञ्च शब्दवर्ज्याश्च रूपादयश्चत्वार इति नव ते द्विधैव। उपात्तानुपात्ता इत्यर्थः। न तूपात्ता एवेत्येतदर्थं च अन्ये नव द्विधा इति पुनः सूत्रितम्। **अनुग्रहोपघाताभ्यामन्योन्यानुविधानादिति।** चक्षुर्धात्वादीनामनुग्रहोपघाताभ्यामञ्जनादिपाणिघातादिलक्षणाभ्यां चित्तचैत्तानामनुग्रहोपघातौ भवतः। चित्तचैत्तानां चानुग्रहोपघाताभ्यां सौमनस्यदौर्मनस्यलक्षणाभ्यां चक्षुर्धात्वादीनामनुग्रहोपघातौ भवतः। अतस्ते **चित्तचैत्तैरधिष्ठानभावेनोपगृहीता** उच्यन्ते। स्वीकृता इत्यर्थः। **यल्लोके सचेतनमिति।** सजीवमित्यर्थः ॥३४॥

[स्प्रष्टव्यं द्विविधं शेषा रूपिणो नव भौतिकाः।
धर्मधात्वेकदेशश्च सञ्चिता दश रूपिणः ॥३५॥]

स्प्रष्टव्यं द्विविधम्

इत्युभयावधारणम्। [6]स्प्रष्टव्यमेव द्विविधम्। द्विविधमेव स्प्रष्टव्यमिति[6]।

शेषा रूपिणो नव भौतिकाः

इत्यत्राप्युभयावधारणम्।

धर्मधात्वेकदेशश्च

भौतिक इत्यत्राप्युभयावधारणम्। यस्माच्चैत उभयावधारितास्तस्माच्छेषाः

---

1 To. संयुक्तो० 2 B. omits च.

3...3 The portion beginning with अष्टमस्य and ending with यावत् has been put in To. before ते चाष्टौ two lines above.

4 B. ०त्वधोग्रहणं 5 A. विज्ञावीतं V विज्ञाविति

6 Mss. स्पष्टव्यमेव द्विविधमेवे ति ; To. reads ०मेवे ति instead of ०मिति at the end.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सप्त चित्तधातवो धर्मधातुश्चाविज्ञप्तिवर्ज्यो नोभयथेति सिद्धम्। **भूतानां** [1]**चतुष्कखक्खटादिलक्षणावधारणादिति**। चतुष्कावधारणात्पृथिव्यप्तेजोवायुधातवः स्प्रष्टव्यधातौ चत्वारि भूतानि। श्लक्ष्णत्वादयस्तत्र चक्षुरादयश्च न भूतानि। खक्खटादिलक्षणावधारणाच्च पृथिव्यप्तेजोवायुधातुष्वन्ये धर्माश्चक्षुरादयो नान्तर्भावं गच्छन्ति। कथम् ' चत्वारि महाभूतानि ' पृथिवीधातुरब्धातुस्तेजोधातुर्वायुधातुः। पृथिवीधातुः कतमः ' खक्खटत्वमिति विस्तरः। **तेषां च स्प्रष्टव्यत्वादिति** ' तेषां च खक्खटत्वादीनां स्प्रष्टव्यत्वात् ' यस्मात्तानि स्प्रष्टव्यानि ' वर्णादयस्तु द्रष्टव्याः श्रोतव्या घ्रातव्याः स्वादयितव्याः। कथं गम्यते स्प्रष्टव्यानि तानीत्यत आह ' **न हि काठिन्यादीनि चक्षुरादिभिर्गृह्यन्ते**। किं तर्हि कायेन्द्रियेणैवेत्यतोऽवगम्यते ' स्प्रष्टव्यानि तानीति। स्यान्मतं तेऽपि वर्णादयः स्प्रष्टव्या इत्यत आह ' **नापि वर्णादयः कायेन्द्रियेण**' किम् ' गृह्यन्त इति प्रकृतम्। **उक्तं च सूत्र** इति विस्तरः। अपरस्मिन्नपि सूत्रे स्पष्टमादर्शितम्। कथमिति विस्तरेण यावदिदमुक्तम् ' **स्प्रष्टव्यानि भिक्षो बाह्यमायतनम् ' चत्वारि महाभूतानि चत्वारि**[2] **महाभूतान्युपादायरूप्यनिदर्शनं सप्रतिघमिति**। शेषं चक्षुराद्यायतनं न भूतानीति स्पष्टमादर्शितम्। **यत्तर्हि सूत्र उक्तमिति** विस्तरः। **यच्चक्षुषि मांसपिण्डे खक्खटं खरगतं** खरप्रकार इत्यर्थः। चक्षुरिन्द्रियं खक्खटस्वभावमिति मत्वा चोदयन्ति[3] **तेनाविनिर्भागवर्तिनो मांसपिण्डस्यैष**[4] **उपदेश** इति। तेन चक्षुरिन्द्रियेणाविनिर्भागवर्तिनोऽधिष्ठानस्यैतद्वचनम्। भवति हि चक्षुरधिष्ठानेऽपि चक्षुरुपचारः। अत एव मांसपिण्ड इति ग्रहणम्। अन्यथा चक्षुषीत्येवावक्ष्यत्[5] यदीन्द्रियमेवेष्यते[6]। **षड्धातुरयं भिक्षो पुरुष** इति विस्तरः। गर्भावक्रान्तिसूत्रे कललाद्यवस्थायामिति भूतमात्रोपदेशान्न भौतिकमस्तीति चोद्यमाशंक्याह ' **मूलसत्त्वद्रव्य**[8]**सन्दर्शनार्थमिति**। [9]मूलस्य सत्त्वद्रव्यस्य[9] संदर्शनार्थमेव। पृथिवीधात्वादयश्चत्वारो मूलसत्त्वम्' पञ्चानां चक्षुरादीनां स्पर्शायतनानां तत उत्पत्तेः। मनोधातुरपि मूलसत्त्वम् ' मनःस्पर्शायतनस्य तत उत्पत्तेः। अथवा चतुर्णां पृथिवीधात्वादीना-

1 Mss. चतुष्ट्व। B. चतुष्काम्
2 B. adds च.
3 B. चोदयति
4 Mss. ०स्यैषोपदेश
5 B. ०वक्ष्यत
6 B. ०वेष्येत
7. Mss. ०धातुरपि
8 B. दर्शनार्थं०
9...9 A & C मूलस्य सत्त्वद्रव्य ; B. मूलसत्त्वस्य द्रव्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुपादायरूपाश्रयत्वात् । विज्ञानधातोश्च चैतसिकानामाश्रयत्वात् । त एव मूलसत्त्वम् । कथं गम्यते । पुनः षट्स्पर्शायतनवचनात् । तत्रैव सूत्रे पश्चादुक्तम् । षट्स्पर्शायतनानीति । चक्षुःस्पर्शायतनं यावन्मनःस्पर्शायतनमिति । अतो विज्ञायते मूलसत्त्वद्रव्यसंदर्शनार्थत्वात् षड्धातुरयं भिक्षो पुरुष इति वचनम् । न तु भूतमात्रत्वादिति । ननु च यथा विज्ञानधातोरव्यतिरिक्तमपि मनःस्पर्शायतनं पुनरुच्यते । एवं चक्षुरादीन्यपि चतुर्धात्वव्यतिरिक्तानि पुनरुच्येरन्निति । अतो न पुनः षट्स्पर्शायतनवचनेन तद्व्यतिरिक्तभौतिकास्तित्वसिद्धिः । नैतदेवम् । यदि हि पृथिवीधात्वादय एव स्पर्शायतनान्यभविष्यन् भूतान्येव स्पर्शायतनानीत्येवावक्ष्यत्[1] । न त्वेवम् । किं तर्हि । चक्षुःस्पर्शायतनं यावन्मनःस्पर्शायतनमिति । अतोऽवगम्यते पृथिवीधात्वादिव्यतिरिक्तानि चक्षुरादीनीति[2] । विज्ञानधातुस्तु चक्षुरादिस्पर्शायतनवचनानुषङ्गेण पुनरुच्यते । स्पर्शायतनमिति कोऽर्थः । स्पर्शस्य चैतसिकस्याश्रय इत्यर्थः । [3]चैत्ताभावप्रसङ्गाच्चेति । यदि षड्धातुरयं भिक्षो पुरुष इति यथाभूतमेव द्रव्याणि गृह्येरन्नान्यानि तदाश्रितानि द्रव्याणि तेनैतत्प्राप्तम् । विज्ञानधातुमात्रग्रहणादत्र चैतसिकानां तदाश्रितानामग्रहणप्रसङ्गः । इष्टत्वाददोष इति चेत् । न । सापक्षालत्वादस्य पक्षस्य । सापक्षालो ह्ययं पक्षः । चित्तविशेषा एव चैतसिका इति । स्वसिद्धान्तविरोधात् । तेनाह । न च युक्तं चित्तमेव चैत्ता इत्यभ्युपपत्तुम्[4] । कस्मात् । **संज्ञा [5]च वेदना[6] च चैतसिक एष धर्मश्चित्तनिश्रित** इति सूत्रवचनात् । साधनं चात्रोपतिष्ठते । चित्तादर्थान्तरभूते संज्ञावेदने । स्कन्धदेशनायां पृथग्देशितत्वात् । रूपस्कन्धवदिति । अथवा स्वाश्रयादर्थान्तरभूते संज्ञावेदने । तदाश्रितत्वात् । यत्स्वाश्रयाश्रितं तत्स्वाश्रयादर्थान्तरभूतम् । तद्यथा कुड्याश्रितं चित्रम् । **सरागादिचित्तवचनाच्चेति** । सरागं चित्तं सरागं चित्तमिति यथाभूतं प्रजानाति । विगतरागं चित्तं विगतरागं चित्तमिति यथाभूतं प्रजानाति । सद्वेषं चित्तं सद्वेषं चित्तमिति तथाभूतं प्रजानातीति विस्तरः । अत्र साधनम् । सरागं चित्तमिति

---

1 B. वचाग्न्त 2 B. omits इति. 3 To. चित्ता०
4 B. इति प्रतिपत्तुम् ; Mss. इत्यभ्युत्पत्तुम् ; To. इत्यभ्युपगन्तुम्
5 To. omits च. 6 B. चेतना

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चित्तरागयोः परस्परतोऽर्थान्तरत्वम् ' सहयोगनिर्दिष्टत्वात् । सपुत्रश्चैत्र इति सहयोगनिर्दिष्टचैत्रपुत्रवदिति ।

सञ्चिता दश

इति ' परमाणुसञ्चयस्वभावा दशैवेत्यर्थः । अन्ये तु धातवोऽस्मादवधारणान्न सञ्चिता इति सिद्धम् ॥३५॥

[छिनत्ति छिद्यते चैव बाह्यं धातुचतुष्टयम् ।
दह्यते तुलयत्येवं विवादो दग्धतुल्ययोः ॥३६॥]

तुलयतीति कस्य धातोरेतद्रूपम् । तथा हि तुल उन्मान इत्यस्य धातोस्तोलयतीति रूपं भवति । नैष दोषः ' तुलां करोति तुलयतीति प्रातिपदिकधातोरेतद्रूपमिष्यते । कर्मणि च तुल्य इति रूपं भवति ।

बाह्यं धातुचतुष्टयम्

इति ' रूपादिकं शब्दवर्ज्यम् । **परशुदार्वादिसंज्ञकमिति ।** परश्वादिसंज्ञकं

छिनत्ति

दार्वादिसंज्ञकं

छिद्यते

संभवं प्रत्येवमुच्यते । कदाचित्परश्वादिसंज्ञकं छिद्यते ' दार्वादिसंज्ञकमपि छिनत्ति । **संबन्धोत्पादिन** इति विस्तरः । संबन्धेनाविभागेनोत्पत्तुं शीलमस्येति संबन्धोत्पादि ' **संघातस्रोतः** ' रूपादिसंघातसन्तान इत्यर्थः । तस्य विभक्तोत्पादनं विभक्तजननं यत् **स छेदः** । क्षणिकानां हि भावानां विनापि परश्वादिना छेदो भवत्येव ' सन्ताननिरोधस्तु परश्वादिनेति परश्वादिकं छिनत्तीत्युच्यते । कारणसामग्रीविशेषवशाद्धि[1] कार्यविशेषोत्पत्तिर्भवति । तत्र धातुचतुष्टयमेव[2] छिनत्ति छिद्यते चेत्यवधार्यते ' तथावधारणाच्चान्ये धातवो नोभयथेति सिद्धम् । अत एव चाह ' न कायेन्द्रियादीनि छिद्यन्त इति विस्तरः । [3]अत्र न चक्षुरिन्द्रियादीनीति वक्तव्ये कस्मात्कायेन्द्रियादीनीति वचनम् । यस्मात्कायेन्द्रिये परिस्फुटश्छेदो[4] भवति यदि भवेदित्यतः कायेन्द्रियपुरःसराणीन्द्रियाणि कथ्यन्ते । **निरवशेषाङ्गच्छेदे** सर्वाङ्गप्रत्यङ्गच्छेदे । **तदद्वैधीकरणात्** तेषां

---

1 To. वशाद्धिकार्य०
2 To. चतुष्टयमव०
3 B. तत्र
4 B. स्फुटच्छेदो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कायेन्द्रियादीनामद्वैधीकरणात्। कथं पुनर्गम्यते तदद्वैधीकरणमिति। अतः पुनराह। **न हीन्द्रियाणि द्विधा भवन्ति।** **छिन्नस्याङ्गस्य** कायादपगतस्य **निरिन्द्रियत्वात्।** इदमपि कथं गम्यते। निरिन्द्रियं तदङ्गं यच्छिन्नं कायादपगतमिति। यस्मात्तत्प्रतीत्य स्प्रष्टव्यादिकं च कायादिविज्ञानानुपपत्तिः[1]। कथं तर्हि छिन्नेन पुनर्लग्नेन नासिकाग्रेण कायविज्ञानोत्पत्तिः। नासिकामूलसंबन्धेन पुनः कायेन्द्रियोत्पत्तेरदोषः। कथमिह गृहगोधिकादीनां पुच्छानि छिन्नानि स्पन्दन्ते यदि तत्र कायेन्द्रियं नास्ति। वायुधातोरेष विकारो नैतत्कायेन्द्रियस्य कर्मेत्यवगन्तव्यम्। **न चापि छिन्दन्ति मणिप्रभावदच्छत्वात्।** यथा मणिप्रभा न छिनत्ति। अच्छत्वात्। तद्वदिन्द्रियाणि।

दह्यते तुलयत्येवम्

इति। एवंशब्देन तदेव बाह्यं धातुचतुष्टयं तथात्वेन प्रदर्श्यते। काष्ठादीनामग्निकृतो विकारो दाहः। स चेन्द्रियाणां न भवति मणिप्रभावदच्छत्वात्। न हि तानि काष्ठादिवच्चर्मादिवद्वा विक्रियन्ते। किं तर्हि तत्संबन्धात्प्रवाहच्छेदो भवति। तुलादिभूतं च तदेव धातुचतुष्टयं तुलयति। नेन्द्रियाणि। तथैवाच्छत्वात्। अमूर्तानां तु धातूनाममूर्तत्वादेव छेदाद्यसंभव इति तेषां छेदादि न चिन्त्यते। **न शब्द उच्छेदित्वादिति।** किम्। छिनत्ति छिद्यते[2]। दह्यते तुलयति वा अप्रवाहवर्तित्वात्।

विवादो दग्धतुल्ययोः

इत्युत्तरत्रापीदमनुवर्तते। न शब्द [3]उच्छेदित्वादिति। **तदेव धातुचतुष्टयं दाहकं तुल्यं चेति।** अग्निक्षारादि दाहकम्। समस्तस्यात्र धातुचतुष्टयस्य भस्मादिविकारहेतुत्वात्। लवणादि तुल्यम्। तत्रापि समस्तस्य तुलावनतिहेतुत्वादित्येकेषामभिप्रायः। **तेजोधातुरेव दग्धा गुरुत्वमेव च तुल्यमिति।** तेजोधातुरेवाग्निज्वालादिगत उद्भूतवृत्तिर्दहति। पृथिवीधात्वादीनामुद्भूतस्ववृत्तित्वेऽप्यदाहकत्वदर्शनात्। गुरुत्वमेव चोपादायरूपमुद्भूतवृत्ति तुल्यते। आतपादिषु लघुद्रव्येषु रूपादीनामुद्भूतवृत्तित्वेऽप्यतुल्यत्वदर्शनात् ॥३६॥

1 B. विज्ञानानुत्पत्तिः
2 B. adds च.
3 Mss. उत्सेदित्वात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[विपाकजौपचयिकाः पञ्चाध्यात्मं विपाकजः।
न शब्दोऽप्रतिघा अष्टौ नैष्यन्दिकविपाकजाः ॥३७॥]

पञ्चाध्यात्मम्

इति, पञ्चग्रहणं मनोनिवृत्त्यर्थम्। अध्यात्मग्रहणं रूपादिनिवृत्त्यर्थम्।

विपाकजौपचयिकाः

एव पञ्चाध्यात्मिका **न नैष्यन्दिका** इत्यवधारणम्। कस्मात्, **तद्व्यतिरिक्तनिष्यन्दाभावात्।** [1]विपाकजा औपचयिकाश्च यद्यपि नैष्यन्दिका भवन्ति,

निष्यन्दो हेतुसदृशः[2]

इति कृत्वा, ते तु विपाकजौपचयिकत्वेनैव[3] संगृहीतत्वान्न नैष्यन्दिका इति गृह्यन्ते। ये तु स्वहेतुसदृशा न च विपाकजा न चौपचयिकास्त इह नैष्यन्दिका अभिप्रेताः। न चैवंविधाश्चक्षुरादयो भवन्ति। किं तर्हि, विपाकजा [4]वौपचयिका वा[4] भवन्तीत्यत एवमुच्यते, तद्व्यतिरिक्तनिष्यन्दाभावादिति। कथं पुनर्ज्ञायते नैष्यन्दिकास्ते न सन्तीति। मृतस्याननुवृत्तेः। न हि रूपादिवन्मृतस्य चक्षुर्धात्वादयोऽनुवर्तन्ते। **विपाकहेतोर्जाता** इति। विपाकस्य फलस्य हेतुर्विपाकहेतुः, विपाकहेतोर्जाता विपाकजाः। **मध्यपदलोपाद्धेतुशब्दलोपात्। गोरथवत्**, यथा गोभिर्युक्तो रथो गोरथ इति। **फलकालप्राप्तं वा कर्मेति**, विपाकफलोत्पत्त्यनन्तरक्षणावस्थमित्यर्थः। **विपच्यत इति विपाकः।** कर्मकर्तरि घञ्। विपाकाज्जाता विपाकजाः। **फलं तु विपक्तिरेवेति विपाक** इति भावे घञ्। [5]**भवतु वा**[5] **हेतौ फलोपचार** इति विस्तरः। अविपाकस्वभावोऽपि कर्मलक्षणो हेतुर्विपाक इत्युच्यते, तदुत्पादकत्वात्। **यथा फले हेतूपचार** इति विस्तरः। **षडिमानि स्पर्शायतनानि** चक्षुरादीनि **पौराणं कर्म।** पुराणे जन्मनि भवं पुराणमेव वा पौराणं कर्म। तानि स्पर्शायतनान्यपौराणकर्मस्वभावान्यपि पौराणं कर्मेत्युच्यन्ते, तज्जातत्वात्। एवमिह[6] विपर्ययोपचारो द्रष्टव्यः। **आहारसंस्कारस्वप्नसमाधिविशेषैरुपचिता औपचयिका** इति, विशेषशब्दः प्रत्येकमभिसंबध्यते। तत्राहारस्वप्नौ लोके प्रतीतौ। संस्कारोऽभ्यङ्गस्नानानुवासनादिस्वभावः। समाधिश्चित्तैकाग्रतालक्षणः। समीपे चय उपचयः। उपचये भवा औपचयिकाः, सैनिकवत्। उपचया एव वा

---

1 Mss. and B. विपाकजौपचयिकाश्च
2 Kārikā, II. 58.
3 B. omits एव.
4...4 B. औपचयिकाश्च
5...5 B. भवति च
6 B. adds अपि.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

औपचयिकाः । वैनयिकवत् । स्वार्थे तद्धितविधानात् । ब्रह्मचर्येण चेत्येक इति । ब्रह्मचारिणामुपशान्तेन्द्रियाणां शरीरोपचयदर्शनात् । अनुपघातमात्रं तु तेन स्यादिति । अब्रह्मचर्येण शरीरापचयः । ब्रह्मचर्येण तु शरीरापचयो न भवति । तस्मादाह । अनुपघातमात्रं तु तेन ब्रह्मचर्येण स्यात् । नोपचयः । उपचयस्त्वाहारादिभिरेव । कस्मात्तर्हि प्रव्रजितानां[1] केषांचिच्छरीरापचयो भवति । कामपरिदाहादियोगादसौ भवेत् । प्रतिप्राकार इवारक्षेति । उपचयसन्तानो विपाकसन्तानस्य परिवार्यावस्थानेनारक्षा । शब्द औपचयिक इति । अनुपचितकायस्य शब्दसौष्ठवादर्शनात् । इच्छातः प्रवृत्तेरिति । शब्दो मे स्यादितीच्छया शब्दः प्रवर्तते । अनिच्छया न प्रवर्तते । विपाकजश्च धर्मोऽनिच्छतोऽपि प्रवर्तते । तस्मान्न विपाकजः शब्दः । साधनं चालोच्यते । न विपाकजः शब्दः । इच्छातः प्रवृत्तेः । योनिशो मनसिकारचैतसिकवत् । यत्तु विपाकजं न तस्येच्छया प्रवृत्तिः । तद्यथा चक्षुरिन्द्रियस्येति । यत्तर्हीति विस्तरः । अनेन स्वसिद्धान्तविरुद्धतां प्रतिज्ञाया उद्ग्राहयति । तृतीयासौ परंपरेत्येक इति विस्तरः । भूतानि पारुष्यविरतेः कर्मपथस्य कण्ठे विपाकस्वभावानि [2]निर्वर्तन्ते । तेभ्यः शब्दः । द्वितीयेऽपि पक्षे । [3]कर्मभ्यो विपाकजानि भूतानि । तेभ्य औपचयिकानि । आहारोपचयतः समाध्युपचयतो वा भूतान्तराणि । तेभ्यो नैष्यन्दिकानि । पूर्वभूतव्यतिरिक्तान्यागन्तुकानि भूतानि । तेभ्यः शब्द इति । [4]अतो न विपाकजः शब्द इति[4] । परंपराभिनिर्वर्तनं त्वभिसंधाय पारुष्यविरतेर्ब्रह्मस्वरता निर्वर्तत इत्युक्तम् । अनेन स्वसिद्धान्तविरुद्धता तस्याः प्रतिज्ञायाः परिह्रियते । यदि शब्दवद्युक्तिविरोधः स्यादिति । शब्द इच्छातः प्रवर्तत इति विपाकयुक्तिविरोधान्न विपाकज उक्तः । तद्व यदि तद्वच्छारीरिक्यपि वेदना । इच्छातः प्रवर्तते । न विपाकजा स्यात् । न त्विच्छातः सा प्रवर्तते । किं तर्हि । अनिच्छयापि सा प्रवर्तते चक्षुरादिवत् । तस्माद्विपाकजेति युज्यत इत्यभिप्रायः । कीदृशी पुनः सा । या सुखदुःखप्रत्ययोपसंहारमन्तरेणापि प्रवर्तते । नैष्यन्दिकाः सभागसर्वत्रगहेतुजनिता इति । सभागसर्वत्रगहेतुभिरेव जनिता न विपाकहेतुनेत्यवधारणम् । विपाकजा विपाकहेतुजनिता इति । विपाकहेतुना जनिता एव । न तु विपाकहेतुनैव जनिता इत्यवधारणम् । सभागहेतुनापि जनिता विपाकजा भवन्ति । तत्र चाष्टावप्रतिघा नैष्यन्दिका

---

1 B. adds ब्रह्मचारिणां.

2 Mss. निवर्त्तन्ते

3 To. कर्मेभ्यो

4 To. omits this portion.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विपाकजा एवेत्यवधार्यते। न हि त औपचयिकाः सञ्चयाभावात्। अपरमाणुसञ्चयस्वभावत्वादित्यर्थः ॥३७॥

[त्रिधान्ये द्रव्यवानेकः क्षणिकाः पश्चिमास्त्रयः।
चक्षुर्विज्ञानधात्वोः स्यात् पृथग्लाभः सहापि च ॥३८॥]

त्रिधान्ये

इति। [1]त्रिधैवान्य अन्य एव[1] [2]त्रिधेत्यवधार्यते। तत्र विपाकजा इन्द्रियाविनिर्भागिण एव।

विपाकोऽव्याकृतो धर्मः सत्त्वाख्य[3]

इति वचनात्। नैष्यन्दिकौपचयिकास्त्विन्द्रियविनिर्भागिणोऽपि। कथं पुनर्गम्यत इन्द्रियविनिर्भागिणोऽपि नैष्यन्दिकाः सन्तीति। मृतस्यापि तदनुवृत्तिदर्शनात्। न ह्यसत्त्वसंख्याता विपाकजा इष्यन्ते।

द्रव्यवानेकः

इति। एक एव द्रव्यवानित्यवधारणम्[4]। सारत्वाद् द्रव्यमित्यविनाशात्। क्षणमेकमनैष्यन्दिका भवन्तीति। क्षणमेकमसभागहेतुनिर्वर्तिताः। पूर्वक्षणानास्रवाभावात्[5]। क्षणिकाः न तु क्षणान्तरविनाशिन इत्ययमर्थोऽभिप्रेतः। अन्यथा हि पश्चिमा एव धातवः क्षणिका इत्यवधारणात्तदितरेषां धातूनामक्षणिकत्वप्रसङ्गः। कथं पुनर्दुःखधर्मज्ञानक्षान्तिकलापे मनोधातुर्मनोविज्ञानधातुश्च युगपद्भवतः। न हि विज्ञानद्वयसमवधानमिष्यते। नोच्यते युगपत्तौ भवत इति। किं तर्हि। एकमेव विज्ञानं धातुद्वयत्वेन व्यवस्थाप्यते। नामद्वयेन कथ्यत इत्यर्थः। तेन व्याचष्टे। [6]दुःखधर्मज्ञानक्षान्तिसंप्रयुक्तं चित्तं मनोधातुर्मनोविज्ञानधातुश्चेति। शेषास्तत्सहभुवो धर्मधातुरिति। तत्र क्षान्तिकलापे चित्तादन्ये धर्माः शेषाः। तत्सहभुवस्तया क्षान्त्या सहभुवः। तद्यथा। अनास्रवसंवरो रूपम्। वेदनासंज्ञाचेतनादयः संप्रयुक्ताः। तेषां च प्राप्तिजात्यादयो धर्मधातुरिति।

समन्वागमं प्रतिलभत इति। प्राप्तिमलब्धपूर्वां लभत इत्यर्थः। चक्षुर्विज्ञानधातुनापि स इति। किम्। समन्वागमं[7] प्रतिलभत इत्यधिकृतम्।

1...1 B. and To. त्रिधान्य एव

2 Mss. omit त्रिधा.

3 Kārikā, II. 51.

4 Mss. ०धारणात्

5 B. ०नास्रवभावाभावात्

6 B. दुःखे

7 A adds प्रतिमं.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पृथग्लाभः

इत्यनेन प्रथमद्वितीये कोट्यौ दर्शिते ।

सहापि च

इत्यनेन तृतीया कोटिर्दर्शिता । चतुर्थी तूक्तनिर्मुक्तेति सुगमत्वान्न दर्शिता । चशब्देन वा साप्युक्ता' अपृथगसह चेति । **कामधातौ क्रमेण चक्षुरिन्द्रियं प्रतिलभमान** इति । कामधातौ स्थितः पुद्गलः क्रमेण कललादिक्रमेण मृत्युक्रमेण वा चक्षुरिन्द्रियं लभते[1] । किंप्रतिसंयुक्तं किं कामधातावेव । नेत्युच्यते । अविशेषेण कामप्रतिसंयुक्तं वा रूपप्रतिसंयुक्तं वा प्रतिलभमानः । कललाद्यवस्थायां तथा क्रमेण मरणस्याचक्षुष्मन्मरणस्य च काले चक्षुर्धातुनाऽसमन्वागतः' कललाद्यवस्थायां तथा मरणावस्थायां वा तदभावात्' षडायतनोत्पत्त्यवस्थायां भवस्यान्तराले वा तेनेदानीं समन्वागमं प्रतिलभते । न तु चक्षुर्विज्ञानधातुनाऽसमन्वागतः समन्वागमं प्रतिलभते' यस्मादसौ कुशलक्लिष्टेन [2]तेनातीतानागतेन [3]समन्वागत एव पूर्वमन्तराभवप्रतिसन्धिकाले । विप्रकृतावस्था ह्येषाधिक्रियते' न प्रतिलब्धवत्प्रतिलप्स्यमानावस्था । **चक्षुर्विज्ञानधातुनेति** विस्तरः । **द्वितीयादिध्यानोपपन्नः**'तत्र तस्य चक्षुर्विज्ञानधातोरभावात् तेन पूर्वमसमन्वागत इदानीं **चक्षुर्विज्ञानं** प्रथमध्यानभूमिकमनिवृताव्याकृतस्वभावं **संमुखीकुर्वाणः**'**तेन चक्षुर्विज्ञानधातुना** समन्वागमं प्रतिलभते । न तु चक्षुर्धातुनाऽसमन्वागतः समन्वागमं प्रतिलभते' प्रतिलब्धवत्समन्वागतत्वात् । **तत्प्रच्युतश्चाधस्तादुपपद्यमान** इति' द्वितीयादिध्यानप्रच्युतोऽधस्तात्प्रथमे ध्याने कामधातौ [4]चोपपद्यमानश्चक्षुर्विज्ञानधातुनाऽसमन्वागतः **समन्वागमं प्रतिलभते**ऽन्तराभवप्रतिसन्धाने कुशलक्लिष्टेन अतीतानागतेन न तु चक्षुर्धातुनाऽसमन्वागतः समन्वागमं प्रतिलभते'प्रतिलब्धवत्समन्वागतत्वात् । **स्यादुभयेनेति** विस्तरः । **आरूप्यधातुच्युत** उभाभ्यां चक्षुर्धातुचक्षुर्विज्ञानधातुभ्यां पूर्वमसमन्वागत अन्तराभवप्रतिसन्ध्यवस्थायामेव चक्षुर्धातुनोत्पादाभिमुखेन चक्षुर्विज्ञानधातुना च कुशलक्लिष्टेनातीतानागतेन समन्वागमं प्रतिलभते । अविकलेन्द्रिया ह्यन्तराभविकाः । **नोभयेन एतानाकारान् स्थापयित्वेति**' कोटिलयोक्तान्धर्मप्रकारान् त्यक्त्वेत्यर्थः । आरूप्यधातुच्युतस्तत्रैवोत्पद्यमानो नोभाभ्यामसमन्वागतः समन्वागमं प्रतिलभते । असमन्वागतत्वं तत्रास्ति' न तु समन्वागमप्रतिलम्भः । द्वितीयादिध्यानोपपन्नश्च

1 Mss. and To. drop लभते.

2 To. omits तेन.

3 B. puts समन्वागत एव after ०काले instead of here.

4 B. वोपपद्य०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्षुर्विज्ञानमसंमुखीकुर्वाणो नोभाभ्यामसमन्वागतः समन्वागमं प्रतिलभते। कथम्' चक्षुर्धातुना यद्यपि समन्वागमं प्रतिलभते न तु चक्षुर्धातुनासावसमन्वागतः। चक्षुर्विज्ञानधातुना यद्यप्यसावसमन्वागतो न तु समन्वागमं प्रतिलभते' [1]तदसंमुखीकुर्वाणत्वात्। चक्षुष्मान् कामधातुस्थः सकृन्मरणादन्तराभवप्रतिसन्धौ नोभाभ्यामसमन्वागतः समन्वागमं प्रतिलभते' ताभ्यां समन्वागतत्वात्। **यश्च चक्षुर्धातुना समन्वागतश्चक्षुर्विज्ञानधातुनापि स इति।** पृथग्लाभः सहापि चेत्यनेनैव सूत्रेणेदमपि चतुःकोटिकं वर्तयति। लाभो हि प्रतिलम्भः प्राप्तिमात्रेऽपि विवक्षया कदाचिद्भवति' प्रथमे चतुःकोटिके प्रतिलम्भोऽधिकृतो द्वितीये तु प्राप्तिमात्रम्। **प्रथमा कोटिरिति** विस्तरः। **द्वितीयादिध्यानोपपन्नो**ऽवश्यं चक्षुर्धातुना समन्वागत इन्द्रियैरविकलत्वात्' चक्षुर्विज्ञानधातुनात्वसमन्वागतः' तत्राभावात्' प्रथमध्यानभूमिकस्य चक्षुर्विज्ञानस्यासंमुखीक्रियमाणत्वात्। **कामधातावलब्धविहीनचक्षुरिति।** अलब्धं विहीनं वा चक्षुरस्यालब्धविहीनचक्षुः। अलब्धचक्षुः कललाद्यवस्थः। विहीनचक्षुर्विनष्टचक्षुः। स कामधातौ चक्षुर्विज्ञानधातुनान्तराभवप्रतिसन्धौ प्रतिलब्धेन कुशलक्लिष्टेन समन्वागतः' न चक्षुर्धातुना' तस्याभावात्। **लब्धाविहीनचक्षुरिति।** लब्धमविहीनं चक्षुरस्य लब्धाविहीनचक्षुः। स कामधातौ चक्षुर्धातुना चक्षुर्विज्ञानधातुना च 'तथा पूर्वं प्रतिलब्धेनेदानीं त्वनेन चाव्याकृतेन समन्वागतः। **प्रथमध्यानोपपन्नश्च** तेनोभयेन समन्वागतः' स्वभूमिकस्य [2]तस्यावश्यमस्तित्वात्' परभूमिकस्य चक्षुषः संभवात्। **द्वितीयादिध्यानोपपन्नश्च पश्यन्।** प्रथमध्यानभूमिकं चक्षुर्विज्ञानं संमुखीकुर्वाण इत्यर्थः। स चाप्यवश्यमनेनोभयेन समन्वागतः। **चतुर्थ्येतानाकारान स्थापयित्वे**त्यारूप्योपपन्नः[3]।

यथायोगमभ्यूहितव्याविति। यश्चक्षुर्धातुनाऽसमन्वागतः समन्वागमं प्रतिलभते रूपधातुनाप सः। यो वा रूपधातुना चक्षुर्धातुनापि सः। चक्षुर्धातुरूपधात्वोः स्यात्पृथग्लाभः सहापि च। पृथक्तावत्' स्याच्चक्षुर्धातुना समन्वागतो न रूपधातुना ' कामधातौ क्रमेण चक्षुरिन्द्रियं प्रतिलभमानः। स्याद्रूपधातुना न चक्षुर्धातुनेति ' इयं कोटिर्नास्ति। सहापि स्यात्। उभयेनासमन्वागतः समन्वागमं प्रतिलभते ' आरूप्यधातोश्च्युतो रूपधातौ कामधातौ चोपपद्यमानः। नोभयेनैतानाकारान् स्थापयित्वा। यश्चक्षुर्धातुना[4] समन्वागतो

1 Mss. and B. तमसंमुखी°
2 To. following Tib तत्रावश्य°
3 B. आरूप्योत्पन्नः
4 To. omits °ना.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपधातुनापि स इति। पूर्वपादकः। यस्तावच्चक्षुर्धातुना समन्वागतो रूपधातुनापि सः। स्याद्रूपधातुना न चक्षुर्धातुना' कललाद्यवस्थास्वलब्धचक्षुर्लब्धविहीनचक्षुश्च। यश्चक्षुर्विज्ञानधातुनाऽसमन्वागतः समन्वागमं प्रतिलभते रूपधातुनापि सः। यो वा रूपधातुनाऽसमन्वागतः समन्वागमं प्रतिलभते चक्षुर्विज्ञानधातुनापि सः। तथैव[1] तयोः स्यात्पृथग्लाभः सहापि च। पृथक्तावत्' स्याच्चक्षुर्विज्ञानधातुना न रूपधातुना' द्वितीयादिध्यानोपपन्नश्चक्षुर्विज्ञानं संमुखीकुर्वाणः। स्याद्रूपधातुना न चक्षुर्विज्ञानधातुना' आरूप्यधातोश्च्युतो द्वितीयादिषु ध्यानेषूपपद्यमानः। सहापि स्यात्। उभयेनासमन्वागतः समन्वागमं प्रतिलभते' आरूप्यधातुच्युतः[2] कामधातौ ब्रह्मलोके चोत्पद्यमानः। नोभयेन' एतानाकारान् स्थापयित्वा। यश्चक्षुर्विज्ञानधातुना समन्वागतो रूपधातुनापि सः। यो वा रूपधातुना चक्षुर्विज्ञानधातुनापि सः पूर्वपादकः। यस्तावच्चक्षुर्विज्ञानधातुना समन्वागतो रूपधातुनापि सः। स्याद्रूपधातुना न चक्षुर्विज्ञानधातुनापि। द्वितीयादिध्यानोपपन्नश्चक्षुर्विज्ञानमसंमुखीकुर्वाणः। यथा चेयं चक्षुर्विज्ञानरूपधातूनां प्रतिलम्भसमन्वागमचिन्ता तथा श्रोत्रविज्ञानशब्दधात्वादीनामपि प्रतिलम्भसमन्वागमचिन्ता कर्तव्या' श्रोत्रविज्ञानधात्वोः[3] स्यात्पृथग्लाभः सहापि चेत्यादि ॥३८॥

[द्वादशाध्यात्मिका हित्वा रूपादीन् धर्मसंज्ञकः।
सभागस्तत्सभागोऽपि शेषो यो न स्वकर्मकृत् ॥३९॥]

द्वादशाध्यात्मिका

इति। उभयावधारणम्। अवधारणादेव चान्ये रूपादयो बाह्या इति सिद्धम्। आत्मनि अधि अध्यात्मम्। अधि आत्मानमिति वा अध्यात्मम्। अध्यात्ममेवाध्यात्मिकाः। [4]अध्यात्मं वा भवा आध्यात्मिकाः। **अहंकारसंनिश्रयत्वाच्चित्तमात्मेत्युपचर्यत** इति। अहंकारसंनिश्रय आत्मेत्यात्मवादिनः संकल्पयन्ति। चित्तं चाहंकारनिश्रय इत्यात्माप्युपचर्यते। कथमित्याह'

आत्मना हि सुदान्तेन स्वर्गं प्राप्नोति पण्डितः

इत्युक्तं गाथायाम्। कथं पुनर्गम्यते' चित्तमात्मशब्देनोच्यत इति। तत

---

1 B. adds च.
2 B. धातोश्च्युतः
3 B. विज्ञानशब्दधात्वोः
4 To. अध्यात्मे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आह । चित्तस्य चान्यत्र दमनमुक्तं भगवतेति । अन्यत्र गाथायामुक्तम् ।

चित्तस्य दमनं साधु चित्तं दान्तं सुखावहम्[1]

इति । तेनायमर्थः । आत्मनि [2]चित्तीकार्ये । आत्मानं वा चित्तमधिकृत्य ये धर्माः प्रत्यासन्नभावादाश्रयभावेन वर्तन्ते त आध्यात्मिकाः । ये तु विषयभावेन वर्तन्ते ते बाह्या इति । कः पुनः प्रत्यासन्नभावः । येन विज्ञानं तद्विकारमनुविधत्ते । चक्षुरादिष्वेव हि विज्ञानं लक्ष्यते न रूपादिष्विति । तथा हि चित्तमिन्द्रियसंबद्धे शरीरदेशे परिच्छिद्यते न विषयदेश इति । एवं तर्हि षड्विज्ञानधातव इति विस्तरः । इह पञ्च तावद्विज्ञानधातवो वर्तमाना एव गृह्यन्ते । इन्द्रियविषयसमानकालत्वात् । वर्तमानविषया हि पञ्च विज्ञानकायाः । मनोविज्ञानधातुरपि वर्तमान एवेह व्यवस्थाप्यते । यस्मान्मनोधातुरस्याश्रयो[3]ऽनन्तरातीतो व्यवस्थाप्यते । अथ[4] भेदादेव हि मनोधातुमनोविज्ञानधात्वोः पृथग्व्यवस्थानम् । तस्मात्त आध्यात्मिका न प्राप्नुवन्ति । न ह्येते मनोधातुत्वमप्राप्ता अतीतत्वमप्राप्ताः चित्तस्याश्रयोभवन्ति यदा[5] तदा त एव ते भवन्तीति लक्षणं नातिवर्तन्त इति । किमनेन वाक्येन साधितम् । इदमनेन साधितम् । वर्तमानानामप्येषामाश्रयभावो भविष्यतीति भविष्यदाश्रयभावेनाध्यात्मिकत्वं भवतीति । यदि वानागतप्रत्युत्पन्नस्येति विस्तरः । अतीतेऽध्वनि यन्मनोधातुलक्षणं तदनागतप्रत्युत्पन्नयोरप्यध्वनोरस्त्येवेत्यभिप्रायः । न हि लक्षणस्याध्वसु व्यभिचारोऽस्ति । न हि स्वभावपरित्यागोऽस्तीत्यर्थः ।

धर्मसंज्ञकः

सभागः

इति । धर्मसंज्ञकः सभाग एवेत्यवधार्यते । यो हि विषयो यस्य विज्ञानस्य नियत इति । तद्यथा चक्षुर्विज्ञानस्य रूपं नियतो विषयो यावन्मनोविज्ञानस्य धर्माः । यदि तत्र तच्चक्षुर्विज्ञानमुत्पन्नमुत्पत्तिधर्मि वा । यावद्यदि तत्र मनोविज्ञानमुत्पन्नमुत्पत्तिधर्मि वा । स विषयः सभाग इत्युच्यते । तस्य च स्वभावसहभूनिर्मुक्ता इति । स्वभावेन सहभूभिश्च निर्मुक्ताः स्वभावसहभूनिर्मुक्ताः । सर्वधर्मास्तस्य विज्ञानस्यालम्बनं । न स्वभावः । स्वात्मनि वृत्तिविरोधात् । न हि तदेवाङ्गुल्यग्रं तेनैवाङ्गुल्यग्रेण स्पृश्यते । न[6] सैवासिधारा तयैवासिधारया

---

1 Cf. Dhammapada, verse 35.
2 Mss. चित्ते कार्ये
3 B. ०रप्याश्रयो
4 B. and To. following Tib. काल०
5 B. following Tib. adds भवन्ति.
6 Mss. & B. omit न, but Tib. has *med*.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

छिद्यते। न सहभुवः संप्रयुक्ता विप्रयुक्ता वा। अतिसंनिकृष्टत्वात्। न ह्यक्षिस्थमञ्जनं तेन गृह्यते। **स पुनश्चित्तक्षणोऽन्यस्य चित्तक्षणस्यालम्बनमिति।** ये पूर्वस्मिन्क्षणे स्वभावसहभुवो धर्मा नालम्बिता अभूवंस्तेऽप्यालम्बिता इति **द्वयोः क्षणयोः सर्वधर्मा आलम्बनं भवन्ति। तस्माद्धर्मधातुर्नित्यं सभागः।** धर्मधातुर्हि नियतो मनस एव। **तत्सभागाश्च शेषाः।** [1]चशब्देन सभागाश्चेति शेषा एव सभागतत्सभागा इत्यवधार्यते। ननु च धर्मधातुरेव सभाग एवेत्यवधारणे शेषा न [2]सभागा इति सभागतत्सभागाः सेत्स्यन्ति। न सेत्स्यन्ति। यद्यपि न सभागा एव हि भवेयुः तत्सभागा एवेति तु संभवेयुः। तन्निवृत्त्यर्थमिदमारभ्यते। सभागतत्सभागा एव शेषाः। न तु सभागा एव नापि तत्सभागा एवेति।

यो न स्वकर्मकृत्

स तत्सभाग इति संबन्धनीयम्। तत्सभागाश्चेत्यनन्तरोक्तत्वात्। उक्तं भवति यः स्वकर्मकृत् स सभाग इति। अस्वकर्मकृदेव तत्सभागस्तत्सभाग एव [3]चास्वकर्मकृदित्यवधारणेऽर्थापत्त्या स्वकर्मकृत्सभाग इति। **रूपाण्यपश्यदिति।** अद्राक्षीदिति वक्तव्यम्। एवं ह्यद्यतनातीतं ह्यस्तनातीतं च परिगृहीतं भवति। अन्यथा ह्यव्यापि लक्षणं स्यात्। [4]अथैवमेव पाठः। उदाहरणमात्रं तद्द्रष्टव्यम्। अद्यतनातीतमपि वक्तव्यम्। **एवं यावन्मनः स्वेन विषयकारित्रेण वक्तव्यमिति।** स्वेन विषयपुरुषकारेण वक्तव्यम्। कथमिति। येन श्रोत्रेण शब्दानशृणोच्छृणोति श्रोष्यति वा तदुच्यते सभागं श्रोत्रमिति [5]सर्वम्। **विज्ञानसमायुक्तमसमायुक्तं**[6] **चेति** विज्ञानसंबद्धमसंबद्धं चेत्यर्थः। **यदेकस्य चक्षुः सभागं तत्सर्वेषाम्।** किम्। सभागमिति वर्तते। **एवं तत्सभागमपीति।** यदेकस्य चक्षुस्तत्सभागं तत्सर्वेषां तत्सभागमित्यर्थः। **प्राप्तग्रहणादिति।** गन्धादयो ये देवदत्तेन घ्राणादीन्द्रियप्राप्ता गृह्यन्ते न ते यज्ञदत्तेन गृह्यन्ते। स्वघ्राणादिकप्रविष्टत्वात्। **इत्यसाधारणत्वादेषां चक्षुरादिवदतिदेशो न्याय्यः।** य एकस्य गन्धः सभागः स सर्वेषाम्। एवं तत्सभागोऽपीति वक्तव्यम्। न तु वक्तव्यम्। यथा रूपमेवं गन्धादय इति। **अस्ति ह्येष संभवः।** य एव गन्धादय एकस्य घ्राणादिविज्ञानमुत्पादयेयुस्त

---

1 Mss. drop च शब्देन 2 Mss. भागा 3 To. वा०
4 B. अथदेव० 5 B. following Tib. सर्वत्र योजनीयम्
6 B. विज्ञानसम्प्रयुक्तमसम्प्रयुक्तं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवान्येषामपीति । यदि ते देवदत्तघ्राणादीन्द्रियप्राप्ता भवेयुर्देवदत्तस्य विज्ञानमुत्पादयेयुः । अथ यज्ञदत्तघ्राणादीन्द्रियप्राप्ता यज्ञदत्तस्य विज्ञानमुत्पादयेयुरित्यर्थः । [1]अथवा त एवान्येषामपीति तलान्तर्गतसूक्ष्मक्रिमिप्रभृतीनामपि विज्ञानमुत्पादयेयुः' न तस्यैव देवदत्तस्य यस्य घ्राणादीन्द्रियप्राप्तास्ते गन्धादय इति । **इन्द्रियविषयविज्ञानानामन्योन्यभजनमिति** । आश्रयविषयाश्रयिभावेनान्योन्याभिमुख्येन प्रवृत्तिः । तथा हीन्द्रियधातवो [2]विज्ञानधातूनाश्रयभावेन यथायोगं भजन्ते' सेवन्त इत्यर्थः' [3]विषयधातूंश्च विषयिभावेन । तथा[4] विषयधातवः स्वेन्द्रियधातून्[5] विषयभावेन भजन्ते । विज्ञानधातूंस्तु[6] विषयभावेनालम्बनभावेन वा भजन्ते । तथा विज्ञानधातवः स्वेन्द्रियधातूनामाश्रयिभावेन भजन्ते' विषयधातूंश्च[7] विषयिभावेनालम्बकभावेन वा भजन्ते । इत्यन्योन्यभजनं भागः । भावे घञ् । **कारित्रभजनं वा भागः** । कारित्रं चक्षुरादीनां दर्शनादि ' विज्ञानधातूनां विज्ञातृत्वम्' विषयधातूनां तद्विषयालम्बनभावः । तस्य कारित्रस्य भजनं कारित्रभजनम् । स एषामस्तीत्यर्थः । प्रदर्शनमात्रमेतत् । विग्रहस्त्वेवं कर्तव्यः । सह भागेन वर्तन्ते सभागा इति । समानो वा भाग [8]एषां त इमे[8] सभागाः । समानार्थस्य सहशब्दस्य स-भाव आदिष्टः । **स्पर्शसमानकार्यत्वाद्वा** । किम्' सभागा इति प्रकृतम् । अत्र कर्मणि घञ्' भज्यत इति भागः । विग्रहस्तु पूर्ववत्' स्पर्शश्चैतसिक एषामिन्द्रियविषयविज्ञानानां समानं कार्यम् । चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानम् । त्रयाणां संनिपातः स्पर्श इत्यादिवचनात् । **ये पुनरसभागा** इति विस्तरः । ये पुनरन्ये चक्षुरादय इत्थमसभागास्तेषां **सभागानामुक्तलक्षणानां सभागाः सदृशास्ते तत्सभागाः** । तेषां तैर्वा सभागास्ते तत्सभागाः । [9]तुल्यार्थो ह्यत्र सभागशब्दो गृह्यते ॥३९॥

[दश भावनया हेयाः पञ्च चान्त्यास्त्रयस्त्रिधा ।
न दृष्टिहेयमक्लिष्टं न रूपं नाप्यषष्ठजम् ॥४०॥]

दर्शनहेया इति । दर्शनं प्रथमतः सत्यदर्शनम्' [10]अनास्रवं पञ्चदशचित्तक्षणसंगृहीतम् । **भावना** तदेव पुनः पुनर्दर्शनम् । लौकिकं वा समाहितं ज्ञानं भावना ।

---

1 Mss. drop अथवा.
2 B. विज्ञानधातूनामाश्रय०
3 B. विषयधातूनां च
4 B. adds हि.
5 B. ०धातूनां
6 B. ०धातूनां तु
7 B. धातूनां च
8...8 B. एषामिमे
9 To. तुल्यार्थं
10 B. अनास्रवपञ्च०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दश भावनया हेयाः पञ्च च

इति। रूपिणो धातवो दश पञ्च च तद्विज्ञानधातव इति। कथं पुनरेतद्गम्यत एत एव त इति।

अन्त्यास्त्रयस्त्रिधा

इति वचनात्। अन्त्यत्रयादन्ये पञ्चदश धातव एव त[1] उच्यन्त इति। ते भावनाहेया एवेत्यवधार्यन्ते। **त्रिप्रकारा** इति। दर्शनहेया भावनाहेया अहेयाश्चेत्यर्थः। एत एव त्रिधा। **अष्टाशीत्यनुशयास्तत्सहभुव** इति। धातुप्रकाराकारभिन्नाः सत्कायदृष्ट्यादयोऽनुशयाः। तत्सहभुवो विज्ञानवेदनादयः संप्रयुक्ताः। असंप्रयुक्तानि च तल्लक्षणानुलक्षणानि। **तत्प्राप्तयश्च सानुचरा** इति। तच्छब्देनानुशयादयः संबध्यन्ते। तेषामनुशयानां तत्सहभुवां च प्राप्तयस्तत्प्राप्तयो यद्यप्यनुशयसहभुवो भवन्ति न तु सर्वाः। काश्चिद्धि प्राप्तयोऽनुशयादिसहभुवो भवन्ति। याः सहजाः। काश्चित्तु पूर्वं पश्चाच्च तेभ्यो भवन्ति। अतः पृथक् प्राप्तिग्रहणम्। सानुचरा इति ग्रहणेनानुप्राप्तयस्तल्लक्षणानि च संगृह्यन्ते। **शेषाः सास्रवा भावनाहेया** इति। एत [2]एव त्रयोऽन्त्या धातवो ये शेषा दर्शनहेयेभ्योऽन्ये सास्रवास्ते भावनाहेयाः। के पुनस्ते। दशानुशयास्तत्सहभुवस्तत्प्राप्तयश्च सानुचराः[3] कुशलसास्रवाः। अनिवृताव्याकृताश्च संस्काराः। अविज्ञप्तिरूपं च सास्रवं सानुचरम्। **अनास्रवा अहेया** इति। मार्गसत्यासंस्कृतस्वभावाः। ननु चान्यदपीति विस्तरः। पृथग्जनत्वमनिवृताव्याकृतसंस्कारस्वभावत्वाद्भावनाहेयमध्यगतम्। अपायसंवर्तनीयं च कायवाक्कर्म रूपस्वभावत्वाद् भावनाहेयमुक्तमिति। अतश्चोदयन्ति वात्सीपुत्रीयाः। आर्यमार्गविरोधित्वादिति। पृथग्जनत्वमार्यमार्गोत्पादे न भवति। नियते चापायिके कर्मणि सत्यार्यमार्गो नोत्पद्यते। आर्यमार्गोत्पादे च सत्यापायिकं कर्म नोत्पद्यते। तस्मात् सत्कायदृष्ट्यादिवत्तदुभयं दर्शनहेयमिति वर्णयन्ति। तत्प्रतिषेधार्थमुक्तमप्येतदभिसंक्षेपेण। सुखप्रतिपत्त्यर्थं पुनरुच्यते।

न दृष्टिहेयमक्लिष्टं न रूपं नाप्यषष्ठजम्।

दृष्टिर्दर्शनम्। अक्लिष्टमनिवृताव्याकृतं [4]कुशलं वा[4] न दर्शनहेयम्। **रूपं** तु क्लिष्टमपि न दर्शनहेयम्। **अषष्ठजं** पञ्चेन्द्रियजं पञ्चविज्ञानम्। तदरूपं क्लिष्टमपि सन्न दर्शनहेयम्। अतोऽन्यत्तु दर्शनहेयं संभवति यथोक्तम्। **अक्लिष्टाव्याकृतं च**

1 B. omits it.

2 B. drops एव.

3 Mss. सानुचाराः

4...4 B. कुशलसास्रवं च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पृथग्जनत्वम्' समुच्छिन्नकुशलमूलवीतरागाणामपि तत्समन्वागमादिति । समुच्छिन्नकुशलमूलाः कुशलैर्धर्मैरसमन्वागता इष्टाः । पृथग्जनत्वेन तु समन्वागताः । यस्मात्ते पृथग्जना इष्यन्ते तस्मान्न कुशलं पृथग्जनत्वम् । क्लिष्टमपि तन्न भवति' वीतरागाणामपि तेन समन्वागमात् क्लिष्टस्य हि वस्तुनः स्वभावप्रहाणमिष्यते । [1]प्राप्तिच्छेदः प्रहाणमित्यर्थः[1] । तद्यदि पृथग्जनत्वं क्लिष्टं स्यात् लौकिकवीतरागाणां तस्य प्राप्तिच्छेद इति तेनासमन्वागमः स्यात् । इष्यते च तेषां तेन समन्वागमः । तथा हि ते लौकिकवीतरागाः पृथग्जना एवेष्यन्ते । अक्लिष्टाव्याकृतत्वैकत्वेऽदोषः । छन्दरागप्रहाणं ह्यक्लिष्टस्येष्यते' तदालम्बनक्लेशप्राप्तिच्छेद इत्यर्थः । न तु तदात्मीयप्राप्तिच्छेद इष्यते । तथा ह्युक्तं भगवता । यो भिक्षवो रूपे छन्दरागस्तं प्रजहीत' एवं[2] वस्तद्रूपं प्रहीणं भवतीति विस्तरः । तस्मादक्लिष्टाव्याकृतं पृथग्जनत्वं तेषां प्रहीणमपि चक्षुरादिवत्समुदाचरति ' अतस्तेन समन्वागमो भवति । किं पुनः कारणम्' अक्लिष्टाव्याकृतत्वात्पृथग्जनत्वं न दर्शनप्रहातव्यम्' रूपत्वाच्च कायवाक्कर्म' इत्याह ' सत्येष्वविप्रतिपत्तेः । अक्लेशदुष्टत्वात् [3]पृथग्जनत्वं न दुःखादिषु सत्येषु विप्रतिपद्यते । न विपरीतरूपेण प्रवर्तत इत्यर्थः । [4]अनालम्बकत्वाच्च कायवाक्कर्माप्यनालम्बकत्वादेव न विप्रतिपद्यते । तस्मात्तदुभयं न दर्शनहेयम् । अयं च[5] सत्येष्वविप्रतिपत्तेरिति हेतुरषष्ठेऽप्यनुवर्तयितव्यः । दुःखे धर्मज्ञानक्षान्तौ पृथग्जनत्वप्रसङ्गाच्चेति' अयमुपचयहेतुः ' पृथग्जनत्वस्यैव दर्शनहेयत्वनिवृत्त्यर्थमुच्यते' कायवाक्कर्मणोऽनभिसंबन्धात् । दुःखे धर्मज्ञानक्षान्तौ पृथग्जनत्वप्राप्तिश्छिद्यते' न तु छिन्ना' तत्प्रहेयक्लेशप्राप्तिवत् ।

निरुध्यमानो मार्गस्तु प्रजहाति तदावृतिम्[6]

इति वचनात् । दुःखे धर्मज्ञाने तु तत्प्राप्तिश्छिन्ना । तेन तत्प्राप्तिसद्भावाद् दुःखे धर्मज्ञानक्षान्त्यवस्थायां स पुद्गलः पृथग्जनः स्यात् । न चासौ तस्यामवस्थायां पृथग्जन इति शक्यते व्यवस्थापयितुम्' अधिगतार्यमार्गत्वात् । तथा हि पृथग्जनत्वं कतमत् । आर्यधर्माणामलाभ इति पृथग्जनत्वलक्षणम् । स चार्यधर्माणां [7]लाभेनालाभो[7] व्यावर्त्यते । तस्मादार्य एवासाविति । इदं तावद्भवन्तो

1...1 Mss. & B. प्राप्तिच्छेदप्रहाण०

2 B. adds छन्दरागप्रहाणे.

3 B. adds अनालम्बकत्वाच्च.

4 B. omits अनालम्बकत्वाच्च.

5 B. omits च.

6 Kārikā, VI. 81.

7 7...B. लाभेन मार्गलाभो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वैभाषिकाः प्रष्टव्याः, तत्पृथग्जनत्वं किं भावनामार्गप्रतिलम्भादेव प्रहीयते। नेत्युच्यते। तत्पृथग्जनत्वं नवभौमिकम्, कामावचरं यावद्भावाग्रिकम्[1]। तच्चाक्लिष्टम्। तेन प्रतिभूमिनवमक्लेशप्रकारप्रहाणावस्थायां प्रहीयते। सर्वं ह्यक्लिष्टं सास्रवं नवम एव विमुक्तिमार्गे प्रहीयते। यद्येवमवीतरागावस्थायामार्यः पृथग्जनः स्यात्। न, पृथग्जनत्वस्य विहीनत्वात्। दुःखे धर्मज्ञानक्षान्तेः प्रभृति हि[2] तद्विहीनमेव, न तु प्रहीणम्। कः पुनर्विहानप्रहाणयोर्विशेष इति। विहानं प्राप्तिच्छेदे व्यवस्थापितम्, प्रहाणं तु प्रतिपक्षलाभे व्यवस्थापितम्। तस्मात्प्राप्तिच्छेदात्तेन पृथग्जनत्वेनासमन्वागमात्तस्यामवस्थायामार्य एव भवति, न पृथग्जन इत्यदोष एषः ॥४०॥

[चक्षुश्च धर्मधातोश्च प्रदेशो दृष्टिरष्टधा।
पञ्चविज्ञानसहजा धीर्न दृष्टिरतीरणात् ॥४१॥]

चक्षुश्च धर्मधातोश्च प्रदेशो दृष्टिः

इति। चक्षुरेव धर्मधातुप्रदेश एव च[3] दृष्टिरित्यवधार्यते। **सत्कायदृष्ट्यादिकेति**, सत्कायदृष्टिरन्तग्राह[4]-दृष्टिर्मिथ्यादृष्टिर्दृष्टिपरामर्शः शीलव्रतपरामर्शश्चेति। **शैक्षस्यानास्रवेति**, प्रज्ञेत्यधिकृतम्। [5]**अशैक्षस्याशैक्षीति**। अशैक्षस्यानास्रवा प्रज्ञाऽशैक्षी। क्षयानुत्पादज्ञानवर्ज्येति वक्तव्यम्। वक्ष्यति हि

क्षयानुत्पादधीर्न दृक्[6]

इति। **समेघामेघेति** विस्तरेण यावत् [7]**क्लिष्टाक्लिष्टलौकिकीशैक्ष्यशैक्षीभिर्दृष्टिभिर्धर्मदर्शनमिति**। लोके भवा लौकिकी। क्लिष्टा चाक्लिष्टा च क्लिष्टाक्लिष्टा। क्लिष्टाक्लिष्टा[8] चासौ लौकिकी च क्लिष्टाक्लिष्टलौकिकी। क्लिष्टाक्लिष्टलौकिकी च शैक्षी चाशैक्षी च क्लिष्टाक्लिष्टलौकिकीशैक्ष्यशैक्ष्यः, ताभिर्धर्मदर्शनम्। कीदृशमित्याह, **समेघमेघारात्रिंदिवरूपदर्शनवदिति**। यथा समेघायां रात्रौ रूपदर्शनम्, एवं क्लिष्टया लौकिक्या सत्कायदृष्ट्यादिकया दृष्ट्या [9]धर्मदर्शनम्। अव्यक्ततरमित्यर्थः। यथा तस्यामेव रात्रावमेघायां रूपदर्शनम्, एवमक्लिष्टया लौकिक्या दृष्ट्या धर्मदर्शनम्। अव्यक्तमित्यर्थः। यथा समेघे दिवसे रूपदर्शनम्, एवं शैक्ष्या दृष्ट्या धर्मदर्शनम्। व्यक्तं न त्वत्यर्थम्। यथा पुनरमेघे दिवसे रूपदर्शनम्, एवमशैक्ष्या दृष्ट्या धर्मदर्शनम्। अत्यर्थं व्यक्तमित्यर्थः।

---

1 B. ०भवाग्रिकम् 2 B. omits हि. 3 To. omits च.
4 B. ०रन्तग्राह० 5 B. अशिक्षस्या० 6 Kārikā, VII. 1.
7 B. क्लिष्टाक्लिष्टा० 8 To. क्लिष्टाक्लिष्टे 9 B. क्लिष्टधर्मदर्शनम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतीरणात्

इत्यसंतीरणात्। संतीरणं पुनर्विषयोपनिध्यानपूर्वकं निश्चयाकर्षणम्। **अत एव चान्यापीति** विस्तरः। अत एवासंतीरणादन्यापि मानसी क्लिष्टा रागादिसंप्रयुक्ता। अक्लिष्टा वा [1]चयानुत्पाद-[1]ज्ञानानिवृताव्याकृता प्रज्ञा न दृष्टिः। **रूपालोचनार्थेनेति।** चक्षुर्न संतीरकत्वेन दृष्टिः। किं तर्हि। रूपालोचनार्थेन। प्रज्ञा तु संतीरकत्वेनेति दर्शितं भवति ॥४१॥

[चक्षुः पश्यति रूपाणि सभागं न तदाश्रितम्।
विज्ञानं दृश्यते रूपं न किलान्तरितं यतः ॥४२॥]

अन्यविज्ञानसमङ्गिन[2] इति। अन्यविज्ञानसंमुखीभाविनः पुद्गलस्यान्यविज्ञानव्यासक्तस्येत्यर्थः। **पश्येच्चक्षुरिन्द्रियम्।** विषयादिसांनिध्यात्। यस्य तु चक्षुर्विज्ञानं पश्यतीति पक्षः तस्य तद्विज्ञानासंभवाददोषः। **तदेव चक्षुराश्रितं विज्ञानं पश्यतीत्यस्तीति**[3]। दर्शनस्य तद्भावे भावात्तदभावे चाभावात्।

दृश्यते रूपं न किलान्तरितं यतः

इति। किलशब्दः परमते[4]। **तस्याप्रतिघत्वादिति।** विज्ञानममूर्त[5] कुड्यादीन्यतिक्रम्यापि पश्येत्। विज्ञानवाद्याह। **नैव ह्यावृते चक्षुर्विज्ञानमुत्पद्यत** इति। अनाभासगतत्वाद्विषयस्येत्यभिप्रायः। **किं खलु नोत्पद्यत** इति। अप्रतिघत्वात्कुड्यादीनि व्यतिभिद्य कुड्याद्यव्यवहित इव विषये विज्ञानमुत्पत्स्यत इति भावः। **यस्य त्विति।** यस्य मम वैभाषिकस्य पक्षः **चक्षुः पश्यतीति तस्य मम चक्षुषः सप्रतिघत्वाद् व्यवहिते कुड्यादिभिर्वृत्त्यभावः।** तस्य चक्षुष आलोचनवृत्त्यभावः। विज्ञानं तर्हि वैभाषिकस्य व्यवहितेऽपि प्राप्नोतीति चोद्यमन्तर्नीतमाशङ्क्य स एव वैभाषिकः पुनराह। **विज्ञानस्याप्यनुत्पत्तिरिति।** यथैव चक्षुषो व्यवहिते वृत्त्यभावो युज्यते। विज्ञानस्याप्यनुत्पत्तिर्विज्ञानवृत्त्यभावः। [6]**आश्रयेण सहैकविषयप्रवृत्तत्वाद्युज्यते।** य एव हि चक्षुषो व्यवहितोऽर्थो विषयः स्यात्स एव विज्ञानस्येति युक्ता विज्ञानस्याप्यनुत्पत्तिः। तव तु विज्ञानवादिनोऽप्रतिघत्वाद्विज्ञानस्य व्यव-

---

1...1 Mss. च चयानुत्पादना
2 B. संसर्गिन
3 B. पश्यतीति
4 B. परमतप्रदर्शनः
5 Mss. & To. ०मूर्त्ति
6 Mss. omit आश्रयेण सह.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हिते विज्ञानमुत्पद्येत । न तूत्पद्यते । तस्माच्चक्षुः पश्यति न विज्ञानमिति सिद्धम् । एवं विज्ञानवादिनि प्रतिषिद्धे तत्पक्षमाचार्यो गृहीत्वाह । **किं नु वै चक्षुः प्राप्तविषयमिति** विस्तरः । **यथा** कायेन्द्रियं प्राप्तविषयं कुड्यादिव्यवहितं विषयं न गृह्णाति कुड्यादिप्रतिघातात् ततः परेण प्रवर्तितुमलभमानत्वात् । किमेवं चक्षुः प्राप्तविषयं कुड्यादिप्रतिघातेन प्रतिहतं सत् ततः परेण गन्तुमलभमानं तं कुड्यादिव्यवहितं विषयं न गृह्णातीति । नैतद्युज्यते । तस्मात्सप्रतिघत्वादावृतं चक्षुर्न पश्येदिति न वक्तव्यम् । **काचाभ्रपटलस्फटिकाम्बुभिश्चान्तरितं कथं दृश्यत** इति । काचेनाभ्रपटलेन स्फटिकेनाम्बुना चान्तरितं व्यवहितं रूपं कथं दृश्यते । सप्रतिघत्वाद्धि कुड्यादिव्यवहितवत्काचादिव्यवहितं चक्षुर्न पश्येत् । तच्च पश्यतीति सिद्धान्तः । **यत्रालोकस्याप्रतिबन्ध** इति । आलोके हि सति विषय आभासगतो भवतीति विज्ञानोत्पत्तिसंभवः । एवं हि विज्ञानकारणं पठ्यते । चक्षुरिन्द्रियमनुपहतं भवति । विषय आभासगतो भवति । तज्जश्च मनस्कारः प्रत्युपस्थितो भवतीति । अत **आवृते रूपे** काचादिभिस्तत्रोत्पद्यत **एव चक्षुर्विज्ञानम्** । **यत्र तु प्रतिबन्धो**ऽकाचादिस्वभावैः कुड्यादिभिस्तमस्विद्भिः[1] **तत्रावृते नोत्पद्यते** । किम् । चक्षुर्विज्ञानमिति । **अनुत्पन्नत्वादावृतं नेक्ष्यत** इति । यत्त्वया किं खलु नोत्पद्यत इत्यनुत्पत्तौ कारणं पृष्टमिदं तत्कारणमिति ब्रूमः । **यत्तर्हि सूत्र उक्तमिति** विस्तरः । **चक्षुषा रूपाणि दृष्ट्वा** न निमित्तग्राही भवति नानुव्यञ्जनग्राहीति विस्तरः । यस्माच्चक्षुः पश्यति तस्मात्पुद्गलश्चक्षुषा पश्यतीत्यभिप्रायः । आचार्यः प्राह । **तेनाश्रयेणेत्ययमत्राभिसन्धिः** । [2]चक्षुराश्रित्येत्येवात्राभिसंधिः[2]। चक्षुषा आश्रयेण विज्ञानेन दृष्ट्वेत्यर्थः । कथं ज्ञायत इत्याह । **यथा मनसा धर्मान्विज्ञायेति** । मनसा आश्रयेण विज्ञानेन विज्ञायेति भवति । **न** ह्यनन्तरातीतं **मनो धर्मान् विजानाति** । वर्तमानावस्थायां हि विज्ञानं कारित्रं करोति । **आश्रितकर्म वा आश्रयस्योपचर्यत** इति । आश्रितस्य विज्ञानस्य कर्म दर्शनमाश्रयस्य चक्षुष उपचर्यते । विज्ञाने पश्यति सति चक्षुः पश्यतीत्युपचारः । **यथा मञ्चाः क्रोशन्तीति** । यथा मञ्चस्थेषु पुरुषेषु क्रोशत्सु मञ्चाः क्रोशन्तीत्युपचारस्तद्वत् । **यथा च सूत्र उक्तमिति** विस्तरः । वैभाषिकाणामप्ययं पक्षः । न चक्षुर्विजानाति । किं तर्हि । विज्ञानं विज्ञानातीति । अथ चोक्तम् । **चक्षुर्विज्ञेयानि**

---

1 B. तमस्विभिः

2...2 Mss. omit this sentence.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपाणि कान्तानीति। तत्राश्रितकर्म आश्रयस्योपचर्यत इत्यवश्यं प्रतिपत्तव्यम्। द्वारं यावदेव रूपाणां दर्शनायेति। द्वारमिव द्वारम्' हेतुराश्रय इत्यभिप्रायः। अनेनागमेन तेनाश्रयेणेति योऽर्थ उक्तस्तमेव समर्थयति। तेन [1]चक्षुषा द्वारेण[2] विज्ञानं पश्यतीति। दर्शने तत्र द्वाराख्येति' चक्षुर्ब्राह्मण द्वारं दर्शनं[3] यावदेव रूपाणां दर्शनायेत्यत्र:[4]। न ह्येतद्युज्यते' दर्शनं रूपाणां दर्शनायेति। अत्रावाचकत्वान्न तद्युज्यत इत्यभिप्रायः। यदि दर्शनं करणं दृश्यतेऽनेनेति दर्शनमिति' कर्तरि वा ल्युट्' पश्यतीति दर्शनमिति। दर्शनायेति वा[5] भावसाधनम्' दृष्टिर्दर्शनं तस्मै दर्शनायेति कथमेतन्न युज्यते। यस्माच्चक्षुर्व्यतिरिक्तं दर्शनं नास्ति। आलोचनमिति चेत्' न' विज्ञानाव्यतिरिक्तत्वात्। विज्ञानमेव ह्यालोचनम्। नातोऽन्यत्पश्यामः। यदि तु चक्षुर्द्वारं विवरं रूपाणां दर्शनाय विज्ञानायेत्यर्थो गृह्येत तद्युज्यते। तद्यथा काचित्प्रज्ञा पश्यत्यप्युच्यत इति' पश्यतीत्यप्युच्यत इति' इतिशब्दोऽत्राध्याहार्यः' [6]अनेनोपन्यासेन दर्शनविज्ञानयोरनर्थान्तरभाव इति दर्शयति। का पुनरसौ या प्रज्ञैवमुच्यते। या दर्शनात्मिकोक्ता'

तदन्योभयथार्या धीः[7]

इति[8]। तस्यैवं जानत एवं पश्यत इति सूत्रे[9] वचनात्। किंचिदिति वचनान्न सर्वं विज्ञानं पश्यतीत्युक्तं भवति। चक्षुर्विज्ञानं हि पश्यतीत्युच्यते' न तु श्रोत्रादिविज्ञानमिति। कान्या [10]दृशिक्रियेति' यस्योपलम्भकत्वं तस्य दर्शनं युज्यत इत्यभिप्रायः। तदेतदचोद्यमिति विस्तरः। यदि विज्ञानं विजानाति' कर्तृभूतस्य विज्ञानस्य कान्या विज्ञानक्रियेति वक्तव्यमिति तुल्यं चोद्यमापद्यते। न च तत्र कर्तृक्रियाभेदः। न कर्तुर्विज्ञानस्य क्रियायाश्च विज्ञानलक्षणाया भेदोऽन्यत्वमस्ति। भवति च कर्तृक्रियासंबन्धव्यपदेशः' विज्ञानं विजानातीति। तद्वदिहापि भवेत्' चक्षुः पश्यतीत्यचोद्यमेतत्। चक्षुर्विज्ञानं दर्शनमित्यपरे' तस्याश्रयभावाच्चक्षुः पश्यतीत्युच्यते। यथा नादस्याश्रयभावाद् घण्टा[11] नदतीत्युच्यते। विज्ञानं तर्हि कस्याश्रयभावाद्रूपं विजाना-

1 B. चक्षुषो
2 B. adds चक्षुः.
3 B. & To. drop दर्शनं.
4 Mss. °येत्यर्थः
5 To. च
6 B. adds प्रजानातीत्यप्युच्यत इति.
7 Kārikā, VII. 1.
8 B. adds वचनात्.
9 B. & To. add अपि.
10 To. दृष्टि°
11 Mss. घटं, but Tib. *dril.*

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तीत्याह । **विज्ञानस्याश्रयभावादिति** । चक्षुर्विज्ञानस्याश्रयभावादित्यर्थः । **तद्विज्ञानं दर्शनमिति रूढं लोक** इति । दर्शनमिति लोके रूढं न तु विज्ञानमिति रूढम् । **कथं गम्यत** इत्याह । **तथा हि** [1]**तस्मिन्नुत्पन्ने रूपं दृष्टमित्युच्यते न विज्ञातमिति । विभाषायामप्युच्यत** इति । स एवार्थोऽभिधीयत इत्यभिप्रायः । **चक्षुःसंप्राप्तं** चक्षुराभासगतम् । **विज्ञानं तु सांनिध्यमात्रेणेति** । नाश्रयभावयोगेनेति दर्शयति । **यथा सूर्यो दिवसकर** इति । यथा सांनिध्यमात्रेण सूर्यो दिवसं करोतीत्युच्यते तथा विज्ञानं विजानातीत्युच्यते । कस्मात् । लोके तथा सिद्धत्वात् । **निर्व्यापारं हीदमिति** विस्तरः । निर्व्यापारमिति निरीहम् । अनेन हि कर्तुरर्थान्तरभूतां क्रियां प्रतिषेधति । **धर्ममात्रमिति** स्वतन्त्रस्य कर्तुः प्रतिषेधं करोति । **हेतुफलमात्रं चेति** । असत्यपि कर्तरि हेतुफलयोः [2]कार्यकारणमर्थत्वं[2] दर्शयति । **तत्र छन्दत उपचाराः क्रियन्ते** ।[3] यदि[4] वस्तु व्यवहाराङ्गम् । तेनेह व्यवहारार्थसंसिद्ध्यर्थमसदपि सद्रूपेण परिकल्प्य कर्तृक्रियादिव्यवस्थानं क्रियते । चक्षुः पश्यति विज्ञानं विजानातीत्येवमादि । **नात्राभिनिवेष्टव्यम्** । भावो भवित्वपेक्षोऽन्य इत्यादि । **जनपदनिरुक्तिं नाभिनिविशेतेति** । जनपदस्तत्र नियता निश्चिता चोक्तिर्जनपदनिरुक्तिः । तां नाभिनिविशेत । कस्मात्[5] । अत्रेयं निरुक्तिरिति । न वा सर्वमेवार्थवतीं निरुक्तिं कल्पयेत् । **संज्ञां च लोकस्य नाभिधावेदिति** । आत्मा जीव इत्येवमादिकां संज्ञां लोकस्य नाध्यारोपयेत् । अभूतसमारोपेण । अस्त्यात्मा शरीरादिव्यतिरिक्त इति नातीव गच्छेदित्यर्थः । अथवा सञ्ज्ञां च लोकस्य नाभिधावेन्नातिसरेत्[6] । अर्थाभावात् संज्ञापि नास्तीति न कल्पयेदित्यर्थः । अतिसरणमतिक्रमणमित्येकोऽर्थः ॥४२॥

[उभाभ्यामपि चक्षुर्भ्यां पश्यति व्यक्तदर्शनात् ।
चक्षुःश्रोत्रमनोऽप्राप्तविषयं त्रयमन्यथा ॥४३॥]

उभाभ्यामपि

इति । अपिशब्दादेकेनापि नात्र नियमः । **द्वयोर्विवृतयोः परिशुद्धतरं दर्शनमित्युक्तं** भवति **नैकतरान्यथीभावादिति** । **उन्मीलितार्धनिमीलितयोरक्ष्णोरेकतरस्यान्यथीभावात्** । द्वयोरेकतरवद्यन्यथीभवति । यदि यदु-

1 Mss. कस्मिं० 2...2 B. कार्यकारणार्थत्वं
3 B. adds चक्षुः पश्यति विज्ञानं विजानातीति.
4 To. following Tib. यद्द 5 To. following Tib. तस्मात्
6 B. नाभिसरेत्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न्मीलितं तदर्धनिमीलितं क्रियेत[1] सर्वनिमीलितं वा । यच्चार्धनिमीलितं यदि तत्सर्वनिमीलितं क्रियेत[1] सर्वोन्मीलितं वा । तदा द्विचन्द्रदर्शनं न भवति । अतोऽवगम्यते द्वयोरपि चक्षुषोरत्र विज्ञानोत्पत्तौ व्यापारोऽस्तीति । **देशाप्रतिष्ठितत्वाद् रूपवदिति** । विपरीतदृष्टान्तः । यथा रूपस्य देशप्रतिष्ठितत्वादाश्रय-**विच्छेदा**द्विच्छेदो भवति नैवं विज्ञानस्य । न हि विज्ञानं देशप्रतिष्ठितम् । किं तर्हि । देशाप्रतिष्ठितममूर्तत्वात् । देशाप्रतिष्ठितत्वाच्च नाश्रयविच्छेदाद्विच्छेदो भवति ।

तथाहि दूराद्रूपं पश्यतीति । यत्र रूपं दृश्यते न तत्र तद्ग्राहकं चक्षुरिन्द्रियमस्ति । तत्र प्रमाणानुपलभ्यमानत्वात् । तत्राविद्यमानदेवदत्तादिवत् । यथा चक्षुरेवं श्रोत्रमपि वक्तव्यम् । इतर आह । स्वविषयदेशप्रापि[2] चक्षुःश्रोत्रम् । इन्द्रियत्वात् । घ्राणेन्द्रियादिवत् । अनेनानुमानेन तत्र प्रमाणानुपलभ्यमानत्वं हेतुमसिद्धं दर्शयति । आचार्य आह । **सति च प्राप्तविषयत्व** इति विस्तरः । यदि प्राप्तविषयं चक्षुःश्रोत्रं कल्प्येत **दिव्यं चक्षुःश्रोत्रमिह मनुष्येषु ध्यायिनां नोपजायेत**[3] । यदि हि चक्षुःश्रोत्रमतिविप्रकृष्टदेशस्थं व्यवहितं च कुड्यादिभिर्यथायोगं [4]रूपं शब्दं[4] गृह्णीयादेवमस्य दिव्यत्वं संभवेत् । तच्च प्राप्तविषयत्वे न स्यात् । **घ्राणादिवत्** । यथा घ्राणजिह्वाकायाः प्राप्तविषयत्वाद्दिव्या ध्यायिनां नोपजायेरन् । तद्वत् । अनेन स्वविषयदेशप्रापित्वपक्षस्य धर्मिविशेषविपर्ययापक्षत्वं दर्शयति । संभवद्दिव्यत्वे हि चक्षुःश्रोत्रे धर्मी । असंभवद्दिव्यत्वभावो विशेषविपर्ययः[5] । स प्राप्नोतीति दोषः । अनेन दोषेणाननुमानत्वात् तत्प्रमाणानुपलभ्यमानत्वं सिद्धं व्यवस्थापयति । तस्मादप्राप्तविषयं चक्षुःश्रोत्रम् । **यद्यप्राप्तविषयं चक्षुरिति** विस्तरः । आसन्नेनातिदूरस्थेन तिरस्कृतेन वा तुल्या तदप्राप्तिरिति तत्र दर्शनं प्रसञ्जयति । किमिदं परस्य साधनमुत दूषणमिति । यदि तावदेवं साधनम् । अतिदूरं तिरस्कृतं चक्षुःश्रोत्रेण गृह्यते । अप्राप्तत्वात् । आसन्नविषयवदिति । तदसाधनम् । हेतोः स्वयमनिश्चितत्वात् । पूर्वाभ्युपगमविरोधाद्वा[6] । अथ दूषणम् । सर्वाप्राप्तग्राहकत्वं चक्षुःश्रोत्रलक्षणस्य धर्मिणः प्रसज्यते । तददूषणम् । अनुमानबाधनात् । कथमित्याह । **कथं तावदयस्कान्तो न सर्वमप्राप्तमयः [7]कर्षतीति** । प्रश्नमुखेनायस्कान्तनिदर्शनमुपन्यस्य सर्वाप्राप्ताग्राहकत्वं चक्षुःश्रोत्रस्य साधयति । न सर्वाप्राप्तग्राहकं चक्षुःश्रोत्रम् । सर्वाप्राप्तग्रहणशक्तिहीनत्वात् ।

1 B. क्रियते ; To. क्रियेत्
2 Mss. & To. प्राप्ति
3 To. ०जायेत्
4...4 B. रूपशब्दम्
5 Mss. omit विपर्ययः.
6 B. ०विरोधाच्च
7 To. कर्षयतीति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अयस्कान्तवत्। अयस्कान्तो [1]ह्यप्राप्तमयो गृह्णाति' कर्षतीत्यर्थः' न च सर्वमप्राप्तं गृह्णाति' तद्वच्चक्षुःश्रोत्रम्। **प्राप्तविषयत्वेऽपि चैतत्समानमिति।** नातिदूरतिरस्कृतो विषयश्चक्षुःश्रोत्रेण गृह्यते' ग्रहणायोग्यत्वात्। संप्राप्ताञ्जनशलाकावत्[2]। अथवा न सर्वं स्वग्राह्यग्राहि चक्षुःश्रोत्रम्'इन्द्रियस्वाभाव्यात्' घ्राणेन्द्रियादिवत्। **घ्राणादीनां हि प्राप्तो विषयो न तु सर्वः' सहभूगन्धाद्यग्रहणात्।** घ्राणादिसहभूनि हि गन्धरसस्प्रष्टव्यानि घ्राणादिभिर्न गृह्यन्ते' शक्तिर्हीन्द्रियाणामीदृशीति। **मनस्त्वरूपित्वादिति।** प्राप्तत्वं मूर्तानामेव व्यवस्थाप्येत[3]' नामूर्तानामिति' [4]मनोऽप्राप्तविषयमिति न विचारः क्रियते।

त्रयमन्यथा

इति। प्राप्तविषयमेव त्रयमिति' इष्टावधारणार्थमारम्भः। अन्यथा हि प्राप्ताप्राप्तविषयमित्यपि संभाव्येत। **निरुच्छ्वासस्य गन्धाग्रहणादिति।** यदुच्छ्वासेन सार्धं सूक्ष्मं भूतचतुष्कं घ्राणमागतं तस्य गन्धो घ्राणेन घ्रायते। वायौ गन्धान्तरमुत्पन्नमित्यपरे। **मिश्रीभवेयुरेकदेशीभवेयुः। अथैकदेशेन।** किम्। स्पृशेयुरिति वर्तते। **कथं शब्दाभिनिष्पत्तिरिति।** यदि न स्पृशन्ति' अनभिघाते शब्दाभिनिष्पत्तिर्न प्राप्नोतीत्यभिप्रायः। **अत एवेति** काश्मीराः। **यदि हि स्पृशेयुर्हस्तो** [5]हस्तेऽभ्याहतः सज्जेत' [6]जतुनीव जत्वन्तरम्। **कथं** [7]**चितं प्रत्याहतं न विशीर्यत** इति। अन्योन्यमस्पृशतां परमाणूनां [8]संघातः प्रत्याहतः पाण्यादिभिः कथं न विशीर्यते। **तदेवैषां निरन्तरत्वं यन्मध्ये नास्ति किंचिदिति**' आलोकादि मध्ये नास्तीति निरन्तरत्वमेषां व्यवस्थाप्यते। तदेव च प्राप्तत्वम्[9] नान्यथेति। **अपि खल्विति**' अपि चेत्यर्थः। **संघाताः सावयवत्वात्स्पृशन्तीत्यदोषः**' योऽसौ दोष उक्तो यदि सर्वात्मना स्पृशेयुर्मिश्रीभवेयुर्द्रव्याणि' अथैकदेशेन सावयवाः प्रसज्येरन्निति। **कारणं प्रतीति।** यस्य यादृशं कारणं तस्य तत्कारणं स्पृष्टमस्पृष्टं वा प्रति[10]। आह' **कदाचिदिति** विस्तरः। **स्पृष्टहेतुकमिति**' स्पृष्टमन्योन्यं हेतुरस्य स्पृष्टहेतुकम्। **एवमस्पृष्टहेतुकम्। यदा विशीर्यत** इति। तद्यथा शुष्का मृच्चूर्णीक्रियमाणा। **यदा चयं गच्छतीति**[11]।

---

1 B. ह्याप्राप्त°
2 To. °ञ्जनदशलाकावत्
3 B. °स्थाप्यते
4 B. मनः प्राप्त°
5 B. हस्तेनाभ्याहतः
6 To. जतुनेव
7 B. संचितं
8 Mss. & To. संहातः
9 B. प्राप्तित्वं
10 B. & To. add इति
11 B. गच्छतीति.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्यथा हिमम्। तद्धि पूर्वं सूक्ष्मं पश्चान्महद्भवति। **चयवतां चय** इति तद्यथा। मृत्पिण्डद्वयसंनिपाते। **उत्तरक्षणावस्थानं स्यादिति।** उत्पद्य स्पृष्टियोगात्।[1] **निरन्तरे तु स्पृष्टसंज्ञेति भदन्तः।** भदन्तमतं **चेष्टव्यमिति।** वैभाषिक-मतं कस्मान्नेष्टव्यम्। ननु वैभाषिकैरप्येवमुक्तम्। तदेवैषां निरन्तरत्वं यन्मध्ये नास्ति किंचिदिति। अस्त्येवम्। सावकाशं तु तद्वचनम्। यन्मध्ये नास्ति किंचिदिति ब्रुवाणा वैभाषिका मध्य आलोकादि नेच्छन्ति। अन्यपरमाणु-प्रवेशानवकाशं तु न ब्रुवते। **अन्यथा हि सान्तराणां परमाणूनां शून्येष्वन्तरेषु गतिः केन प्रतिबध्येत।** गतिमत इति वाक्यशेषः। अयं चापरो दोषः। **न च परमाणुभ्योऽन्ये संघाताः।** यथा वैभाषिकाः कल्पयन्ति। **त एव** [2]**ते संघाताः परमाणवः**[2] **स्पृश्यन्ते यथा रूप्यन्त** इति[3]। संघाता[4]एव नैक इत्यर्थः। **यदि च परमाणोरिति** विस्तरः। परमाणवपरिनिष्पत्तिं वक्तुकाम आचार्यो विचारयति। यदि परमाणोरेकस्य पूर्वादिदिग्भागभेदः कल्प्येत **स्पृष्टस्यान्योन्यमस्पृष्टस्य वा सावयवत्वप्रसङ्गः। न चेत्।** किम्। दिग्भागभेद इति वर्तते। **स्पृष्टस्याप्य-प्रसङ्गः।** कस्य। सावयवत्वस्य। अत्र साधनम्। न निरवयवः परमाणु-र्दिग्भागभेदवत्त्वात्। माषराशिवदिति। तदेतद्दिग्भागभेदवत्त्वं नेच्छन्ति वैभा-षिकाः। दिग्भागभेदो हि संघातरूपाणामेव कल्प्यते। एवं च वर्णयन्ति। धर्म-तैवेयं यत्सप्रतिघानां भिन्नदेशत्वम्। तेषां नैरन्तर्येणावस्थानादभिन्नदेशत्वं मा भूदिति सान्तराणामपि सप्रतिघत्वेन गतिः प्रतिबध्यत इति ॥४३॥

[त्रिभिर्घ्राणादिभिस्तुल्यविषयग्रहणं मतम्।
चरमस्याश्रयोऽतीतः पञ्चानां सहजश्च तैः ॥४४॥]

आशुवृत्त्या च [5]**पर्वतादीनामलातचक्रादिवदिति।** आत्मपरिमाणतुल्यस्यै-वार्थस्य ग्रहण इष्यमाणे कथं पर्वतादीनां महतां सकृदिव ग्रहणं लक्ष्यते। न क्रमेणेत्याशङ्क्य युक्तिं तथा ग्रहणे कथयति। आशुवृत्त्या चेत्यादि। यथालात-चक्रादिग्रहणं क्रमेण वर्तमानं सकृदिव लक्ष्यते तथा पर्वतनदीशब्दादिग्रहणमाशु-वृत्त्या भवतीति। **आहोस्वित्तुल्यातुल्यस्येति।** द्राक्षाफलादिदर्शने तुल्यस्य वाला-ग्रपर्वतादिदर्शनेऽतुल्यस्येत्यभिप्रायः। **उन्मिषितमात्रेणेति** न क्रमदर्शनन्यायेन। **एवं श्रोत्रेणेति** विस्तरः। **कदाचिदल्पीयांसः।** यदा **मशकशब्दं शृणोति।**

---

1 B. adds स्पर्शो नास्ति.
2...2 B. संघाते
3 Mss. omit इति.
4 B. संघात
5 B पर्वताना०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कदाचित्समाः । यदा श्रोत्रपरमाणुसमप्रमाणं कस्यचिच्छब्दं शृणोति । **कदाचिद्भूयांसः** । यदा मेघशब्दं शृणोतीति । **अजाजीपुष्पवदवस्थिताः** कालजीरकपुष्पवदवस्थिताः । [1]एकतलावस्थिता इत्यर्थः । **भूर्जाभ्यन्तरावस्थिता** इति । कर्णाभ्यन्तरे यद्भूर्जपत्रवर्णाकारं तद्भूर्जमिवेति भूर्जम् । तदभ्यन्तरेऽवस्थिताः **श्रोत्रेन्द्रियपरमाणवः** । **घाटाभ्यन्तरे** । घाटा नासापुटी । **मालावदवस्थितानीति** । मण्डलेन समपङ्क्त्यावस्थितानीति । **वालाग्रमात्रं किलेति** । आगमसूचनार्थः किलशब्दः । [2]**अस्फुटमव्याप्तम्** । **स किलेति** । कर्मसामर्थ्यादेवाविशरणं स्यादिति किलशब्देन अरुचिं सूचयति । **संचिताश्रयालम्बनत्वादिति** । संचिताश्रयत्वात्संचितालम्बनत्वाच्च ।

चरमस्याश्रयोऽतीतः

इत्यतीत एवेत्यवधारणम् । **अत एवोच्यत** इति । यस्मात् **पञ्च विज्ञानकाया इन्द्रियद्वयाश्रयाः** । चक्षुरादीन्द्रियाश्रया मनइन्द्रियाश्रयाश्च । तस्माच्चतुष्कोटिक[3] उतिष्ठते[4] । **प्रथमा कोटिश्चक्षुरिति** । चक्षुर्विज्ञानस्य चक्षुराश्रयभावेन न समनन्तरप्रत्ययभावेन । न हि चक्षुश्चित्तचैत्तस्वभावम् ।

चित्तचैत्ता अचरमा उत्पन्नाः समनन्तरः[5]

इति च समनन्तरप्रत्ययलक्षणम् । **द्वितीया कोटिः** । **समनन्तरातीतश्चैतसिको धर्मधातुः** । तस्य समनन्तरभावेन [6]नाश्रयभावेन । षडेव ह्याश्रया विज्ञानस्येष्यन्ते चक्षुरादयो मनःपर्यन्ता नान्ये । **तृतीया समनन्तरातीतं मनः** । उभयलक्षणयुक्तत्वात् । **चतुर्थी उक्तनिर्मुक्ता धर्माः** । कोटित्रयमुक्ता विप्रयुक्ता असंस्कृतादयः । **एवं यावत्कायविज्ञानस्य स्वमिन्द्रियं वक्तव्यमिति** । यः श्रोत्रविज्ञानस्याश्रयभावेन समनन्तरप्रत्ययभावेनापि स तस्येति [7]चतुःकोटिकः । प्रथमा कोटिः श्रोत्रम् । द्वितीया समनन्तरातीतश्चैतसिको धर्मधातुः । तृतीया समनन्तरातीतं मनः । चतुर्थी कोटिरुक्तनिर्मुक्ता धर्मा इति । एवमन्यदपि वक्तव्यम् । **मनोविज्ञानस्य पूर्वपादक** इति । यो मनोविज्ञानस्याश्रयभावेन समनन्तरप्रत्ययभावेनापि स तस्येति पूर्वपादकः । **यस्तावदाश्रयभावेन समनन्तरप्रत्ययभावेनापि स** इति । मनस्तावदवश्यमसौ समनन्तरप्रत्ययः स्यात् । समनन्तर-

---

1 B. एकतला०
2 B, अस्तृत०
3 Mss. & B. चतुष्कोटिकम्
4 B. आतिष्ठते
5 Kārikā, II. 63.
6 To. omits नाश्रयभावेन.
7 B. चतुःकोटिकम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्ययभावेन नाश्रयभावेन ॱ समनन्तरातीतश्चैतसिको धर्मधातुः ॱ अचक्षुराद्याश्रयषट्स्वभावत्वात् ॥४४॥

[तद्विकारविकारित्वादाश्रयश्चक्षुरादयः ।
अतोऽसाधारणत्वाच्च विज्ञानं तै निरुच्यते ॥४५॥]

तद्विकारविकारित्वात्

इति विस्तरः । तेषां चक्षुरादीनां विकारस्तद्विकारः ॱ तद्विकारेण विकारः तद्विकारविकारः ॱ स एषामस्तीति तद्विकारविकारीणि विज्ञानानि ॱ तद्भावः तद्विकारविकारित्वम् । तस्माच्चक्षुरादय एवैषामाश्रया इत्यवधार्यते । **अनुग्रहोपघातपटुमन्दतानुविधानादिति** । चक्षुरादीनामञ्जनादिभिरनुग्रहं रेणवादिभिश्चोपघातं चक्षुरादिविज्ञानान्यनुविदधते ॱ ससुखोत्पादात्सदुःखोत्पादाच्च यथाक्रमम् । पटुमन्दतां च तेषामनुविदधते ॱ पटुमन्दतोत्पादात् । अतोऽवगम्यते ॱ चक्षुरादिविकारेण विज्ञानविकारो भवतीति । ननु च पटुनि रूपे पटु चक्षुर्विज्ञानमुत्पद्यमानं दृश्यते ॱ मन्दे मन्दमिति । [1]तेषां चक्षुरादीनाम् । यद्यपि रूपस्य पटुमन्दते चक्षुर्विज्ञानमनुविदधीत ॱ विधुरावस्थयोस्तु चक्षूरूपयोश्चक्षुरवस्थामेव चक्षुर्विज्ञानमनुविधत्ते ॱ न रूपावस्थाम् । तथा हि चक्षुष्यनुगृहीते रूपे चोपहते तद्वीतरागाणां मध्यस्थानां च चक्षुर्विज्ञानमविकारमुत्पद्यते ॱ न तु सदुःखमुत्पद्यते । रूपे पुनरनुगृहीतेऽपरित्यक्ते ॱ चक्षुषि चोपहते कामलव्याधिना तिमिरोपघातेन वा ॱ पीतदर्शनं भ्रान्तं केशोण्डुकादिदर्शनं वा प्रवर्तते । तथा पटुनि रूपे जरया मन्दे चक्षुषि मन्दं चक्षुर्विज्ञानमुत्पद्यते । एवं मन्दे रूपे चक्षुर्यद्यतिपटु भवेत्पटु चक्षुर्विज्ञानमुत्पद्यते । तथा हि जातिस्वभावेन पटुनि गृध्रचक्षुषि मन्देऽपि शवरूपेऽनेकयोजनविप्रकृष्टेऽपि चक्षुर्विज्ञानमुत्पद्यते । इत्येवं श्रोत्रादीन्यपि योज्यानि ।

अतोऽसाधारणत्वाच्च

इति । अत आश्रयभावात् ॱ असाधारणत्वाच्च । आश्रयभावो व्याख्यात इति न तं प्रत्याद्रियते । असाधारणत्वमेव तु व्याचक्षाण आह ॱ **कथमसाधारणत्वमित्यादि** । **अन्यचक्षुर्विज्ञानस्यापीति** ॱ अन्यसन्तानविज्ञानस्यापीत्यर्थः । **तैरेव निर्दिश्यत** इति चक्षुरादिभिः ॱ चक्षुर्विज्ञानं यावन्मनोविज्ञानम् ॱ न **रूपादिभिः** ॱ रूपविज्ञानं यावद्धर्मविज्ञानम् । **यथा भेरीशब्दो यवाङ्कुर** इति ।

---

1 B. omits तेषां चक्षुरादीनाम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

असाधारणत्वात्ताभ्यां भेरीयवाभ्याम् ' यथा निर्देशो लोके भेरीशब्दो यवाङ्कुर इति ' न तु दण्डशब्दः क्षेत्राङ्कुर इति वा । दण्डो [1]हि पटहादिशब्दस्यापि कारणीभवेत् ' क्षेत्रं च शालिगोधूमाङ्कुरस्यापि ' इति साधारणत्वान्न ताभ्यां निर्देशः क्रियते । असाधारणाभ्यां तु भेरीयवाभ्यां निर्देशः । तद्वदिहापि द्रष्टव्यम् । अपि खलु चक्षुरिव विज्ञानम् ' उभयोः सत्त्वसंख्यातत्वात् ' रूपं त्वसत्त्वसंख्यातमपि । चक्षुषा विज्ञानम् चक्षुर्विज्ञानम् ' तस्य [2]कारणभावात् । [3]चक्षुषे विज्ञानं चक्षुर्विज्ञानम् ' सुखदुःखवेदनासंप्रयुक्तस्य विज्ञानस्य चक्षुरनुग्रहोपघातप्रवृत्तत्वात् । चक्षुषो विज्ञानं चक्षुर्विज्ञानम् ' असाधारणत्वेन ततः प्रवृत्तेः । चक्षुषो विज्ञानं चक्षुर्विज्ञानम् ' सत्त्वसंख्यातस्यैव स्वामिभावात् । चक्षुषि विज्ञानं चक्षुर्विज्ञानम् । तत्संप्रयोगिन्याः सुखाया दुःखाया वा वेदनायाः[4] चक्षुष्येव परिच्छिद्यमानत्वात् । एवं श्रोत्रादिषु योज्यम् । तदेवं चक्षुरादिभिरेव विज्ञाननिर्देशो युज्यते ' न रूपादिभिः । **एवं तृतीयचतुर्थध्यानभूमिकेन चक्षुषा तद्भूमिकाधरभूमिकानि रूपाणि पश्यतो योजयितव्यमिति ।** तस्यैव कामधातूपपन्नस्य योजयितव्यम् । **एवं तृतीयादिध्यानचक्षुषा योज्यमिति ।** तस्यैव प्रथमध्यानोपपन्नस्य तृतीयचतुर्थध्यानचक्षुषा पश्यतो योज्यम् ॥४५॥

[न कायस्याधरं चक्षुरूर्ध्वं रूपं न चक्षुषः ।
विज्ञानं चास्य रूपं तु कायस्योभे च सर्वतः ॥४६॥]

न कायस्याधरं चक्षुः

इति ' अधरभूमिकमित्यर्थः । स्वभूमिकमूर्ध्वभूमिकं चाभ्यनुज्ञातं भवति । **पञ्चभूमिकानि हि कायचक्षूरूपाणि**[5] । कायः शरीरम् । एतानि कायादीनि पञ्चभूमिकानि ' **कामावचराणि** प्रथमध्यानभूमिकानि **यावच्चतुर्थध्यानभूमिकानि** ' आरूप्यधातावभावात् । **द्विभूमिकं चक्षुर्विज्ञानमिति** ' **कामावचरं प्रथमध्यानभूमिकं च** ' तयोर्वितर्कविचारसद्भावात् ' चक्षुर्विज्ञानस्य चावश्यं सवितर्कविचारत्वात् ।

[6]ऊर्ध्वं रूपं न चक्षुषः

इति ' नोर्ध्वभूमिकं रूपं चक्षुषो विषयो भवति ' ऊर्ध्वभूमिकस्य रूपस्य सूक्ष्मत्वात् । स्वभूमिकमधरभूमिकं चाभ्यनुज्ञातं भवति ।

---

1 B. ऽपि
2 B. करण०
3 B. चक्षुषो
4 Mss. वेदनाश्च चक्षु०
5 B. adds इति·
6 B. & To. ऊर्ध्वंरूपं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विज्ञानं च

किम्, ऊर्ध्वं न चक्षुष इति प्रकृतम् । कामावचरस्य चक्षुषोऽधरभूमिकस्य प्रथमध्यानभूमिकं चक्षुर्विज्ञानं न भवति । स्वभूमिकमधरभूमिकं वाभ्यनुज्ञातं भवति । कामावचरस्य चक्षुषः स्वभूमिकं कामावचरमेव चक्षुर्विज्ञानं भवति । प्रथमध्यानभूमिकस्य चक्षुषः प्रथमध्यानभूमिकमेव चक्षुर्विज्ञानं भवति, कामावचरं तु चक्षुर्विज्ञानमस्य न भवति । ननु चोक्तमधरभूमिकमभ्यनुज्ञातमिति । सत्यमुक्तमेतत् । किन्तु असत्यात्मीयेऽधरभूमिकमिष्यते, न सतीति । द्वितीयतृतीयचतुर्थध्यानचक्षुषो ह्यसति आत्मीये प्रथमध्यानभूमिकमेवाधरं चक्षुर्विज्ञानं भवति, न तु कामावचरम्, परमनिहीनत्वात् । संभवतस्त्वेवमुक्तमधरभूमिकमभ्यनुज्ञातमिति । **अस्येत्यनन्तरोक्तस्य चक्षुर्विज्ञानस्येति** चक्षुर्विज्ञानजातेः, **रूपं सर्वतो विषयः** । संभवतस्तु योज्यम् । कामावचरस्य चक्षुर्विज्ञानस्य स्वभूमिकमेव रूपम्, प्रथमध्यानभूमिकस्य तु [1]प्रथमध्यानभूमिकचक्षुराश्रयस्य[1] चक्षुर्विज्ञानस्य स्वभूमिकमधरभूमिकमूर्ध्वभूमिकं[2] च रूपं विषयः, चतुर्थध्यानभूमिकचक्षुराश्रयस्य तु चतुर्थध्यानभूमिकं रूपं ततश्चाधरभूमिकं सर्वं विषयः । एवं यावद्द्वितीयध्यानभूमिकचक्षुराश्रयस्य द्वितीयध्यानभूमिकम्, ततश्चाधरभूमिकं रूपं विषयः । एवं चक्षुर्विज्ञानजातेरूर्ध्वमधः स्वभूमौ च रूपं विषयो भवति । **कायस्य चोभे रूपविज्ञाने सर्वतो भवत** इति । कामावचरस्य कायस्य शरीरस्य स्वभूमिकोर्ध्वभूमिके रूपविज्ञाने भवतः । प्रथमध्यानभूमिकस्य कायस्य प्रथमध्यानभूमिकमेव विज्ञानम्, रूपं तु स्वोर्ध्वाधरभूमिकम् । यथा [3]स्वाश्रयं चक्षुः, द्वितीयादिध्यानभूमिकस्य कायस्य विज्ञानमधरभूमिकमेव, प्रथमध्यानभूमिकमेवेत्यर्थः । रूपं तु द्वितीयतृतीयध्यानभूमिकस्य कायस्य स्वोर्ध्वाधरभूमिकम्, यथा स्वाश्रयं चक्षुः । चतुर्थध्यानभूमिकस्य कायस्य रूपं स्वाधरभूमिकम्, तत ऊर्ध्वं रूपाभावात् ॥४६॥

[तथा श्रोत्रं त्रयाणां तु सर्वमेव स्वभूमिकम् ।
कायविज्ञानमधरस्वभूम्यनियतं मनः ॥४७॥]

तथा श्रोत्रम्

इति । यथा चक्षुरुक्तं तथा श्रोत्रं व्याख्यातव्यम् । कथमिति, अथ[4]

1...1 Mss. omit this portion.
2 A, B., To. & V drop ऊर्ध्वभूमिकं.
3 Mss. आश्रयं
4 B. & To. आह

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्र काये स्थितः श्रोत्रेण शब्दान् शृणोति किं तानि कायश्रोत्रशब्दविज्ञानान्येकभूमिकान्येव भवन्ति, आहोस्विदन्यभूमिकान्यपि । आह, सर्वेषां भेदः । कामधातूपपन्नस्य स्वेन श्रोत्रेण स्वान् शब्दान् शृण्वतः सर्वं स्वभूमिकं भवतीति [1]विस्तरेणानया दिशा[1] ग्रन्थो वक्तव्यो यावदयं तु नियमः ।

न कायस्याधरं श्रोत्रमूर्ध्वं शब्दो न च श्रुतेः ।
विज्ञानं चास्य शब्दस्तु कायस्योभे च सर्वतः ॥

इति विस्तरेण योज्यम् । कथमिति । न कायस्याधरं श्रोत्रम् । पञ्चभूमिका हि कायश्रोत्रशब्दाः, कामावचरा यावच्चतुर्थध्यानभूमिकाः । द्विभूमिकं श्रोत्रविज्ञानम्, कामावचरं प्रथमध्यानभूमिकं च । तत्र यद्भूमिकः कायस्तद्भूमिकमूर्ध्वभूमिकं वा श्रोत्रं भवति, न त्वधरभूमिकम् । यद्भूमिकं श्रोत्रं तद्भूमिकोऽधरभूमिको वास्य शब्दो विषयो भवति, ऊर्ध्वं शब्दो न च श्रुतेः । न हि[2] कदाचिदूर्ध्वभूमिकः शब्दोऽधरभूमिकेन श्रोत्रेण श्रोतुं शक्यते । विज्ञानं च, ऊर्ध्वं न श्रोत्रस्य शब्दवत् । अस्य शब्दस्तु कायस्योभे च सर्वतः अस्येत्यनन्तरोक्तस्य श्रोत्रविज्ञानस्य शब्दः, सर्वतो विषयः, ऊर्ध्वमधः स्वभूमौ च । कायस्य चोभे शब्दविज्ञाने सर्वतो भवत इति ।

अनियतं मनः

इति । यथा चक्षुः श्रोत्रं [3]वा नियमितम्, न कायस्याधरं चक्षुः श्रोत्रं [4]वेत्येवमादिना नैवं नियमितं मनः । अत एवाह, **पञ्चभूमिकेऽपि काये सर्वभूमिकानि मनआदीनि** भवन्तीति । मनोधर्ममनोविज्ञानानि सर्वभूमिकानि कामावचराणि यावद्भवाग्रिकाणि । तद्यथा कामधातूपपन्नो यदि कामावचरान्मनसोऽनन्तरं कामावचरमेव कामावचरधर्मालम्बनं मनोविज्ञानमुत्पादयति सर्वाणि कामावचराणि । यदि प्रथमध्यानभूमिकाद्यावद्भवाग्रभूमिकादु**पपत्तिकाले समापत्तिकाले वा** संभवतः कामावचरं तथैव मनोविज्ञानमुत्पादयति, मनस्ततस्त्यम्, शेषाणि कामावचराणि । अथ तत्रैव तद्विज्ञानमुत्पादयति धर्मास्त्वालम्बनं प्रथमध्यानभूमिका यावद्भवाग्रभूमिकाः, धर्मास्ततस्त्याः, शेषाणि पूर्ववत् । एवं प्रथमध्यानोपपन्नो यावद्भवाग्रोपपन्नो यथायोगं वक्तव्यः ।

1...1 B. विस्तरेणानेनादिना 2 Mss. ति
3 B. च 4 B. चेत्येव०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाप्त आनुषङ्गिकः प्रसङ्ग इति ।

चक्षुश्च धर्मधातोश्च प्रदेशो दृष्टिः[1]

इत्येतदाधिकारिकम्[2] । [3]अथ यत्र काये स्थितश्चक्षुषा रूपाणि पश्यतीत्येवमादिरयमानुषङ्गिकः प्रसङ्गः । दर्शनसंबन्धादागतत्वात् ॥४७॥

[पञ्च बाह्या द्विविज्ञेया नित्या धर्मा असंस्कृताः ।
[4]धर्मार्धं इन्द्रियं ये च द्वादशाध्यात्मिकाः स्मृताः ॥४८॥]

पञ्च बाह्या द्विविज्ञेयाः

इति । पञ्चग्रहणं धर्मधातुनिराकरणार्थम् । बाह्यग्रहणं चक्षुरादिनिरासार्थम् । बाह्या एव पञ्च द्विविज्ञेया इत्यवधारणादन्ये **त्रयोदश धातव एकविज्ञानविज्ञेया** इति सिद्धम् । **पञ्चविज्ञानकायानामविषयत्वात् ।**

नित्या धर्मा असंस्कृताः

इति । असंस्कृता एव नित्या इत्यवधारणम् । अध्वसंचाराभावान्नित्याः ।

[5]धर्मार्ध इन्द्रियं[5] ये च द्वादशाध्यात्मिकाः स्मृताः

इति । धातव इत्यधिकारः । [6]**द्वाविंशतीन्द्रियाण्युक्तानि** । **सूत्र** इति । अथ जातिश्रोणो ब्राह्मणो येन भगवांस्तेनोपसंक्रान्तः । उपसंक्रम्य भगवता सार्धं संमुखं संमदनीं संरञ्जनीं विविधां कथां व्यतिसार्यैकान्ते न्यषीदत् । एकान्तनिषण्णो जातिश्रोणो ब्राह्मणो भगवन्तमिदमवोचत् । इन्द्रियाणीन्द्रियाणीति भो गौतम उच्यन्ते । कति भो गौतम इन्द्रियाणि । कियता चेन्द्रियाणां संग्रहो भवति । द्वाविंशतिरिमानि ब्राह्मण इन्द्रियाणि । कतमानि द्वाविंशतिः । **चक्षुरिन्द्रियं श्रोत्रेन्द्रियं घ्राणेन्द्रियं जिह्वेन्द्रियं कायेन्द्रियं मनइन्द्रियं स्त्रीन्द्रियं पुरुषेन्द्रियं जीवितेन्द्रियं[7] सुखेन्द्रियं दुःखेन्द्रियं सौमनस्येन्द्रियं दौर्मनस्येन्द्रियमुपेक्षेन्द्रियं श्रद्धेन्द्रियं वीर्येन्द्रियं स्मृतीन्द्रियं प्रज्ञेन्द्रियमनाज्ञातमाज्ञास्यामीन्द्रियमाज्ञेन्द्रियमाज्ञातावीन्द्रियम् ।** इतीमानि ब्राह्मण द्वाविंशतिरिन्द्रियाणि । इयता इन्द्रियाणामिन्द्रियसंग्रहो भवति । अथ जातिश्रोणो ब्राह्मणो भगवतो भाषितमभिनन्द्यानुमोद्य भगवतोऽन्तिकात् प्रक्रान्त इति । धर्मार्ध इति धर्मधात्वेकदेश इत्यर्थः । धर्मार्धमिति नपुंसकनिर्देशेन केचित् पठन्ति । तेषां पाठे अर्धधर्म इति समप्रविभागः प्राप्नोति । [8]अर्धं नपुंसकमिति

---

1 Kārikā, I. 41 2 B. ०कः 3 B, अथवा

4 Yaśomitra prefers धर्मार्धः, but Poussin's fragmentary edition of the *Kārikā* (Paris 1931) reads धर्मार्धम्. 5...5 Mss. धर्मार्धमिन्द्रियं

6 B. द्वाविंशतिरिन्द्रियाणि 7 Mss. drop जीवितेन्द्रियं, 8 Pā., II. 2. 2.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लक्षणात् । अर्धपिप्पलीति यथा । अथ नपुंसकलिङ्गोऽप्यर्धशब्द एकदेशार्थे वर्तते । तदैवं समासः क्रियते । धर्मश्चासावर्धं च धर्मार्धम् । धर्मं वार्धं धर्मार्धमिति । **आभिधर्मिकास्तु षडायतनव्यवस्थामनादृत्येति ।** चक्षुरायतनं यावत्कायायतनं मनआयतनमिति षडायतनमिति षडायतनव्यवस्थां युक्तरूपामनादृत्य । **जीवितेन्द्रियानन्तरं मनइन्द्रियं पठन्ति** । सालम्बनत्वात् । वेदनेन्द्रियादीनि हि सालम्बनानि [1]अनन्तरं पठन्ति । **जीवितेन्द्रियादीन्येकादशेति** । जीवितेन्द्रियम् । वेदनेन्द्रियाणि पञ्च । श्रद्धादीनि चेति[2] । **त्रयाणां च भाग इति** । आज्ञास्यामीन्द्रियादीनां नवद्रव्यात्मकानां मनइन्द्रियं मुक्त्वान्यान्यष्टौ द्रव्याणि **धर्मधात्वेकदेशः । चक्षुरादयः पञ्च स्वनामोक्ता इति** । पञ्च चक्षुरादयो धातवः पञ्चेन्द्रियाणि । चक्षुरिन्द्रियं यावत्कायेन्द्रियम् । **स्त्रीपुरुषेन्द्रिये च कायेन्द्रियैकदेश एवेति** पञ्च चक्षुरादिधातवः सप्तेन्द्रियाणि भवन्ति । **सप्त चित्तधातवो मनइन्द्रियमिति** । एवं द्वादशाध्यात्मिका धातवोऽष्टाविन्द्रियाणि भवन्तीति । द्वादशाध्यात्मिका धातव एव धर्मार्ध एव चेन्द्रियमित्यवधारणात् **पञ्च धातवो रूपादयः** । **तदन्यधर्मधातुप्रदेशो[3] नेन्द्रियमिति** सिद्धम् ।।४८।।

आचार्ययशोमित्रकृतौ स्फुटार्थायामभिधर्मकोशव्याख्यायां
धातुनिर्देशो नाम प्रथमं कोशस्थानम् ।।१।।

---

1 B. तदनन्तरं.
2 B. चेन्द्रियाणि पञ्चेति
3 B. ०प्रदेशश्च.

'CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभिधर्मकोशव्याख्यायाम्

द्वितीयं कोशस्थानम्

[चतुर्ष्वर्थेषु पञ्चानामाधिपत्यं द्वयोः किल।
चतुर्णां पञ्चकाष्टानां संक्लेशव्यवदानयोः ॥१॥]

उक्तानीन्द्रियाणीति। प्रथमस्य द्वितीयस्य च कोशस्थानस्य सम्बन्धोपनिपाततां दर्शयन्नाह। उक्तानीन्द्रियाणीति। प्रथमकोशस्थानावसाने यस्मात्

धर्मार्धं[1] इन्द्रियम्

इत्युक्तं तस्मादिदमायातमिति सम्बन्धः। कः पुनरिन्द्रियार्थ इति। वैयाकरणैरन्यथा इन्द्रियशब्दार्थव्युत्पत्तिः कृतेत्यतः प्रश्नयति कः पुनरिन्द्रियार्थ इति। [2]**इदि परमैश्वर्ये** इति पठ्यते। तस्य धातोरिन्दन्तीतीन्द्रियाणीति रूपं द्रष्टव्यम्। कथं कृत्वा' इन्दन्तीति इन्द्राणि' रप्रत्यय औणादिकः' इन्द्राण्येवेन्द्रियाणीति स्वार्थे घस्तद्धितः। अथवा इन्दतीतीन्द्रियम्' बहुलत्वात्तु बहुवचनेन कृतो निर्देश इन्दन्तीतीन्द्रियाणीति' तस्मात् [3]इन्दतीत्यस्य शब्दस्य इन्द्रियमित्यादेशः। कथम्' अवर्णस्य रभावः' तिशब्दस्य चेयादेशः' तेन नैरुक्तेन विधानेनेन्द्रियमिति भवति। तद् यथा कुञ्जर इति। वैयाकरणैर्हि कुञ्जोऽस्यास्तीति कुञ्जर इति मत्वर्थीयेन कुञ्जरशब्दो व्युत्पाद्यते। नैरुक्तैस्तु तदनादृत्य कुञ्जरः कुञ्जचारित्वादिति नैरुक्तेन न्यायेन साध्यते। तद्वदिहापि द्रष्टव्यम्। यदि वैयाकरणनयेन[4] इन्द्रस्य लिङ्गमिन्द्रियमिति व्युत्पाद्येत' आधिपत्यार्थ इन्द्रियार्थो हीयेत' आधिपत्यार्थश्चेष्यते' तस्मादित्थमिन्द्रियशब्दस्य व्युत्पत्तिर्नैष्टव्येति। **दृष्ट्वा श्रुत्वा च विषमपरिवर्जनादिति**। दृष्ट्वा श्वभ्रादि श्रुत्वा च व्याघ्रादिरुतं श्वभ्रादिव्याघ्रादिरुतविषमपरिवर्जनात्। **ससंप्रयोगयोरिति** सचैतसिकयोः। **रूपदर्शनशब्दश्रवणयोश्चेति**। चक्षुः पश्यति श्रोत्रं शृणोतीत्यादि वैभाषिकाणां सिद्धान्तः। [5]तेनालोचनविशेषलक्षणयोर्दर्शनश्रवणयोरसाधारण-

---

1 B. & To. धर्मार्धं; but see Kārikā, 1.47.   2 Dhā., 1. 64.

3 B. & To. इन्दन्तो०   4 See Pā., V, 2,95.

5 B. & To. following Tib. तेनालम्बन०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कारणत्वे चक्षुःश्रोत्रयोराधिपत्यम्। आत्मभावशोभायां पूर्ववदिति। अघ्राणादीनां सत्त्वानामकान्तरूपत्वादकान्तात्मभावत्वादित्यर्थः। तैः कवडीकाराहारपरिभोगादिति। तैर्घ्राणादिभिस्तत्परिभोगादिति। कथं गन्धस्य कवडीकाराहारत्वम्। [1]नासिकया गन्धग्रासव्यवच्छेदेन कवडीकरणात्। कथं स्प्रष्टव्यस्य कवडीकाराहारत्वम्। कायेन स्नानाभ्यङ्गादिकस्प्रष्टव्यस्य रोमकूपमुखग्रासव्यवच्छेदेन कवडीकरणात्।

द्वयोः किल

इति। किलशब्दः परमतद्योतने। स्वमतमस्य पश्चाद् वक्ष्यते। द्वयोरिति प्रत्येकमभिसम्बन्धः। **सत्त्वभेदः स्त्रीपुरुष** इति। स्त्रीत्येको निकायसभागः पुरुष इत्यपरस्तयोर्भेदः। **सत्त्वविकल्प इति स्तनादेः संस्थानस्य स्वरस्याचारस्य चान्यथात्वं** विशेष इत्यर्थः। **संक्लेशव्यवदानयोरित्यपर** इति पूर्वाचार्यः। न सत्त्वभेदविकल्पयोरन्तरेणापि पुरुषेन्द्रियं रूपावचराणां विकल्पसिद्धेः। विकल्पकृतश्च सत्त्वभेद इत्यभिप्रायः। **तद्वियुक्तविकलानामिति**। वियुक्ताश्च ते विकलाश्च वियुक्तविकलाः। ताभ्यां स्त्रीपुरुषेन्द्रियाभ्यां वियुक्तविकलास्तद्वियुक्तविकलाः। के। **[2]शण्ठपण्डकोभयव्यञ्जनाः**। तद्वियुक्ताः शण्ठपण्डकाः। तेषां स्त्रीपुरुषेन्द्रियाभावात्। शण्ठपण्डकानां पुनः कः प्रतिविशेषः। शण्ठकाः स्वभावतो निःस्त्रीपुरुषेन्द्रियाः। पण्डका उपक्रमेणोपहतेन्द्रियाः। विनये तु पण्डका एव पञ्च पठ्यन्ते। प्रकृतिपण्डक ईर्ष्यापण्डकः पक्षपण्डक आसेकपण्डको लूनपण्डकश्चेति। तत्र प्रकृतिपण्डकः शण्ठ इहाभिप्रेतः। यस्य हि प्रकृत्या व्यञ्जनं नास्ति स प्रकृतिपण्डकः। शेषा इह पण्डका इष्यन्ते। लूनपण्डको हि तावदिन्द्रियच्छेदादिन्द्रियविकल इति स्फुट एषः। पक्षपण्डकादयस्त्विन्द्रियाकर्मण्यत्वेन तद्विकला एव। इन्द्रियकर्मण्यत्वकालेऽपि तद्विकला इति व्यवस्थाप्यन्त एव। तदिन्द्रियकर्मण्यत्वस्य पुरुषसुखविशेषाजनकत्वात् प्रसवाजनकत्वाच्च। इन्द्रियसद्भावाशङ्कानिवृत्त्यर्थमेव चेह शण्ठपण्डका इति पृथक् पाठः। अन्यथा हि विनयवदिहाप्यभिधर्मे पण्डका इत्येवं[3] पठ्येरन्। उभयव्यञ्जनास्तद्विकलाः स्थानभ्रंशवैकल्यादल्पसुखहेतुत्ववैकल्याच्च। अपरे

1 B. & To. नासिकयोः 2 B. & To. षण्ढ for शण्ठ throughout.
3 B. & To. following Tib. इत्येव.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याचक्षते। तद्वियुक्ताः शण्ठाः। तद्विकलाः पण्डका उपक्रमवैकल्यात्। उभयव्यञ्जनाश्च तद्विकलाः स्थानभ्रंशवैकल्यादल्पसुखहेतुत्ववैकल्याच्चेति। **तेषामसंवरादीनि न भवन्ति।**

नृणामसंवरो हित्वा शण्ठपण्डद्विधाकृतीन्[1]।
आनन्तर्यं शण्ठादीनां तु नेष्यते
अल्पोपकारालज्जित्वात्[2]।
छिनत्ति स्त्रीपुमान् दृष्टिचरितः[3]

इति वचनात्। **स्त्रीपुरुषाणां तु तानि भवन्ति।** अतः संक्लेशे आधिपत्यं स्त्रीपुरुषेन्द्रिययोः। **संवरफलप्राप्तिवैराग्याणि चेति।** संवरस्त्रिविधः प्रातिमोक्षसंवरो ध्यानसंवरोऽनास्रवसंवरश्च। तेषामेकोऽपि संवरो न भवति किमङ्ग सर्वः।

संवरोऽप्येवम्[4]

इति वचनात्। अतएव च स्रोतआपत्त्यादिफलप्राप्तिः। कामादिवैराग्यञ्च तेषां न सम्भवति। स्त्रीपुरुषाणां तु भवतीति। अतो व्यवदानेऽपि स्त्रीपुरुषेन्द्रिययोराधिपत्यमिति। **निकायसभागसम्बन्धसन्धारणयोरिति।** जीवितेन्द्रियस्य निकायसभागोत्पत्तौ निकायसभागसम्बन्धे तस्याधिपत्यं व्यवस्थाप्यते। निकायसभागसन्धारणे चाधिपत्यं। जीवितेन्द्रियवशेन तदूर्ध्वमवस्थानात्। **मनइन्द्रियस्य पुनर्भवसम्बन्ध** इति। क्लिष्टेन पुनर्भवसम्बन्धात्। जीवितेन्द्रियादस्य को विशेषः। जीवितेन्द्रियस्य अन्तराभव एव सम्बन्धनं मनइन्द्रियस्य तूपपत्तिभवेऽपि। समानकालञ्च जीवितेन्द्रियं निकायसभागेन तत्सम्बन्धनं करोति। मनइन्द्रियं तु भिन्नकालमपि पुनर्भवे तत्सम्बन्धनं करोति। **वशिभावानुवर्तन**[5] इति। चित्तस्य वशिभावमनुवर्तते लोको धर्मो वा यथोक्तम्। चित्तेनायं लोको नीयत इति विस्तरः। **गाथायामप्युक्तम्**

चित्तेन नीयते लोकश्चित्तेन [6]परिकृष्यते।
एकधर्मस्य चित्तस्य सर्वधर्मा वशानुगाः॥[7]

---

1 Kārikā, IV. 44.
2 Kārikā, IV. 98. To. अल्पोपकार्यलज्जि॰
3 Kārikā, IV. 81.
4 Kārikā, IV. 44.
5 B. ॰नुवर्तनं
6 Mss. परिक्लष्यते
7 See Saṃyutta N., I, 7, Addhavagga, 2.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति। **रागादीनां तदनुशायित्वादिति** । तेषु सुखादिष्वनुशायितुं शीलमेषामालम्बनतः संप्रयोगतो वा। त इमे तदनुशायिनो रागादयः। तद्भावस्तदनुशायित्वम्। तस्मादिति। यथोक्तं सुखायां वेदनायां रागोऽनुशेते। दुःखायां द्वेषः अदुःखासुखायां मोह इति। **तैर्हि व्यवदायत इति**। तैर्विशुध्यतीत्यर्थः। तदेवं क्लेशविशुद्धावेषां श्रद्धादीनामाधिपत्यमुक्तं भवति। **व्यवदानेऽपि सुखादीनामाधिपत्यमित्यपर इति**। न केवलं संक्लेशे सुखादीनामाधिपत्यम्। किं तर्हि। व्यवदानेऽपीत्यपिशब्दस्यार्थः। आभिधार्मिकाः केचिदेवमाहुः। व्यवदानेऽपि तेषामाधिपत्यमस्तीत्यागममानयन्ति। **यस्मान् सुखितस्य चित्तं समाधीयत इत्युक्तं सूत्रे। दुःखोपनिषच्छ्रद्धा**। दुःखमुपनिषदस्याः। सेयं श्रद्धा दुःखोपनिषद् दुःखहेतुकेत्यर्थः। दुःखे सति कस्यचिद्धर्मे रत्नत्रये वा श्रद्धा जायते प्रव्रज्यां [1]वाभिलषति। **षण्णैष्क्रम्याश्रिताः सौमनस्यादय इति**। षण्णैष्क्रम्याश्रितानि सौमनस्यानि षण्णैष्क्रम्याश्रितानि दौर्मनस्यानि षण्णैष्क्रम्याश्रिता उपेक्षाः। नैष्क्रम्यं सास्रवोऽनास्रवो मार्गः। धातोः संसाराद्वा निष्क्रमणं वैराग्यमित्यपरे। यथोक्तं सूत्रे चक्षुर्विज्ञेयानि रूपाणि प्रतीत्योत्पद्यते सौमनस्यं नैष्क्रम्याश्रितं नैष्क्रम्यालम्बनमित्यर्थः। नैष्क्रम्यानुकूलमिति वा। एवं यावन्मनः प्रतीत्य धर्मांश्चोत्पद्यते सौमनस्यं नैष्क्रम्याश्रितमिति। तथा चक्षुर्विज्ञेयानि रूपाणि प्रतीत्योत्पद्यते दौर्मनस्यं नैष्क्रम्याश्रितम्। एवं यावन्मनः। तथा चक्षुर्विज्ञेयानि रूपाणि प्रतीत्योत्पद्यत उपेक्षा नैष्क्रम्याश्रिता। एवं यावन्मनः। नैष्क्रम्यं प्राप्स्यामीति कस्यचित् सौमनस्यम्। न नैष्क्रम्याय मया यत्नः क्रियत इति कस्यचिद्दौर्मनस्यम्। कस्यचित् प्रतिसंख्यायोपेक्षा तेषु रूपादिषु भवति।

अपरे पुनराहुरिति सौत्रान्तिकाः। **विज्ञाय विषमपरिहारादिति**। विज्ञानेन विषमपरिहारः क्रियते न चक्षुःश्रोत्रेणेत्यभिप्रायः। **नापि विज्ञानादन्यद्रूपदर्शनं शब्दश्रवणं वास्तीति**। न रूपदर्शनं ग्रहणव्यतिरिक्तं विचार्यमाणं लभ्यते। ग्रहणं च विज्ञानमेवेति नान्यद्भवति। तस्माच्चक्षुःश्रोत्रविज्ञानयोः ससंप्रयोगयोरुत्पत्तौ यदाधिपत्यमुक्तं तदेव तद्भवति। नान्यत्राधिपत्यमेतदित्यभिप्रायः ॥१॥

---

1 Mss. चाभिलषति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[स्वसर्वार्थोपलब्धौ त्वाधिपत्यादिन्द्रियाणि षट् ।
स्त्रीत्वे पुंस्त्वे चाधिपत्यात् कायात् स्त्रीपुरुषेन्द्रिये ॥२॥
निकायस्थितिसंक्लेशव्यवदानाधिपत्यतः ।
जीवितं वित्तिश्रद्धादि पञ्चकेन्द्रियता मताः ॥३॥
निर्वाणाद्युत्तरोत्तरप्रतिलम्भाधिपत्यतः ।
अनाज्ञातमाज्ञास्याम्याज्ञाज्ञातावीन्द्रियाणि च ॥४॥]

मनसः पुनः सर्वार्थोपलब्धाविति[1] ।

स्वार्थोपलब्ध्याधिपत्यात्

इत्येव सिद्धे मनसः सर्वार्थोपलब्धाविति वचनं धर्मधातोरसर्वधर्मस्वभावत्वात् । व्याख्यातञ्चैतत् पुरस्तात् । ननु चार्थानामप्यत्राधिपत्यमिति । द्वयं प्रतीत्य विज्ञानस्योत्पत्तिरिति वचनात् । अधिकं हि प्रभुत्वमाधिपत्यमिति । अधिकः प्रभुरधिपतिस्तद्भाव आधिपत्यमिति । सर्वरूपोपलब्धौ सामान्यकारणत्वादिति । नीलपीतादिसर्वरूपोपपलब्धौ [2]एकरूपस्य चक्षुषः [3]कारणत्वात् । न तु[4] रूपस्यैकरूपस्य नीलपीतादिसर्वरूपोपलब्धौ कारणत्वम् । न हि नीलरूपं पीतरूपोपलब्धौ कारणं भवति । तत् पटुमन्दताद्यनुविधानाच्चोपलब्धेरिति । यस्मादुपलब्धिश्चक्षुरादिपटुमन्दतामनुविधत्ते । तद्यथा पटुनि चक्षुषि पट्वी तदुपलब्धिः । मन्दे मन्देति । आदिशब्देन अकुशलकुशलसवेदनावेदनानुविधानम् । अकुशले मनसि अकुशलोपलब्धिः । कुशले कुशला । सवेदने सवेदना । अवेदने [5]चावेदनेति । न रूपस्य पटुमन्दताद्यनुविधत्ते उपलब्धिः । तेनाह । तद्विपर्ययादिति । तस्माच्चक्षुरादीनामधिकमैश्वर्यं न रूपादीनाम् ।

कायात् स्त्रीपुरुषेन्द्रिये

इति । अत्र साधनम् । कायेन्द्रियस्वभावं स्त्रीपुरुषेन्द्रियम् । स्प्रष्टव्यविज्ञानजनकत्वात् । अस्त्रीपुरुषेन्द्रियस्वभावकायेन्द्रियवत् । वैधर्म्येण चक्षुरिन्द्रियवत् । स्त्र्याकृतिस्वरचेष्टाभिप्राया इति । [6]स्त्र्यभिप्रायः पुरुषाभिप्रायो[6] विपर्ययेण । तदेवं सति सत्त्वविकल्प एव स्त्रीपुरुषेन्द्रिययोराधिपत्यम् ।

निकायसभागस्थितौ जीवितेन्द्रियस्याधिपत्यम् । न तु वैभाषिकवत् निकायसभागसम्बन्धे तत्र मनस एवाधिपत्यात् । संक्लेशे वेदनानामिति । अत्र

---

1 Mss. ०पलम्भाविति
2 V. एवं रूपस्य
3 To. करणत्वात्
4 Mss. ननु
5 B. & To. omit च.
6......6 B. & To. स्त्र्यभिप्रायपुरुषाभिप्राययोः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वैभाषिकैः सार्धमैकमत्यम्। **तथाहि तैरिति** विस्तरः। तथाहि तैः श्रद्धादिभिः **क्लेशाश्च विस्कम्भ्यन्ते** लौकिकमार्गगतैर्मार्गश्चावाह्यते निर्वेधभागीयादिगतैः। तदेवं व्यवदानसम्भारे श्रद्धादीनां प्रत्येकमाधिपत्यमुक्तं भवति।

न ह्यविमुक्तचित्तस्यास्ति परिनिर्वाणमिति। आज्ञातावीन्द्रियं क्षयज्ञानाद्यनास्रवमिन्द्रियम्। तदेव च विमुक्तं क्लेशविमुक्त्या सन्तानविमुक्त्या च। तत्प्राप्तस्य निरुपधिशेषनिर्वाणं भवति। तस्मादाज्ञातावीन्द्रियस्य निरुपधिशेषनिर्वाण आधिपत्यं व्यवस्थाप्यते। **दृष्टधर्मसुखविहारं प्रतीति** विस्तरः। दृष्टो धर्मो दृष्टधर्मः दृष्टजन्मेत्यर्थः। सुखो विहारः सुखविहारः। दृष्टधर्मे सुखविहारः दृष्टधर्मसुखविहारः। **तं प्रत्याज्ञातावीन्द्रियस्याधिपत्यं विमुक्तिप्रीतिसुखप्रतिसंवेदनादिति।** विमुक्तिः क्लेशप्रहाणं प्रीतिः सौमनस्यं सुखं प्रस्रब्धिसुखं विमुक्त्या प्रीतिसुखस्य प्रतिसंवेदनं विमुक्तिप्रीतिसुखप्रतिसंवेदनम् तस्मादिति। तदुक्तं भवति विमुक्तिप्रीतिसुखप्रतिसंवेदनमेव दृष्टधर्मसुखविहार इति ॥२-४॥

वाक्पाणिपादपायूपस्थानामपि चेन्द्रियत्वमुपसंख्यातव्यमिति। सांख्याश्चक्षुरिन्द्रियादिव्यतिरिक्तानि वागिन्द्रियादीनि कल्पयन्ति' वागिन्द्रियं येन वचनं क्रियते' पाणीन्द्रियं येन किञ्चिद् द्रव्यमादीयते। पादेन्द्रियं येन विहरणं क्रियते चंक्रमणमित्यर्थः' पाय्विन्द्रियं येन पुरीषोत्सर्गः क्रियते' उपस्थेन्द्रियं कायेन्द्रियैकदेशव्यतिरिक्तं येनानन्दः सुखविशेषः प्राप्यते। न खलूपसंख्यातव्यमविद्यादीनामिन्द्रियत्वं येनार्थेन भगवता द्वाविंशतिरिन्द्रियाण्युक्तानि। तत्राविद्यादीनामयोगात्। कोऽसावर्थ इत्याह

[चित्ताश्रयस्तद्विकल्पः स्थितिः संक्लेश एव च।
संभारो व्यवदानञ्च यावदेतावदिन्द्रियम् ॥५॥]

चित्ताश्रयस्तद्विकल्पः

इति विस्तरः। चित्तस्याश्रयस्तदाश्रयस्य विकल्पो स्थितिः संक्लेशः [1]व्यवदानसंभारो व्यवदानञ्चेति। एतच्च **षडायतनं मौलं सत्त्वद्रव्यमिति** तदितरेषां तदाश्रितत्वात्। तथाहि षडिन्द्रियाधिपत्यसंभूतमिन्द्रियाधिष्ठानम्। षड् वा विषया विज्ञानकायाश्च। तदेतदपि सत्त्वद्रव्यमिष्यते न तु मौलम्। न ह्यधिष्ठानाद्याधिपत्यसंभूतं षडायतनमिति। **व्यवदानसंभरणं पञ्चभिरिति'** श्रद्धादिभिः। **व्यवदानं त्रिभिरिति'** अनाज्ञातमाज्ञास्यामीन्द्रियादिभिः ॥५॥

1 B. व्यवदाने संभारो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपरः कल्पः ।

[प्रवृत्तेराश्रयोत्पत्तिस्थित्युपभोगतोऽथवा ।
चतुर्दश तथान्यानि निवृत्ताविन्द्रियाणि च ॥६॥]

प्रवृत्तेराश्रयोत्पत्तिरिति विस्तरः। प्रवृत्तिपक्षं निवृत्तिपक्षं चाधिकृत्योच्यते। प्रवृत्तेः संसारस्याश्रय **उत्पत्तिः। स्थितिरुपभोगश्च।** निवृत्तेरपि निर्वाणस्याश्रय उत्पत्तिः स्थितिरुपभोगश्च। एतावता च पुरुषार्थपरिसमाप्तिरिति। निरर्थिका तदन्येन्द्रियप्रज्ञप्तिः। भवतामपि पुरुषार्थपरिसमाप्तिः पठ्यते। तस्य शब्दाद्युपलब्धिरादिर्गुणपुरुषान्तरोपलब्धिरन्त इति। तत्र षडायतनं मूलसत्त्वद्रव्यभूतं संसरतीति प्रवृत्तेराश्रयः। **उत्पत्तिस्त्रीपुरुषेन्द्रिय** इति। उत्पद्यतेऽस्या इत्युत्पत्तिः। कस्मादित्याह **तत उत्पत्तेः।** कस्य षडायतनस्य। मनःकायेन्द्रिययोः साक्षात्ताभ्यामुत्पत्तेश्चक्षुरादीनां चतुर्णां क्रमेणोत्पत्तेः। **स्थितिर्जीवितेन्द्रियेण** षडायतनावस्थानात्। **उपभोगो वेदनादिभिः।** सुखादिभिः। **श्रद्धादयो हि निवृत्तेराश्रय** इति श्रद्धादीनां प्रतिष्ठाभूतत्वात्। आज्ञास्यामीन्द्रियं **प्रभव** इत्यादिभवः प्रथमतोऽनास्रवोत्पत्तेः। **स्थितिराज्ञेन्द्रियं** प्राबन्धिकत्वात्। **उपभोग** आज्ञातावीन्द्रियेणेति तेन विमुक्तिप्रीतिसुखप्रतिसंवेदनात्। **अत एतावन्त्येवेन्द्रियाणीति।** नाविद्यादीनामिन्द्रियत्वमिष्टमित्यर्थः। **अत एव चैषामेषोऽनुक्रम** इति। चक्षुरिन्द्रियं यावदाज्ञातावीन्द्रियमिति प्रवृत्तिनिवृत्त्योराश्रयादिभावात्। **वाचस्तु नेन्द्रियत्वं वचने शिक्षाविशेषापेक्षत्वात्।** जातमात्रो हि बालको विनैव शिक्षया चक्षुषा रूपाणि पश्यति न त्वेवं वचनं करोति। तस्मादिन्द्रियधर्मातिक्रान्तत्वान्न वाक् इन्द्रियं भवितुमर्हति। जिह्वेन्द्रियाधिष्ठानस्यैव त्वेतत् कर्मवचनमिति। **पाणिपादस्य चादानविहरणादनन्यत्वादिति।** पाणिरेव **ह्यन्यथान्यत्र चोत्पन्न आदानमुच्यते।** पाद एव चान्यथान्यत्र चोत्पन्नो **विहरणमिति।** कर्माभावात्। स्वात्मनि च [1]वृत्तिविरोधात् न पाणिपादस्येन्द्रियत्वम्। **उरगप्रभृतीनामिति।** सर्पादीनां पाणिपादं नास्ति। **अथ च तेषामादानविहरणं भवति।** न पाणिपादस्येन्द्रियत्वम्। तेषामप्यस्ति सूक्ष्ममिति चेन्न साध्यत्वात्। **पायोरपि नेन्द्रियत्वमुत्सर्ग** इत्यशुच्युत्सर्गे। **गुरुद्रव्यस्य** यस्य कस्यचिदाकाशे छिद्रे

1 Mss. वृत्तिनिरोधात्.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वत्र पायुस्थानादन्यत्रापि **पतनात्**। गुरुद्रव्यस्य गुरुत्वादेवं स्वयं पतनं नेन्द्रियकृतम्। **वायुना च तत्प्रेरणादिति**। वायुना तस्य गुरोरशुचिद्रव्यस्य प्रेरणा। वायोरेव तत्कर्म स्यान्न पाय्विन्द्रियस्य तदनुपलब्धेः। **उपस्थस्यापि नेन्द्रियत्वमानन्द** इति। कायेन्द्रियैकदेशस्त्रीपुरुषेन्द्रियव्यतिरिक्तकल्पितस्य उपस्थस्य नेन्द्रियत्वमानन्दे। कायेन्द्रियैकदेशभूतस्त्रीपुरुषेन्द्रियकृतं हि तत् क्लिष्टं सौख्यमिति वाक्यार्थः। **कण्ठदन्ताक्षिवर्त्माङ्गुलिपर्वणामपीति** विस्तरः। यदि यथोक्तात् कारणादेतावन्त्येवेन्द्रियाणीति नेष्यते। कण्ठस्याभ्यवहरणे दन्तस्य **चर्वणे** अक्षिवर्त्मन **उन्मेषनिमेषे** पर्वणोऽस्थिसन्धिसङ्कोचविकाशक्रियायामिन्द्रियत्वं **प्रसज्येत**। **सर्वस्य वा कारणभूतस्येति** विस्तरः। सर्वस्य वा कारणभूतस्य वीजादेः स्वस्यां क्रियायां स्वकार्यक्रियायामङ्कुरादिलक्षणायामिन्द्रियत्वं प्रसज्येतेत्यधिकृतम्। यदि यस्य यत्र पुरुषकारोऽस्ति तस्य तत्रेन्द्रियत्वमिष्यते। स च नियमहेतुः पूर्वोक्तो नेष्यते। तस्मादयुक्तं वागादीनामिन्द्रियत्वम्।

तत्र चक्षुरादीनामिति विस्तरः। तत्रेति वाक्योपन्यासे। **कृतो निर्देश** इति।

तद्विज्ञानाश्रया रूपप्रसादाश्चक्षुरादयः।[1]

कायात् स्त्रीपुरुषेन्द्रिये।[2]

विज्ञानं प्रतिविज्ञप्तिः[3]

इति। **जीवितेन्द्रियस्येति**।

आयुर्जीवितमाधार उष्मविज्ञानयोर्हि यः[4]

इत्यत्र। **श्रद्धादीनां चैत्तेष्विति**।

श्रद्धाप्रमादः प्रस्रब्धिः[5]

इत्यत्र प्रदेशे। ननु च वेदनाया अपि कृतो निर्देशश्चैत्तेषु च करिष्यते

वेदनानुभवः[6]

इति।

वेदना चेतना संज्ञा[7]

इति वचनात्। सत्यम्। सामान्यं रूपं वेदनाया उक्तम्। वक्ष्यते च। विशेषविभागरूपं त्विह विवक्षितमिति **सुखादीनां कर्तव्यो निर्देश**

---

1 Kārikā, I. 9.
2 Kārikā, II. 2.
3 Kārikā, I. 16.
4 Kārikā, II. 45.
5 Kārikā, II. 25.
6 Kārikā, I. 14.
7 Kārikā, II. 24.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्याह । आज्ञास्यामीन्द्रियादीनां तर्हि न कर्तव्यः' यस्मान्मनसो लक्षणमुक्तम्' श्रद्धादीनां चैत्तेषु करिष्यते' सुखसौमनस्योपेक्षाणामिह क्रियते । एषामपि कर्तव्य एव यस्मान्नवद्रव्यस्वभावत्वमेषां दर्शयितव्यम् । एतस्यां चावस्थायामेतानि नव द्रव्याण्यनाज्ञातमाज्ञास्यामीन्द्रियाख्यां लभन्ते ' एतस्यामवस्थायामाज्ञेन्द्रियाख्यामेतस्यामाज्ञातावीन्द्रियाख्यां लभन्त इति । स एषामवस्थाविशेषो दर्शयितव्य इत्यतः सूक्तमेतत् सुखादीनामाज्ञास्यामीन्द्रियादीनां च कर्तव्य इति ॥६॥

[दुःखेन्द्रियमसाता या कायिकी वेदना सुखम् ।
साता ध्याने तृतीये तु चैतसी सा सुखेन्द्रियम् ॥७॥
अन्यत्र सा सौमनस्यमसाता चैतसी पुनः ।
दौर्मनस्यमुपेक्षा तु मध्योभय्यविकल्पनात् ॥८॥]

असाता या कायिकी वेदना

इति । असातेति सातानिवृत्त्यर्थम् । कायिकीति मानसीनिवृत्त्यर्थम् । तत्र कायाश्चक्षुरादयः पञ्च परमाणुसञ्चयात्मकत्वात् । तत्र काये भवा' कायेन वा[1] आश्रयेण सह चरतीति कायिकी । या उपघातिका पञ्चेन्द्रियाश्रया वेदना' तत्

दुःखेन्द्रियम्

इत्यवगन्तव्यम् ।

सुखम्

साता

इति । अत्रेन्द्रियमित्यनुवर्तते' कायिकीति च । सातेति ग्रहणमसातानिवृत्त्यर्थम् । तदेतदुक्तं भवति' तत् सुखेन्द्रियं या अनुग्राहिका पञ्चेन्द्रियाश्रया[2] वेदनेति ।

ध्याने तृतीये तु चैतसी सा सुखेन्द्रियम्

इति । तृतीये तु ध्याने चैतस्यपि साता वेदना सुखेन्द्रियमिति व्यवस्थाप्यते । कस्माच्चैतस्येव साता तत्र गृह्यते' न कायिकीति । अत आह ' न हि तत्र कायिकी वेदनास्ति[3] पञ्चविज्ञानकायाभावादिति ।

तृतीये ध्याने [4]कस्मात् सा[4] न सौमनस्येन्द्रियम् । अत आह'

---

1 A drops कायेन वा.
2 A & To. omit श्रया.
3 Mss. वेदनानास्ति
4...4 Mss. कस्मात्सा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीये तु ध्याने प्रीतिवीतरागत्वात् सुखेन्द्रियमेव सा न सौमनस्येन्द्रियम्। सातत्वाद्धि सुखमुच्यते। न प्रीतिरसंप्रहर्षाकारत्वात्। तथाहि सूत्र उक्तं प्रीतेर्विरागादुपेक्षको विहरतीति विस्तरेण यावत् स्मृतिमान् सुखविहारी तृतीयं ध्यानमुपसम्पद्य विहरतीति।

सौमनस्यादन्या प्रीतिरिति चेदत आह। प्रीति हिं सौमनस्यमिति।

असाता चैतसी पुनः

दौर्मनस्यम्

इति। उपघातिका चैतसिकी वेदना दौर्मनस्यम्।

उपेक्षा तु मध्या

इति उपेक्षेन्द्रियं तु या मध्या वेदना। नैव साता नासातेत्यर्थः।

उभयी

इति। उभयावयवावस्था उभयी कायिकी चैतसिकीत्यर्थः।

अविकल्पनात्

इति। अभिनिरूपणाविकल्पाभावादित्यर्थः। प्रायेणेति ग्रहणं समाधिजविपाकजप्रीतिसुखपरिवर्जनार्थम्। न तु कायिकमिति। न कायिकं सुखदुःखं विकल्पनादुत्पद्यते। किं कारणमित्याह। विषयवशादर्हतामप्युत्पत्तेरिति। प्रहीणप्रियाप्रियविकल्पानामप्यर्हतां विषयवशेनैव कायिकसुखदुःखोत्पादात्। अतस्तयोरिन्द्रियत्वेन भेद इति। तयोः कायिकचैतसिकयोः सुखयोर्दुःखयोश्च इन्द्रियत्वेन भेदः पृथक्त्वं सुखेन्द्रियं सौमनस्येन्द्रियं दुःखेन्द्रियं दौर्मनस्येन्द्रियमिति। उपेक्षा तु स्वरसेनैवानभिसंस्कारेणाविकल्पयत एवानभिनिरूपयत एवोत्पद्यते कायिकी चैतसिकी वा विपाकजा नैष्यन्दिकी वा। तस्मादेकमिन्द्रियं क्रियते इन्द्रियत्वेनाभेद उपेक्षेन्द्रियमिति। अन्यथा च कायिकमिति विस्तरः। अन्येनानुभवरूपविशेषेण कायिकं सुखमनुगृह्णाति। अन्येन चैतसिकम्। स्थिरं हि कायिकम्। अस्थिरं हि चैतसिकम्। एवं दुःखमन्ये नानुभवरूपविशेषेण कायिकमुपहन्ति। अन्येन चैतसिकमिति। उपेक्षायां [1]नैष विकल्प इति। एष स्वरूपविशेषलक्षणो विकल्पो नास्ति। अत उपेक्षणं प्रति उपेक्षाक्रियां प्रति। अविकल्पनादस्वभावविशेषादभेदः ॥७-८॥

---

1 Mss. & B. लेप

[दृग्भावनाशैक्षपथे नव त्रीण्यमलं त्रयम् ।
रूपीणि[1] जीवितं दुःखे सास्रवाणि नव द्विधा ॥९॥]

दृग्भावनाशैक्षपथे

इति । दृग् दर्शनम् । दृशो भावनाया अशैक्षस्य च पन्था दृग्भावनाशैक्षपथः । तस्मिन्नेव मार्गत्रये यानि मनःसुखसौमनस्योपेक्षाश्रद्धावीर्यस्मृतिसमाधिप्रज्ञाख्यानि **नव** द्रव्यानि । तानि **दर्शनमार्गे अनाज्ञातमाज्ञास्यामीन्द्रियम्**। **भावनामार्गे आज्ञेन्द्रियम्**। **अशैक्षमार्गे आज्ञातावीन्द्रियमिति** व्यवस्थाप्यन्ते । अन्योन्यमपेक्षमाणानि तानि नव द्रव्याणि तत्तन्नाम लभन्ते । नवेति च [2]कलापान्तरापेक्षयैवमुक्तं नत्वेकस्मिन् चित्तकलापे नव द्रव्याणि भवन्ति । सुखसौमनस्योपेक्षेन्द्रियाणामेकतरस्यैव भावात् । यदि हि स मार्गोऽनागम्यध्यानान्तरचतुर्थध्यानाकाशविज्ञानाकिञ्चन्यायतनभूमिकः । तत्रोपेक्षेन्द्रियमेव । न सुखसौमनस्येन्द्रिये । यदि प्रथमद्वितीयध्यानभूमिकः । तत्र सौमनस्येन्द्रियमेव । यदि तृतीयध्यानभूमिकः । तत्र सुखेन्द्रियमेव नान्यदिति । **अनाज्ञातमाज्ञातुं प्रवृत्त** इति । अनाज्ञातं सत्यचतुष्टयमाज्ञातुं वेदितुं प्रवृत्त आज्ञास्यामीति प्रारब्धः । तस्येन्द्रियमनाज्ञातमाज्ञास्यामीन्द्रियम् । अलुक्समासः । आख्यातप्रतिरूपकश्चायमाज्ञास्यामीति शब्दः । **भावनामार्गे नास्त्यपूर्वमाज्ञेयं तदेव**[3] तु सत्यचतुष्टयमाजानाति **शेषानुशयप्रहाणार्थं** भावनाहेयक्लेशप्रहाणार्थम् । तस्याज्ञस्य पुद्गलस्येन्द्रियमाज्ञेन्द्रियम् । आज्ञमेवेन्द्रियमिति वा । **अशैक्षमार्गे** त्वाज्ञातमित्यवगम **आज्ञाताव** इति । [4]अर्थकथनमात्रमेतत् । शब्दविग्रहस्त्वेवं कर्तव्यः । [5]आज्ञातमित्यात्र आज्ञातावः । अवतेर्घञि रूपमेतदाव इति । **सोऽस्यास्तीति** मत्वर्थीय **आज्ञातावी । आज्ञातमवितुं शीलमस्येति वेति** ताच्छीलिको णिनिः । **तथा भूतस्येन्द्रियमिति**। तथाभूतस्य पुद्गलस्येन्द्रियम्। आज्ञाताविन इत्यर्थः ।

अमलं त्रयम्

इति । अमलमेव त्रयमित्यवधार्यते । ननु चायमनास्रवसास्रवप्रकारभेद उक्तो धातुनिर्देशे ।

---

1 Poussin रूपाणि

2 Mss. कलापान्तरापेक्षैव०

3 A adds च.

4 Mss. अथ०

5 Mss. आज्ञातमित्येत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनास्रवा मार्गसत्यम्[1]

इति । तथा

सास्रवानास्रवा एते त्रयः शेषास्तु सास्रवाः[2]

इत्यादिवचनात् । सत्यमुक्तोऽयमेवमादिः प्रकारभेदः । स तु सामान्यरूपेणोक्तो न भेदरूपेण । अतः शिष्यसुखप्रतिपत्त्यर्थमयमेवमादिप्रकारभेदः प्रतिपदरूपेण पुनरभिधीयत इत्येवमवगन्तव्यम् । द्विधा नवेति न सूत्रयितव्यम्[3] । एकान्तानास्रवसास्रवनिर्धारणादेव हि द्विधा न वेति सिद्धेः । यदि ह्येतानि नवैकान्तेनानास्रवाणि स्युरेकान्तानास्रवेष्वाज्ञास्यामीन्द्रियादिषु पठ्येरन् । तथैकान्तसास्रवाणि स्युः । एकान्तसास्रवेषु रूपीन्द्रियजीवितदुःखदौर्मनस्येषु[4] पठ्येरन्[5] । न चैवम् । अतो नव द्विधेति सिद्धम् । अस्त्येतदेवम् । मतान्तरनिवृत्त्यर्थं तु पुनरिदमुच्यते

नव द्विधा

इति । द्विधैव नव नानास्रवाणि यथैके कथयन्ति । तत्सिद्धये चागममानयन्ति । **यस्येमानीति** विस्तरः । **सर्वेण सर्वाणि न सन्तीति** । सर्वेण प्रकारेण मृदुमध्याधिमात्रभेदेन । सर्वाणीति पञ्चापि न सन्तीत्यर्थः । **पृथग्जनपक्षावस्थितं वदामीति वचनात्** । अर्थादेतदुक्तं भवति । यस्येमानि सन्ति स आर्य इति । **नेदं ज्ञापकं तेषामनास्रवत्वमधिकृत्येत्याचार्यः** । तथाह्यार्य**पुद्गलव्यवस्थानं कृत्वा यस्येमानीत्याहेति** । कथम् । पञ्चेमानि भिक्षव इन्द्रियाणि । कतमानि पञ्च । श्रद्धेन्द्रियं यावत् प्रज्ञेन्द्रियम् । एषां पञ्चानामिन्द्रियाणां तीक्ष्णत्वात् परिपूर्णत्वादर्हन् भवति । ततस्तनुतरैर्मृदुतरैरनागामी भवति । ततस्तनुतरैर्मृदुतरैः सकृदागामी । ततस्तनुतरैर्मृदुतरैः स्रोतआपन्नः । ततोऽपि तनुतरैर्मृदुतरैर्धर्मानुसारी । ततस्तनुतरैर्मृदुतरैः श्रद्धानुसारी । इति हि भिक्षव इन्द्रियपारमितां प्रतीत्य फलपारमिता प्रज्ञायते । फलपारमितां प्रतीत्य पुद्गलपारमिता प्रज्ञायते । यस्येमानि पञ्चेन्द्रियाणि सर्वेण सर्वाणि न सन्ति । तमहं बाह्यं पृथग्जनपक्षावस्थितं वदामीति । तदेवमार्यपुद्गलव्यवस्थानं कृत्वा यस्येमानीत्याह भगवानिति । **पृथग्जनो वा द्विविध इति** । **आभ्यन्तरकश्च बाह्यकश्च** । **असमुच्छिन्नकुशलमूल** आभ्यन्तरको बौद्धसंगृहीतत्वात् । **समुच्छिन्न**-

1 Kārikā, I. 5.
2 Kārikā, I. 31.
3 Mss. ०तव्यः
4 Mss. ०दौर्मनस्यमध्ये
5 V पश्येरन्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुशलमूलस्तु बाह्यकस्तद्विपर्ययात्। अतएव च बाह्यमिति विशेषणम्। इतरथा हि पृथग्जनपक्षावस्थितं वदामीत्येवावक्ष्यत्। उक्तं च सूत्रे[1] इति। अथ भगवतोऽचिराभिसंबुद्धस्यैतदभवत्। अधिगतो मे धर्मो गम्भीरो गम्भीरावभासो दुर्दर्शो दुरवबोधोऽतर्क्योऽतर्कावचरः सूक्ष्मो निपुणः पण्डितविज्ञवेदनीयः। तं चाहं परेषामावेदयेयम्। तं च परे न विजानीयुः। स मम स्याद्विघातः स्यात् क्लमथः स्याच्चेतसोऽनुदयः। यं न्वहमेकाकी अरण्ये प्रवणे[2] दृष्टधर्मसुखविहारतायोगमनुयुक्तो विहरेयम्। अथ ब्रह्मणः सहापते र्ब्रह्मलोके स्थितस्यैतदभवत्। नश्यति बतायं लोकः प्रणश्यति बतायं लोकः। यत्रेदानीं कदाचित् कर्हिचित् तथागता अर्हन्तः सम्यक्संबुद्धा लोक उत्पद्यन्ते। तद्यथोदुम्बरपुष्पम्। तस्य चाद्य भगवतोऽल्पोत्सुकविहारितायां चित्तं क्रामति न धर्मदेशनायाम्। यं न्वहं गत्वा अध्येषयेयम्। अथ ब्रह्मा सहापतिः तद्यथा बलवान् पुरुषः सम्मिञ्जितं बाहुं प्रसारयेत् प्रसारितं वा सम्मिञ्जयेत्। एवमेव ब्रह्मा सहापतिर्ब्रह्मलोके अन्तर्हितो भगवतः पुरस्तात् प्रत्यस्थात्। अथ ब्रह्मा तस्यां वेलायां गाथामभाषत।

प्रादुर्बभूव मगधेषु पूर्वं धर्मो ह्यशुद्धः समलानुबद्धः।
अपावृणीष्व अमृतस्य द्वारं वदस्व धर्मं विरजं[3] निरञ्जनम्॥

अथ भगवानस्यां वेलायां इमे गाथे अभाषत।

कृच्छ्रेण मे अधिगतो ब्रह्मन् खिलां प्रविदाल्य
भवरागपरीतैश्च नायं धर्मः सुसंबोधः[4]।

प्रतिस्रोतोपमं मार्गं गम्भीरमतिदुर्दृशम्
न द्रक्ष्यन्ते रागरक्तास्तमस्कन्धेन चावृताः॥

ब्रह्मावोचत्। सन्ति भदन्त सत्त्वा लोके जाता लोके वृद्धास्तीक्ष्णेन्द्रिया अपि मध्येन्द्रिया अपि मृद्विन्द्रिया अपि इत्यप्रवर्तित एव स्वधर्मचक्र इति विस्तरः। इन्द्रियाणि श्रद्धादीनि। यैस्ते भव्या उक्ताः। यस्मादप्रवर्तितेऽपि धर्मचक्रे सन्ति

---

1 Cf. Mādhyamika Vṛ., pp. 498-9; Vinaya Piṭaka, I, 5: Brahmayācanakathā (p. 4); Lalitavistara, p. 392.

2 M. Vṛ., p. 498 प्रविविक्ते 3 Mss. विरजो

4 To. following Vinaya Piṭaka सुसंबुद्धः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तीक्ष्णेन्द्रिया इत्याद्युक्तम्, **तस्मात् सन्त्येव सास्रवाणि श्रद्धादीनीति।** **सदेवकाल्लोकादिति** विस्तरः। न तावदहमस्मात् सदेवकाल्लोकात् समारकात् सब्रह्मकात् सश्रमणब्राह्मणिकायाः प्रजायाः सदेवमानुषाया मुक्तो निःसृतो विसंयुक्तो विप्रमुक्तो विपर्यासापगतेन चेतसा बहुलं [1]व्यवहार्षमिति विस्तरवचनम्। **न चानास्रवाणामेष[2] परीक्षाप्रकार** इति। न ह्यनास्रवाणामास्वाद आदीनवो निःसरणं वा युज्यते ॥९॥

[विपाको जीवितं द्वेधा द्वादशान्त्याष्टकादृते।
दौर्मनस्याच्च तत्त्वेकं सविपाकम्।]

अर्हन्निति नानागामी, क्लेशाविमुक्तसन्तानत्वात्। **ऋद्धिमानिति** प्राप्ताभिज्ञः। **चेतोवशित्वं प्राप्त** इति असमयविमुक्तः। **जीवितपरिष्कारमिति**, जीविताय परिष्कारस्तदनुगुणत्वात्, **दत्त्वा तत्प्रणिधायेति**, तदायुः प्रणिधाय चेतसि कृत्वेत्यर्थः। कथमित्याह, यन्मे भोगविपाकं कर्म[3] तदायुर्विपाकं भवत्विति। **प्रान्तकोटिकमिति।**

वृद्धिकाष्ठागतम्[4]

इति लक्षणमस्य वक्ष्यते। **चित्तमुत्पादयति वाचं च भाषत** इति। चित्तवाचावपि तत्सिद्धये कुर्यात्। नैककारणसाध्यं हि कार्यम्, तदनेन विपाक एव जीवितेन्द्रियमिति दर्शयति। [5]**यन्मे भोगविपाकं कर्म तदायुर्विपाकदायि भवत्विति।** ध्यानभावनाबलं तु तस्या आकर्षकमिति।

विपाकोच्छेषं विपच्यत इति। अकालमरणेनापरिसमाप्तफलस्य त्यक्तस्य जन्मान्तकर्मणो भावनाबलेन विपाकोच्छेषमाकृष्य प्रतिसंवेदयते। **तेषां तादृश** इति। तेषां योगिनाम्। **पूर्वकर्मजं स्थितिकालावेधमिति**, पूर्वस्मिन् जन्मनि कर्म पूर्वकर्म ततो जातः पूर्वकर्मजः, स्थितिरिन्द्रियं महाभूतानां प्रवाहः, स्थितेः कालः स्थितिकालः, तस्यावेध आक्षेपः स्थितिकाला-

---

1 B. & To. व्यहार्ष॰ 2 A ॰मेव
3 Mss. omit कर्म, but see line 17 below.
4 To. वृद्धिनिष्ठा; Kārikā, VII. 41.
5 Mss. वृद्धि, but see line 12 above.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वेधः, तावत् [1]संस्कारक्षणानुबन्धसामर्थ्यमाक्षेपः । तेन ह्यसौ स्थितिकाल आविध्यते । [2]तं पूर्वकर्मजं स्थितिकालावेधमिन्द्रियमहाभूतानां व्यावर्तयन्ति योगिनः, अपूर्वं च समाधिजमागन्तुकमाक्षिपन्ति ।

प्रश्नात् प्रश्नान्तरमुपजायत इति । अथ यदर्हन् भिक्षुरायुःसंस्कारान् स्थापयति तज्जीवितेन्द्रियं कस्य विपाक इत्यस्मात् प्रश्नात् किमर्थमायुःसंस्कारानधितिष्ठन्तीति प्रश्नान्तरम् । परहितार्थं शासनस्थित्यर्थं चेति । परहितार्थं बुद्धा भगवन्तः, शासनस्थित्यर्थमेव श्रावकाः । [3]रोगादिभूतं चात्मभावमिति । रोगगण्डशल्यादिभूतं त्रिदुःखतायोगात् । क्व कस्य चेति । क्वेत्यस्य प्रश्नविसर्जनम्, मनुष्येष्वेव त्रिषु द्वीपेष्विति । कस्येत्यस्य विसर्जनम्, स्त्रीपुरुषयोरसमयविमुक्तस्यार्हतः प्रान्तकोटिध्यानलाभिन इति । तस्य हीति विस्तरः । समाधौ च वशित्वं प्रान्तकोटिकध्यानलाभिनः, तीक्ष्णेन्द्रियत्वात् । क्लेशैश्चानुपस्तब्धा सन्ततिर्निरवशेषक्लेशप्रहाणात् । दृष्टिप्राप्तस्य यद्यपि समाधौ वशित्वमस्ति, न तु तस्य क्लेशैरनुपस्तब्धा सन्ततिः । समयविमुक्तस्य यद्यपि क्लेशैरनुपस्तब्धा सन्ततिः, न तु समाधौ वशित्वम् । असमयविमुक्तस्य तूभयमस्ति ।

बहुवचनमिति, जीवितसंस्कारानिति यद्वचनं तद्बहुवचनम् । कस्मादित्याह, बहूनामिति विस्तरः । बहूनां सन्तानवर्तिनां जीवितसंस्काराणामुत्सर्जनाधिष्ठानात् । न ह्येकस्य क्षणस्य उत्सर्जनेऽधिष्ठाने वा प्रयोजनमस्ति । प्रवाहेण परकार्याभिनिष्पादनात् । एकस्य च क्षणस्यापीडाकरत्वात् । न च कालान्तरस्थावरमिति । कालान्तरस्थानशीलं कालान्तरस्थावरमक्षणिकम् । तच्च तदायुर्द्रव्यं न भवतीति द्योतनार्थं बहुवचनमित्येके । बहुष्वेव संस्कारेष्विति, सौत्रान्तिकानामयं पक्षः । एकस्मिन्नपि क्षणे बहवस्ते संस्कारा येष्वायुरिति प्रज्ञप्तिः । नैकमायुर्नाम द्रव्यमस्ति । ते च संस्काराः पञ्चस्कन्धस्वभावाः चतुःस्कन्धस्वभावा वा द्रष्टव्याः । अन्यथा हि नैव संस्कारग्रहणमकरिष्यत । एवं तु वक्तव्यमभविष्यत् । भगवान् जीवितान्यधिष्ठायायूंष्युत्सृष्टवानिति । मरणवशित्वज्ञापनार्थमिति, मरणे वशित्वमस्तीति । त्रैमास्यमेव नोर्ध्वमिति । त्रयो मासाः समाहृतास्त्रिमासम्, त्रिमासमेव त्रैमास्यम् । अत्र

---

1 B. & To. following Tib. संसार°

2 Mss. तत्

3 Mss. रोगाभि°

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालाध्वनोरत्यन्तसंयोगे द्वितीया[1] भवति। नोर्ध्वं त्रैमास्याद्विनेयकार्याभावात्' सुभद्रावसानत्वात् बुद्धकार्यस्य। **तस्यापि सम्पादनार्थमिति** 'प्रतिज्ञातसम्पादनार्थम्' अन्यथा वचनमात्रं स्यादिति। **कल्पावशेषः** कल्प एकः सकलः 'कल्पाधिकः कल्पः सातिरेक इत्यर्थः। **स्कन्धमरणमारयोरिति**। चत्वारो माराः 'देवपुत्रमारः क्लेशमारः स्कन्धमारो मरणमारश्च। तत्र प्रथमे यामे देवपुत्रमारो निर्जितः। द्वितीये यामे दिव्येन चक्षुषा लोकं व्यवलोक्य तृतीये यामे क्लेशमारो निर्जितः। वैशाल्यां तु त्रैमास्यं जीवितसंस्कारानधिष्ठाय आयुःसंस्कारानुत्सृष्टवान्। स्कन्धमारनिर्जयार्थमुत्सृष्टाः स्कन्धाः' तेषूत्सृष्टेषु मर्तव्यं स्यात्। अतो मरणमारनिर्जयार्थमधिष्ठिता इति वैभाषिकाः। **निष्ठितमानुषङ्गिकं** यत् प्रश्नात्[2] प्रश्नान्तरमुपजातम्।

द्वेधा द्वादश

इति। द्वेधैव द्वादश एवेत्यवधार्यते। ऋते अन्त्यादष्टकाच्छ्रद्धादिकादाज्ञातावीन्द्रियपर्यन्तात्'

दौर्मनस्याच्च।

जीवितेन्द्रियादेकान्तविपाकादन्यानि द्वादशेन्द्रियाणि विपाकश्चाविपाकश्च। तत्र **चक्षुरादीनि** पुरुषेन्द्रियावसानानि सप्त स्वप्नाद्यभिनिर्वृत्तानि **औपचयिकान्य**विपाकः। मनोदुःखसुखमिति विस्तरः। यानि मनआदीनि **कुशलक्लिष्टानि** [3]**तान्यविपाकः**। **यानि च यथायोग**मैर्यापथिकशैल्पस्थानिकनैर्माणिकस्वभावानि अव्याकृतानि **तान्यविपाकः**। यथायोगमिति विशेषणमैर्यापथिकादीनां मानसत्वेन दुःखेन्द्रियासम्भवात्' सुखसौमनस्ययोश्च क्वचिदसम्भवात्। तत्र कामधातावैर्यापथिकं मनइन्द्रियं तत्संप्रयुक्ते च सौमनस्योपेक्षेन्द्रिये अविपाकः। रूपधातावैर्यापथिकं मनइन्द्रियमविपाकः। वेदनेन्द्रियञ्च तत्संप्रयुक्तं यथाभूमि। नैर्माणिकं पञ्चभूमिकम्। तत्र चोपेक्षेन्द्रियमेवाविपाकः। ऐर्यापथिकशैल्पस्थानिकनैर्माणिकानि नित्यमुपेक्षेन्द्रियेण संप्रयुक्तानीति भदन्तानन्तवर्मा। **शेषाणि विपाक इति**। कुशलक्लिष्टैर्यापथिकशैल्पस्थानिकनैर्माणिकस्वभावेभ्यो मनइन्द्रियादिभ्योऽन्यानि मनइन्द्रियादीनि विपाकजानि विपाकः। **शेषाण्यविपाक इति सिद्धमिति**। जीवितेन्द्रियं द्वादश चक्षुरादीनि हित्वा तदवधारणादेव शेषाण्यविपाक इति

1 Pā., II. 3. 5.

2 A omits प्रश्नात्.

3 A omits तानि.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिद्धम् । कतमानि पुनस्तानि । दौर्मनस्येन्द्रियं न विपाकः [1]कुशलाकुशलत्वात् । तथाहि वक्ष्यति

तत्त्वेकं सविपाकम्

इति । [2]श्रद्धादीन्यष्टकं कुशलमित्यविपाकः ।

विपाकोऽव्याकृतो धर्मः सत्त्वाख्यः[3]

इति विपाकलक्षणाभावात् ।

यदि दौर्मनस्येन्द्रियं न विपाक इत्यनेनागमविरोधं दर्शयति । **संप्रयोगवेदनीयतामधिकृत्ये**ति । वेदनीयं वेदना । दौर्मनस्यं वेदनीयमस्मिन्निति दौर्मनस्यवेदनीयं कर्म[4] । **सौमनस्योपेक्षावेदनीये अपी**ति । संप्रयोगमात्रवचनाद्दौर्मनस्यवत् सौमनस्योपेक्षे अपि न विपाकः प्राप्नुत इति परस्याभिप्रायः । **संप्रयोगेऽपि न दोषो विपाकेऽपी**ति । सौमनस्यं वेदनीयमस्मिन् सौमनस्यवेदनीयं कर्म । तथा सौमनस्यं विपाकत्वेन वेदनीयमस्य सौमनस्यवेदनीयं कर्मेति । **अगत्या ह्येतदेवं गम्येते**ति । यदि दौर्मनस्यं युक्त्या परिच्छिन्नं न विपाक इति तत एवमगत्याख्यायेत संप्रयोगवेदनीयतामधिकृत्योक्तमिति । तेनाह । **का पुनरत्र युक्तिर्दौर्मनस्यं न विपाक** इति । अथ वा अगत्या ह्येतदेवं गम्येत क्वचित् संप्रयोगवेदनीयता क्वचित् विपाकवेदनीयतेति । ब्रूयास्त्वं सर्वत्रैव तर्हि संप्रयोगवेदनीयतेति । अत एतदन्तराभिप्रायमभिसमीक्ष्याह । का पुनरत्र युक्तिर्दौर्मनस्यं न विपाक इति । **दौर्मनस्यं** हीत्यनिष्टचिन्तनादिकैः **परिकल्पविशेषैरुत्पाद्यते च व्युत्पाद्यते च व्युपशाम्यते च । सौमनस्यमप्येवमि**ति । परिकल्पविशेषैरिष्टचिन्तनादिभिरुत्पाद्यते च व्युपशाम्यते च । **वीतरागादीनां तर्ही**ति । यस्माद्वीतरागादीनां **दौर्मनस्यं व्यावर्तते । न हि चक्षुरादिको विपाकभूतो** वीतरागादीनां व्यावर्तते । दौर्मनस्यं तु व्यावर्तते । वचनाद् दौर्मनस्येन कामवीतरागोऽसमन्वागत इति । सूत्रेऽप्युक्तम् 'अवीतरागस्य द्विशल्या वेदनोक्ता कायिकं दुःखं प्रतिसंवेदयते चैतसिकं च दौर्मनस्यमिति' वचनाद् वीतरागस्य

---

1 A drops कुशला. 2 B. & To. श्रद्धाद्यष्टकं, but see Kārikā, II. 11.
3 Kārikā, II. 57. 4 A कः ; V क

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च एकशल्या कायिकमेव दुःखं प्रतिसंवेदयत इति । **सौमनस्यमप्येषा**मिति विस्तरः । वीतरागाणामव्याकृतं विपाकरूपं सौमनस्यं कीदृशं स्यात् । समापत्ति-संगृहीतं तेषां सौमनस्यं सम्भवति । तच्च कुशलत्वान्न विपाकः । अतो वक्तव्यम् । **कीदृशं** तेषां सौमनस्यं **विपाक** इति । **यादृशं तादृशम**स्त्विति । अपरिच्छिद्यमान-मपि तदस्त्येवेति दर्शयति । तस्यास्ति **विपाकावकाशो न दौर्मनस्यस्य । सर्वथा-प्यसमुदाचारान्** समापत्त्यवस्थायामप्यसमापत्त्यवस्थायामपीत्यतो **न विपाक** इति सिद्धम् । **मनइन्द्रियमुभयोरुभयस्ये**ति । उभयोः सुगतिदुर्गत्योः । उभयस्य कुशलाकुशलस्य । विपाक इत्यधिकारः । इदमुत्सृष्टं जीवितेन्द्रियाष्टमानि सुगतौ कुशलस्य विपाक इति । तत्र कथमुभयव्यञ्जनमासाधुसम्मतं [1]कुशलस्य विपाक इत्याह । **सुगतावुभयव्यञ्जनस्याकुशलेन तत्स्थानप्रतिलम्भ** इति । स्थानमस्य भ्रष्टमतोऽस्याकुशलेन प्रतिलम्भो विप्रयुक्तो धर्मः । उभयं तु व्यञ्जनं कुशलस्यैव विपाक इत्यभिप्रायः ।

तत्त्वेकं सविपाकम्

इति । तदेकं सविपाकमेवेत्यर्थः । तेनाह । **तुशब्द एवकारार्थो भिन्न-क्रमश्चे**ति । भिन्नस्थान इत्यर्थः । तदेकं सविपाकं त्विति हि क्रमो न भिन्नः स्यात् । श्लोकबन्धानुगुण्येन त्वेवमुक्तम् । **न हि तदव्याकृत**मिति । सविपाक-मेवेत्यवधारणे युक्तिं दर्शयति । द्वे हि वस्तुनी अविपाके इष्येते । अव्याकृत-मनास्रवञ्च । **विकल्पविशेषोत्पाद्यत्वान्न तदव्याकृतम् । असमाहितत्वाच्च नाना-स्रवम्** । अव्याकृतं हि पूतिबीजवन्न विपाकदानाय समर्थम् । अनास्रवं तु तृष्णानभिष्यन्दितत्वान्नालं विपाकदानायानभिष्यन्दितसारबीजवत् । पारि-शेष्यादकुशलं वा तद्भवेत् कुशलसास्रवं वा । अतः सविपाकमेव नास्त्यविपाकं दौर्मनस्यम् ।

[दश द्विधा ॥१०॥

मनोऽन्यवित्तिश्रद्धादीन्यष्टकं कुशलं द्विधा ।

दौर्मनस्यं मनोऽन्या च वित्तिस्त्रेधान्यदेकधा ॥११॥]

दश द्विधा

इति । दशैव द्विधा । द्विधैव च दशेत्यवधारणम् । द्विधेति सविपाकाविपाकानि ।

---

1 A. कुशलविपाकः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनोऽन्यवित्तिश्रद्धादीनि

चेति। मनश्च अन्यवित्तयश्च श्रद्धादीनि चेति। वित्तिर्वेदना। अन्यग्रहणेन दौर्मनस्यवर्जितं गृह्यते दौर्मनस्यस्योक्तत्वात्। श्रद्धादीनि **श्रद्धावीर्यस्मृतिसमाधि-प्रज्ञाः**[1]। गृह्यन्त इत्यधिकृतम्। **अन्यदविपाकमिति**। यथोक्तदौर्मनस्यायवधारणाज्जीवितं रूपीणि[2] च सप्तेन्द्रियाण्याज्ञास्यामीन्द्रियादीनि च त्रीण्यविपाकानीति सिद्धम्। अव्याकृतत्वादनास्रवत्वाच्च यथाक्रमम्।

अष्टकं कुशलम्

इति। अष्टकं कुशलमेवेत्यवधारणम्।

द्विधा दौर्मनस्यम्

इति। द्विधैव दौर्मनस्यं दौर्मनस्यमेव च द्विधेत्यवधारणम्। द्विधेति कुशलञ्चाकुशलञ्च। अन्यदपि द्वैधमस्ति। कुशलं चाव्याकृतञ्च अकुशलं चाव्याकृतञ्चेति। तत् कथमिदमवधार्यते कुशलं चाकुशलं चेति। व्याख्यानतो विशेषप्रतिपत्तिः। अथवा दौर्मनस्यं सविपाकमेवेति निर्धारितम्। तस्मादिदमेव द्वैधं भवति नान्यत्।

अन्या च वित्तिः

इति। दौर्मनस्यवर्ज्यं वेदनाचतुष्टयं तस्योक्तत्वात्।

त्रेधा

इति। **कुशलाकुशलाव्याकृतानि**। त्रयः प्रकारास्त्रेधा। द्वित्र्योश्च धमुञ् एधाच्चेति[3] त्रेधेत्येषा शब्दव्युत्पत्तिः। अलोभादिसम्प्रयुक्तानि कुशलानि। लोभादिसम्प्रयुक्तान्यकुशलानि। अतोऽन्यान्यव्याकृतानि।

अन्यदेकधा

इति। **जीविताष्टममन्यदेकधैवेत्यवधार्यते। अव्याकृतमेवेत्यर्थः**। एतदर्थं च पुनरस्य करणम्। अन्यथा ह्यकुशलमेव कुशलाव्याकृतमेवाकुशलाव्याकृतमेव वा तत् सम्भाव्यते। तस्मादभीप्सितैकधात्वप्रसिद्ध्यर्थं पुनरुच्यते। यस्यैकधात्वं सम्भवति तद्भवति किञ्च सम्भवत्यव्याकृतत्वमिति ॥११॥

---

1 To. प्रज्ञा
2 B. & To. रूपाणि
3 Mss. omit च्चेति. Pā., V. 3, 45-46.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[कामाप्तममलं हित्वा रूपाप्तं स्त्रीपुमिन्द्रिये।
दुःखे च हित्वा रूपाप्तं सुखे चापोह्य रूपि च ॥१२॥]

कामाप्तममलं हित्वा

इति। अमलमेव हित्वा कामाप्तं भवति। तद्धातुप्रतिसंप्रयुक्तमेवेति। अधातुपतितमेवेत्यर्थः।

रूपाप्तं स्त्रीपुमिन्द्रिये

इति विस्तरः। स्त्री च पुमांश्च स्त्रीपुमांसौ। समासान्तो विधिरनित्य[1] इति परिभाषया समासान्तो न भवति। तयोरिन्द्रिये स्त्रीपुमिन्द्रिये।

दुःखे च

इति। दुःखवेदनास्वभावे इन्द्रिये दुःखदौर्मनस्ये इत्यर्थः। ते स्त्रीपुमिन्द्रिये दुःखदौर्मनस्ये अमलं चेहानुवर्तमानं हित्वा। शेषं रूपाप्तमिन्द्रियं भवति।

क्वोच्यन्त इति पृष्टे सूत्रं दर्शयति। **अस्थानमनवकाश** इति विस्तरः। अत्र सूत्र इत्यभिप्रायः। **अन्यः पुरुषभावोऽस्ति यः कामधातौ पुरुषाणां भवतीति।** स्तनादिसंस्थानस्वराचारान्यथात्वम्। **दुःखेन्द्रियं नास्तीत्या-श्रयस्याच्छत्वात्** तदभिघातजं नास्ति। **अकुशलाभावाच्च** विपाकजं नास्ति। **दौर्मनस्येन्द्रियं नास्ति [2]शमथस्निग्धसन्तानत्वादिति।** यस्माच्च [2]शमथेन समाधिना प्रतिघविगमाद् रौक्ष्यं सन्ताने नास्ति। तस्माद् दौर्मनस्येन्द्रियं नास्ति। **आघातवस्त्वभावाच्चे**ति। आघातः कोपस्तस्य वस्तु विषय आघातवस्तु। नव चाघातवस्तूनि। अनर्थं मेऽकार्षीत् करोति करिष्यति चेत्याघातवस्तुत्रयम्। मित्रस्य मेऽनर्थमकार्षीत् करोति करिष्यत्यपरमाघातवस्तुत्रयम्। अमित्रस्य मेऽर्थमकार्षीत् करोति करिष्यति चेत्यपरमाघातवस्तुत्रयमिति। एषां नवानामाघातवस्तूनामभावाद्विषयकृतमपि दौर्मनस्यं नास्ति। न केवलं हेतुकृतं नास्तीति दर्शयति। हेतुकृतं हि तद् यत् स्वसन्तानप्रतिघकृतम्। प्रत्ययकृतं च तद् यन्नवाघातवस्तुकृतमिति।

सुखे चापोह्य रूपि च

इति। चशब्देन पूर्वोक्तमनुकृष्यते। तेनाह। स्त्रीपुमिन्द्रिये दुःखे

---

1 B. & To. समासान्ते. See Paribhāṣā, 84. 2 समo

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चामलञ्च हित्वेति वर्तत इति। सुखे इति सुखवेदनास्वभावे सुखसौमनस्येन्द्रिये। रूपीन्द्रियं चक्षुरादि ॥१२॥

[मनो वित्तित्रयं त्रेधा द्विहेया दुर्मनस्कता
नव भावनया पञ्च न हेयान्यपि न त्रयम् ॥१३॥]

वित्तित्रयं सुखसौमनस्योपेक्षा इति। सुखेन्द्रियं यत्तृतीयध्यानभूमिकं दर्शनहेयानुशयसंप्रयुक्तं तद्दर्शनहेयम्। तत्रैव अतोऽन्यत् सास्रवम्। पञ्चविज्ञानकायिकञ्च कामावचरम्। प्रथमध्यानभूमिकञ्च त्रिविज्ञानकायिकं भावनाप्रहातव्यम्। अनास्रवं तु सुखेन्द्रियमहेयम्। सौमनस्यं दर्शनहेयसंप्रयुक्तं दर्शनहेयम्। अतोऽन्यत् सास्रवं भावनाहेयम्। अनास्रवमहेयम्। उपेक्षेन्द्रियं तु सर्वगमिति सुगमम्।

द्विहेया दुर्मनस्कता[1]

इति। दौर्मनस्ययोगाद् दुर्मनस्कः। तद्भावो दुर्मनस्कता दौर्मनस्यमित्यर्थः। यस्य गुणस्य हि भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति लक्षणात्। तद्दर्शनहेयसंप्रयुक्तं दर्शनहेयम्। अतोऽन्यद्भावनाहेयम्। नाहेयमसमाहितत्वात् ॥१३॥

[कामेष्वादौ विपाकौ द्वे लभ्येते नोपपादुकैः।
तैः षड् वा सप्त वाष्टौ वा षड् रूपेष्वेकमुत्तमे ॥१४॥]

कामेष्वादौ विपाकौ द्वे लभ्येते

इति। कामप्रधानत्वात् कामधातुः। काम इति निर्दिश्यत इति वक्ष्यते। अण्डजजरायुजसंस्वेदजैः सत्त्वैः कामधातावादौ प्रथमतो द्वे इन्द्रिये विपाकात्मके लभ्येते। कायेन्द्रियं जीवितेन्द्रियं च। कस्मात्। प्रतिसन्धिकाले मनउपेक्षेन्द्रिययोरवश्यं क्लिष्टत्वात्।

उपपत्तिभवः क्लिष्टः सर्वक्लेशैः स्वभूमिकैः[2]

इति वचनात्। चक्षुरादीनां च तस्यामवस्थायामविद्यमानत्वात्।

नोपपादुकैः

इत्यपवादः। अविशेषितत्वाद्धि उपपादुकैरपि तथैव द्वे एव लभ्येयातामिति

---

1 A & V, दुर्मनस्कता

2 Kārikā, III. 38.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रसङ्गः । तस्मादयं प्रतिषेधः । किमुपपादुकैस्ते द्वे नैव लभ्येते' लभ्येते' न तु द्वे एव । तेनाह

तैः षड् वा

इति विस्तरः । यद्यव्यञ्जना भवन्ति' यद्यविद्यमानस्त्रीपुरुषेन्द्रियाः । यथाप्राथमकल्पिका[1] इति । युगाद्युत्पन्नाः

प्रागासन् रूपिवत् सत्त्वाः[2]

इति वचनात् । कतमानि षट् ' चक्षुरादीनि पञ्च जीवितञ्च षष्ठमिति । यथा देवादिष्विति । आदिशब्देन नारकादयोऽपि गृह्यन्ते । अन्तराभवोपपत्तिभवप्रतिसन्ध्यवस्थायां तानि प्रथमतो लभ्यन्ते । किं पुनरुभयव्यञ्जना अप्युपपादुका भवन्तीति । निहीनोभयव्यञ्जनोत्पत्तिः । विशिष्टा चोपपादुका योनिः । कथमनयोः समायोग इति चोदनाभिप्रायः । रूपप्रधानत्वाद् रूपाणीति रूपधातुर्निर्दिश्यते । रुपप्रधानत्वादिति रूपाणां स्वच्छत्वात् भास्वरत्वादित्यर्थः । अथवा न कामगुणप्रधानो रूपधातुः । किं तर्हि ' रूपमात्रप्रधानः । नाप्यारूप्यधातुवदरूपप्रधान इति' सूत्रेऽप्युक्तमिति ' सूत्रेऽप्येवं दृष्टम् । न मदुपज्ञमेवैतदिति दर्शयति । येऽपि ते शान्ता विमोक्षा अतिक्रम्य रूपाण्यारूप्याः । तेऽप्यनित्या अध्रुवा अनाश्वासिका विपरिणामधर्माण इति विस्तरः । अव्यञ्जनैरुपपादुकैरिति प्राथमकल्पिकैः । समापत्तितश्च परत्वादिति । यस्मात्पूर्वं रूपसमापत्तिः पश्चादारूप्यसमापत्तिः । तस्माद्रूपधातोरुत्तर आरूप्यधातुः । उपपत्तितश्च प्रधानतरत्वादिति । यस्माच्चोपपत्तितः प्रधानतरो रूपधातोरारूप्यधातुः । बहूनि कल्पसहस्राणि तत्रातिप्रशान्तो विपाको भवति । अतोऽप्यसावुत्तरः' न तूपपत्तिदेशतः'

आरूप्यधातुरस्थान[3]

इति वचनात् ॥१४॥

[निरोधयत्युपरमन्नारूप्ये जीवितं मनः ।
उपेक्षाञ्चैव रूपेऽष्टौ कामे दश नवाष्ट वा ॥१५॥]

निरोधयत्युपरमन्

इति । म्रियमाण आरूप्यधातावेतान्येव त्रीणीन्द्रियाणि निरोधयति । सापवादं चैतद्वेदितव्यम्'

---

1 V प्राथमविकल्पिका
2 Kārikā, III. 97.
3 Kārikā, III. 3.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुभे सर्वत्र पञ्च च[1]

इति वचनात् ।

रूपेऽष्टौ

इति । रूपधातावष्टावेतान्येव । सह पञ्चभिश्चक्षुरादिभिर्निरोधयेत् । सकृत्-समग्रेन्द्रियमरणात् । अत एवाह' सर्वे ह्युपपादुकाः समग्रेन्द्रिया उप-पद्यन्ते म्रियन्ते चेति ।

कामे दश नवाष्ट वा

इति । उभयव्यञ्जनो दशेन्द्रियाणि निरोधयति यदि समग्रपञ्चेन्द्रियो भवति । एकव्यञ्जनो नव । अव्यञ्जनोऽष्टौ । यदि तु विकलेन्द्रियोऽन्धो वधिरो वा भवति । तदा तदिन्द्रियं परिहार्यम् ॥१५॥

सापवादं चैतत्सर्वंकामधातावेव वेदितव्यम् । तदपवादमाह

[क्रममृत्योस्तु चत्वारि शुभे सर्वत्र पञ्च च ।
नवाप्तिरन्त्यफलयोः सप्ताष्टनवभिर्द्वयोः ॥१६॥]

क्रममृत्योस्तु चत्वारि

इति । न ह्येषां पृथग्निरोध इति । न ह्येषां कामधातावन्योन्यं विरहय्य निरोधोऽस्तीत्यभिप्रायः ।

शुभे सर्वत्र पञ्च च

इति । सर्वस्य पूर्वोक्तस्य मरणविधेः

निरोधयत्युपरमन्नारूप्ये जीवितं मनः[2]

इत्येवमादेरपवादः । त्रिविधं हि मरणचित्तं संभवति । क्लिष्टमव्याकृतं कुशलञ्च । तत्र क्लिष्टाव्याकृतचित्तस्योत्सर्गन्यायेन मरणविधिरुक्तः । कुशल-चित्तस्य तु मरणे श्रद्धादयः पञ्चाधिकाः प्रक्षेप्तव्याः । एषां हि श्रद्धादीनां कुशले चेतस्यवश्यम्भावः । तेन यत्र त्रीण्युक्तानि तत्राष्टौ । यत्राष्टौ तत्र

1 Kārikā, II. 16.

2 Kārikā, II. 15.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्रयोदश । यत्र दश तत्र पञ्चदश । यत्र नव तत्र चतुर्दश[1] । यत्र पुनरष्टौ तत्र त्रयोदश । यत्र चत्वारि तत्र नवेति विस्तरेण गणनीयम् । रूपारूप्यधात्वोर्नास्ति क्रममरणम् ।

इन्द्रियप्रकरणे सर्वे इन्द्रियधर्मा विचार्यन्त इति । इन्द्रियप्रकरणे इह क्रियमाणे सर्वे इन्द्रियधर्मा इन्द्रियावस्थाविशेषाः कारित्रविशेषा वा विचार्यन्त इत्येके व्याचक्षते । अपरे तु व्याचक्षते । इन्द्रियप्रकरणे इन्द्रियस्कन्धके सर्वे इन्द्रियधर्मा अवस्थाविशेषाः कारित्रविशेषा वा विचार्यन्ते । तेनेहापि ते विचार्यन्ते । तत्प्रत्यासत्वादस्य शास्त्रस्येत्यभिप्रायः ।

नवाप्तिरन्त्यफलयोः

इति 'नवभिरिन्द्रियैराप्तिर्नवाप्तिः । कस्य' अन्त्यफलयोः । अन्ते भवे अन्त्ये' अन्त्ये फले अन्त्यफले ' तयोः । के पुनरन्त्ये । **स्रोतआपत्तिफलं अर्हत्त्वफलं च** । यथा दण्डस्य द्वावन्तौ भवतः । एवं पंक्त्यवस्थितानां चतुर्णां फलानां स्रोतआपत्तिफलं अर्हत्त्वफलं चान्ते भवतः । **सकृदागामिफलमनागामिफलञ्च मध्ये भवतः** । तयोरन्त्ययोः फलयोर्नवभिरेवेन्द्रियैः प्राप्तिः । कतमैर्नवभिरित्याह । **श्रद्धादिभिराज्ञातावीन्द्रियवर्ज्यैर्मनउपेक्षेन्द्रियाभ्यां चेति नवभिरिति** । तत्रैवमभिसमयक्रमः । दुःखे धर्मज्ञानक्षान्तिः । दुःखे धर्मज्ञानम् । दुःखेऽन्वयज्ञानक्षान्तिः । दुःखेऽन्वयज्ञानम् । समुदये धर्मज्ञानक्षान्तिः । समुदये धर्मज्ञानम् । समुदयेऽन्वयज्ञानक्षान्तिः । समुदयेऽन्वयज्ञानम् । निरोधे धर्मज्ञानक्षान्तिः' निरोधे धर्मज्ञानम् । निरोधेऽन्वयज्ञानक्षान्तिः । निरोधेऽन्वयज्ञानम् । मार्गे धर्मज्ञानक्षान्तिः । मार्गे धर्मज्ञानम् । मार्गेऽन्वयज्ञानक्षान्तिः मार्गेऽन्वयज्ञानमिति षोडश क्षणा अभिसमय इत्युच्यन्ते । तत्र दुःखे धर्मज्ञानक्षान्तिर्यावन्मार्गेऽन्वयज्ञानक्षान्तिरिति पञ्चदश क्षणा दर्शनमार्गः ।

अदृष्टदृष्टेर्दृङ्मार्गस्तत्र पञ्चदश क्षणाः[2]

इति वचनात् । तच्चाज्ञास्यामीन्द्रियमित्युच्यते' मार्गेऽन्वयज्ञानं तु षोडशः स भावनामार्गः । ततः प्रभृत्या वज्रोपमसमाधेर्यावाननास्रवो मार्गः सर्वोऽसौ भावनामार्गः । तच्चाज्ञेन्द्रियमित्युच्यते । क्षयज्ञानात्प्रभृति सर्वोऽनास्रवो मार्गोऽशैक्षमार्गः । तच्चाज्ञातावीन्द्रियमित्युच्यते । तत्र स्रोतआपत्तिफलं मार्गेऽन्वयज्ञान-

---

1 Mss. चतुर्दशी

2 Kārikā, VI. 28.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षान्त्यवस्थायां प्राप्यते। श्रद्धादीनि चात्र पञ्चेन्द्रियाण्यवश्यं भवन्ति[1] तस्या अवस्थायाः कुशलत्वात्। आज्ञास्यामीन्द्रियस्वभावा चासौ मार्गेऽन्वयज्ञानक्षान्तिर्वर्तमाना। मनइन्द्रियं च तत्संप्रयुक्तं[2] भवत्युपेक्षेन्द्रियं [3]चावश्यमनागम्याश्रयत्वात्। अनागम्यस्य चोपेक्षेन्द्रियसंप्रयुक्तत्वात्। मार्गेऽन्वयज्ञानं त्वस्यामवस्थायामाज्ञेन्द्रियस्वभावमुत्पादाभिमुखं वर्तते। तेन श्रद्धादिभिः पञ्चभिराज्ञास्यामीन्द्रियेणाज्ञेन्द्रियेण मनउपेक्षेन्द्रियाभ्यां चेति तत्फलं नवभिः प्राप्यते। **उभाभ्यां हि तस्य प्राप्तिरिति।** आनन्तर्यमार्गेणाज्ञास्यामीन्द्रियस्वभावेन विमुक्तिमार्गेण चाज्ञेन्द्रियस्वभावेन तस्य प्राप्तिः। **विसंयोगप्राप्तेरावाहकसंनिश्रयत्वाद् यथाक्रमम्।** तस्या विसंयोगप्राप्तेरानन्तर्यमार्गस्यावाहकत्वात्, जनकत्वात्, विमुक्तिमार्गस्य च तस्या सन्निश्रयत्वात्, आधारत्वादित्यर्थः। द्वाभ्यां चौरनिष्कासनकपाटपिधानवत्। यथा हि द्वयोर्मनुष्ययोरेकेन चौरो निष्कास्यते, द्वितीयेनास्य कपाटं पिधीयते, तथानन्तर्यमार्गेण विसंयोगप्राप्तिरावाह्यते क्लेशप्राप्तिमादाय निरोधात्, विमुक्तिमार्गेणाधार्यते विसंयोगप्राप्तिसहोत्पादात्। **अर्हत्त्वस्य पुनः श्रद्धादिभिराज्ञास्यामीन्द्रियवर्ज्यैरिति।** वज्रोपमसमाध्यवस्थायामर्हत्त्वफलं प्राप्यते। श्रद्धादीनि मनइन्द्रियं च पूर्ववत्। वज्रोपमसमाधिकलापस्तस्यामवस्थायामानन्तर्यमार्ग आज्ञेन्द्रियस्वभावो वर्तमानः। **सुखसौमनस्योपेक्षेन्द्रियाणां चान्यतमत्।** यदि तृतीयं ध्यानं निश्रित्यार्हत्त्वं प्राप्यते, सुखेन्द्रियं तत्र वर्तमानम्। अथ प्रथमं द्वितीयं ध्यानं निश्रित्य, तत्र सौमनस्येन्द्रियम्। अथानागम्यध्यानान्तरचतुर्थध्यानाकाशविज्ञानाकिञ्चन्यायतनानामन्यतमं निश्रित्य, तत्रोपेक्षेन्द्रियं वर्तमानम्। क्षयज्ञानकलापस्त्वस्यामवस्थायां विमुक्तिमार्ग आज्ञातावीन्द्रियस्वभाव उत्पादाभिमुखो भवति। तेन श्रद्धादिभिः पञ्चभिराज्ञेन्द्रियेणाज्ञातावीन्द्रियेण मनइन्द्रियेण सुखसौमनस्योपेक्षेन्द्रियाणां चान्यतमेनेति तत्फलं **नवभिः प्राप्यते।** आनन्तर्यविमुक्तिमार्गाभ्यां तत्प्राप्तिरिति पूर्ववद्व्याख्यानम्।

सप्ताष्टनवभिर्द्वयोः,

प्राप्तिरिति वाक्यशेषः। प्रत्येकमिति विस्तरः। सकृदागामिफलस्य सप्त-

---

1 Mss. add इति.

2 Mss. तत्संयुक्तं

3 Mss. चावश्यं समागम्या°

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भिरष्टाभिर्नवभिर्वा प्राप्तिः। एवमनागामिफलस्य। तत्प्रतिपादयन्नाह। सकृदागामिफलं तावद्यद्यानुपूर्वकः प्राप्नोति। स च लौकिकेन मार्गेणेति। लौकिको मार्गः शान्ताद्युदाराद्याकारः।

शान्ताद्युदाराद्याकारा उत्तराधरगोचराः[1]

इति वचनात्। तेनोत्तरां भूमिं शान्ततः प्रणीततो निःसरणतश्चेह योगी पश्यति। अधरामौदारिकतो दुःखिलतः स्थूलभित्तिकतश्च पश्यति। स चायं चतुःप्रकारो वर्ण्यते। प्रयोगमार्ग आनन्तर्यमार्गो विमुक्तिमार्गो विशेषमार्गश्च। तत्र प्रयोगमार्गो यत आनन्तर्यमार्ग उत्पद्यते। स पुनर्येन क्लेशान्प्रजहाति। विमुक्तिमार्गोऽप्यानन्तर्यमार्गादनन्तरमुत्पद्यते। क्लेशप्रहाणप्राप्तेराधारकः। विशेषमार्गस्तत उर्ध्वं विशिष्टो मार्गः। तेन मार्गेण नवप्रकाराः क्लेशाः प्रहेयाः। अधिमात्राधिमात्रोऽधिमात्रमध्योऽधिमात्रमृदुः मध्याधिमात्रो मध्यमध्यो मध्यमृदुः मृद्वधिमात्रो मृदुमध्यो मृदुमृदुश्चेति। तद्यदि पृथग्जनः प्रजहाति दर्शनभावनाहेयान् क्लेशान्मिश्रीकृत्य। तेन मृदुमध्याधिमात्रादिभेदेन नवधा कृत्वा प्रजहाति। मृदुमृदुभ्यामानन्तर्यविमुक्तिमार्गाभ्यामधिमात्राधिमात्रं क्लेशप्रकारं प्रजहाति। एवं यावदधिमात्राधिमात्राभ्यामानन्तर्यविमुक्तिमार्गाभ्यां मृदुमृदुक्लेशप्रकारं प्रजहाति। आर्यस्तु भावनाहेयानेव क्लेशांस्तथैव नवधा कृत्वा प्रजहाति। दर्शनहेयानां दर्शनमार्गेण प्राक्प्रहीणत्वात्। लोकोत्तरस्तु भावनामार्गस्तथैव षोडशाकारोऽनित्याद्याकारभेदात्। स चापि तथैव प्रयोगादिमार्गभेदाच्चतुर्भेदः। इहापि मृदुमृदुभ्यामानन्तर्यविमुक्तमार्गाभ्यामधिमात्राधिमात्रं क्लेशप्रकारं प्रजहाति। एवं यावदधिमात्राधिमात्राभ्यामानन्तर्यविमुक्तिमार्गाभ्यां मृदुमृदुक्लेशप्रकारं प्रजहाति। एष लौकिकलोकोत्तरयोर्मार्गयोर्दिङ्मात्रनिर्देशः। तत्सकृदागामिफलमानुपूर्वकेण वा लभ्येत भूयोवीतरागेण वा। तत्रानुपूर्विको यः स्रोतआपत्तिफलं प्राप्य क्रमात् सकृदागामिफलं प्राप्नोति। कश्चासौ। यः सकलबन्धन एकप्रकाराद्युपलिखितो वा यदि न षट्प्रकारोपलिखितो नियाममवक्रामति। षोडशे चित्तक्षणे स स्रोतआपन्नो भवति। स भावनाहेयस्यैकस्य यावत्षट्स्यैव वा प्रकारस्य प्रहाणाय शमथचरितत्वाल्लौकिकमपि मार्गमुत्पादयति। स षट्प्रकारप्रहाणे[2] सकृदागामिफलं प्राप्नोति।

---

1 Kārikā, VI. 50.

2 B. & To. षट्प्रकारे प्रहीणे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्य फलस्य सप्तभिरिन्द्रियैः प्राप्तिः। श्रद्धादिभिः पञ्चभिर्मनइन्द्रियेणोपेक्षेन्द्रियेण च सप्तमेनानागम्यनिश्रयत्वात्[1]। **अथ लोकोत्तरेण मार्गेण तस्याष्टाभिरिन्द्रियैः प्राप्तिः।** तैरेवाज्ञेन्द्रियेण चाष्टमेन। तान्येव हि श्रद्धादीनि सप्तेन्द्रियाण्याज्ञेन्द्रियाख्यां लभन्ते। अनास्रवत्वात्। **अथ भूयोवीतराग इति।** यो लौकिकेन मार्गेण पृथग्जनावस्थायां षट्प्रकारोपलिखितोऽभूत्। स भूयोवीतराग इत्युच्यते। भूयसा प्रकारेण वीतराग इति कृत्वा। स यदि सकृदागामिफलं प्राप्नोति। कथं स[2] प्राप्नोति इति। अभिसमयक्रमेण पूर्वोक्तेन मार्गेऽन्वयज्ञानक्षान्त्यवस्थायां[3] प्राप्नोति। **तस्य नवभिर्यथैव स्रोतआपत्तिफलस्य।** श्रद्धादिभिराज्ञातावीन्द्रियवर्ज्यैः। मनउपेक्षेन्द्रियाभ्यां चेति पूर्ववद्व्याख्यानम्। अयं हि स्रोतआपत्तिफलमप्राप्यैव षोडशे क्षणे सकृदागामी भवति। **अनागामिफलं यद्यानुपूर्वकः प्राप्नोतीति।** इहानुपूर्वको यः स्रोतआपत्तिफलं सकृदागामिफलं च प्राप्यानागामिफलं प्राप्नोति। यो वा भूयोवीतरागो भूत्वा स्रोतआपत्तिफलमलब्ध्वैव सकृदागामिफलमेव च लब्ध्वानागामिफलं प्राप्नोति। **स च यदि लौकिकेन मार्गेण प्राप्नोति। तस्य सप्तभिरिन्द्रियैः प्राप्तिः।** यथा सकृदागामिफलस्यानुपूर्विकीयस्येत्यभिप्रेतम्। श्रद्धादिभिः पञ्चभिर्मनउपेक्षेन्द्रियाभ्यां चेत्यर्थः। **अथ लोकोत्तरेण मार्गेण तस्याष्टाभिस्तथैवेति।** यथा सकृदागामिफलस्यैवाष्टाभिरित्यर्थः। आज्ञेन्द्रियमष्टमं भवतीति। **अथ वीतराग इति।** कामधातुमात्रवीतरागो लौकिकेन मार्गेण नवमे प्रकारे प्रहीणे। प्रथमादपि वा ध्यानाद्यावदाकिंचन्यादपि वा वीतरागो योऽनागामिफलं प्राप्नोति। **तस्य नवभिः प्राप्तिः। यथा स्रोतआपत्तिफलस्य।** स्रोतआपत्तिफलस्य हि दर्शनमार्गेण प्राप्तिः। अस्य च दर्शनमार्गेणैव प्राप्तिरिति तुल्यत्वम्। **अयं तु विशेषः। सुखसौमनस्योपेक्षेन्द्रियाणामन्यतमं भवति निश्रयविशेषादिति।** यदि तृतीयं ध्यानं निश्रित्य[4] नियाममवक्रामति। सुखेन्द्रियं तत्र भवति। अथ प्रथमद्वितीये ध्याने निश्रित्य सौमनस्येन्द्रियं तत्र भवति। अथानागम्यध्यानान्तरचतुर्थध्यानानामन्यतमं निश्रित्योपेक्षेन्द्रियं तत्र भवतीति। **यदाप्ययमानुपूर्विक** इति विस्तरः। यदाप्ययमधिगतपूर्वफल आनुपूर्विकस्तीक्ष्णेन्द्रियः। स **नवमे विमुक्तिमार्गे ध्यानं प्रविशति मौलं लौकिकेन मार्गेण।**

---

1 Mss. ०निःश्रयत्वात्, To. निःश्रयत्वात् 2 Mss. च

3 B. ०ज्ञानावस्थायां 4 Mss. निसृत्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदाप्यष्टाभिरिन्द्रियैरनागामिफलं प्राप्नोति । तत्र मौलध्यानसंगृहीतो विमुक्तिमार्गो भवति । तत्र च सौमनस्येन्द्रियम् । आनन्तर्यमार्गस्त्वनागम्यसंगृहीत एव । यदि न प्रविशति तत्र चोपेक्षेन्द्रियमेव नान्यथा । तस्य प्राप्तिरष्टाभिः श्रद्धादिभिः पञ्चभिर्मनउपेक्षासौमनस्येन्द्रियैश्चेति । उभाभ्यां च तस्य प्राप्तिरिति । आनन्तर्यविमुक्तिमार्गाभ्यां चौरनिष्कासनकपाटपिधानवदिति व्याख्यातमेतत् । **अथ लोकोत्तरेण प्रविशतीति** । स एवानुपूर्विकस्तीक्ष्णेन्द्रियो वेदितव्योऽधिकारानुवृत्तेः । **तस्य नवभिरिन्द्रियैः प्राप्तिः** । तैरेवेदानीमुक्तै रिन्द्रियैः, **आज्ञेन्द्रियेण च नवमेन** । तान्येव हीन्द्रियाण्यनास्रवत्वादाज्ञेन्द्रियाख्यां लभन्ते ।

इदमिह चोद्यते । कस्मादानुपूर्विक एवमुक्तो न पुनर्वीतरागपूर्वी । न हि वीतरागपूर्व्यनागम्यनिश्रयेण दर्शनमार्गमुत्पाद्य षोडशे चित्तक्षणे मौलं प्रथमं ध्यानं प्रविशति । तत्राधिगतेऽनादरात् । आनुपूर्विको हि मौलध्यानार्थी तस्यानधिगतपूर्वत्वात् । तस्मादस्ति सम्भवो यदसौ मौलमेव प्रविशति । वीतरागपूर्वी तु चतुःसत्यदर्शनं प्रति [1]कृतादरः, न ध्यानं प्रति, इति न तत्र षोडशे चित्तक्षणे मौलं ध्यानं प्रविशतीत्यभिप्रायः ॥१६॥

नवाप्तिरन्त्यफलयोः[2]

इत्युक्तम्, तद्विरोधयति **यत्तर्हि अभिधर्म उक्तम्**, ज्ञानप्रस्थाने । **कतिभिरिन्द्रियैरर्हत्त्वं प्राप्नोतीति**, **आह**,

[अर्हत्त्वस्यैकादशभिरुक्तमेकस्य सम्भवात् ।
उपेक्षाजीवितमनोयुक्तोऽवश्यं त्रयान्वितः ॥१७॥]

एकादशभिः

इति । तत्कथं न विरुध्यत इत्यभिप्रायः ।

एकस्य सम्भवात्

इति । कस्यचिदेवैकस्य पुद्गलस्य सम्भवः, न सर्वस्य सम्भवः । यो हि मृद्विन्द्रियः **परिहाय परिहाय सुखसौमनस्योपेक्षाभिः** निश्रयविशेषात्पार्यायिकीभि**रर्हत्त्वं प्राप्नुयात्** तं प्रत्येवमुक्तम् । **एकादशभिरिति** । **न तु सम्भवोऽस्ति** सुखसौमनस्योपेक्षाणां एकस्मिन्काले समवधानमित्यर्थः । चित्तचैत्तानामेकैकद्रव्योत्पत्तेः, यो हि कश्चिन्मृद्विन्द्रियः पुद्गलोऽनागम्यं वोपेक्षेन्द्रियनिश्रयं निश्रित्यार्हत्त्वं

1 C. has क्रतां corrected into हृतां ; V हृता०   2 Kārikā, II. 16.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्राप्नुयात्। तस्य तत्प्राप्तिरुपेक्षेन्द्रियेण। ततः पुनरपि परिहीयते। ततः प्रथमं द्वितीयं वा ध्यानं निश्रित्य पुनरर्हत्त्वं प्राप्नुयात्। तस्य तत्प्राप्तिः सौमनस्येन्द्रियेण। ततः पुनरपि परिहीयते। ततः स तृतीयं ध्यानं निश्रित्य पुनरर्हत्त्वं प्राप्नुयात्। तस्य तत्प्राप्तिः सुखेन्द्रियेण। इति प्रत्येकं तत्र फलप्राप्ताववश्यं नवैवेन्द्रियाणि व्याप्रियन्ते। श्रद्धादीनि पञ्च मनआज्ञाज्ञातावीन्द्रियाणि सुखसौमनस्योपेक्षेन्द्रियाणां चान्यतमदिति। पुनः पुनः प्राप्तेस्तदेकादशभिरित्युक्तम्। **कथमनागामिनोऽप्येष प्रसङ्गो न भवतीति।** कस्मात्तत्र शास्त्रेऽर्हत्त्वफलमेवैकादशभिः प्राप्नोतीत्युक्तम्। न तूक्तमनागामिफलमपीति। **न ह्यसौ परिहीणः कदाचित्सुखेन्द्रियेण प्राप्नोतीति।** असावनागामी तृतीयध्यानोर्ध्वभूमिलाभात् परिहीणो भवति। ऊर्ध्वभूमेरेव परिहीणो भवति। नासावनागामिफलात्परिहीण इत्युच्यते। एवं यावद्द्वितीयध्यानात्। यदा तु प्रथमात्परिहीणो भवति तदानागामिफलात्परिहीण इत्युच्यते। पञ्चावरभागीयप्रहाणाद्धि अनागामिफलं व्यवस्थाप्यते। यदा च स कामवैराग्यात्परिहीणस्तदा तृतीयं ध्यानमस्य नास्ति। तत्कथं सुखेन्द्रियेणानागामिफलं प्राप्नुयात्। तत आह। न ह्यसौ परिहीणः कदाचित्सुखेन्द्रियेण प्राप्नोतीति। किम्। सौमनस्येन्द्रियेण प्राप्नुयात्। यत एवं सुखेन्द्रियस्यैव प्रतिषेधः प्राप्नुयाद् यदि नवमे विमुक्तिमार्गे मौलं ध्यानं प्रविशेत्। नैतदस्ति। यो हि परिहीणो भवेत् स मृद्विन्द्रियः। यश्च मृद्विन्द्रियः स न शक्नोति नवमे विमुक्तिमार्गे मौलं ध्यानं प्रवेष्टुम्। तीक्ष्णेन्द्रियस्तु शक्नोति। इन्द्रियसञ्चारस्यादुष्करत्वात्[1]। अस्त्येतत्[2]। किं तु यद्यसौ मृद्विन्द्रिय [3]आनुपूर्विकोऽनागामिफलं प्राप्य ततश्च परिहीणो भूत्वा इन्द्रियसञ्चारं कुर्यात्। इन्द्रियसञ्चारेण च तीक्ष्णेन्द्रियो भूत्वा पूर्वकेणैव क्रमेणानागामिफलं प्राप्नुवन् यदि नवमे विमुक्तिमार्गे मौलं प्रविशेत्। तस्य तदानागामिफलप्राप्तिरष्टाभिर्नवभिर्वा भवति श्रद्धादिभिः पञ्चभिर्मनइन्द्रियेणोपेक्षेन्द्रियेण चानन्तर्यमार्गसंगृहीतेन सौमनस्येन्द्रियेण च मौलध्यानविमुक्तिमार्गसंगृहीतेनेति। लोकोत्तरेण चेन्मौलं ध्यानं प्रविशेत्। एभिश्चाष्टाभिराज्ञेन्द्रियेण च नवमेनेत्यवगन्तव्यम्। तस्मात् सूक्तं न ह्यसौ परिहीणः कदाचित्सुखेन्द्रियेण प्राप्नोतीति। वीतरागपूर्वी तर्ह्येकादशभिस्तत्प्राप्नुयात्। कथम्। यो मृद्विन्द्रियः

1 B. & To. following Tib. सञ्चारस्य दुष्करत्वात् 2 B. सत्यमेतत्
3 C. & V. आनुपूर्वको°

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुद्गलस्तृतीयध्यानलाभी तृतीयं ध्यानं निश्रित्य नियाममवक्रामेत् । स षोडशे चित्तक्षणे अनागामी भवति । सा तत्फलप्राप्तिः सुखेन्द्रियेण श्रद्धादिभिः पञ्चभिर्मनआज्ञास्यामीन्द्रियाज्ञेन्द्रियैश्चेति । स ततोऽनागामिफलात्परिहीण इन्द्रियोत्तापनेन तीक्ष्णेन्द्रियमात्मानं कृत्वा अनागम्यनिश्रयेणैवानागामिफलं प्राप्नुवन्नवमे विमुक्तिमार्गे मौलं प्रविशेत् । तस्य तत्फलप्राप्तिः पूर्ववदुपेक्षेन्द्रियेण सौमनस्येन्द्रियेण च श्रद्धादिभिश्चापि पञ्चभिर्मनइन्द्रियेण चाष्टमेन लोकोत्तरमार्गत्वादाज्ञेन्द्रियेणापि नवमेन । इत्येवं द्वयोः कालयोरेकादशभिरिन्द्रियैः स पुद्गलस्तदनागामिफलं प्राप्नुयादिति । ततस्तत्प्रतिषेधार्थमिदमाह । **न च वीतरागपूर्वी परिहीयते । तद्वैराग्यस्य द्विमार्गप्रापणादिति ।** न च कामवीतरागः केनचिन्निश्रयेण नियाममवक्रान्तः परिहीयते । कस्मात् । तद्वैराग्यस्य कामवैराग्यस्य । द्विमार्गप्रापणात् लौकिकलोकोत्तरमार्गप्रापणात् । इह फलं द्विविधम् । संस्कृतमसंस्कृतं च ।

संस्कृतासंस्कृतं फलम्[1]

इति वचनात् । तत्र यदसंस्कृतं विसंयोगलक्षणमनागामिफलम् । तत्पूर्वं लौकिकेन मार्गेण प्राप्तम् । नियामावक्रान्तौ च लोकोत्तरेण मार्गेण पुनस्तत्प्राप्तम् । द्विविधा हि तस्य प्राप्तिः । लौकिकी लोकोत्तरा च । तस्मात्स्थिरं तद्वैराग्यम् । तस्मादतो न परिहीयते ।

ननु च

फलाद्धानिर्न पूर्वकात्[2]

दर्शनहेयानामवस्तुकत्वादित्येतदपि कारणान्तरमस्ति । [3]कस्मात्तदिह नोक्तमिति । एतदपि वक्तव्यम् । अपि खलु पर एवं ब्रूयात् । मा भूद्दर्शनहेयक्लेशवैराग्यपरिहाणिः । भावनाहेयक्लेशमात्रवैराग्यपरिहाणिस्तु कस्मादस्य[4] परिहीणकस्य न भवेत् । पञ्चावरभागीयप्रहाणाद्धि अनागामिफलं भवति । तत्र च सत्कायदृष्टिः शीलव्रतपरामर्शो विचिकित्सा च दर्शनहेयाः । कामच्छन्दो व्यापादश्च भावनाहेयौ । तयोश्च तस्य वीतरागपूर्विणोऽभिसमयान्ते षोडशे चित्तक्षणे प्रहाणस्य लौकिकेन मार्गेण प्राप्तस्य तत्सामर्थ्यात् पुनरनास्रवा प्राप्ति-

---

1 Kārikā, VI. 51.
2 Kārikā, VI. 58.
3 Mss. तस्मा०
4 Mss. कस्मादस्या

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवति। अनास्रवगोत्राणां लब्धत्वात्। अनास्रवं हि नवमविमुक्तिमार्गस्वभावं संस्कृतमनागामिफलमसंस्कृतं च कामच्छन्दादिप्रहाणं तस्यामवस्थायां लभ्यते। तस्मादिदमेव कारणमुक्तम्। [1]आर्येण तद्वैराग्यस्य द्विमार्गप्रापणादिति। कामच्छन्दादिप्रहाणस्य द्विमार्गप्रापणादित्यर्थः।

उपेक्षाजीवितमनोयुक्तोऽवश्यं त्रयान्वितः

इति। उपेक्षया जीवितेन मनसा वा युक्तोऽन्वितोऽवश्यं त्रयेण समन्वागतः। तेनैवोपेक्षाजीवितमनःस्वभावेन। न ह्येषामन्योन्येन विना समन्वागम इति। यदैकस्य समन्वागमस्तदेतरयोरपि समन्वागमः। तेनैषां समन्वागमव्यवस्थानं क्रियते। चक्षुरादीनां तु न क्रियते। तस्मादाह। चक्षुःश्रोत्रघ्राणजिह्वेन्द्रियैरिति विस्तरः। चक्षुःश्रोत्रघ्राणजिह्वेन्द्रियैरारूप्यधातूपपन्नो न समन्वागत इत्यत्र कायेन्द्रियाग्रहणम्। कामधातौ च येनाप्रतिलब्धविहीनानीत्यस्योपचयार्थस्य चक्षुरादिष्वेव सम्भवान्न कायेन्द्रिये। अन्यथा हि रूपिभिरिन्द्रियैरारूप्योपपन्नो न समन्वागत इत्येवोच्यते। अप्रतिलब्धानि कललाद्यवस्थायाम्। विहीनानि लब्धविनाशादन्धत्वाद्यवस्थायां[2] क्रममरणे वा। पृथग्जना न समन्वागता इति विशेषणम्। आर्यस्यावश्यं समन्वागतत्वात्। न हि तस्य भूमिसञ्चारेण अनास्रवसुखादित्यागः। दौर्मनस्येन कामवीतराग इति। इहस्थो धात्वन्तरस्थो वा पृथग्जनो वार्यो वा न समन्वागतः[3]। पृथग्जनः फलस्था इति। फलस्थाः स्रोतआपन्नादयः। अभिसमयान्ते विहीनत्वात्। तेनानाज्ञातमाज्ञास्यामीन्द्रियेणासमन्वागताः। आज्ञेन्द्रियेण दर्शनमार्गस्था अप्राप्तत्वादसमन्वागताः। अशैक्षमार्गस्थाः फलप्राप्तौ विहीनत्वादसमन्वागताः। अप्रतिषिद्धास्ववस्थासु यथोक्तसमन्वागमो[4] वेदितव्य इति। या अप्रतिषिद्धा अवस्थाश्चक्षुरादिभिरिन्द्रियैः समन्वागमं प्रति। तास्ववस्थासु यद्यदिन्द्रियमुक्तम्। तैस्तैः समन्वागतो वेदितव्य इत्यर्थः। तद्यथा कामधाताव-प्रतिलब्धविहीनावस्थां हित्वा चक्षुरादिभिर्जिह्वान्तैः समन्वागतः। कायेन्द्रियेण कामरूपधातूपपन्नः समन्वागत इत्यादि ॥१७॥

---

1 Mss. आचार्येण.

2 Mss. ०दर्थत्वाद्यवस्थायां

3 A & C समन्वागः

4 A & C ०गतो : V drops the whole line.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[चतुर्भिः सुखकायाभ्यां पञ्चभिश्चक्षुरादिमान् ।
सौमनस्यी च दुःखी तु सप्तभिः स्त्रीन्द्रियादिमान् ॥१८॥
अष्टाभिरेकादशभिराज्ञाज्ञातावितान्वयः ।
आज्ञास्यामीन्द्रियोपेतास्त्रयोदशभिरन्वितः ॥१९॥]

चतुर्भिः सुखकायाभ्याम्

इति । युक्त इति वर्तते । अवश्यमिति च । संख्यानुक्रमविवक्षायां तु तदनन्तरं तैरित्येवानन्तरं सुखादिग्रहणम् । सुखेन्द्रियेण समन्वागत इति । चतुर्थध्यानारूप्यधातूपपन्नं पृथग्जनं मुक्त्वा सर्वः सुखेन्द्रियेण समन्वागतः । तस्यान्यैर्नावश्यं समन्वागतः । चक्षुरादिभिर्जिह्वेन्द्रियान्तैरारूप्यधातौ कामधातौ चाप्रतिलब्धविहीनावस्थायामसमन्वागमः । कायेन्द्रियेण चारूप्यधातौ । स्त्रीपुरुषेन्द्रियाभ्यां रूपारूप्यधात्वोश्च । कामधातौ चालब्धविहीनावस्थायाम् । दुःखेन्द्रियेण रूपारूप्यधात्वोः । सौमनस्येन्द्रियेण पृथग्जनस्तृतीयध्यानोपपन्नः । दौर्मनस्येन्द्रियेण कामवीतरागावस्थायाम् । श्रद्धादिभिः पञ्चभिः समुच्छिन्नकुशलमूलावस्थायाम् । आज्ञास्यामीन्द्रियेण पृथग्जनफलस्थावस्थायाम् । आज्ञेन्द्रियेण पृथग्जनदर्शनमार्गस्थाशैक्षावस्थायाम् । आज्ञातावीन्द्रियेण पृथग्जनशैक्षावस्थायामसमन्वागत इति । **यः कायेन्द्रियेण सोऽपि चतुर्भिरिति** । कामधातूपपन्नः कायेन्द्रियेण समन्वागतः । तस्य नान्यैरवश्यं समन्वागमः । चक्षुरादिभिः कामधातावलब्धविहीनावस्थायामसमन्वागमः । स्त्रीपुरुषेन्द्रियाभ्यामेतस्यामेवावस्थायां रूपधातौ चासमन्वागमः । दुःखेन चास्मिन्नेव । सुखेन च पृथग्जनस्य चतुर्थध्यानोपपत्तावसमन्वागमः । सौमनस्येन पृथग्जनस्तृतीयचतुर्थध्यानोपपन्नोऽसमन्वागतः । दौर्मनस्येन श्रद्धादिभिश्चान्यैः पूर्ववदसमन्वागमो वक्तव्यः ।

पञ्चभिश्चक्षुरादिमान्

इति । चक्षुःश्रोत्रघ्राणजिह्वावानित्यर्थः । **तेन चेति** । तेन चक्षुषा । चक्षुषि सत्यवश्यं कायेन्द्रियम् । न तु श्रोत्रादीनि । कामधातावलब्धविहीनत्वसम्भवात् । स्त्रीपुरुषेन्द्रियादीनां पूर्ववद्व्यभिचारो वक्तव्यः । **एवं श्रोत्रघ्राणजिह्वेन्द्रियैरिति** । यः श्रोत्रेन्द्रियेण सोऽवश्यं पञ्चभिरुपेक्षाजीवितमनःकायैस्तेन च । इत्येवं सर्वं नेयम् ।

सौमनस्यी च ।

किम् ? पञ्चभिरवश्यं समन्वागत इत्यधिकृतम् । चक्षुरादिष्वेव सौमनस्यं कस्मान्न प्रक्षिप्तम् ? अन्यस्थानपाठात् । तथा ह्यादिशब्देन प्रक्षेप आकुलः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्यात्। द्वितीयध्यानजस्तृतीयालाभी कतमेन सुखेन्द्रियेण समन्वागत इति। सुखेन्द्रियं कामधातौ पञ्चविज्ञानकायिकं प्रथमे च ध्याने त्रिविज्ञानकायिकमस्ति। तृतीये तु ध्याने मानसम्। अतो द्वितीयध्यानजो नाधरेण सुखेन्द्रियेण समन्वागतः। तस्य भूमिसञ्चारेण त्यक्तत्वात्। न तृतीयध्यानभूमिकेन तस्यालाभित्वादिति मत्वा चोदयति। कतमेन सुखेन्द्रियेण समन्वागत इति। आह। क्लिष्टेन तृतीयध्यानभूमिकेनेति। सर्वे ह्यधरभूम्युपपन्नाः सत्त्वा उपरिभूमिकेनाप्रहीणेन क्लिष्टेन समन्वागता इति सिद्धान्तः। शेषेन्द्रियव्यभिचारः पूर्ववद्वक्तव्यः।

दुःखी तु सप्तभिः

इति। कामधातूपपन्नो ह्येषः। तस्मादवश्यं कायेन्द्रियेण चतुर्भिश्च वेदनेन्द्रियैरिति दौर्मनस्यवर्ज्यैः। तद्वीतरागावस्थायां दौर्मनस्यं व्यभिचरति। मनोजीवितेन्द्रिये च स्त इत्यवश्यं सप्तभिरिन्द्रियैः समन्वागतः। शेषेन्द्रियव्यभिचारस्तु पूर्ववद्वाच्यः।

स्त्रीन्द्रियादिमान्

अष्टाभिः[1]

इति। स्त्रीपुरुषदौर्मनस्यश्रद्धावीर्यस्मृतिसमाधिप्रज्ञेन्द्रियवानित्यर्थः। जीवितमनःसुखदुःखसौमनस्योपेक्षेन्द्रियाणामुक्तत्वात्। आज्ञातावीन्द्रियादीनां च त्रयाणां वक्ष्यमाणत्वात्। एषामेवाष्टानामिन्द्रियाणां ग्रहणं भवति। यः स्त्रीन्द्रियेण समन्वागत इति। स कामधातूपपन्न एव स्त्रीन्द्रियवत्त्वात्[2]। अतः सोऽवश्यमष्टाभिरिन्द्रियैः समन्वागतः। कतमैरित्याह। तैश्च सप्तभिः स्त्रीन्द्रियेण चेति। कायजीवितमनोभिश्चतुर्भिश्च वेदनेन्द्रियैरिति सप्तभिः। स्त्रीन्द्रियेण चाष्टमेन। शेषैरनियमः। यथोक्तं चक्षुरादीनां वैकल्यसम्भवादित्यादिभिः कारणैः। स्त्रीन्द्रियवत्[3] पुरुषेन्द्रियवानपि वक्तव्यः। दौर्मनस्यवानपि कामोपपन्नः कामावीतराग इति तथैव तैः सप्तभिर्दौर्मनस्येन च। श्रद्धावानपि त्रैधातुकः सत्त्व इति तैः पञ्चभिः श्रद्धादिभिरविनाभाविभिरुपेक्षाजीवितमनोभिश्च समन्वागतः। शेषैरनियमः पूर्ववत्। यथा श्रद्धावानेवं यावत्प्रज्ञावान्।

---

1 B. & To. अष्टादिभिः, but C has दि of अष्टादिभिः scratched; see also Kārikā.

2 A स्त्रीन्द्रियत्वात्

3 A स्त्रीन्द्रिये च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आज्ञाते इन्द्रियमाज्ञातेन्द्रियमिति । आज्ञात एवेन्द्रियमाज्ञातेन्द्रियम् । निरवशेषाज्ञात इन्द्रियमित्यर्थः । आज्ञेन्द्रियमपि ह्याज्ञात इन्द्रियम् । न तु निरवशेषे । सावशेषत्वात् प्रहेयस्य । अथवा [1]पदैकदेशग्रहणेन आज्ञातावी पुद्गल आज्ञात इत्युच्यते तस्येन्द्रियमाज्ञातेन्द्रियमिति । य आज्ञेन्द्रियेण सोऽवश्यमेकादशभिरिति । आज्ञेन्द्रियवान् फलस्थः शैक्षस्त्रिष्वपि धातुषु भवति । स[2] चतुर्थध्यानारूप्योपपन्नः कथं सुखसौमनस्येन्द्रियाभ्यां समन्वागतः । यस्मादार्यः कामवैराग्येऽवश्यं सौमनस्येन्द्रियं प्रतिलभते । द्वितीयध्यानवैराग्ये च सुखेन्द्रियम् । ते च भूमिसञ्चारेऽपि न त्यज्येते[3] । तथा हि वक्ष्यति ।

भूमिसञ्चारहानिभ्यां ध्यानाप्तं त्यज्यते शुभम् ।
तथारूप्याप्तमार्यं तु फलाप्त्युत्तप्तिहानिभिः ॥[4]

इति । फलप्राप्तीन्द्रियोत्तापनेऽपि यद्यपि ते प्रतिपन्नकमार्गमृद्विन्द्रियमार्गसंगृहीते त्यज्येते[5] तथाप्यपरे फलस्थतीक्ष्णेन्द्रियमार्गस्वभावे लभ्येते[6] । तस्मात्ताभ्यां सुखसौमनस्याभ्यां भूमिसञ्चारेऽप्यपरित्यक्ताभ्यां चतुर्थध्यानारूप्योपपन्नोऽप्यार्यः समन्वागत एव भवति । शेषैः पूर्ववदनियमः ।

आज्ञास्यामीन्द्रियोपेतस्त्रयोदशभिरन्वितः

इति विस्तरः । आज्ञास्यामीन्द्रियसमन्वागतः कामावचरः सत्त्वः कामधातावेवाज्ञास्यामीन्द्रियोत्पादनात् ।

असंवेगादिह त्रिधा तत्र निष्ठेति [7]वाचनात्[8]

इति । तस्मादवश्यं कायेन्द्रियमस्यास्ति । चतस्रो वेदना दौर्मनस्यवर्ज्याः । तस्य वीतरागावस्थायां व्यभिचारात् । तत्रावश्यमिति वर्तते । त्रयोदशभिरेभिरिन्द्रियैरवश्यमेव समन्वागत इत्यवधार्यते । न तु त्रयोदशभिरेवेति । शेषैरनियमः । अन्धादिष्वपि दर्शनमार्गसम्भवात् । स्त्रीपुरुषेन्द्रिययोर्वैकल्ये कथं दर्शनमार्गोत्पत्तिः । स्त्रीपुरुषेन्द्रियवियुक्तविकलानां हि संवरफलप्राप्तिवैराग्याणि न सन्तीति । केचित्तावदाहुः । प्रतिलब्धसंवराणां फलप्राप्तिर्भवति । द्विव्यञ्जनो-

---

1 Mss. यदैक०
2 V adds तु.
3 Mss. त्यज्यते
4 Kārikā, IV. 40.
5 Mss. त्यज्यते
6 Mss. लभ्यते
7 Mss. वच०
8 Kārikā, VI. 55.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दयाद्धि[1] प्रातिमोक्षसंवरत्यागो भवति । न तद्वैकल्यात् । क्रममरणाद्वा स्त्रीपुरुषेन्द्रियनिरोधे[2]ऽप्यभ्यस्तनिर्वेधभागीयस्य दर्शनमार्गोत्पत्तिर्भवति । अपरे पुनराहुः । पुद्गलसामान्यमिहाधिक्रियते नैकस्यैवेन्द्रियैरावश्यकसमन्वागमव्यभिचारावुच्येते[3] । कथम् ।

उपेक्षाजीवितमनोयुक्तोऽवश्यं त्रयान्वितः[4]

इति यावत् । उपेक्षासमन्वागतः पुद्गलः कामधातूपपन्नो वा [5]यावद्भवाग्रोपपन्नो वा सर्वोऽसाववश्यं त्रयेण समन्वागतः । चक्षुरादिव्यभिचारस्तु सम्भवतो न सर्वत्र । कश्चिदेव हि रूपिभिरिन्द्रियैरसमन्वागतो य आरूप्यधातूपपन्नः । न तु यो रूपधातूपपन्नः । विस्तरेण यावत्कश्चिदेव श्रद्धादिभिरसमन्वागतो यः समुच्छिन्नकुशलमूलः । न तु स एवारूप्यधातूपपन्नः । तथेहापि यावानाज्ञास्यामीन्द्रियोपेतः सर्वोऽसावेभिर्यथोक्तैस्त्रयोदशभिरिन्द्रियैरवश्यं समन्वागतः । व्यभिचारस्तु सम्भवतः कस्यचिदेव । तथा हि कस्यचिच्चक्षुरिन्द्रियेणासमन्वागमो योऽन्धः । कस्यचिच्छ्रोत्रेन्द्रियेण यो बधिरः । एवं घ्राणादिभिः । यावत् कस्यचित्स्त्रीन्द्रियेण यः पुरुषः । कस्यचित्पुरुषेन्द्रियेण या स्त्री । कस्यचिद्दौर्मनस्येन यो वीतरागः । इत्येवमेवावगन्तव्यम् ॥१६॥

[कायविज्जीवितमनः सर्वाल्पैर्निःशुभोऽष्टभिः ।
[6]अपि बालस्तथारूप्य[6] उपेक्षायुर्मनःशुभैः ॥२०॥]

सर्वाल्पैर्निःशुभोऽष्टभिः[7]

इति । एकः पुद्गलः सर्वेभ्योऽल्पैर्यैः समन्वागतः । स कियद्भिरल्पैः समन्वागत इत्याह । **निःशुभो यः समुच्छिन्नकुशलमूलः** । स च कामधातावेव ।

छिनत्ति स्त्रीपुमान् दृष्टिचरितः[8]

इति । कामवैराग्यं वास्य[9] न संभवति । तस्मादस्य पञ्चापि वेदनेन्द्रियाणि सन्ति । **कायेन्द्रियं** च **जीवितमनसी** च त्त एव सर्वत्र । चक्षुरादीनि तु न सन्ति । क्रममरणावस्थायामन्धत्वाद्यवस्थायां च तेषामभावात् । वेदयत इति

---

1 Mss. व्यञ्जनोदयाद्धि

2 B. To. & V स्त्रीपुरुषेन्द्रिये निरोधे

3 Mss. ०वुच्यते.

4 Kārikā, II. 17.

5 A यावत्तद्भवा०

6...6 Poussin आरूप्येषु तथा बाल

7 Mss. B. & To. अष्टाभिः

8 Kārikā, IV. 80.

9 B. & To. following Tib. चात

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृत्वेति कर्तरि क्विप् । वेदनं वा विदिति भावसाधन औणादिकः क्विप् । ज्ञापकं दर्शयति यथा संपदनं संपदिति ।

तथारूप्ये

इति । संख्यामात्रं तथाशब्देन संबध्यते । एकान्तकुशलत्वाच्छ्रद्धादीनि शुभग्रहणेन गृह्यन्त इति । शुभान्येव नाकुशलाव्याकृतानि यानि तानि शुभानीत्यर्थः । आज्ञास्यामीन्द्रियादीनामपि ग्रहणप्रसङ्ग इति । तान्यप्येकान्तकुशलानि । तस्मात्तद्ग्रहणप्रसङ्ग इति । न । अष्टाधिकारादिति ।

निःशुभोऽष्टभिः

इत्येतस्मात् ।

उपेक्षायुर्मनःशुभैः

अष्टाभिरित्याज्ञास्यामीन्द्रियादीनां निरासः कृतो भवति । अष्टशब्देन कृतावधित्वात् । बालाधिकाराच्चेति । बालोऽत्राधिक्रियते ।

बालस्तथारूप्ये

इति वचनात् । आज्ञास्यामीन्द्रियाद्यभावे च पृथग्जनो भवति । पृथग्जनत्वं कतमत् । आर्यधर्माणामलाभ इति वचनात् । तस्मात्तेष्वनास्रवेष्वप्रसङ्ग इति ॥२०॥

[सर्वबहुभिरेकान्नविंशत्यामलवर्जितैः ।
× × × × ॥२१॥][1]

द्विव्यञ्जनो यः समग्रेन्द्रिय इति । द्विव्यञ्जनोऽपि हि समग्रचक्षुरादिक एवमेकान्नविंशत्या[2] समन्वागतो नान्यथा । आज्ञातावीन्द्रियं द्वयोश्चान्यतरदिति । [3]रागित्वादाज्ञातावीन्द्रियमेकान्तेन[4] वर्जयितव्यम् । आर्यस्य चाज्ञास्यामीन्द्रियाज्ञेन्द्रियाभ्यामवश्यं पर्यायेण समन्वागमात् । यदाज्ञास्यामीन्द्रियं न तदाज्ञेन्द्रियं यदाज्ञेन्द्रियं न तदाज्ञास्यामीन्द्रियम् । उक्त इन्द्रियाणां धातुप्रभेदप्रसङ्गेनागतानां विस्तरेण प्रभेद इति । अष्टादशानां धातूनां कतीन्द्रियं कति नेन्द्रियमिति धातुप्रभेदप्रसङ्गेन ।

---

1 Poussin reconstructs the 2nd half the Kārikā apparently on the basis of the Tib. thus: द्विलिङ्गीराग्यार्यौ लिङ्गैकामलद्वयवर्जितैः ॥

2 Mss. एवमेकान्त० B. एवमेकोन०; for the form एकान्न see Pā., VI, 3, 76.

3 A रागित्वा०

4 B. ०न्द्रिय एकान्तेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]धर्मार्थ इन्द्रियं ये च द्वादशाध्यात्मिकाः स्मृताः[2]

इति इन्द्रियाण्यागतानि। तेषां प्रभेदः।

अमलं त्रयम्[3]

इत्येवमादिविस्तरेणोक्तः ॥२१॥

[कामेऽष्टद्रव्यकोऽशब्दः परमाणुरनिन्द्रियः।
कायेन्द्रियो नवद्रव्यो दशद्रव्योऽपरेन्द्रियः ॥२२॥]

किमेते संस्कृता धर्मा इति। ये ते स्कन्धधात्वायतनत्वेनाभिहिताः पूर्वम्। **यथा भिन्नलक्षणा** इति। रूप्यते इति रूपम्। अनुभवो वेदना। निमित्तोद्ग्रहणं संज्ञेत्यादि। संस्कृतग्रहणमुत्पत्तिमत्त्वात्। **उताहो नियतसहोत्पादा अपि। केचित् सन्तीति।** सन्ति हि केचित्सहोत्पादाः, न तु नियतसहोत्पादाः। यथा चक्षुरादिसहोत्पादास्तद्विज्ञानादयश्चक्षुरादीनां सभागतत्सभागभावात्। तस्मादेवं पृच्छति, **सर्व इमे धर्माः पञ्च भवन्तीति।** पञ्चवस्तुकनयेनैवं सर्वधर्मसंग्रहो व्यवस्थाप्यते। रूपादिकलापमुखेन धर्मनिर्देशः सुखप्रतिपत्त्यर्थम्। **तत्रासंस्कृतं नैवोत्पद्यत** इति। न तत्प्रति सहोत्पादनियमश्चिन्त्यते। **सर्वसूक्ष्मो रूपसंघातः परमाणुरिति।** संघातपरमाणुर्न द्रव्यपरमाणुः। यत्र हि पूर्वापरभागो नास्ति तत्सर्वरूपापचितं द्रव्यं द्रव्यपरमाणुरितीष्यते। तस्माद्विशिनष्टि संघातः परमाणुरिति।

कामेऽष्टद्रव्यकोऽशब्दः

इति। **कामधातौ यदा शब्दोऽत्र नोत्पद्यते, तदा नियतमष्टद्रव्यक एव भवति, नातो न्यूनद्रव्यकः।**

अपरेन्द्रियः

इति। अपरमिन्द्रियमस्मिन्नित्यपरेन्द्रियः, चक्षुरादिमानित्यर्थः। यत्र हि चक्षुः श्रोत्रादि वा तत्र कायेन्द्रियेण भवितव्यम्, तत्प्रतिबद्धवृत्तित्वाच्चक्षुरादीनाम्। **सशब्दाः पुनरेते परमाणव** इत्यष्टद्रव्यकादयः संघातपरमाणवः सशब्दा उत्पद्यमाना यथाक्रमं **नवदशैकादशद्रव्यका उत्पद्यन्ते।** योऽष्टद्रव्यकः स नवद्रव्यकः। यो नवद्रव्यकः स दशद्रव्यकः। यो दशद्रव्यकः स एकादशद्रव्यक इति। **अस्ति हीन्द्रियाविनिर्भागी शब्दोऽपीति।** इन्द्रियाद्विनिर्भक्तुं यो न शक्यते स इन्द्रियाविनिर्भागी शब्द इन्द्रियापृथग्वर्तीत्यर्थः। अविनिर्भागीति केचिद्भुजि पठन्ति।

1 B. धर्मार्धमिन्द्रियं
2 Kārikā, I. 48.
3 Kārikā, II. 9.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कथमविनिर्भागे भूतानां क्वचिदेव संघातः कठिन इत्यादि। **कठिनः** पृथिवीधातुः। **द्रवोऽ**ब्धातुः। **उ**ष्णस्तेजोधातुः। **समुदीरणा**[1] वायुधातुः। तुल्यभूतसद्भावात्तुल्यरूपैस्तत्संघातैर्भवितव्यमित्यभिप्रायः। **यद्यत्र पटुतममिति** विस्तरः। यद्द्रव्यं पृथिव्यादिलक्षणम्' यत्र संघाते पटुतमं स्फुटतमम्। **प्रभावतः** शक्तितः। न तु द्रव्यतः। उद्भूतमुत्पन्नम्। **तस्य तत्रोपलब्धिः।** तस्य द्रव्यस्य तत्र संघात उपलब्धिर्ग्रहणम्[2]। **सूचीतूलीकलापस्पर्शवत्।** तत्र सूच्यो लोहमय्यः प्रतीता लोके। तूल्यो वीरणादिपुष्पमूलदण्डाः' याः सिंका इति प्राकृतजनप्रतीताः' तासां सूचीनां तूलीनां च कलापः' तस्य स्पर्शः सूचीतूलीकलापस्पर्शः। तस्य चोपलब्धिः तस्य पटुतमस्य प्रभावत उद्भूतस्य भूतस्येति। [3]तत्र तस्येवेत्यनेन लक्षणेन वतिः। एतदुक्तं भवति। यथा तुल्येऽपि सूचीनां तूलीनां कलापसद्भावे तीक्ष्णत्वात्सूचीनामेव स्पर्शो[4] व्यक्तमुपलभ्यते' न तूलीनामतीक्ष्णत्वात्। तथा **क्वचिदेव संघाते** काष्ठादिके **कठिनमुपलभ्यते।** **क्वचिद्द्रवः** पानीये। **क्वचिदुष्णोऽ**ग्नौ। **क्वचित्समुदीरणा**[5] वायौ। न च तत्र तत्र संघाते चत्वारि महाभूतानि न सन्ति। **सक्तुलवणचूर्णरसवच्च**। सक्तुचूर्णानां लवणचूर्णानां च यथा रसस्योपलब्धिः' लवणचूर्णरस एव व्यक्तमुपलभ्यते' न तु सक्तुचूर्णरसः' तद्वदिहापीति। **संग्रहधृतिपक्तिव्यूहनादिति।** संग्रहकर्मणाब्धातोरस्तित्वं गम्यते काष्ठादिके। अन्यथा पांसुमुष्टिवत्तद्विशीर्यते। यदि तत्राब्धातुर्न स्यात्। धृतिकर्मणाप्सु नौप्रभृतीनां पृथिवीधातोरस्तित्वं गम्यते। पक्तिकर्मणा तेजोधातोरस्तित्वं गम्यते। यदि हि तन्न स्यात्काष्ठादिकं न पूतीभवेत्। व्यूहनकर्मणा वायुधातोरस्तित्वं गम्यते। प्रसर्पणं हि तस्य न स्याद्वृद्धिर्वा यदि वायुधातुस्तत्र न स्यात्। एवमन्यत्रापि योज्यम्। **प्रत्ययलाभे च सतीति** विस्तरः। प्रत्ययानामग्न्यादीनां लाभे सति **कठिनादीनां द्रवद्रव्याणां**[6] **च द्रवणादिभावात्** द्रवणघनत्वादिभावात्। तद्यथाग्निभूते सति कठिनस्य लोहस्य द्रवणम्। तेन ज्ञायते लोहेऽब्धातुरस्तीति। [7]तथा द्रवस्य शैत्यादिप्रत्ययलाभे काठिन्यम्' तेन ज्ञायते पृथिवीधातोरत्रास्तित्वमिति। तथा कठिनसंघर्षादौष्ण्यमुपलभ्यते' तेन तेजोधातोरत्रास्तित्वं गम्यते। इत्येवं संभवतोऽन्यत्रापि योज्यम्। **अप्सु शैत्यातिशयादौष्ण्यं गम्यते इत्यपर** इति

1 Mss. ०दीरणो
2 Mss. लब्धिग्रहणम्
3 Pā., V, 1,116.
4 A संस्पर्शः
5 Mss. ०दीरणो
6 B. & To. omit it.
7 V तद् यथा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भदन्तश्रीलाभः। यस्मादापः शीताः शीततराः शीततमाश्चोपलभ्यन्ते। ततो ज्ञायते तेजसस्तत्वान्यतरतमोत्पत्तेः शैत्यातिशयः। तेन च तत्र तेजोऽस्तीति गम्यते।

अव्यतिभेदेऽपीति विस्तरः। तं मतमाचार्यो दूषयति। **यथा न च शब्दस्य** द्रव्यान्तरेण व्यतिभेदो मिश्रीभावोऽस्ति। **अतिशयश्च भवति** स्वभावभेदात्पटुः शब्दः पटुतरः पटुतम इति। एवमिहापि भवेत्। यथा च वेदनाया न केनचिद्द्रव्यान्तरेण व्यतिभेदो भवतीति स्वभावभेदात्तारतम्येनातिशयः' तथेहापीति। नानेन तेजोऽस्तित्वं गम्यते। ता एव ह्यापः काश्चिच्छीताः काश्चिच्छीततराः काश्चिच्छीततमा इति। **बीजतस्तेषु तेषां भावो न स्वरूपत इत्यपर** इति सौत्रान्तिकाः। बीजतः शक्तितः सामर्थ्यत इत्यर्थः। न स्वरूपतो न द्रव्यत इत्यर्थः। शक्तिरेव हि नानाविधास्ति यया योगिभिरधिमोक्षविशेषेण सुवर्णधातू रूप्यधातुस्ताम्रधातुरित्येवमादयो धातवः क्रियन्ते। कस्मादित्याह' **सन्त्यस्मिन्दारुस्कन्धे विविधा धातव इति वचनात्**। धातुशक्तयो हि तत्रैवं[1] भगवतोक्ताः। न हि तत्रातिबहूनां सुवर्णरूप्यादीनां [2]स्वरूपतस्तत्रावकाशोऽस्तीति।

कथं वायौ वर्णसद्भाव इति। वैभाषिकानेवं चोदयन्ति।

कामेऽष्टद्रव्यकः

इति नियमे कथं वायौ वर्णोऽस्तीति निर्धार्यते। न हि कथञ्चित्तत्र वर्ण उपलभ्यते। **श्रद्धानीय एषोऽर्थो नानुमानीय** इति वैभाषिकाः। परमाप्तैरयमुक्तोऽर्थ इति प्रत्येतव्यो नार्थोऽनुमानसाध्य इत्यभिप्रायः। **संसर्गतो गन्धग्रहणा**द्वेति। अस्ति वानुमानमिति दर्शयति। गन्धवता तु द्रव्येण वायोः सम्पर्काद्गन्ध उपलभ्यते। **स च गन्धो वर्णं न व्यभिचरति**। यत्र हि गन्धस्तत्र वर्णेन भवितव्यमिति। अत्र च साधनवचनम्। वर्णवान् वायुर्गन्धवत्त्वाज्जातिपुष्पवदिति।

रूपधातौ गन्धरसयोरभाव उक्त इति।

विना गन्धरसघ्राणजिह्वाविज्ञानधातुभिः[3]

इति वचनात्। **तेन तत्रत्याः परमाणवः [4]षट्सप्ताष्टद्रव्यका** इति। तत्रत्यास्तत्र भवाः। तत्रत्याः परमाणवः संघातपरमाणवोऽधिकृताः। य इहाष्टद्रव्यक उक्तो निरिन्द्रियोऽशब्दः स तत्र षड्द्रव्यकः। यो नवद्रव्यकः

1 B. तत्रैव
2 B. & To. following. Tib. omit तत्र.
3 Kārikā, I. 3.
4 Mss. & To. षट्सप्ताष्टा°

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]कायेन्द्रियी स सप्तद्रव्यकः। यो दशद्रव्यकोऽपरेन्द्रियः सोऽष्टद्रव्यकः। सशब्दकाः पुनरेते सप्ताष्टनवद्रव्यका इत्यवगन्तव्यम्। उक्तरूपत्वान्न पुनरुच्यन्त इति। उक्तकल्पत्वान्न पुनः सूत्र्यन्त[2] इत्यर्थः।

किं पुनरत्र द्रव्यमेव[3] द्रव्यमिति विस्तरः। मुख्यवृत्त्या यद्द्रव्यं यस्य [4]स्वलक्षणमस्ति तद्द्रव्यं गृह्यते। **आहोस्विदायतनम्**। द्रव्यमित्यधिकृतम्। आयतनमपि हि द्रव्यमिति शक्यते वक्तुं सामान्यविशेषलक्षणसद्भावात्। **किं चातः**। कश्चातो[5] दोष इत्यर्थः। **यदि द्रव्यमेव द्रव्यं गृह्यते**। यदि रूपपर्यन्तलक्षणं पृथिव्यादिपरमाणुद्रव्यं गृह्यते। **अत्यल्पमिदमुच्यते अष्टद्रव्यक** इत्यादि। **संस्थानगुरुत्वलघुत्वश्लक्ष्णत्वकर्कशत्वशीतजिघत्सापिपासानां सम्भवतो** द्रव्यान्तराणां **क्वचित्क्वचित्सद्भावात्**। तथा च सति योऽष्टद्रव्यकः स नवद्रव्यको यावच्चतुर्दशद्रव्यक इत्यष्टद्रव्यकनियमो भिद्यते। एवं नवद्रव्यकादिषु योज्यम्। एवं रूपधातावपि षट्सप्ताष्टद्रव्यनियमभेदो वक्तव्यः। **चतुर्द्रव्यको हि वक्तव्य** इति। यस्माद्भूतान्यपि पृथिव्यादीनि **स्प्रष्टव्यायतनम्**।

स्प्रष्टव्यं द्विविधम्[6]

इति वचनात्। तस्मात्कामे चतुर्द्रव्यकोऽशब्दः। रूपं गन्धो रसः स्प्रष्टव्यमिति। सशब्दस्तु पञ्चद्रव्यक इति वक्तव्यम्। **यदाश्रयभूतमिति**। पृथिव्यादीनि चत्वारि। **यदाश्रयिभूतमिति**। रूपं गन्धो रसः स्प्रष्टव्यैकदेशश्च। तदेवं संस्थानस्य रूपेऽन्तर्भावात् गुरुत्वादीनां च स्प्रष्टव्य इति नात्यल्पमिदमुच्यते। नाप्यतिबहु। आश्रयभूतानां स्प्रष्टव्यायतनान्निःकृष्य चतुर्धा निर्देशात्। **एवमपि [7]भूयांसीति** विस्तरः। यद्भूतचतुष्कमाश्रय एकस्योपादायरूपस्य नीलस्य पीतस्य वा न तदेवान्यस्योपादायरूपस्य गन्धस्य रसस्य वाश्रयः। किं तर्हि। **अन्यदेव भूतचतुष्कं तस्याश्रय** इति वैभाषिकसिद्धान्तः। **तत्र पुनर्जातिद्रव्यमिति**। भूतचतुष्कजातिरत्र गृह्यते। [8]**या ह्येकस्य भूतचतुष्कस्य जातिस्तामन्यानि भूतचतुष्काणि नातिक्रामन्ति**[9]। **एवं विकल्पेन वक्तुमिति**। क्वचिदत्र द्रव्यमेव द्रव्यं गृह्यते यदाश्रयभूतम्। क्वचिदत्रायतनद्रव्यं गृह्यते [10]यदाश्रयिभूतम्। यच्च तदाश्रय-

---

1 To. कायेन्द्रिया
2 B. सूच्यन्त
3 V omits द्रव्यमेव.
4 V स्वस्वलक्ष०
5 Mss. कस्यातो
6 Kārikā, I. 35.
7 Mss. भूयान्सीति
8 A यो; V ये
9 B. क्रामति
10 V यदाश्रय०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भूतं तज्जात्या गृह्यत इति । **छन्दतो हि वाचां प्रवृत्तिः, अर्थस्तु परीक्ष्य** इति । छन्दत इच्छातः संक्षेपविस्तरविधानानुविधायिन्यो वाचः प्रवर्तन्ते । अर्थस्तु [1]तासां परीक्ष्यः । किमेवं नियतसहोत्पादानि तानि भवन्ति न[2]भवन्तीति[2] । योगाचारचित्तास्तु संघातावस्थाने भूतानां भौतिकानां च नियमं वर्णयन्ति । कथमिति, उच्यते । अस्ति समुदाय एकभौतिकः, तद्यथा शुष्को मृत्पिण्डः । अस्ति द्विभौतिकः स एवार्द्रः । अस्ति त्रिभौतिकः स एवोष्णः । अस्ति यावत् सर्वभौतिकः स एवार्द्र उष्णश्च मृत्पिण्डो गमनावस्थायामिति । उपादायरूपेऽपि यदुपादायरूपं यस्मिन् समुदाये उपलभ्यते, तत्तत्रास्तीति वेदितव्यम् । अस्ति समुदाय एकोपादायरूपिकः, तद्यथा प्रभा । अस्ति द्व्युपादायरूपिकः, तद्यथा [3]सशब्दगन्धो वायुः । त्र्युपादायरूपिकः, तद्यथा धूमः, तस्य रूपगन्धस्प्रष्टव्यविशेषप्रभावितत्वात् । स्प्रष्टव्यविशेषः पुनरत्र लघुत्वं वेदितव्यम् । चतुरुपादायरूपिकः[4], तद्यथा गुडपिण्डः । पञ्चोपादायरूपिकः[4], तद्यथा स एव सशब्दः, इत्येवमाद्यपि[5] वक्तव्यम् ॥२२॥

[चित्तचैत्ताः सहावश्यं सर्वं संस्कृतलक्षणैः ।
प्राप्त्या वा पञ्चधा चैत्ता महाभूम्यादिभेदतः ॥२३॥]

शेषाणां वक्तव्य इति, चित्तचैत्तानां विप्रयुक्तानां च ।

चित्तचैत्ताः सहावश्यम्

इति । न चित्तं चैत्तैर्विना उत्पद्यते, नापि चैत्ता विना चित्तेनेत्यवधार्यते, न तु सर्वं चित्तं [6]सर्वचैत्तनियतसहोत्पादम्, नापि सर्वचैत्ताः सर्वचित्तनियतसहोत्पादा इति ।

सर्वं संस्कृतलक्षणैः

इति । संस्कृतलक्षणैर्यद्युक्तं तत्सर्वं तैः संस्कृतलक्षणैर्जात्यादिभिरवश्यं सहोत्पद्यते । किं पुनस्तदित्याह, **यत्किंचिदुत्पद्यते रूपं चित्तं चैतसिकाश्चित्तविप्रयुक्ताश्चेति** । पूर्वमेव ह्यसंस्कृतं बहिष्कृतम्, तत्रासंस्कृतं नैवोत्पद्यते इति वचनात् । **विकल्पार्थो वाशब्द** इति । **किञ्चित्प्राप्त्या सहोत्पद्यते यत्सत्त्वसंख्यातम्,**

1 Mss. ताभ्यां
2...2 B. भवन्ति वेति
3 Mss. & B. omit स.
4 Mss. ०रूपिकं
5 Mss. ०वमादिष्वपि
6 Mss. सर्वचित्त०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किञ्चिन्न यदसत्त्वसंख्यातमिति विकल्पः। प्रतिसंख्याप्रतिसंख्यानिरोधयोर्यद्यपि प्राप्तिरस्ति न तु तावुत्पद्येते इति न तयोर्ग्रहणम्। सहोत्पादननियमो ह्ययमारम्भ[1] इति। असत्त्वसंख्यातस्य प्राप्तिर्नास्तीति किमत्र कारणम्। सर्वसत्त्वसाधारणत्वात्। सहजयैव च प्राप्तया प्राप्तिमान् सहोत्पद्यते। न पूर्वपश्चात्कालजयेत्यवगन्तव्यम्।

गतिविषय इति। उत्पत्तिविषय इत्यर्थः। **महाभूमिका** इति। महत्त्वं सर्वचित्तभवत्वात् ॥२३॥

[वेदना चेतना संज्ञा छन्दः स्पर्शो मतिः स्मृतिः।
मनस्कारोऽधिमोक्षश्च समाधिः सर्वचेतसि ॥२४॥]

इमे किलेति। किलशब्दः परमतद्योतने। स्वमतं तु छन्दादयः सर्वचेतसि न भवन्ति। तथा ह्यनेनैवाचार्येण पञ्चस्कन्धके लिखितम्। छन्दः कतमः। अभिप्रेते वस्तुन्यभिलाषः। अधिमोक्षः कतमः। निश्चिते वस्तुनि तथैवावधारणमित्यादि। **चेतना चित्ताभिसंस्कार** इति। चित्तप्रस्पन्दः। प्रस्पन्द इव प्रस्पन्द इत्यर्थः। **विषयनिमित्तग्राह** इति। विषयविशेषरूपग्राह[2] इत्यर्थः। **स्पर्श इन्द्रियविषयविज्ञानसन्निपातजा स्पृष्टिरिति**। इन्द्रियविषयविज्ञानानां सन्निपाताज्जाता स्पृष्टिः। स्पृष्टिरिव स्पृष्टिः। यद्योगादिन्द्रियविषयविज्ञानान्यन्योन्यं स्पृशन्तीव स स्पर्शः। **धर्मप्रविचय** इति। प्रविचिनोतीति प्रविचयः। प्रविचीयन्ते वानेन धर्मा इति प्रविचयः। येन संकीर्णा इव धर्माः पुष्पाणीव प्रविचीयन्ते। उच्चीयन्त इत्यर्थः। इमे सास्रवाः। इमेऽनास्रवाः। इमे रूपिणः। इमे अरूपिण इति। धर्माणां प्रविचयो धर्मप्रविचयः। प्रतीतत्वात् प्रज्ञेति वक्तव्ये श्लोकबन्धानुगुण्येन मतिरिति कारिकायामुक्तम्। **स्मृतिरालम्बनासंप्रमोष** इति। यद्योगादालम्बनं न मनो विस्मरति। तच्चाभिलपतीव[3]। सा स्मृतिः। **मनस्कारश्चेतस आभोग** इति। आलम्बने चेतस आवर्जनम्। अवधारणमित्यर्थः। मनसः कारो मनस्कारः। मनो वा करोति आवर्जयतीति मनस्कारः। **अधिमुक्तिस्तदालम्बनस्य गुणतोऽवधारणम्**[4]। रुचिरित्यन्ये। यथानिश्चयं धारणेति योगाचारचित्ताः। **समाधिश्चित्तस्यैकाग्रतेति**। अग्रमालम्बनमित्येकोऽर्थः।

---

1 Mss. ०मारम्भ
2 A ०ग्राहक
3 Mss. & B. ०पतीव
4 Mss. ०धारणात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यद्योगाच्चित्तं प्रबन्धेन एकत्रालम्बने वर्तते । स समाधिः । यदि समाधिः सर्वचेतसि भवति । किमर्थं ध्यानेषु यत्नः क्रियते । बलवत्समाधिनिष्पादनार्थम् ।

कथमेकस्मिंश्चित्ते दशानां भिन्नलक्षणानां चैत्तानामस्तित्वं गम्यत इति । अत आह । **सूक्ष्मो हि चित्तचैत्तानां विशेष** इति विस्तरः । स एष विशेषश्चित्तचैत्तानां दुर्लक्ष्यः **प्रबन्धेष्वपि तावत् किं पुनः क्षणेषु** कालपर्यन्तलक्षणेषु । **रूपिणीनामप्योषधीनां** मूर्तानामपि कासाञ्चित् हरीतकीप्रभृतीनां **बहुरसानां** [1]**षड्रसानामिन्द्रियग्राह्या** जिह्वेन्द्रियग्राह्या [2]**दुरवधारा** दुःपरिच्छेदा **भवन्ति** । **किं पुनर्ये धर्मा अमूर्ता बुद्धिग्राह्या** मनोविज्ञानमात्रग्राह्याः । तस्मादाप्तोपदिष्टा इति कृत्वा तथैव ते प्रतिपत्तव्या इत्यभिप्रायः ॥२४॥

[श्रद्धाप्रमादः प्रश्रब्धिरुपेक्षा ह्रीरपत्रपा ।
मूलद्वयमविहिंसा वीर्यश्च कुशले सदा ॥२५॥]

श्रद्धा चेतसः प्रसाद इति । क्लेशोपक्लेशकलुषितं चेतः श्रद्धायोगात्प्रसीदति । उदकप्रसादकमणियोगादिवोदकम् । **सत्यरत्नकर्मफलाभिसंप्रत्यय**[3] **इत्यपरे** इति । आकारेण श्रद्धानिर्देशः । सत्येषु चतुर्षु रत्नेषु च त्रिषु कर्मसु च शुभाशुभेषु । तत्फलेषु च इष्टानिष्टेषु । सन्त्येवैतानीत्यभिसंप्रत्ययोऽभिसंप्रतिपत्तिः श्रद्धेति । **अप्रमादः कुशलानां धर्माणां भावनेति** । भावना नाम कुशलानां प्रतिलम्भनिषेवणस्वभावा ।

प्रतिलम्भनिषेवाख्ये शुभसंस्कृतभावने[4]

इति वचनात् । सा कथमप्रमादो नाम चैतसिको भविष्यति । यस्मिन्सति सा प्रतिलम्भनिषेवणभावना भवति । सोऽप्रमादस्तात्पर्यलक्षणः । अत आह । **या तेष्ववहिततेति** । तदेवं सति भावनाहेतावयं भावनोपचारः कृत इति । **चेतस आरक्षेति** । यः सांक्लेशिकेभ्यश्चित्तमारक्षते । **सोऽप्रमाद** इति । **चित्तकर्मण्यतेति** । यद्योगाच्चित्तं कर्मण्यं भवति । सा चित्तकर्मण्यता । चित्तलाघवमित्यर्थः । **ननु च सूत्रे कायप्रश्रब्धिरप्युक्तेति** । कथं पर्यायो यत्प्रश्रब्धिसंबोध्यङ्गद्वयं भवति । अस्ति कायप्रश्रब्धिः । अस्ति चित्तप्रश्रब्धिः ।

---

1 V षड्रसा०

2 Mss. दुरवधाना

3 Mss. ०प्रत्य

4 Kārikā, VII. 27.

तत्र यापि कायप्रस्रब्धिस्तदपि प्रस्रब्धिसंबोध्यङ्गमभिज्ञायै संबोधये निर्वाणाय संवर्तते । यापि चित्तप्रस्रब्धिस्तदपि प्रस्रब्धिसंबोध्यङ्गमभिज्ञायै संबोधये निर्वाणाय संवर्तत इति । कथमियमेकैवोच्यते प्रस्रब्धिश्चित्तकर्मण्यतेति । **सा तु यथा कायिकी वेदनेति** , यथा चेतस्यपि वेदना परमाणुसञ्चयात्मकेन्द्रियाश्रयत्वात् कायिकीत्युच्यते , **तथेयमपि प्रस्रब्धिरवगन्तव्या । कथं सा बोध्यङ्गेषु योक्ष्यत** इत्यसमाहितत्वात् पञ्चानां विज्ञानकायानां पृच्छति । **तत्र तर्हीति** विस्तरः , तत्र सूत्रे कायवैशारद्यमेव कायकर्मण्यता भूतविशेषलक्षणा प्रीत्यध्याकृता[1] , प्रीतमनसः कायः प्रश्रभ्यत इति वचनात् । **कथं सा बोध्यङ्गमिति** । पृथक्कलापत्वात्सास्रवत्वाच्च न युज्यत इत्यभिप्रायः । **प्रीतिः प्रीतिस्थानीयाश्च धर्माः प्रीतिसंबोध्यङ्गमिति** विस्तरः । तीर्थिकाः किल भगवच्छ्रावकानेवमाहुः । श्रमणो भवतो[2] गौतम एवमाह , [3]एत यूयं भिक्षवः पञ्च निवरणानि प्रहाय चेतस उपक्लेशकराणि प्रज्ञादौर्बल्यकराणि सप्त बोध्यङ्गानि भावयतेति । वयमप्येवं ब्रूमः । तत्रास्माकं श्रमणस्य च गौतमस्य को विशेषो धर्मदेशनायाः । तेभ्यो भगवता एतदुपदिष्टम् , पञ्च सन्ति दश भवन्ति , दश सन्ति पञ्च व्यवस्थाप्यन्ते । **प्रतिघः प्रतिघनिमित्तं च** नवाघातवस्तूनि **व्यापादनिवरणमुक्तं** भगवता तदानुकूल्यात् । तथा सप्त सन्ति चतुर्दश भवन्ति , चतुर्दश सन्ति सप्त व्यवस्थाप्यन्ते , प्रीतिः प्रीतिनिमित्तं चेत्यनेन भेदेन तदानुकूल्यादिति । **न च संकल्पव्यायामौ प्रज्ञास्वभावाविति** , तयोर्यथाक्रमं वितर्कवीर्यस्वभावत्वान्न तौ प्रज्ञास्वभावौ । यदा च त्रिस्कन्धो मार्गः क्रियते शीलस्कन्धः समाधिस्कन्धः प्रज्ञास्कन्ध इति । तत्र प्रज्ञास्कन्धनिर्देश उक्तम् । प्रज्ञास्कन्धः कतमः , सम्यग्दृष्टिः सम्यक्संकल्पः सम्यग्व्यायाम इति । **उपेक्षा चित्तसमतेति** । यद्योगाच्चित्तं सममनाभोगं वर्तते , सोपेक्षा संस्कारोपेक्षा नाम । त्रिविधा हि उपेक्षा , वेदनोपेक्षा संस्कारोपेक्षा अप्रमाणोपेक्षा चेति ।

ननु चोक्तं दुर्ज्ञान एषां विशेष इति । सूक्ष्मो हि चित्तचैत्तानां विशेषः , स एष दुःपरिच्छेदः प्रवाहेष्वपि तावदित्यादिवचनाद्दुःखेन ज्ञायते दुर्ज्ञानः । **अस्ति हि नाम दुर्ज्ञानमपि ज्ञायते** । यदविरुद्धमेकस्मिंश्चित्तक्षणे धर्मान्तरेण स्पर्शादिना । **इदं तु खलु अतिदुर्ज्ञानं यद्विरोधेऽप्यविरोध** इति , आभोगानाभोगयोरेकस्मिंश्चित्तक्षणेऽविरोधो व्यव-

1 B. °ध्याहृता   2 Mss., B. & To. भवन्तो
3 B. & To. एवं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थाप्यत इति वाक्यशेषः । न हि विरुद्धयोः सुखदुःखयोरेकस्मिंश्चित्तक्षणे भावो दृष्ट इति । अन्यत्राभोग इति । अन्यत्रालम्बने आभोग अन्यत्रानाभोग इत्यविरोधः । एवंजातीयकमत्रान्यदप्यायास्यतीति । विरोधजातीयं यथा वितर्कविचारौ । तयोर्हि लक्षणम् ' चित्तौदारिकता वितर्कः ' चित्तसूक्ष्मता विचार इति ।

वितर्कविचारौदार्यसूक्ष्मते[1]

इति वचनात् । तयोस्त्वेकत्र चित्ते विरोध इति वक्ष्यते । यस्तस्य नयः ' सोऽस्यापीति । पर्यायेणानयोर्वृत्तिरित्यभिप्रायः । ह्रीरपत्राप्यं च पश्चाद्वक्ष्यते इति ।

अह्रीरगुरुतावद्ये भयादर्शित्वमत्रपा[2]

इत्यत्र विपर्ययग्रहणात् । स तु प्रज्ञात्मक इति । स त्वमोहः प्रज्ञास्वभावः । प्रज्ञा च महाभूमिकेति ।

मतिः स्मृतिः[3]

इति वचनात् । नासौ कुशलमहाभूमिक एवोच्यते । किं तर्हि ' अकुशलादिभूमिकोऽपीति । अविहेठनेति । यद्योगात्परो न विहेठ्यते । साविहिंसा । विहिंसाप्रतिपक्षश्चैतसिकः । चेतसोऽभ्युत्साह इति । कुशलक्रियायां[4] यश्चेतसोऽभ्युत्साहस्तद्वीर्यम् । यस्त्वकुशलादिक्रियायां चेतसोऽभ्युत्साहो नैतद्वीर्यम् ' कौसीद्यमेव तत् प्रवचने पठ्यते सीदनात्मकत्वात् । तथा ह्युक्तं भगवता ' इतो बाह्यकानां यद्वीर्यं कौसीद्यमेव तदिति ॥२५॥

[मोहः प्रमादः कौसीद्यमाश्रद्ध्यं[5] स्त्यानमुद्धतिः[6] ।
सर्वदा क्लिष्टेऽकुशले त्वाह्रीक्यमनपत्रपा ॥२६॥]

मोहो नामाविद्येति ।

विद्याविपक्षो धर्मोऽन्योऽविद्या[7]

इति पश्चाद्व्याख्यायते । भावनाविपक्षो धर्म इति । भावनाया अभावमात्रप्रतिप-

---

1 Kārikā, II. 33.
2 Kārikā, II. 32.
3 Kārikā, III. 28.
4 V कुशलाक्रियायां
5 Poussin, Fragment des Kārikās ०माश्राद्ध्य०
6 Ibid. ०मुद्भवः
7 Kārikā, III. 28.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्तिर्मा भूदिति भावनाविपत्त इत्याह। एवं [1]कौसीद्यादिष्वपि व्याख्येयम्। **कायगुरुता चित्तगुरुतेति**। प्रस्रब्धिप्रतिपक्षो धर्मः। **यथा कायिकी वेदनेति**। यथा वेदना रूपीन्द्रियाश्रयत्वाच्चैतसिक्यपि कायिकीति व्याख्याता। तथा कायिकं स्त्यानम्' पञ्चविज्ञानकायसंप्रयुक्तं स्त्यानं कायिकमित्युच्यते। **औद्धत्यं चेतसोऽव्युपशम इति**। नृत्यगीतादिशृङ्गारवेषालंकारकायौद्धत्य[2]-संनिश्रयदानकर्मकश्चैतसिको[3] धर्मः।

न चात्र स्त्यानं पठ्यते इत्यभिधर्मे। **प्राप्तिज्ञो देवानां प्रियो न त्विष्टिज्ञ इति**। पाठप्रामाण्यमात्रेण दश क्लेशमहाभूमिकाः प्राप्ता इत्येतामेव प्राप्तिं जानीते देवानां प्रियः' न त्वाचार्याणामिष्टिमिच्छां जानीते। कोऽयं देवानां प्रियो नाम' ऋजुकजातीयो देवानां प्रिय इत्येके व्याचक्षते ' अशठो हि देवानां प्रियो भवति ' मूर्खो देवानां प्रिय इत्यपरे।

यो हीश्वराणामिष्टः स न ताडनेन शिक्षते

इति मूर्खो भवतीति। **यथैवामोह** इति। यथैवामोहः कुशलमूलं प्रज्ञास्वभावत्वान्महाभूमिक इति व्यवस्थापितो **न कुशलमहाभूमिक** एवेत्यवधार्यते ' ततश्च कुशलमहाभूमिकेषु न पठितः। तथा मुषितस्मृत्यादयोऽपि पञ्चमहाभूमिकत्वान्न क्लेशमहाभूमिका एवेत्यवधार्यन्ते। ततश्च इमे न क्लेशमहाभूमिकमध्ये पठ्यन्ते। कथमित्याह। **स्मृतिरेव हि क्लिष्टा मुषितस्मृतिता' समाधिरेव क्लिष्टो विक्षेप इत्येवमादीति**। आदिशब्देन प्रज्ञैव क्लिष्टा असंप्रजन्यम्। मनस्कार एव क्लिष्टो ऽयोनिशोमनस्कारः ' अधिमुक्तिरेव क्लिष्टा मिथ्याधिमोक्ष इति दर्शयति।

अत एवोच्यत इति विस्तरः। यत एवं स्मृत्यादयो मुषितस्मृतितादयो व्यवस्थाप्यन्ते नैतद्व्यतिरिक्ताः। अत एवोच्यते **चतुष्कोटिक** इति। **ये महाभूमिकाः क्लेशमहाभूमिका अपि त** इति काका[4] पृच्छति। चतुष्कोटिकाः। स्युर्महाभूमिका न क्लेशमहाभूमिकाः ' स्युः क्लेशमहाभूमिका न महाभूमिकाः ' स्युर्महाभूमिकाश्च क्लेशमहाभूमिकाश्च' स्युर्नैव महाभूमिका न क्लेशमहाभूमिकाः। **तृतीया स्मृत्यादय इति**। ये मुषितस्मृत्यादयः पञ्च यथोक्ताः। एते हि महाभूमिकाः क्लेशमहाभूमिकाश्च। **चतुर्थी एतानाकारान्[5] स्थापयित्वेति**। उक्तनिर्मुक्ता धर्माः

---

1 Mss. & To. कौशीद्य०

2 Mss. ०वेशालंकारकायौद्धत्य०

3 A कर्मचैतसिकी

4 Mss. काक्षा

5 B एतामाकारां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुशलमहाभूमिकादयश्चैतसिका रूपादयश्चान्य इति । **तेषामन्यथा चतुष्कोटिक** इति । द्वितीयायां कोट्यां विक्षेपः प्रक्षेप्तव्यः । न तु तृतीयायाम् । अत एवं वक्तव्यम् । प्रथमा कोटिः पूर्ववत् । द्वितीया आश्रद्धयं कौसीद्यमविद्या औद्धत्यं प्रमादो विक्षेपश्च । तृतीया स्मृत्यादयश्चत्वारः । [1]मुषितस्मृत्यसंप्रजन्यायोनिशोमनस्कारमिथ्याधिमोक्षा[2] इत्यर्थः । चतुर्थी पूर्ववत् । यत्तूक्तं न चात्र स्त्यानं पठ्यत इति तान्प्रति ब्रवीति । **स्त्यानं पुनरिष्यत** इति विस्तरः । **तस्यापाठे कस्यापराध** इति । किमस्य स्त्यानस्यापाठे ममापराधः । किमाभिधार्मिकस्येति । अभिधर्मकारस्यायमपराधो न ममेत्यभिप्रायः । स्त्यानस्य [3]सर्वक्लेशसंप्रयोगित्वेनाभिमतत्वात् । **एवं त्वाहुरिति** । तत्र शास्त्रे स्त्यानस्यापाठे कारणमाहुराभिधार्मिकाः[4] । **क्षिप्रतरं किलेति** । किलशब्दोऽसम्भावनायाम् । कथं हि नाम क्लिष्टो धर्मः शुक्लस्य समाधेरनुगुणो भविष्यति । लयौद्धत्ये हि समाधिपरिपन्थिनी । तत्कथं परिपन्थ्येवानुगुण[5] इति । **न ह्येते जातु सहचरिष्णुतां[6] जहीत** इति । न ह्येते स्त्यानौद्धत्ये कदाचित्सहचरधर्मतां त्यजत इत्यर्थः । **तथापि यद्यस्याधिमात्रमिति** । एवमपि [7]च स्त्यानमौद्धत्यं वा यस्य पुद्गलस्याधिमात्रम् । स[8] पुद्गलस्तच्चरितः स्त्यानचरित औद्धत्यचरितो वावगन्तव्यः । क्वचिद्धि कलापे कश्चिद्धर्म उद्भूतो[9] भवतीति । **नान्यत्रेति** । कुशलादिषु ।

अकुशले त्वाह्रीक्यमनपत्रपा

इति । तुशब्दो विशेषणे अवधारणे वा । अकुशल एवेति ॥२६॥

[क्रोधोपनाहशाठ्येर्ष्याप्रमादम्रक्षमत्सराः ।
मायामदविहिंसाश्च परीत्तक्लेशभूमिकाः ॥२७॥]

परीत्तक्लेशभूमिकाः

इति । परीत्तोऽल्पकः[10] । को ऽसौ । **अविद्यामात्रम्** अविद्यैव केवलेत्यर्थः । **तेनाविद्यामात्रेणेति** नान्येन रागादिना क्लेशेन । **भावनाहेयेनेति** । [11]न दर्शनहेयेन । **मनोभूमिकेनैवेति** न पञ्चविज्ञानकायिकेन । यस्मादिमे क्रोधादय उपक्लेशा मनोभूमिका एव भवन्ति । अतो मनःसंप्रयोगात्परीत्तक्लेशभूमिका

1 To. मुषिता°
2 V °मिथ्याधिकारमोचा
3 To. सर्वक्लेशसंयोगित्वे°
4 Mss. रभिधार्मिकाः
5 To. °नुगुणे
6 A °रिष्टुतां
7 Mss. यः
8 A omits सः.
9. Mss. उद्वृत्तो
10 Mss. परीत्तः क्लेशोल्पकः
11 A drops न.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उच्यन्ते। रागादिकलापे ह्यवश्यमविद्यया भवितव्यमिति न परीत्तो रागादिकः। तदेवं ये सर्वत्र चैतसिके ते[1] महाभूमिकाः। ये कुशल एव ते कुशलमहाभूमिकाः[2]। ये क्लिष्टे निवृते चाकुशले च ते क्लेशमहाभूमिकाः[3]। ये त्वकुशल एव तेऽकुशलमहाभूमिकाः। ये परीत्तक्लेशसंप्रयुक्ते चेतसि ते परीत्तक्लेशभूमिकाः[4]। एषां तु निर्देश उपक्लेशेषु करिष्यत इति। अनुशयनिर्देशे ॥२७॥

[सवितर्कविचारत्वात् कुशले कामचेतसि।
द्वाविंशतिश्चैतसिकाः कौकृत्यमधिकं क्वचित् ॥२८॥
आवेणिके त्वकुशले दृष्टियुक्ते च विंशतिः।
क्लेशैश्चतुर्भिः क्रोधाद्यैः कौकृत्येनैकविंशतिः ॥२९॥
निवृतेऽष्टादशान्यत्र द्वादशाव्याकृते मताः।
मिद्धं सर्वाविरोधित्वाद् यत्र स्यादधिकं भवेत् ॥३०॥]

अन्येऽपि चानियता इति। ये कदाचित्कुशले [5]कदाचिदकुशले[5] कदाचिदव्याकृते चेतसि भवन्ति। **मिद्धादय** इति। आदिशब्देनारतिविजृम्भिकातन्द्रीभक्तेऽसमतादय उपक्लेशाः क्लेशाश्च रागादयोऽप्यनियतत्वेन गृह्यन्ते। न ह्येते रागादयः पञ्चानां प्रकाराणां अन्यतमस्मिन्नियता भवन्ति। न महाभूमिकाः। सर्वत्र चेतस्यभावात्। न [6]कुशलमहाभूमिकाः कुशलत्वायोगात्। न क्लेशमहाभूमिकाः सर्वत्र क्लिष्टे तदभावात्। न हि सप्रतिघे चेतसि रागो भवति सरागे च चेतसि प्रतिघः। इत्येवमन्येऽपि क्लेशा वक्तव्याः। अत्राचार्यवसुमित्रः संग्रहश्लोकमाह।

वितर्कचारकौकृत्यमिद्धप्रतिघसक्तयः।
मानश्च विचिकित्सा चेत्यष्टावनियताः स्मृताः ॥

इति। तदिदमष्टानियमवचनं[7] न बुध्यामहे। दृष्टयोऽपि कस्मान्नानियता इष्यन्ते। न हि सप्रतिघे सविचिकित्से वा चित्ते मिथ्यादृष्टिः प्रवर्तते।

आवेणिकत्वेऽकुशले दृष्टियुक्ते च विंशतिः।
क्लेशैश्चतुर्भिः क्रोधाद्यैः कौकृत्येनैकविंशतिः[8] ॥

---

1 Mss. omit it.
2 A drops महा ; V omits from ये कुशल up to भूमिकाः.
3 A drops महा.
4 Mss. परीत्तक्लेशमहाभूमिकाः
5...5 Mss. omit this portion.
6 A adds कुशलभूमिकाः.
7 Mss. मष्टनियम०
8 Kārikā, II. 29.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति वचनात् । तस्माद्यद्वा तद्वेदमुक्तमिति पश्यामः ।

कामावचरं तावत्पञ्चविधमिति । कुशलमेकम् । अकुशलं द्विविधम् । आवेणिकमविद्यामात्रसंप्रयुक्तं रागाद्यन्यक्लेशसंप्रयुक्तं च । अव्याकृतमपि द्विविधम् । निवृताव्याकृतं सत्कायान्तर्ग्राहदृष्टिसंप्रयुक्तम**निवृताव्याकृतं च** विपाकजादीनि । **कुकृतभावः कौकृत्यमिति** । अर्थस्य कुकृतस्य धर्मः । स [1]तु चैतसिक इति न संबध्यते । तस्मादाह । **इह तु पुनः कौकृत्यालम्बनो धर्म** इति । किंस्वभाव इत्याह । **चेतसो विप्रतिसार** इति । यदि कौकृत्यालम्बनो धर्मः कौकृत्यमुच्यते तत्संप्रयुक्ता अप्यन्ये चित्तचैत्ताः कौकृत्यं प्राप्नुवन्ति । न प्राप्नुवन्ति । तेषामप्राधान्यात् । विप्रतिसारावस्थायां हि कौकृत्यलक्षणं चैतसिकं कौकृत्याकारमुद्भूतवृत्तिकम् । अन्ये चित्तचैत्तास्तदाकारेणानुवर्तन्ते । कस्यचिदेव हि धर्मस्य कस्मिंश्चिच्चित्तकलापे प्राधान्यमिति वर्णयन्ति । **शून्यतालम्बनविमोक्षमुखं शून्यतेति** । स्कन्धानामन्तर्व्यापारपुरुषरहितालम्बनं विमोक्षमुखं समाधिविशेषः शून्यतेत्युच्यते । विनीलकव्याध्मातकाद्य**शुभालम्बनोऽलोभोऽशुभेत्युच्यते** । भावनासंबद्धत्वात् स्त्रीलिङ्गनिर्देशोऽशुभा भावनेति । तथेहापि कौकृत्यालम्बनश्चैतसिको धर्मः कौकृत्यमिति । **स्थानेन स्थानिनामतिदेशः । सर्वो ग्राम आगत** इति । सभूमिकः शालासमुदायो ग्रामः । स्थानिषु मनुष्येष्वागतेषु वक्तारो भवन्ति । सर्वो ग्राम आगत इति । एवं **सर्वो देश आगत** इति । **स्थानभूतं च कौकृत्यं विप्रतिसारस्येति** । विप्रतिसारालम्बनत्वात् । तस्माद्युक्तस्तथा निर्देशः । **फले वा हेतूपचार** इति । हेतुः कौकृत्यम् । फलं विप्रतिसारः । तस्मिन्फले हेतुरुपचर्यते । हेतुवाचकेन शब्देन फलमुच्यत इत्यर्थः । **यथा षडिमानि स्पर्शायतनानि पौराणं कर्मेति** । पूर्वजन्मकृतस्य पौराणस्य कर्मणश्चक्षुरादीनि षट् स्पर्शायतनानि फलानि । तेषु यथा कर्मोपचर्यते । तद्वत् । **यत्तर्ह्यकृतालम्बनं तत्कथं कौकृत्यमिति** । यदकृतं तन्न कृतमिति मत्वा चोदयति । **अकृतेऽपि कृताख्या भवतीति** । अकृतेऽप्यर्थे कृतशब्दप्रयोगो भवति । कथमित्याह । **न साधु मया कृतं यत्तन्न कृतमिति** । कृतमिव तदिति कृत्वा । **यत्कुशलमकृत्वा तप्यत** इति । यत् कुशलं दानादिकमकृत्वा तप्यते पश्चात्तापी भवति तत् कुशलम् । **अकुशलं च कृत्वा** । किम् । तप्यत इत्यधिकृतम् । यच्चाकुशलं प्राणातिपातादिकं कृत्वा तप्यते तदपि कुशलम् । **विपर्ययादकुशलम्** । यदकुशलमकृत्वा तप्यते कुशलं च कृत्वेति । यत्पापमकृत्वा पश्चात्तापी भवति । न साधु मया कृतं यत्तन्न

[1] Mss. न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृतमिति। तदकुशलं कौकृत्यम्। यच्च कुशलं दानादिकं कृत्वा पश्चात्तापी भवति। न साधु मया कृतं यद्दानादिकं कृतमिति। तदप्यकुशलम्। तदेतदुभयमप्युभयाधिष्ठानं भवतीति। तदेतत्कौकृत्यमुभयमपि कुशलं चाकुशलं चोभयाधिष्ठानं भवति यथोक्तेन विधानेन।

आवेणिके

इति। रागादिपृथग्भूत इत्यर्थः।

दृष्टियुक्ते च

इति। चशब्दोऽकुशल इत्यनुकर्षणार्थः। महाभूमिक एव कश्चित्प्रज्ञाविशेषो दृष्टिरिति। संतीरिका या प्रज्ञा सा दृष्टिः। सा चेहाकुशला गृह्यते। तस्मादाह मिथ्यादृष्टिश्चेत्यादि।

कौकृत्येनैकविंशतिः

इति। कौकृत्येन चेति [1]लुप्तनिदृष्टश्चकारो द्रष्टव्यः।

क्लेशैश्चतुर्भिः

इत्यादिषु प्रत्येकं वाक्यपरिसमाप्तिर्वेदितव्या। न हि रागादयः परस्परेण संप्रयुज्यन्त इत्याभिधार्मिकाः। स च क्लेश आवेणिकोक्ताश्च विंशतिरिति। दश [2]महाभूमिकाः षट् क्लेशमहाभूमिकाः। द्वावकुशलमहाभूमिकौ वितर्को विचारश्चेति विंशतिः। स च क्लेशो रागः प्रतिघो मानो विचिकित्सा चेत्येकविंशतिः। एकविंशतिर्भवत्येवेति क्रियावधारणमवगन्तव्यम्। क्रोधादिभिरपीति।

क्रोधोपनाहशाठ्येर्ष्याप्रदास-[3]म्रक्षमत्सराः।

मायामदविहिंसाश्च[4]

इति। एभिरपि संप्रयुक्ते चित्ते एकविंशतिरेव चैतसिकाः। ते चावेणिकोक्ताः पूर्ववत्। स चोपक्लेशः क्रोधो वा यावद्विहिंसा वेति। कौकृत्येन च संप्रयुक्ते। [5]ते च पूर्वोक्तास्तच्च कौकृत्यमित्येकविंशतिः। कौकृत्यमपि ह्युपक्लेशः स्वतन्त्रमिष्यते। समासत आवेणिक इति विस्तरः। अविद्यामात्रसंयुक्ते चेतस्यकुशले दृष्टिसंप्रयुक्ते चाकुशले विंशतिः। अन्यक्लेशोपक्लेशसंप्रयुक्ते त्वकुशल एवैकविंशतिः

1 B. & To. suggest in f. n. लुप्तनिर्देश्यश्चकारो.

2 Mss. omit महा०.

3 Mss. प्रहास०

4 Kārikā, II. 27.

5 V reads चेतसि अकुशले for ते च.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निवृताव्याकृतमिति। क्लेशाच्छादितं कुशलाकुशलत्वेनाव्याकृतं यत् तन्निवृताव्याकृतम्। अनाच्छादितं त्वनिवृताव्याकृतं विपाकजैर्यापथिकशैल्पस्थानिकनैर्माणिकस्वभावम्। **बहिर्देशका अव्याकृतमपि कौकृत्यमिच्छन्तीति।** [1]कश्मीरमण्डलाद् ये बहिर्देशस्थितास्ते बहिर्देशकाः। **त्रयोदशेति।** क्वचिदनिवृताव्याकृते कौकृत्यं त्रयोदशममधिकं प्रक्षिप्य। मिद्धं प्रचलायमानावस्थायां स्वप्नदर्शनावस्थायां वा **कुशलाकुशलाव्याकृतत्वादिति।** शास्त्रे वचनात्। कथं मिद्धं कुशलं [2]वक्तव्यमकुशलं[2] वक्तव्यमव्याकृतं वक्तव्यमिति। आह ' कुशलं वक्तव्यमकुशलं वक्तव्यमव्याकृतं वक्तव्यमिति। **यत्र द्वाविंशतिस्तत्र त्रयोविंशतिरिति** विस्तरः। यत्र द्वाविंशतिश्चैतसिका इत्युक्तं तत्र **तन्मिद्धं त्रयोविंशम्।** त्रयोविंशतेः पूरणमित्यर्थः। **यत्र त्रयोविंशतिः** कौकृत्यमधिकं क्वचिदिति। तत्र तन्मिद्धं **चतुर्विंशम्।** एवं यावत्

अन्यत्र द्वादशाव्याकृते मताः

मिद्धं त्रयोदशं वक्तव्यम्। बहिर्देशकमतेन तु कौकृत्याधिके चतुर्दशं मिद्धं भवतीति योज्यम् ॥२८-३०॥

[कौकृत्यमिद्धाकुशलान्याद्ये ध्याने न सन्त्यतः।

ध्यानान्तरे वितर्कश्च विचारश्चाप्यतः परम् ॥३१॥]

अतो यथोक्तादिति। अतो यथावर्णिताच्चैत्तसहोत्पादनियमात्। **कौकृत्यं मिद्धं च सर्वथा नास्तीति।** न कुशलं नाप्यव्याकृतम्। कुत एवाकुशलमिति। सर्वथा मिद्धं कौकृत्यं च नास्ति। **शाठ्यमदमायावर्ज्या** इति।

माया शाठ्यं च कामाद्यध्यानयोर्ब्रह्मवञ्चनात्[3]

स्त्यानौद्धत्यमदा धातुत्रये[4]

इति वचनात्। एतानि वर्ज्यन्ते तेषां तत्र सद्भावात्। **अन्यत्सर्वं तथैवेति।** कुशले चित्ते पूर्ववत् द्वाविंशतिः। आवेणिके दृष्टियुक्ते च निवृता-

---

1 Mss. काश्मीर०

2...2 B. & To. supply this from Tib. C seems to have in the f. n. a few letters which are illegible.

3 Mss. ०ब्रह्मचर्यदं०

4 Kārikā, V. 53.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याकृतेऽष्टादश कामधातुवत्। रागमानविचिकित्सान्यक्लेशसंप्रयुक्ते माया-शाठ्यमदोपक्लेशसंप्रयुक्ते च एकान्नविंशतिः। ते च स च क्लेश उपक्लेशो वा तत्रैकान्नविंशो भवति। अनिवृताव्याकृते विपाकजैर्यापथिकनैर्माणिके पूर्ववत् द्वादश।

ध्यानान्तरे वितर्कश्च

इति। कौकृत्यमिद्धाकुशलानि चेति चशब्दः। किम्' न सन्तीत्यधिकृतम्। **शेषं तथैव** वितर्कन्यूनं **यथा प्रतिषिद्धं** नास्तीति। कौकृत्यमिद्धाकुशलवितर्का न सन्तीत्यर्थः। **विचारश्च मायाशाठ्यं** **चे**त्यपिशब्दादिति। विचारश्चेति एतावति वक्तव्ये

विचारश्चापि

इत्यपिशब्दाधिक्यादर्थाधिक्यमिति। मायाशाठ्यमपि तत्र नास्तीत्ययमपरार्थो लभ्यते। मदस्तु नापास्यते'

स्त्यानौद्धत्यमदा धातुत्रये[1]

इति वचनसामर्थ्यात्। **शेषं तथैवेति**। कुशले वितर्कविचारनिर्मुक्ता विंशतिः। आवेणिके दृष्टियुक्ते षोडश। रागादिक्लेशसंप्रयुक्ते मदोपक्लेश-संप्रयुक्ते च सप्तदश। दश महाभूमिकाः षट् क्लेशमहाभूमिकाः। स च क्लेशः स वोपक्लेशः[2]। अनिवृताव्याकृते दश महाभूमिका य[3] एवेति गमनीयम्[4]। **ब्रह्मणो हि॰ यावच्छाठ्यमिति** विस्तरः। तत्र शाठ्यपूर्वकत्वान्मायापि गृहीता भवति। **पर्षत्संबन्धान्नोर्ध्वमिति**। येषां पर्षदस्ति तेषां पर्षद्ग्रहणार्थं माया-शाठ्यं प्रवर्तते। अष्टौ पर्षदः पठ्यन्ते' क्षत्रियपर्षद्ब्राह्मणपर्षद्गृहपति-पर्षच्छ्रमणपर्षच्चातुर्महाराजिकपर्षत्त्रयस्त्रिंशत्पर्षन्मारपर्षद्ब्रह्मपर्षत्। तासामन्य-तमाऽपि[5] ऊर्ध्वमतो नास्तीति मायाशाठ्याभावः। ब्रह्मणस्तु पर्षदस्ति। तस्मादाह' **स हि स्वस्यां पर्षदि निषण्णोऽश्वजिता भिक्षुणा** ब्रह्मलोकगतेन **प्रश्नं पृष्टः' कुत्रेमानि चत्वारि महाभूतान्यपरिशेषं निरुध्यन्त** इति। **अप्रजानन्नारूप्यधातौ** चत्वारि महाभूतान्यशेषं निरुध्यन्त इत्यनवबुध्यमानः **क्षेपं** कथाप्रकरणमकार्षीत्। **अहमस्मि ब्रह्मेति** विस्तरः। ब्रह्मेत्युक्त्वा **महा-**

1 Kārikā, V. 53.

2 Mss. चोप०

3 B. & To. following Tib, omit य.

4 B. गणनीयम्.

5 B. & To ०तमोपि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मेति वचनं ब्रह्मान्तरेभ्य आत्मनो विशिष्टत्वप्रदर्शनार्थम् । **ईश्वर** ईशनशीलः **कर्ता निर्माता स्रष्टा सृज**[1] इति पर्याया उत्तरोत्तरव्याख्यायोगो वा । **पितेव** पितृभूतः । केषाम् ' भावानाम् ॥३१॥

[अह्रीरगुरुतावद्ये भयादर्शित्वमत्रपा ।
प्रेम श्रद्धा गुरुत्वं ह्रीरुभयं कामरूप्ययोः ॥३२॥]

उक्तमेतदिति विस्तरः । या **भूमिर्यच्चित्तं** यावन्तश्च **चैत्ताः** ' सा भूमिस्तच्चित्तं तावन्तश्च चैत्ता इत्युक्तमेतत् । तत्र विहितमिति । शास्त्रे विहितम् । स एव चात्रार्थः । **गुणेषु गुणवत्सु चेति** । तत्र विहितमिति केचित्पठन्ति । स्वपरसान्तानिकेषु मैत्रीकरुणादिषु । गुणेषु गुणवत्सु च पुद्गलेष्वाचारगोचरगौरवादिसंपन्नेषु । यद्योगाद्गौरवं न करोत्यसावगौरवता । नास्ति गौरवमस्येत्यगौरवः ' तद्भावोऽगौरवता ' चैतसिकविशेषः । कोऽसाविति पर्यायावाहुः ' **अप्रतीशता अभयवशवर्तितेति** । शिष्यं प्रति इष्ट इति प्रतीशी गुरुस्थानीयः ' नास्ति प्रतीशोऽस्येत्यप्रतीशः ' तद्भावोऽप्रतीशता । भावाभिधानेन चैत्तो गृह्यते । भयं नाम मानसश्चैत्तो धर्मः । भयेन वशे वर्तितुं शीलमस्येति भयवशवर्ती ' न भयवशवर्ती अभयवशवर्ती ' तद्भावोऽभयवशवर्तिता । **तदेव चाह्रीक्यम्** । नास्ति ह्रीरस्येत्यह्रीकः ' तद्भाव आह्रीक्यम् । **स च गौरवप्रतिद्वन्द्वो धर्मः** ' न तदभावमात्रम् ।

अवद्ये भयादर्शित्वमत्रपा

इति । अवाच्यमवद्यम् । अतश्चाह ' **अवद्यं नाम यद्गर्हितं सद्भिरिति** । तत्राभयदर्शिता **अनपत्राप्यमिति** । अवद्येऽनिष्टफलादर्शितेत्यर्थः । **भीयतेऽस्मादिति** । अत्र भयशब्दोऽपादानसाधनः । तस्माद्भयशब्देन **अनिष्टं फलमुच्यते** । **अभयस्य दर्शनमभयदर्शितेति** विस्तरः । यदि तावदेवं क्रियेत ' न भयमभयम् ' अभयं द्रष्टुं शीलमस्येत्यभयदर्शी ' तद्भावोऽभयदर्शितेति **प्रज्ञा विज्ञास्यते** । [2]प्रज्ञया ह्यभयं पश्यति । अथ पुनरेवं क्रियेत[3] ' भयं द्रष्टुं शीलमस्येति भयदर्शी ' **न भयदर्शी** अभयदर्शी ' [4]तद्भावोऽभयदर्शिता[4] । **अभयदर्शितेत्यविद्या विज्ञास्यते** । तथा ह्यविद्यायोगाद्भयं न पश्यति । नैव

1 V. सृत
2 A प्रज्ञा या हि भयं पश्यति
3 Mss. क्रियते
4...4 A भयदर्शिता न भयदर्शिता, C तद्भावः भयदर्शिता न भयदर्शिता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि दर्शनं दर्शितेति विस्तरः। न प्रज्ञा नाप्यविद्या। किं तर्हि' तयोः प्रज्ञाविद्ययोर्यो निमित्तमुपक्लेशस्तदभयदर्शनम्। तच्चानपत्राप्यमिति। अपलपते[1] ऽनेनेत्यपलाप्यम्। [2]कृत्यल्युटो बहुलमिति करणे ण्यत्प्रत्ययः। न अपलाप्यमनपलाप्यमिति।

[3]ह्री लज्जायां [4]त्रपूष् लज्जायामित्येकार्थयोरनयोर्धात्वोः कथमर्थान्तरे वाचकत्वमित्यपरितुष्यन्तोऽन्ये पुनराहुः' आत्मापेक्षयेति विस्तरः। एवमपि द्वे अपेक्षे युगपत्कथं सेत्स्यत इति। अस्मिन्नपि पक्षे युगपदपेक्षाद्वयासंभव इति परस्यांश्चोदक आह। एवमपीति। अपिशब्देनायमपि पक्षो दुष्यतीत्यभिप्रायः। आह्रीक्यमनपत्राप्यं चैकस्मिंश्चित्ते कथं भवत इति मत्वा चोदयति' द्वे अपेक्षे युगपत्कथं सेत्स्यत इति। न खलूच्यते युगपदात्मानं परं चापेक्षत इति विस्तरः। पर्यायेण वृत्तिमनयोर्दर्शयति। कस्यचिद्धि दोषैरात्मानमपेक्षमाणस्यापि न प्रवर्तते लज्जा। कस्यचित्परमपेक्षमाणस्येति। विपर्ययेण ह्रीरपत्राप्यं चेति विस्तरः। प्रथमेन तावत्कल्पेन

अह्रीरगुरुतावद्ये भयादर्शित्वमत्रपा

इत्येनेन। सगौरवतेति विस्तरेण भयदर्शिता अपत्राप्यमिति। भयदर्शितानिमित्तमपत्राप्यमित्यर्थः। द्वितीयेन कल्पेन आत्मापेक्षया दोषैरलज्जनमाह्रीक्यं परापेक्षयानपत्राप्यमित्यनेन आत्मापेक्षया दोषैर्लज्जनं ह्रीः। परापेक्षयापत्राप्यमिति। एवमपि द्वे अपेक्षे इति विस्तरेण चोद्यपरिहारौ वक्तव्यौ।

प्रेमगौरवयोरेकत्वं मन्यन्ते केचित्। तस्मादनयोर्नानाकरणप्रदर्शनार्थमाह'

प्रेम श्रद्धा

इति। प्रेमैव श्रद्धा न गौरवम्। न तु श्रद्धैव प्रेम। तेनाह' द्विविधं हि प्रेम क्लिष्टमक्लिष्टं चेत्यादि। स्याच्छ्रद्धा न प्रेमेति चतुष्कोटिकः। दुःखसमुदयसत्ययोः श्रद्धैवाभिसंप्रत्ययरूपा[5]। न प्रेम अस्पृहणीयत्वात्। स्यात्प्रेम न श्रद्धेति। प्रियतारूपा तृष्णा नाभिसंप्रत्ययरूपेति श्रद्धा न भवति। उभयं श्रद्धा च प्रेम च। अभिसंप्रत्ययरूपत्वात्स्पृहणीयत्वाच्च निरोधमार्गसत्ययोस्तदुभयात्मकं भवतीत्यर्थः। नोभयमेतानाकारान् स्थापयित्वेति। अन्ये चैतसिका वेदनादयो विप्रयुक्तादयश्च। एवं धर्मालम्बनस्य प्रेम्णः श्रद्धायाश्च[6] चतुष्कोटिकं कृत्वा पुद्गलालम्बनस्य चतुष्कोटिकं

---

1 Mss. ०त्यनेन

2 Pā., III. 3. 113.

3 Dhā., I. 399.

4 Dhā., III. 3.

5 Mss. ०प्रत्यरू०

6 Mss. omit च.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करोति । पुद्गलेष्विति विस्तरः । तत्र सार्धं विहरन्तीति सार्धविहारिणः शिष्याः । ये प्रव्रजिता गुरोरन्ते वसन्तीत्यन्तेवासिनो निश्रयाध्ययनसंबन्धिनः । तेषु पुत्रादिषु प्रेम न गौरवं क्लिष्टमक्लिष्टं चेति संभवतः । गौरवं न प्रेम ।

गुरुत्वं ह्रीः

इति वक्ष्यमाणलक्षणं गौरवं न प्रेम गौरवस्थानत्वात् । उभयम् प्रेम गौरवं च तदुभयात्मकं भवतीत्यर्थः । नोभयमेतानाकारान् स्थापयित्वा । योऽन्यो जनो ऽसंबद्धो निर्गुणः । तत्र न प्रेम न गौरवमिति । तत्पूर्विका च प्रियता प्रेमेति । गुणसंभावनापूर्विका प्रियता तच्च प्रेम । तस्मान्न सैव श्रद्धा प्रेमेत्याचार्यः ।

गुरुत्वं ह्रीः

इति । यथोक्ता ह्रीः सगौरवता सप्रतीशता सभयवशवर्तितेत्युक्ता । या ह्रीस्तद्गौरवम् । तदेवं प्रेम श्रद्धालक्षणं भवति । ह्रीलक्षणं तु गौरवमित्युक्तं तयोर्नानाकरणम् । एवं सप्रतीशतापीति । एवं ह्रीरपि । धर्मेषु च पुद्गलेषु च । ये पुद्गलालम्बने श्रद्धाह्रियौ ते तत्र न स्त इति । पुद्गलालम्बने श्रद्धाह्रियावधिक्रियेते[1] ययोरैक्यं मन्यन्ते । [2]ते आरूप्यधातौ[2] न स्तः । कामरूप्यधात्वोरेव भवत इत्युक्तम् ॥३२॥

[वितर्कविचारौदार्यसूक्ष्मते मान उन्नतिः ।
मदः स्वधर्मे रक्तस्य पर्यादानं तु चेतसः ॥३३॥]

कथं पुनरनयोरेकत्र चित्ते योग इति । न हि तदेव चित्तं तद्योगादौदारिकं च सूक्ष्मं च युज्यते विप्रतिषेधात् । निष्ठ्यूतमिति निःपूर्वस्य [3]ष्ठीवतेर्निष्ठायाभेतद्रूपं निष्ठ्यूतम् निरस्तमित्यर्थः । नातिश्यायते नातिघनीभवति । नातिविलीयते नातिद्रवीभवति । नातिसूक्ष्मं भवति नात्यौदारिकमिति । मध्यमावस्थमित्यर्थः । एवं तर्हि निमित्तभूताविति विस्तरः । यथोदकातपौ सर्पिषः श्यानत्वविलीनत्वयोर्निमित्तभूतौ न तु पुनस्तत्स्वभावौ श्यानत्वविलीनत्वस्वभावौ । एवं वितर्कविचारौ चित्तस्यौदारिकतासूक्ष्मतयोर्निमित्तभूतौ न तु पुनरौदारिकसूक्ष्मतास्वभावाविति । अत एवं वक्तव्यम् चित्तौदारिकताहेतुर्वितर्कः चित्तसूक्ष्मताहेतुर्विचार इति । अयुक्तस्त्वमभ्युपगमाददोष एष इति । तत इदं दोषान्तरमाह आपेक्षिकी चौदारिकसूक्ष्मतेति विस्तरः । भूमिप्रकारभेदान् ।

---

1 Mss. ०क्रियते 2...2 Mss. चारूप्यधातौ

3 To. ष्ठीवते निष्ठाया०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भूमिभेदात्प्रकारभेदाच्च। भूमिभेदात्तावत् प्रथमध्यानमपेक्ष्य कामधातुरौदारिको महाभिसंस्कारतरत्वात्। कामधातुमपेक्ष्य प्रथमं ध्यानं सूक्ष्ममल्पाभिसंस्कारतरत्वात् प्रशान्तमिति। तदेव पुनर्द्वितीयं ध्यानमपेक्ष्यौदारिकम्। एवं **यावद्भवाग्रं** सूक्ष्मम्। प्रकारभेदादपि तस्यामेव भूमावापेक्षिक्यावौदारिकसूक्ष्मते। तद्यथा य एव ते त्रयः क्लेशानां मूलप्रकारा मृदुमध्याधिमात्रा गुणानां च। कामधातौ यावद्भवाग्रे तेषामधिमात्रः क्लेश औदारिकः। मृदुः सूक्ष्मः। क्लेशविपर्ययेण गुणानामिति। एवं भूमिप्रकारभेदेनापेक्षिक्यावौदारिकसूक्ष्मते इति **आभवाग्रादौदारिकसूक्ष्मते स्याताम्**। अशिष्टं चैतत्। वितर्कविचारयोः कामधातुप्रथमध्यानभूमिकत्वादिति। **न चौदारिकसूक्ष्मतया जातिभेदो युक्त** इति। वितर्कविचारयोर्जातिभेद इष्यते। अन्यो वितर्कोऽन्यो विचार इति। न चौदारिकत्वेन सूक्ष्मत्वेन **च वितर्कविचारयोर्यथाक्रमं स्वभावभेदो युक्तः**। किं कारणम्। जातिभिन्नयोर्हि वेदनासंज्ञयोरौदारिकसूक्ष्मता भवति। न च पुनरौदारिकसूक्ष्मतयैव तयोः स्वभावभेदः। किं तर्हि। अनुभवलक्षणतया निमित्तोद्ग्रहणलक्षणतया च तयोः स्वभावभेदः। तस्मादप्यनयोर्नास्ति लक्षणम्। **अन्ये पुनराहुरिति** सौत्रान्तिकाः। **वाक्संस्कारा** इति। वाक्समुत्थापका इत्यर्थः। **वितर्क्य विचार्य वाचं भाषते नावितर्क्य नाविचार्येति**[1]। वितर्कविचारैरेवं चैवं च भाषिष्य इति। **तत्र ये औदारिकास्ते वितर्का** वाक्संस्काराः। कर्मणा स्वभावो द्योतितो न शक्यमन्यथा स्वलक्षणं प्रदर्शयितुमिति। **एवं सूक्ष्मास्ते विचाराः**। एतस्यां कल्पनायां समुदायरूपा वितर्कविचाराः पर्यायभाविनश्च भवन्ति। चित्तचैत्तकलापस्य वाक्समुत्थापकत्वात्। कथं पुनरनयोरेकत्र चित्ते योग इत्युक्तम्। अतो वैभाषिक आह। **यदि चैकत्र चित्तेऽन्योधर्म औदारिक** इति विस्तरः। एकत्र चित्ते वितर्क औदारिकस्वभावोऽन्यो धर्मः। विचारस्तु सूक्ष्मस्वभावोऽपरः। तौ च यथाक्रमं चित्तौदारिकतासूक्ष्मताहेतुत्वाच्चित्तौदारिकतासूक्ष्मतेत्युच्यते। अथ वा [2]चित्तस्यौदारिकश्चित्तौदारिकः[2]। चित्तौदारिकभावश्चित्तौदारिकता। एवं चित्तसूक्ष्मतापि वक्तव्येति **कोऽत्र विरोधः। न स्याद्विरोधो यदि** वितर्क**विचारयोर्जातिभेदः स्याद्वेदनासंज्ञावत्**। वेदना ह्यौदारिकी। संज्ञा सूक्ष्मा। तयोस्तु जातिभेदोऽस्तीति। औदारिकसूक्ष्मतायामप्येकत्र चित्ते न विरोधः।

---

1 Mss. add वितर्क्य विचार्येति. 2...2 A & C चित्तौदारिकः चित्तोदारिकः, V. simply चित्तोदारिकः

एकस्यां तु जातावनवधृतलक्षणायामैक्येन च कैश्चिद्गृहीतायां **मृद्वधिमात्रता** औदारिकसूक्ष्मतालक्षणा **युगपन्न** [1]**संभवती**त्यर्थादयुगपत् संभवतीत्युक्तम्। तथा हि वेदना अन्यो वा धर्मः पर्यायेण मृदुतामधिमात्रतां च भजते। **नैवं व्यक्तो भवति।** किम्, जातिभेदः। कस्मात्, **प्रत्येकं जातीनां मृद्वधिमात्रत्वात्।** वेदना ह्यौदारिकी भवति सूक्ष्मा वापेक्षाभेदात्। कथमिति, वेदना संज्ञामपेक्ष्यौदारिकी, रूपमपेक्ष्य सूक्ष्मा। तथा संज्ञा संस्कारानपेक्ष्यौदारिकी, वेदनामपेक्ष्य सूक्ष्मा। **वितर्कविचारवदेव वा।** भवतोऽपि हि कामावचरौ वितर्कविचारावौदारिकौ प्रथमध्यानभूमिकौ सूक्ष्मौ, ध्यानान्तरे च विचारः सूक्ष्मतर इति। तदेवं प्रत्येकं जातीनां मृद्वधिमात्रत्वान्नैवं व्यक्तो भवति, न मृद्वधिमात्रतया जातिभेदो व्यक्तो भवतीत्यर्थः। अत्र [2]संघभद्र आचार्य[2] आह, एकत्र च चित्ते औदारिकसूक्ष्मते भवतः। न च विरोधः प्रभावकालान्यत्वात्। यदा हि चित्तचैत्तकलापे वितर्क उद्भूतवृत्तिर्भवति, तदा चित्तमौदारिकं भवति। यदा[3] विचारस्तदा सूक्ष्मम्, रागमोहचरितव्यपदेशवत्। रागमोहयौगपद्येऽपि हि तयोरन्यतरोद्भूतवृत्तियोगाद् रागचरितो मोहचरित इति वा व्यपदिश्यते। तद्वदिहापि द्रष्टव्यमिति। अत्र वयं ब्रूमः, भवति कस्मिंश्चित्कलापे कस्यचिद्धर्मस्योद्भूतवृत्तित्वम्, किं त्वनयोर्न लक्षणं विवेचितमिति, न किञ्चिदेतत्। ननु च चित्तौदारिकतासूक्ष्मतालक्षणौ वितर्कविचारावुक्तौ। सत्यमुक्तौ। प्रत्येकं तु जातीनामौदारिकसूक्ष्मते इति तावौदारिकसूक्ष्मतालक्षणौ भवितुमर्हतो यथोक्तमिति नैतदस्मानाराधयति। **नैव हि वितर्कविचारावेकत्र चित्ते भवत इत्यपर** इत्याचार्यमतम्। अस्मिन्मते यथोक्तदोषप्रसङ्गो न भवति। कस्त्वनयोः पर्यायवर्तिनोर्विशेषः। अत्र पूर्वाचार्या आहुः। वितर्कः कतमः, चेतनां वा निश्रित्य प्रज्ञां वा पर्येषको मनोजल्पोऽनभ्यूहाभ्यूहावस्थयोर्यथाक्रमं सा च चित्तस्यौदारिकता। विचारः कतमः, चेतनां वा निश्रित्य प्रज्ञां वा प्रत्यवेक्षको मनोजल्पोऽ[4]नभ्यूहाभ्यूहावस्थयोर्यथाक्रमम्। सा च चित्तसूक्ष्मतेति[5]। अस्मिन्पक्षे वितर्कविचारावेकस्वभावौ समुदायरूपौ पर्यायवर्तिनौ पर्येषणप्रत्यवेक्षणाकारमात्रेण भिन्नाविष्येते[6]। तत्रोदाहरणं केचिदाचक्षते,

---

1 To. संभवतीत्य०

2...2 To. संघभद्राचार्य

3 Mss. & B. यदि

4 A & C अनव्यूहाभ्यूहावस्थ०, V अनव्यूहावस्थ०

5 Mss. omit इति.

6 Mss. ०विष्यते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्यथा बहुषु घटेष्ववस्थितेषु को ऽत्र दृढः को जर्जर इति मुष्टिनाभिघ्नतो य ऊहः स वितर्कः। इयन्तो जर्जरा दृढा वेति यदन्ते ग्रहणं स विचार इति। कथमिदानीं प्रथमं ध्यानं पञ्चाङ्गमिति विस्तरः। विविक्तं कामैर्विविक्तं पापकैरकुशलैर्धर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरतीति सूत्रे पञ्चाङ्गमुक्तम्। तत्कथम्। भूमितस्तत्पञ्चाङ्गमुक्तं न क्षणत इति। प्रथमध्यानभूमिः कदाचिद्वितर्केण व्यवकीर्णा। कदाचिद्विचारेण। तदेवं सन्तानमधिकृत्य पञ्चाङ्गमुक्तम्। न क्षणमधिकृत्येत्यदोषः।

येन केनचित्परतो विशेषपरिकल्पेनेति। भूतेनाभूतेन वा परत उत्कर्षपरिकल्पेन शूरोऽर्थवानस्मि शीलवान् बुद्धिसंपन्न इति वा या चेतस उन्नतिः स मानो नाम चैतसिको धर्मः।

पर्यादानं तु चेतसः

इति तुशब्दो विशेषणार्थो भिन्नक्रमश्चावगन्तव्यः। अत एवाह। मदस्तु स्वधर्मेष्वेव रक्तस्येति[1] विस्तरः। चेतसः पर्यादानमिति। येन स्वधर्मेष्वेव रूपशौर्यादिषु[2] रक्तं चेतः पर्यादीयते संनिरुध्यते स रागनिष्यन्दो मदः। यः स्वधर्मेष्वेव रक्तस्य [3]दर्पचेतसः पर्यादानात्कुशलधर्मक्रियाभ्यः प्रतिसंहारो[3] मद इत्याचार्यसंघभद्रः। संप्रहर्षविशेषो मद इति। क्लिष्टसौमनस्यमभिप्रेतम्। तदेतन्नेच्छन्ति वैभाषिकाः। यस्मात्सौमनस्यमा द्वितीयाद्ध्यानात्। मदश्च त्रैधातुकः

स्त्यानौद्धत्यमदा धातुत्रये[4]

इति वचनात् ॥३३॥

[चित्तं मनोऽथ विज्ञानमेकार्थं चित्तचैतसाः।
साश्रयालम्बनाकाराः संप्रयुक्ताश्च पञ्चधा ॥३४॥]

उक्ताः सह चित्तेन चैत्ताः प्रकारेणेति। चित्तं तावत्प्रकारेणोक्तं

विज्ञानं प्रतिविज्ञप्तिः[5]

---

1 Mss. omit इति.
2 Mss. ०सौन्दर्यादिषु
3...3 C दर्पं चेतसः पर्यादानं कुशलान्यक्रियाभ्युपप्रतिसंहारः ; A ०कुशलान्यक्रियाभ्यु-प्रति० ; V कुशलान्यकं वात्मप्रति०
4 Kārika, V. 53.
5 Kārikā, I. 16.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्येवमादिना[1]स्वलक्षणस्कन्धधात्वायतनकुशलादिप्रभेदेन[2]। चैत्ता अपि स्वलक्षणपरस्परविशेषेण[3] चित्तसंख्यावधारणकामप्रथमध्यानादिभूमिप्रभेदेन

एकार्थम्

इति। यच्चित्तं तदेव मनस्तदेव विज्ञानमित्येकोऽर्थोऽस्येत्येकार्थम्। निर्वचनभेदस्तूच्यते। चिनोतीति चित्तमिति। कुशलमकुशलं वा चिनोतीत्यर्थः। नैरुक्तेन विधिनैवं[4] सिद्धम्। मनुत इति मनः। मन ज्ञान इत्यस्य औणादिकप्रत्ययात्तस्यैतद्रूपं मन इति। विजानात्यालम्बनमिति विज्ञानम्। कर्तरि ल्युट्। चितं शुभाशुभैर्धातुभिरिति चित्तम्। [5]वासनासंनिवेशयोगेन सौत्रान्तिकमतेन योगाचारमतेन वा। आश्रयभूतं मन आश्रितभूतं विज्ञानमिति। आश्रयभावापेक्षं मनः।

षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः[6]

इत्यर्थपरिग्रहात्[7]। आश्रितभावापेक्षं विज्ञानम्। द्वयं प्रतीत्य विज्ञानस्योत्पत्तिरिति वचनात्

चित्तचैतसाः।

[8]साश्रयालम्बनाकाराः संप्रयुक्ताश्च

इति। चशब्द एकानुकर्षणार्थः। य एव हि चित्तचैत्ता इत्यनेन शब्देनाभिहितास्त एव साश्रया इत्यनेनापि शब्देनाभिधीयन्ते। एवं सालम्बनाः साकाराः संप्रयुक्ताश्च। तत्र साश्रया इन्द्रियाश्रितत्वात् षडायतनाश्रितत्वादित्यर्थः। सालम्बना[9] विषयग्रहणात्। न हि विनालम्बनेन चित्तचैत्ता उत्पद्यन्ते। साकाराः तस्यैवालम्बनस्य प्रकारेणाकारणात्[10]। येन ते सालम्बनाः तस्यैवालम्बनस्य प्रकारेण[11] ग्रहणात्। कथम्। विज्ञानं हि नीलं [12]पीतं वा वस्तु विजानाति उपलभत इत्यर्थः। तदेव [13]तथालम्बनं वस्तु वेदनानुभवति। संज्ञा परिच्छिनत्ति। चेतनाभिसंस्करोतीत्येवमादि। अथ वा तस्यैवालम्बनस्य विज्ञानं सामान्यरूपेणोपलभ्यतारूपं गृह्णाति। विशेषरूपेण तु वेदनानुभवनीयतारूपं

---

1 Mss. स लक्षण०
2 Mss. ०यतन कुशलादिप्र०
3 Mss. ०विशेष
4 Mss. नैव
5 Mss. भावना०
6 Kārikā, I. 17.
7 V ०निग्रहात्
8 Mss. आश्रया
9 Mss. सालम्बन
10 Mss. प्रकारणाकरणात्
11 Mss. ०कारणे
12 V. नीलपीते
13 Mss. तदा०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गृह्णाति । संज्ञा परिच्छेद्यतारूपं गृह्णातीत्येवमादि । **संप्रयुक्ताः समं प्रयुक्तत्वा-दिति** । समा अविप्रयुक्ताश्चान्योन्यमिति संप्रयुक्ताः । **आश्रयालम्बनाकारकाल-द्रव्यसमताभिरिति** । येनाश्रयेण चित्तमुत्पद्यते । तेनैवाश्रयेण वेदनासंज्ञाचेतनादय उत्पद्यन्ते । तथा येनालम्बनेन चित्तम् । तेनैव वेदनादयः । येनाकारेण चित्तम् । तेनैव वेदनादयः । यदि हि नीलाकारं चित्तम् । नीलाकारा एव तत्संप्रयुक्ता वेदना-दय उत्पद्यन्ते । यस्मिंश्च काले चित्तम् । तस्मिन्नेव वेदनादयः । यथा च चित्तद्रव्य-मेकमेवोत्पद्यते । न द्वे त्रीणि वा । तथा वेदनाद्रव्यमेकमेवोत्पद्यते । न द्वे त्रीणि वा । तथा संज्ञाद्रव्यं चेतनाद्रव्यमित्येवमादि । तेनेदमेवान्त्यं दुर्गमिति व्याचष्टे । यथैव ह्येकं चित्तम् । **एवं चैत्ता अपि एकैका** इति ॥३४॥

[विप्रयुक्तास्तु संस्काराः प्राप्त्यप्राप्तिसभागता ।
आसंज्ञिकसमापत्ती जीवितं लक्षणान्यपि ॥३५॥
नामकायादयश्चेति]

विप्रयुक्तान् वक्तुकाम आचार्य उपोद्घातं करोति । **निर्दिष्टाश्चित्तचैत्ताः सवि-स्तरप्रभेदाः** । विप्रयुक्तास्त्ववसरप्राप्ता इदानीमुच्यन्त इत्यभिप्रायः । सविस्तर-प्रभेदा इति । विस्तरश्च प्रभेदश्च विस्तरप्रभेदौ । सह विस्तरप्रभेदाभ्यां सविस्तर-प्रभेदाः । अथ वा विस्तरेण प्रभेदः विस्तरप्रभेदः । सह विस्तरप्रभेदेन सविस्तर-प्रभेदाः । तत्र चित्तं तावत् सविस्तरप्रभेदं[1] निर्दिष्टम्

विज्ञानं प्रतिविज्ञप्तिर्मनआयतनं च[2]

इत्येवमादिना । चैत्ता अपि

वेदनानुभवः[3]

इत्यारभ्य यावत्

पञ्चधा चैत्ताः[4]

इति विस्तरेण ।

नामकायादयश्च

इति । [5]चशब्द एवंजातीयकानुक्तविप्रयुक्तप्रदर्शनार्थः । संघभेदप्रभृतयो हि द्रव्यतश्चित्तविप्रयुक्ता इष्यन्त इति । येऽप्येवंजातीयका इति शास्त्रेऽप्युक्तत्वात् । चित्तविप्रयुक्ता इति चित्तग्रहणं चित्तसमानजातीयप्रदर्शनार्थम् । चित्तमिव चित्तेन

1 Mss. प्रभेदेन
2 Kārikā, I. 16.
3 Kārikā, I. 14.
4 Kārikā, II. 23.
5 Mss. इति शब्द

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च विप्रयुक्ता इत्यर्थः । किं च तेषां चित्तेन समानजातीयत्वम् । यदरूपिणोऽमी भवन्ति । रूपित्वादेव हि विप्रयुक्तत्वेऽपि रूपं न विप्रयुक्तत्वे[1] नाम लभते । यद्वामीषां नामरूपमिति नामत्वम् । तत्तेषां चित्तेन समानजातीयत्वम् । चैत्ता अपि चित्तेन तुल्यजातीयाः । ते तु चित्तेन सहालम्बने संप्रयुक्ताः । तद्विशेषणार्थं विप्रयुक्तग्रहणम् । असंस्कृतमपि तत्समानजातीयमनालम्बनत्वेनेति तत्परिहारार्थं संस्कारग्रहणम् । अत एवाह । **इमे संस्कारा न चित्तेन संप्रयुक्ताः** ' **न च रूपस्वभावा इति चित्तविप्रयुक्ता उच्यन्त** इति ॥

[प्राप्तिर्लाभः समन्वयः ।

प्राप्त्यप्राप्ती स्वसन्तानपतितानां निरोधयोः ।३६।।]

तत्रेति वाक्योपन्यासे निर्धारणे वा । तावच्छब्दः क्रमे ।

प्राप्तिर्लाभः समन्वयः

इति । प्राप्तिरिति सामान्यसंज्ञा । लाभः समन्वय इति विशेषसंज्ञा । लाभः प्रतिलम्भ [2]इत्येकार्थः । समन्वयः समन्वागम इत्यनर्थान्तरम् । प्रतिलम्भ इत्युक्ते समन्वागमस्याग्रहणम् । समन्वागम इत्युक्ते प्रतिलम्भस्याग्रहणम् । प्राप्तिरित्युक्ते तूभयोर्ग्रहणम्[3] । अत एवाह ' **द्विविधा हि प्राप्तिरप्राप्तविहीनस्य च प्रतिलम्भः प्रतिलब्धेन** [4]**च समन्वागम** इति । अप्राप्तं च विहीनं चाप्राप्तविहीनम् । तस्याप्राप्तविहीनस्य प्रतिलम्भः । अप्राप्तस्य तद्यथा दुःखे धर्मज्ञानक्षान्तेः । विहीनस्य तद्यथा कामावचरस्य कामवैराग्येण त्यक्तस्य धातुप्रत्यागमनात् परिहाण्या वा पुनःप्रतिलम्भः । प्रतिलब्धेन च द्वितीयादिषु क्षणेषु समन्वागमः ' तस्याः समनुवर्तनात् । यश्च प्रतिलम्भो यश्च समन्वागमः । सा द्विधा प्राप्तिरिति प्रतिलम्भे समन्वागमे च प्राप्तिशब्दो वर्तते । अभेदविवक्षायां तु प्राप्तिः प्रतिलम्भः समन्वागम इत्येक एवार्थः । तथा हि प्रथमे क्षणे दुःखे धर्मज्ञानक्षान्तेः प्राप्तिः प्रतिलम्भ इष्यते । सापि समन्वागम इत्युच्यते । प्रथमक्षणस्थ आर्यपुद्गलो दुःखे धर्मज्ञानक्षान्त्या समन्वागत इत्युच्यते'

आज्ञास्यामीन्द्रियोपेतस्त्रयोदशभिरन्वितः[5]

इत्यादिवचनात् । कथमयं लक्षणनिर्देशः । न हि भेदविवक्षायामपि पर्याय-

---

1 Mss. विप्रयुक्तत्व

2 B. & To. इत्येकोऽर्थः

3 A & C °भयाद्ग्रहणं

4 Mss. omit च.

5 Kārikā, II. 19.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वचनेन लक्षणनिर्देशः कल्पते। प्राप्तिः[1] कतमा। यः प्रतिलम्भो यः समन्वागम इति। पर्यायवचनमपि कदाचित् लक्षणाय कल्पते। अनलो जातवेदा अग्निरिति। सूत्रेऽप्युक्तम्। अविद्या कतमा। [2]यत्पूर्वान्ते अज्ञानमपरान्त अज्ञानमिति विस्तरः। [3]**विपर्ययादप्राप्तिरिति सिद्धमिति।** विपर्ययादेवाप्राप्तिरिति सिद्धे [4]नैतदर्थं सूत्रं कर्तव्यमित्यभिप्रायः। अप्राप्तिरप्रतिलम्भोऽसमन्वागम इति विपर्ययादेतत्त्रयं गम्यते। तथैव चाप्रतिलम्भासमन्वागमयोरप्राप्तिरिति सामान्यसंज्ञा। तस्मादेवं [5]च वक्तव्यम्। द्विविधा अप्राप्तिरप्राप्तपूर्वाणामप्रतिलम्भः प्राप्तविहीनानामसमन्वागम इति। अथ वाप्रतिलब्धस्य विहीनस्य चाद्याप्राप्तिरप्रतिलम्भः। अप्रतिलब्धेन विहीनेन च द्वितीयादषु [6]क्षणेष्वसमन्वागम इति।

प्राप्त्यप्राप्ती स्वसन्तानपतितानाम्

इति। संस्कृतानां प्राप्त्यप्राप्ती स्वसन्तानपतितानामेवेत्यवधार्यते। **न परसन्तानपतितानामिति।** न परसत्त्वसन्ततिपतितानां धर्माणां स्वसन्ततौ प्राप्त्यप्राप्ती भवत इत्यर्थः। तेनाह **न हि परकीयैः कश्चित्समन्वागत** इति। **नाप्यसन्ततिपतितानामिति।** नासत्त्वसन्ततिपतितानामित्यर्थः। तस्मादाह **न ह्यसत्त्वसंख्यातैः कश्चित्समन्वागत** इति। माल्याभरणादयः काष्ठकुड्यादिगताश्च रूपादयोऽसत्त्वसंख्याताः। चक्षुरादयः सत्त्वसंख्याताः। केशादयो रूपीन्द्रियसंबद्धाः सत्त्वसंख्याता एव वेदितव्याः। तदनुग्रहोपघातपरिणामानुविधानात्। तथा हि रूपीन्द्रियोपघातात् पालित्यादिविकारः केशादीनां दृश्यते। रसायनोपयोगेन चानुग्रहात्पालित्यादिप्रत्यापत्तिरिति सर्वेषां सत्त्वसंख्यातानां प्राप्तिर्भवतीति सिद्धान्तः।

निरोधयोः

इति[7] प्रतिसंख्याप्रतिसंख्यानिरोधयोरसत्त्वसंख्यातयोरपि प्राप्त्यप्राप्ती भवतः। **सर्वसत्त्वा अप्रतिसंख्यानिरोधेन** यथा प्रत्ययवैकल्यं **समन्वागताः।** **सकलबन्धना-**

---

1 Mss. omit visarga.
2 To. omits यत्; V य पूर्वान्ते
3 To. विपर्ययादेवाप्राप्ति०
4 Mss. नैतं०
5 Mss. न
6 Mss. लक्षणे०
7 To. प्रतिसंख्यानिरोधाप्रतिसंख्यानिरोधयो०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दिक्षणस्थवर्ज्या इति । आदौ क्षणः दुःखे धर्मज्ञानक्षान्तिक्षणः । तत्र स्थिता आदिक्षणस्थाः । सकलानि बन्धनान्येषामिति सकलबन्धनाः । अप्रहीण-सर्वप्रकारक्लेशाः । सकलबन्धनाश्चादिक्षणस्थाश्च त इति सकलबन्धनादिक्ष-णस्थाः । ते वर्ज्या एषां तैर्वा वर्ज्याः सकलबन्धनादिक्षणस्थवर्ज्याः । के । सर्वे आर्याः । ते प्रतिसंख्यानिरोधेन समन्वागताः । सकलबन्धनादि-क्षणस्थास्त्वार्या न समन्वागताः । तस्यां ह्यवस्थायां क्षान्तिवध्याः क्लेशाश्छिद्यन्ते न छिन्नाः । तन्निरोधोऽपि प्राप्यते न प्राप्तः ।

निरुध्यमानो मार्गस्तु प्रजहाति तदावृतिम्[1]

इति सिद्धान्तात् । एकप्रकारोपलिखितादयस्त्वार्या लौकिकमार्गप्राप्तेन निरोधेन तस्यामवस्थायां समन्वागताः । अत ऊर्ध्वं द्वितीयादिषु क्षणेषु समन्वागता एव अनास्रवमार्गप्राप्तेनापि निरोधेन । पृथग्जनाश्च केचित्समन्वागता इत्येक-प्रकारोपलिखितादयः । आकाशेन तु नास्ति कश्चित्समन्वागत इति । असंबन्धात् । निरोधाभ्यां त्वस्ति संबन्धः । तस्मादाकाशस्य प्राप्तिर्नास्ति । यस्य च नास्ति प्राप्तिः । तस्याप्राप्तिरपि नास्तीति सिद्धान्त एष वैभाषि-काणाम् ।

कुत एतदिति । रूपादिचक्षुरादिवत्स्वरूपकार्यानुपलम्भात्पृच्छति । [2]सूत्रा-दिति । व्याख्यानमेव[2] वैभाषिकः साधयति । दशानामशैक्षाणां धर्माणामिति विस्तरः । दशाशैक्षा धर्मा [3]अष्टावशैक्षाण्यार्यमार्गाङ्गानि सम्यग्विमुक्तिः सम्यग्-ज्ञानञ्च । तेषामुत्पादात् संमुखीभावात् प्रतिलम्भाददितः प्राप्तेः समन्वागमात् पश्चात्प्राप्तेः । पञ्चाङ्गं विप्रहीणः प्रहीणपञ्चाङ्ग इत्यर्थः । पञ्चाङ्गानि सत्काय-दृष्टिः शीलव्रतपरामर्शो विचिकित्सा कामच्छन्दो व्यापाद इति । एतान्यनागामि-फलप्राप्तौ प्रहीणानीति न युज्यन्ते । इमानि तु प्रयुज्यमानानि पञ्चाङ्गानि पश्यामो यदुतोर्ध्वभागीयानि रूपराग आरूप्यराग औद्धत्यं मानोऽविद्या चेति । प्रतिनिधिभूतायाः प्राप्तेर्योगात् प्रकृतिस्थोऽप्यर्हन्नार्य इत्युच्यते । साधनं चात्र । द्रव्यतोऽस्ति समन्वागमः सूत्रोक्तत्वात् आयतनद्रव्यवदिति । आचार्यस्तं प्रत्याह । तेन तर्ह्यसत्त्वाख्यैरपि चक्ररत्नादिभिः परसत्त्वैरपि स्त्रीरत्नादिभिः

1 Kārikā, VI, 81.

2...2 Mss. सूत्रादिव्याख्यातमेव

3 Mss. अष्टावशैचा ह्यार्यं॰

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समन्वागमो द्रव्यसत्[1] **प्राप्नोति । सूत्रे वचनात्**[2] । कथमिति सूत्रं दर्शयति । **राजा** यावद्विस्तर इति । **राजा भिक्षवश्चक्रवर्ती सप्तभी रत्नैः समन्वागतः ।** तस्येमानि सप्त रत्नानि । तद्यथा चक्ररत्नं हस्तिरत्नमश्वरत्नं मणिरत्नं स्त्रीरत्नं गृहपतिरत्नं परिणायकरत्नमेवं[3] सप्तममिति विस्तरः । एभिः सप्तभी रत्नैः समन्वागमः[4] सूत्र उक्तः । न च द्रव्यतोऽस्तीत्यनैकान्तिकतां दर्शयति । प्रतिज्ञादोषं [5]चायमुद्भावयत्यनुमानविरोधात् । कथमित्युच्यते । न द्रव्यसन् दशाशैक्षधर्मसमन्वागमः समन्वागमस्वाभाव्यात् चक्रवर्तिसप्तरत्नसमन्वागमवदिति । अनेन प्रतिज्ञाया धर्मस्वरूपं विपर्यासयति । **वशित्वं कामचार** इति । इच्छानुविधायित्वम् । **तत्र वशित्वमिति** । चक्रवर्तिसूत्रे । **अन्यत्र पुनर्द्रव्यान्तरमिति** । दशाशैक्षधर्मसमन्वागमसूत्रे । **कः पुनरेवमयोग**[6] इति । प्रवचने हि द्विविधमिष्यते द्रव्यसच्च वस्तु प्रज्ञप्तिसच्चेति । कथमयुक्तिरिति वैभाषिकाः । आचार्य आह । **अयमयोग** इति विस्तरः । इह यद्द्रव्यसद्वस्तु तत्प्रत्यक्षग्राह्यं वा भवेदनुमानग्राह्यं वा । तत्र प्रत्यक्षग्राह्यं **रूपशब्दादि** पञ्चेन्द्रियग्राह्यत्वात् । मनोविज्ञानग्राह्यमपि किंचित्प्रत्यक्षं **रागद्वेषादि** स्वसंवेद्यत्वात् । **चक्षुःश्रोत्रादि** त्वनुमानग्राह्यं चक्षुर्विज्ञानादिकृत्यानुमेयत्वात् । तद्भावाभावयोस्तद्भावाभावात् । प्राप्तिः पुनर्न प्रत्यक्षग्राह्या न चानुमानग्राह्या । तत्सिद्धौ निरवद्यानुमानादर्शनात् । तस्माद्द्रव्यधर्मासंभवादयोग इति स्थितमेतत् । इदानीमाचार्यस्तत्पक्षमुत्थाप्योत्थाप्य दूषयति । उत्पत्तिहेतुरिति विस्तरः । यस्य प्राप्तिरस्ति स उत्पद्यते हेतुसद्भावात् । **असंस्कृतस्य न स्यात् प्राप्तिर्यस्मादसंस्कृतमनुत्पाद्यम् । ये च धर्मा अप्राप्ता** दुःखे धर्मज्ञानक्षान्त्यादयः । **ये च त्यक्ताः भूमिसञ्चारवैराग्यतः ।** तद्यथा कामावचरा अक्लिष्टा ऊर्ध्वभूम्युपपत्त्या क्लिष्टाश्च वैराग्येण त्यक्ताः । तेषां धातुप्रत्यागमतः परिहाण्या वा **कथमुत्पत्तिः स्यात्** । न हि तेषां प्राप्तिरस्त्यनुत्पन्ननिरुद्धत्वात् । **सहजप्राप्तिहेतुका चेत्** । का । तेषामुत्पत्तिरधिकृता । सहजा या प्राप्तिरिदानीमुत्पद्यते सा तेषां जनिकेति । आह । **जातिरिदानीं किंकरी जातिजातिर्वेति** । किंकरणशीला किङ्करी । जातिर्लक्ष्यं

---

1 Mss. द्रव्यं सत्
2 To. वदनात्
3 B. & To following Tib. मेव
4 A & V समन्वागतः
5 B वाय॰
6 V रेवसयोग

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धर्मं जनयति । जातिजातिस्तु तल्लक्षणां जातिं जनयति । तेन यदि लक्ष्याणां धर्माणामुत्पत्तिः प्राप्तिहेतुकोच्येत ' तत्र जातिः किङ्करी । अथ लक्षणानाम् 'उत्पत्तिस्तद्धेतुकोच्येत । तत आह 'जातिजातिर्वा किंकरीति विकल्पः । अथ वा यदि भवतैवं कल्प्येत ' जातिर्धर्मं जनयति ' प्राप्तिः पुनर्जातिं जनयतीति । तत्रोच्यते जातिजातिर्वा किङ्करीति । **सकलबन्धनानां खल्वपीति** विस्तरः । येषामेकोऽपि क्लेशप्रकारो न प्रहीणस्ते सकलबन्धनाः । तेषां सकलबन्धनानां खल्वपि **मृदुमध्याधिमात्रक्लेशोत्पत्तिप्रकारभेदो न स्यात्** । कस्मात् । **प्राप्त्यभेदात्** । विकलबन्धनानां हि प्राप्तिवैकल्यान्मृदुमध्याधिमात्रक्लेशोत्पत्तिभेदः परिकल्प्येत ' न तु सकलबन्धनानाम् ' प्राप्तीनां तुल्यत्वात् । **यतो वा स भेद** इति । यतो वा कारणादभ्यासतोऽन्यतो वा स भेदः । कस्यचित्सकलबन्धनस्याधिमात्रः कस्यचिन्मध्यः कस्यचिन्मृदुः । **तत एव** भेदकारणात्तदुत्पत्तिरस्तु । तेषां मृद्वादीनां क्लेशानामुत्पत्तिः । **तस्मान्नोत्पत्तिहेतुः प्राप्तिरिति** । वैभाषिक आह । **कश्चैवमाहेति** विस्तरः । **व्यवस्थाहेतुः प्राप्तिः । असत्यां हि प्राप्तौ लौकिकमानसानाम्** इति[1] । लोके भव'[2] लौकिकम् ' मन एव मानसम् ' लौकिकं मानसमेषाम् ' त इमे लौकिकमानसाः । **आर्यपृथग्जनाः** । आर्याश्च पृथग्जनाश्च । लौकिकमानसग्रहणमार्यविशेषणम् । पृथग्जना हि नित्यमेव लौकिकमानसाः । आसंज्ञिकासंज्ञिसमापत्त्यवस्थायां वा पृथग्जनविशेषणमपि संभवति । तेषामार्यपृथग्जनानाम् । तेषामिति निर्धारणे षष्ठी ' संबन्धलक्षणा वा । तेषां **न स्याद्व्यवस्थानमिति**परिच्छेदः । यत्कृतं व्यवस्थानं सा प्राप्तिः । **प्रहीणाप्रहीणक्लेशताविशेषादिति** । प्रहीणक्लेशा आर्या अप्रहीणक्लेशाः पृथग्जनाः ' तद्भावः[3] ' स एव विशेषः इति प्रहीणाप्रहीणक्लेशताविशेषः ' तस्मात् । **एतद्व्यवस्थानं भवितुमर्हति** । ननु च पृथग्जना अपि केचित्प्रहीणक्लेशा भवन्ति । कथमवधार्यते' आर्या एव प्रहीणक्लेशा इति । अत्यन्तसमुद्घातवचनादेवमुक्तम् । **एतच्चैव कथमिति** । **एषां प्रहीणः क्लेश एषामप्रहीण** इति यदेतद्व्यवस्थानम् । तत्कथं भविष्यति । **प्राप्तौ तु सत्यां** क्लेशप्राप्त्या **एतत्सिध्यति** व्यवस्थानम् ' **तद्विगमाविगमात्** क्लेशप्राप्तिविगमाविगमात् 'छेदाच्छेदादित्यर्थः । येषां तत्प्राप्ति

---

1 Mss. omit इति.   2 B. & To. भवो   3 To. ०वाः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विगमाः[1] ते आर्याः। येषामविगमाः[2] ते पृथग्जना इति। ननु च पृथग्जनानामपि केषांचित् क्लेशप्राप्तिर्विगता। विगता[3]। न तु लोकोत्तरेण मार्गेण। स तर्हि लोकोत्तरमार्गकृतो विशेषः कथं परिच्छिद्यते[4]। लोकोत्तरेणेयं क्लेशप्राप्तिर्विगता लौकिकेनेयमिति। सास्रवानास्रवविसंयोगप्राप्तिभेदात्। **आश्रयविशेषादेतत्सिध्यतीति**। आत्मभावविशेषादेतद्व्यवस्थानमेषां प्रहीणः क्लेश एषामप्रहीणः क्लेश इति सिध्यति। **तथा परावृत्त** इति। तथान्यथाभूतः। **तत्प्रहेयाणां** दर्शनभावनामार्गप्रहेयाणाम्। **अग्निदग्धव्रीहिवदिति**। **यथाग्निदग्धो व्रीहिर**बीजीभूतो भवति। एवं यथोक्तेन न्यायेनाबीजीभूत **आश्रयः क्लेशानां प्रहीणक्लेश इत्युच्यते। उपहतबीजभावे वा**। आश्रय इत्यधिकृतम्। तेन **लौकिकेन मार्गेण प्रहीणक्लेश**[5] इति शक्यते वक्तुं बीजस्योपघातमात्रभावात्। **विपर्ययादप्रहीण** इति। अनिर्दग्धबीज आश्रयेऽनुपहतबीजभावे वा। **यश्चाप्रहीण** इति विस्तरः। यश्चाप्रहीणोऽनन्तरोक्तेन विधिना दर्शनप्रहातव्यः कामावचरो यावद्भावाग्रिकः। भावनाप्रहातव्यो वा कामावचरो यावद्भावाग्रिकः। **तेन समन्वागतः। यश्च प्रहीणस्तथैव** यावद्भावाग्रिकः। **तेनासमन्वागत** इति **प्रज्ञप्यते**। प्रज्ञप्तिधर्मोऽयमिति दर्शयति। **कुशला अपि द्विप्रकारा** इति विस्तरः। यथा क्लिष्टा द्विप्रकारा इत्यपिशब्दार्थः। समुच्चये वा कुशलाश्चेत्यर्थः। **तद्बीजभावानुपघातादिति**। तेषामुत्पत्तिलाभिकानां कुशलानां बीजं तद्बीजम्। तद्बीजस्य भावस्तद्बीजभावः। कस्य। आश्रयस्य। तद्बीजभावस्यानुपघातस्तद्बीजभावानुपघातः। तस्मात् तद्बीजभावानुपघातात्। **समन्वागतः**। **कैः**। **अयत्नभाविभिः कुशलैः**। **उपघाता दसमन्वागत उच्यते**। कोऽसावित्याह। **समुच्छिन्नकुशलमूलः**। **तस्य त्विति**। तस्याश्रयस्य तद्बीजभावस्य उपघातो मिथ्यादृष्ट्या वेदितव्यः। नान्यथा। तेनाह। **न तु[6] खलु कुशलानां धर्माणां बीजभावस्यात्यन्तं[7] सन्ततौ समुद्घातो** यथा क्लेशानामार्यमार्गेणात्यन्तं सन्ततौ समुद्घात इत्यभिप्रायः। **ये पुनरिति** विस्तरः। ये प्रायोगिकाः। **तैरुत्पन्नैः** तेषामुत्पत्ति-

---

1 B. ०विगताः

2 Mss. & B. ०मविगताः

3 A and V omit विगता.

4 A and C परिच्छेद्यते ;

5 To. omits क्लेश

6 A & C ननु for न तु

7 A & C स्यात्यान्त

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्तदुत्पत्तिः । **तदुत्पत्तौ वशित्वं** सामर्थ्यविशेषस्तस्याविघातात् । कस्य । सन्ततेः । समन्वागम उच्यते । कैः । **तैर्यत्नभाविभिः कुशलैः । यस्मादेवं तस्माद्बीजमेव** शक्तिविशेष एवात्र समन्वागमावस्थायाम**नपोद्धृतं** क्लिष्टानां धर्माणामार्यमार्गेण । **अनुपहतं** लौकिकेन मार्गेण । अयत्नभाविनां च कुशलानां धर्माणां मिथ्यादृष्ट्या[1] । **परिपुष्टं च वशित्वकाले** यत्नभाविनां कुशलानां बीजमिति प्रकृतम् । **समन्वागमाख्यां लभते । नान्यद्द्रव्यं यद्वैभाषिकैः कल्पितम् । किं पुनरिदं बीजं नामेति** द्रव्याशङ्कया पृच्छति । **यन्नामरूपं फलोत्पत्तौ समर्थम् ।** यत्पञ्चस्कन्धात्मकं रूपं फलोत्पत्तिसमर्थम् । **साक्षादनन्तरं पारंपर्येण** दूरतः । **कोऽयं परिणामो नामेति** [2]सांख्यीयपरिणामाशङ्कया पृच्छति । **सन्ततेरन्यथात्वमिति ।** अन्यथोत्पादः । **का चेयं सन्ततिरिति ।** किं यथा सांख्यानामवस्थितद्रव्यस्य धर्मान्तरनिवृत्तौ धर्मान्तरप्रादुर्भावः । तथावस्थायिन्याः सन्ततेरन्यथात्वमिति । नेत्युच्यते । किं तर्हि । **हेतुफलभूता ।** हेतुश्च फलं च हेतुफलम् । हेतुफलमिति नैरन्तर्येण प्रवृत्तास्त्रैयध्विकाः **संस्काराः** संततिरिति व्यवस्थाप्यन्ते । **यत्र तूक्तमिति** विस्तरः । यत्र तु सूत्र उक्तम् । किमित्याह । **लोभेन समन्वागतोऽभव्योऽयोग्यश्चत्वारि स्मृत्युपस्थानानि** कायस्मृत्युपस्थानादीनि उत्पादयितुमिति । यदि बीजं प्राप्तिः । बीजं नित्यमस्तीति स्मृत्युपस्थानोत्पत्तिर्न स्यात् । भवदीयायामपि प्राप्तौ तदुत्पत्तिर्न स्यादिति तुल्यमेतत् । तस्मादुभाभ्यामपि वक्तव्यम् । **तत्राधिवासनं लोभस्याविनोदनं वा समन्वागम इति ।** अधिवासनमभ्यनुज्ञानमविनोदनमव्युपशमनम् । **सर्वथा प्रज्ञप्तिधर्मो न द्रव्यधर्म** इति सर्वप्रकारेण यद्युत्पत्तिहेतुर्यदि व्यवस्थाहेतुर्यद्याश्रयविशेषो यद्यधिवासनमविनोदनं वा सर्वथा प्रज्ञप्तिधर्मः । प्रज्ञप्तया संवृत्या व्यवहारेण धर्मः प्रज्ञप्तिधर्मः । न द्रव्यधर्मः न द्रव्यतो धर्मः स्वभाव इत्यर्थः । अथ वा द्रव्यं च तद्धर्मश्च स द्रव्यधर्मः । न रूपादिवत् विद्यमानस्वलक्षणो धर्म इत्यर्थः । **तस्य च प्रतिषेधः ।** तस्य च प्रज्ञप्तिधर्मस्य प्रतिषेधो**ऽसमन्वागम** इति । **इदमस्येति** ज्ञानचिह्न'[3] प्रतिलब्धधर्माविप्रणाशकारणं च प्राप्तिरित्याचार्यसंघभद्रः । **इदमस्येति**[4] ज्ञानचिह्नमित्यसिद्धमेतत् । आश्रयविशेषेण तज्ज्ञानमिति **ब्रूमः ।** यदि च

---

1 A & C ०दृष्ट्यां
2 B. & To. सांख्यानां
3 Mss. ज्ञानं चिह्न०
4 Mss. इदमस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतिलब्धधर्माविप्रणाशकारणं प्राप्तिरिष्यते । प्राप्तपरित्यागो नैव स्यात् । भवति च । तस्मादकारणमेतत् । स एव च शक्तिविशेषलक्षणं बीजभावमाचार्येण व्यवस्थापितं दूषयति । किमयं शक्तिविशेषश्चित्तादर्थान्तरमुतानर्थान्तरम्[1] । किं चातः । अर्थान्तरं चेत्[2] । सिद्धं प्राप्तिरस्तीति । संज्ञामात्रे तु विवादः । अनर्थान्तरं चेत् । [3]नन्वकुशलं कुशलस्य बीजमभ्युपगतं भवत्यकुशलस्य च कुशलम् । को हि नाम्नौष्ण्यस्य तेजसोऽनर्थान्तरत्वे सत्यौष्ण्यमेव दाहकमध्यवस्येन्न तेजः । कुशलबीजं ह्यकुशले चेतस्यव्याकृते वा वर्तते । एवमकुशलबीजं कुशले चेतस्याव्याकृते वा वर्तते । तथैव चाव्याकृतबीजमपि कुशले चाकुशले च वर्तते । सास्रवबीजं चानास्रवेऽनास्रवबीजं च सास्रवे चेतसि वर्तत इति सांकर्यदोषः प्रसज्यत इति । अत्र वयं ब्रूमः । अनर्थान्तरभावे सांकर्यदोषो भवेत् । तत्तु बीजं न चित्तादर्थान्तरं वक्तव्यम् । नाप्यनर्थान्तरम् । उपादायप्रज्ञप्तिरूपत्वात् । अथाप्यनर्थान्तरभावः । तथाप्यदोषः । कुशलेन हि चित्तेनोत्पन्नेन स्वजातीयेऽन्यजातीये वा स्वसंतानचित्ते बीजमाधीयेत । ततः कारणविशेषात्कार्याविशेष इति विशिष्टम् । तेन तच्चित्तमुत्पद्येत । तद्विशिष्टं चित्तं कुशलबीजकार्यक्रियायां समर्थमुत्पद्येत । एवमकुशलेनापि स्वजातीयेऽन्यजातीये वा स्वसंतानचित्ते बीजमाधीयेत । तच्च तेन [4]विशिष्टमकुशलबीजकार्यक्रियायां समर्थमुत्पद्येत । एवमव्याकृतेनापि चित्तेन स्वजातीये अन्यजातीये वा स्वसंतानचित्ते बीजमाधीयेत । तच्चापि तेन विशिष्टमव्याकृतबीजकार्यक्रियायां समर्थमुत्पद्येत । सास्रवेणाप्यनास्रवे चित्ते बीजमाधीयेत । अनास्रवेणापि सास्रवे । इत्येवमन्योन्यबीजाधायकमन्योन्यजनकं च चित्तं चित्तान्तरादुत्पद्यमानमन्योन्यवास्यवासकत्वेन प्रवर्तते । न च कुशले नाकुशले चित्ते शक्तिविशेष आहित इति तदकुशलं कुशलतामापद्यते कुशलं वा तदकुशलतां शक्तिविशेषमात्रत्वात् । शक्तिर्बीजं[5] वासनेत्येकोऽयमर्थः । एवमकुशलादिवासनापि वक्तव्या । यावत् सास्रवेणानास्रवे शक्तिविशेषाधानेऽपि । अनास्रवेणापि सास्रवे शक्तिविशेषाधाने । न तत्सास्रवमनास्रवं संपद्यते । अनास्रवं वा सास्रवमिति । भवता-

---

1 B. ०मताऽनर्थान्तरं, To. ०मतोऽनर्थान्तरम्   2 A यत्

3 A and C ननु कुशलं ; V अनुकुशलं

4 B. & To. following Tib. add चित्तम् reading विशिष्टं चित्तमकु०

5 Mss. शक्तिवीजं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मपि वैभाषिकाणामिदं चिन्त्यते। यदा सास्रवचित्तसमनन्तरमनास्रवमनास्रवचित्तसमनन्तरं वा सास्रवचित्तमुत्पद्यते। तदा किं पूर्वकः सास्रवकलापोऽनास्रवकलापो वा शक्तिमान् समनन्तरप्रत्ययादिभावेनोत्तरकलापोत्पत्तावुताशक्तिमान्। किं चातः। यद्यशक्तिमान् ' समनन्तरप्रत्ययादिभावोऽप्यस्य हीयेत। अथ शक्तिमान् ' सा शक्तिः किं सास्रवे चेतसि सास्रवा ' आहोस्विदनास्रवा। तच्चित्तं सास्रवस्यानास्रवस्य च चित्तान्तरस्य समनन्तरप्रत्ययादिभावं कुर्वत्[1] किं ययैव शक्त्या सास्रवस्य समनन्तरप्रत्ययादिभावं कुर्यात्तयैवानास्रवस्य। यदि तयैव ' कथं शक्तिकार्यसांकर्य[2] न भवेत्। अथान्यया शक्त्या सास्रवस्यान्ययानास्रवस्य समनन्तरप्रत्ययादिभावं कुर्यात् ' कथमनयोरेकत्र शक्त्योस्तस्माच्चित्तादनन्ययोर्भिन्नरूपता भिन्नकार्यता च युज्यते। युज्यते चेत् ' अस्माकमपि चित्तादनन्यासां शक्तीनां तत्रावस्थानं कार्यभेदश्च भविष्यति। एवमनास्रवस्यापि चित्तस्य सास्रवानास्रवचित्तसमनन्तरप्रत्ययादिभावेन संभवतः तथैव शक्त्योर्भिन्नरूपता कार्यभेदश्च वक्तव्यः। तेन यदुक्तं नन्वकुशलं कुशलस्य बीजमभ्युपगतं भवतीत्यादि तदयुक्तम्। न हि कुशलाहितेन शक्तिविशेषेण विशिष्टं समर्थमकुशलमकुशलबीजकार्यं करोति। किं तर्हि ' कुशलबीजकार्यमेव करोति। स्वाहितेन तु शक्तिविशेषेण तदकुशलं स्वबीजकार्यं करोति। तत् कथमिदमुच्यते कुशलस्याकुशलं बीजमिति। ब्रूयास्त्वमकुशलचित्ते तत्कुशलबीजमाहितं किमकुशलं न भवतीति। न भवन्तो बीजार्थं जानते। कुशलेन चित्तेन निरुध्यमानेन तथा शक्तिविशिष्टमकुशलं चित्तं जन्येत। यथा तच्चित्तं स्वोत्पत्तियोग्यं भविष्यति साक्षात् पारम्पर्येण वेति शक्तिविशेष एव बीजम्। न बीजं नाम किञ्चिदस्ति प्रज्ञप्तिसत्त्वात्। अत एव प्राप्त्यप्राप्ती प्रज्ञप्तिसत्यावुच्येते[3]। द्रव्यसत्यावेव तु वैभाषिका वर्णयन्ति ॥३६॥

[त्रैयध्विकानां त्रिविधा शुभादीनां शुभादिका।
स्वधातुका तदाप्तानामनाप्तानां चतुर्विधा ॥३७॥]

अतीतानां धर्माणामतीतापि प्राप्तिरिति विस्तरः। अतीतानां धर्माणां तद्यथा क्लिष्टानामतीता प्राप्तिः। या उत्पन्ननिरुद्धा साग्रजापि संभवति ' सहजापि। पश्चात्कालजापि। तेषामेवानागता प्राप्तिरनुत्पन्ना। प्रत्युत्पन्ना

1 Mss कुर्वन्तत्, B. कुर्वत्तत्, To. कुर्यात् तत्
2 A & V ०संकर्यं
3 A & V ०च्यते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

या पश्चात्कालजा उत्पन्नानिरुद्धा । **अनागतानामपि** प्राप्तिरतीता याग्रजोत्पन्ननिरुद्धा[1] । अनागता यानुत्पन्ना । प्रत्युत्पन्नाग्रजोत्पन्नानिरुद्धा । तथा **प्रत्युत्पन्नानामप्यतीता** प्राप्तिर्याग्रजोत्पन्ननिरुद्धा । अनागता यानुत्पन्ना । प्रत्युत्पन्ना या सहजा । अतीतादिजातिसामान्यं च गृहीत्वैवमुक्तम् । न त्वेकस्यातीतस्यावश्यं त्रिविधा प्राप्तिरस्ति । न हि [2]विपाकजस्यानागतातीता[2] वा प्राप्तिः संभवति ।

अव्याकृताप्तिः सहजा[3]

इति वचनात् । यदि तु प्रतिद्रव्यं प्राप्तिव्यवस्था क्रियेत संभवं प्रत्येतदेवं भवेत् । क्लिष्टानामुत्पत्तिप्रतिलम्भिकानां च कुशलानामतीतादीनामतीतादयः प्राप्तयोऽवश्यं भवन्ति । न हि पृथग्जनस्यानुत्पन्नस्यानास्रवस्य मार्गस्यातीता प्रत्युत्पन्ना च प्राप्तिरस्ति । सापवादश्चायमुत्सर्गोऽवगन्तव्यः ।

अव्याकृताप्तिः सहजा

इति वचनात् । असंस्कृतानां तु प्राप्तिरुत्पन्ननिरुद्धातीता । अनुत्पन्नानागता । उत्पन्नानिरुद्धा प्रत्युत्पन्ना । सुगमत्वात्तु न सूत्रितमेतत् । **कामरूपारूप्यावचराणां कामरूपारूप्यावचरी यथाक्रममिति** । कामधातूपपन्नस्य कामावचराणां धर्माणां कामावचरी प्राप्तिः । तस्यैव रूपावचराणां रूपावचरी । तस्यैवारूप्यावचराणामारूप्यावचरी रूपधातूपपन्नस्य च कामावचराणाम् । तद्यथा निर्माणचित्तानां कामावचरी । रूपावचराणां रूपावचरी । आरूप्यावचराणामारूप्यावचरी । आरूप्यधातूपपन्नस्य तद्धातुकानां तद्धातुकैव प्राप्तिः ।

अनास्रवानां चतुर्विधा

इति । **अधात्वाप्तानां** संस्कृतासंस्कृतानाम**नास्रवाणां चतुर्विधा प्राप्तिः** । कामरूपारूप्यावचरी चानास्रवा च । **समासेन** सर्वाननास्रवानभिसमस्येत्यर्थः । प्रत्येकं तु न चतुर्विधा । तत आह । **तत्राप्रतिसंख्यानिरोधस्येति** विस्तरः । कामधातूपपन्नस्य कामावचरादीनां यथासंभवमप्रतिसंख्यानिरोधस्य प्राप्तिः कामावचरी । रूपधातूपपन्नस्य रूपावचरादीनामप्रतिसंख्यानिरोधप्राप्ती रूपावचरी । आरूप्यधातूपपन्नस्यारूप्यावचरादीनामप्रतिसंख्यानिरोधप्राप्तिरारूप्यावचरी । सत्त्वसंतानवशेनैव हि तत्प्राप्तिर्व्यवस्थाप्यते । न तु तेषां वशेन येषामप्रतिसंख्यानिरोधः ।

---

1 Mss. ॰न्नानिरुद्धा   2...2 Mss. विपाकजस्यानागता प्रत्युत्पन्ना
3 Kārikā, II, 38.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदि ह्येवं स्यात्' मार्गसत्यस्याप्रतिसंख्यानिरोधप्राप्तिरनास्रवा स्यात्। **प्रतिसंख्यानिरोधस्य रूपारूप्यावचरी चानास्रवा** चेति। न कामावचरी। कामधातोरप्रतिपक्षत्वात्। रूपावचरेण तु मार्गेण प्राप्तस्य रूपावचरी प्राप्तिः। आरूप्यावचरेणारूप्यावचरी। अनास्रवेण मार्गेणानास्रवा। आर्यस्य तु रूपावचरेण मार्गेण प्राप्तस्य रूपावचरी चानास्रवा च' आरूप्यावचरेणारूप्यावचरी चानास्रवा च।

लौकिकेनार्यवैराग्ये विसंयोगाप्तयो द्विधा[1]

इति वचनात्। **मार्गसत्यस्यानास्रवैवेति**। लौकिकीमस्य प्राप्तिं प्रतिषेधयति' **सेयं समस्य चतुर्विधेति**' समासेन त्रैधातुकी चानास्रवा चेत्युक्तमर्थं निगमयति ॥३७॥

[त्रिधा न शैक्षाशैक्षाणामहेयानां द्विधा मता।
अव्याकृताप्तिः सहजाभिज्ञानैर्माणिकावृते ॥३८॥]

शैक्षाणामिति। शैक्षा धर्माः शैक्षस्यानास्रवा धर्माः। अशैक्षा अशैक्षस्यानास्रवाः। मार्गसत्यभावा एवैते द्रष्टव्याः। शैक्षाशैक्षेभ्यस्त्वन्ये **नैवशैक्षानाशैक्षाः**। असंस्कृता अपि यावन्नैवशैक्षा नाशैक्षा इष्यन्ते। तेषाम्

त्रिधा

प्राप्तिः **शैक्षादिभेदेन**' शैक्ष्यशैक्षी नैवशैक्षी नाशैक्षी चेति। **अनार्येण प्राप्तस्ये**ति। पृथग्जनेन प्राप्तस्य' **तस्यैव शैक्षेणेति**। तस्यैव प्रतिसंख्यानिरोधस्य शैक्षेण मार्गेण प्राप्तस्य **शैक्षी**। **अशैक्षेणाशैक्षी**। क्षयज्ञानसंप्रयुक्तेन मार्गेण प्राप्तस्य' विसंयोगप्राप्तिसन्निश्रयत्वात् क्षयज्ञानस्य। यद्यपि स वज्रोपमेन शैक्षेण प्राप्यते तदावाहकत्वात्' तत्प्राप्तत्ववचने तु शैक्ष्याः[2] प्राप्तेरशैक्षी प्राप्तिर्विशेषिता स्यदिति न तेन शैक्षेणाशैक्षीत्युक्तम्। **तस्यैवार्यमार्गप्राप्तस्यानास्रवेति**। तस्यैव प्रतिसंख्यानिरोधस्यार्यमार्गप्राप्तस्यानास्रवा' **मार्गसत्यस्य चानास्रवा**। प्राप्तिरित्यधिकृतम्। आर्येण लौकिकमार्गप्राप्तस्य प्रतिसंख्यानिरोधस्य प्राप्तिः किं सास्रवा उताहोऽनास्रवा। उभयथेत्याह। सा कस्मान्नोक्ता। सावशेषं भाष्यम्। पश्चाद्दर्शयिष्यते

लौकिकेनार्यवैराग्ये विसंयोगाप्तयो द्विधा[3]

---

1 Kārikā. VI, 47.
2 Mss. शैक्षाः
3 Kārikā, VI, 47.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति नोच्यते। या त्वसंकीर्णा प्राप्तिः सैवेहोच्यत इति वेदितव्यम्।

दुर्बलत्वादिति। अनभिसंस्कारवत्त्वाद्दुर्बलत्वम्। **द्वे अभिज्ञे** इति। दिव्यचक्षुरभिज्ञां दिव्यश्रोत्राभिज्ञाम्। **निर्माणचित्तं च वर्जयित्वा।** किम्'

अव्याकृताप्तिः सहजा

इति संबन्धनीयम्। **तेषां हि बलवत्त्वादिति** विस्तरः। तेषां हि दिव्यचक्षुरभिज्ञादीनां बलवत्त्वात्। किम्' पूर्वपश्चात्सहजा प्राप्तिः। **प्रयोगविशेषनिष्पत्तेरिति**' प्रयोगविशेषेण निष्पत्तिर्दिव्यचक्षुरभिज्ञादीनाम्। तस्याः प्रयोगविशेषनिष्पत्तेर्बलवत्त्वम्। बलवत्त्वात्पूर्वंपश्चात्सहजा प्राप्तिरित्यर्थसंबन्धः। **शैलपस्थानिकस्यापि** कस्यचित्' तद्यथा विश्वकर्मणः। **ऐर्यापथिकस्य च**' तद्यथा स्थविरस्याश्वजितः[1]। **अत्यर्थमभ्यस्तस्य** भृशमात्मसात्कृतस्येच्छन्ति वैभाषिकाः। किम्' पूर्वंपश्चात्सहजा प्राप्तिरिति ॥३८॥

[निवृतस्य च रूपस्य कामरूपस्य[2] नाग्रजा।
अक्लिष्टाव्याकृताप्राप्तिः सातीताजातयोस्त्रिधा ॥३९॥]

निवृतस्य च रूपस्य

इति। चशब्दः समुच्चयार्थः। प्राप्तिः सहजेति समुच्चीयते। तच्च क्लिष्टं रूपं प्रथमध्यानभूमिकमेव विज्ञप्तिरूपं वेदितव्यम्। ततोऽन्यासु भूमिषु तदुत्थापकाभावात्। **अधिमात्रेणापीति** विस्तरः। अधिमात्रेणापि चित्तेन निवृता विज्ञप्तिरुत्थापिता। तदेव चाधिमात्रं विज्ञप्तिचित्त**मविज्ञप्तिं नोत्थापयति। अतो दौर्बल्यसिद्धिः।** तस्या दौर्बल्यसिद्धेः सहजैव प्राप्तिः। **प्राप्तिभेद** इति। विपाकजादीनामनिवृताव्याकृतानां सहजा प्राप्तिः। अभिज्ञाद्वयादीनां तु पूर्वंपश्चात्सहजा प्राप्तिरिति तद्भेदः।

कामरूपस्य[3] नाग्रजा

इति। **कामावचरस्य** कुशलाकुशलस्य विज्ञप्त्यविज्ञप्तिरूपस्या**ग्रजा प्राप्तिः सर्वथा नास्ति।** यदि कुशलस्य यद्यकुशलस्य नास्त्येव सर्वथेत्यर्थः। **सहजा चास्ति [4]पश्चात्कालजा चेति[4]** संभवतः। तद्यथा प्रथमस्य विज्ञप्त्यविज्ञप्तिक्षणस्यादौ सहजा प्राप्तिर्भवति। द्वितीयादिषु क्षणेषु तस्यैवाद्यस्य क्षणस्य पश्चात्-

---

1 To. ०जितस्य
2 Poussin कामे रूपस्य
3 B. कामे रूपस्य
4...4 A. ०लजा वेति, V लजौ वेति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालजा भवति । एवमन्येषामपि द्वितीयादीनां क्षणानां सहजा पश्चात्कालजा प्राप्तिर्वेदितव्या । कामावचरस्यैव रूपस्याग्रजा प्राप्तिप्रतिषेधाद्ध्यानानास्रवसंवररूपस्याग्रजा प्राप्तिरस्त्येवेत्युत्सृष्टा भवति ।

अप्राप्तिरनिवृताव्याकृतैव सर्वा । कस्माद्व्यवस्थाप्यते । यद्यप्राप्तिः क्लेशानां क्लिष्टा भवेत्' प्रहीणक्लेशस्य क्लेशवदेव न स्यात् । यदि कुशला स्यात्' समुच्छिन्नकुशलमूलस्य न स्यात् । अनास्रवाणां धर्माणामप्राप्तिरनास्रवा स्यात् । किं स्यात् । पृथग्जनो न स्यान्नित्यमार्यधर्मसमन्वागतत्वात् । पारिशेष्यादनिवृताव्याकृतैवाप्राप्तिरिति व्यवस्थाप्यते । **प्रत्युत्पन्नस्य नास्त्यप्राप्तिः प्रत्युत्पन्नेति ।** प्रत्युत्पन्नस्य धर्मस्य प्राप्तिर्वर्तते । तस्मादस्याप्राप्तिर्नास्ति प्रत्युत्पन्ना । तस्य प्राप्त्यप्राप्त्योः समवधानासम्भवात् । **अतीनातागतयोस्तु त्रैयध्विकीति ।** अप्राप्तानां प्राप्तविहीनानां च प्रायोगिकाणां गुणानामनागतानां च चक्षुरादीनामपि च येषां प्राप्तिर्नास्ति' अतीताप्यस्त्यप्राप्तिरनागतापि प्रत्युत्पन्नापि । स्रोतोन्यायेन हि तेषामप्राप्तिरुत्पद्यते निरुध्यतेऽनागतावस्थानेति ॥३९॥

[कामाद्याप्तामलानाञ्च मार्गस्याप्राप्तिरिष्यते ।
पृथग्जनत्वं तत्प्राप्तिभूसञ्चाराद् विहीयते ॥४०॥]

कामाद्याप्तामलानां च

इति ।

त्रिधा[1]

इत्यनुकर्षणार्थश्चकारः । कामादिषु धातुष्वाप्ता अवियुक्ताः कामाद्याप्ताः । कामाद्याप्तानाममलानां चाप्राप्तिस्त्रिविधा ' उपपत्त्याश्रयवशेन तद्व्यवस्थापनात् ' धर्मसहाव्यवस्थापिनी[2] ह्यप्राप्तिः ' न प्राप्तिवद्धर्मवशेन व्यवस्थाप्यते । तस्मात्कामधातूपपन्नस्य कामरूपारूप्यावचराणामनास्रवाणां च धर्माणामप्राप्तिः कामावचरी ' रूपधातूपपन्नस्य रूपावचरी ' आरूप्यधातूपपन्नस्यारूप्यावचरी । तद्यथा कामधातूपपन्नस्य प्रायोगिकाणां गुणानामुपपत्तिलाभिकानामपि[3] कुशलसमुच्छेदावस्थायामप्राप्तिरवीतरागत्वाच्च रूपारूप्यावचराणामक्लिष्टानामप्राप्तिः पृथग्जनत्वाच्चानास्रवाणामप्राप्तिः कामावचरी । तथा रूपधातूपपन्नस्य कामावचराणां भूमिसंचारत्यक्तानां रूपारूप्यावचराणां च प्रायोगिकाणां गुणानां[4] पृथग्जनत्वाच्चा-

---

1 Kārikā, II, 39.
2 B. ०स्थायिनी
3 Mss. ०मुत्पत्तिलाभि०
4 Omitted in Mss. but supplied from Tib. in B. & To.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नास्रवाणामप्राप्ती रूपावचरी। तथैव चारूप्यधातूपपन्नस्य कामरूपावचराणां भूमिसंचारत्यक्तानामारूप्यावचराणां च प्रायोगिकाणां गुणानां पृथग्जनत्वादेव चानास्रवाणामप्राप्तिरारूप्यावचरीति नेयम्।

पृथग्जनत्वं कतमत्। आर्यधर्माणामलाभ इत्यनेन शास्त्रपाठेनानास्र-[1]वत्वाभावमप्राप्तेर्दर्शयति। **कतमेषामार्यधर्माणामलाभ** इति। आर्यधर्मा दुःखे धर्मज्ञानक्षान्तिमारभ्य सर्वोऽनास्रवो मार्ग इति। अत एवं पृच्छति। **सर्वेषाम-विशेषवचनादिति।** सर्वेषां दुःखे धर्मज्ञानक्षान्त्यादीनां शैक्षाशैक्षज्ञानानामलाभः। कस्मात्। अविशेषितत्वात्। यद्येवमुत्पन्नायामपि दुःखे धर्मज्ञानक्षान्तौ परिशिष्टानामार्यधर्माणामलाभोऽस्यास्तीत्यनार्यः स्यात्। तस्मादिदमाह। **स तु यो विना लाभेनेति।** यो विना लाभेनालाभः। तत्पृथग्जनत्वमिति। **अन्यथा हीति** विस्तरः। यद्यार्यधर्माणां लाभेऽपि सत्यन्येषामपि धर्माणामलाभः पृथग्जनत्वमिष्यते। **बुद्धोऽपि श्रावकप्रत्येकबुद्धसंतानिकै-रार्यधर्मैरसमन्वागमादनार्यः स्यात्।** केवलालाभग्रहणात्त्वप्रसङ्गः। **एव-शब्दस्तर्हि पठितव्य** इति। आर्यधर्माणामलाभ एवेति। **एकपदान्यपि ह्यवधारणानीति।** केवलपदान्यपीत्यर्थः। **अब्भक्षो[2] वायुभक्ष** इति। अब्भक्ष एव वायुभक्ष एवेति नोच्यते। एवशब्दस्य चार्थो[3] गम्यते। तद्वदिहापीति। अथ वा अप एव यो भक्षयति सोऽब्भक्षः। यो वायुमेव भक्षयति स वायुभक्ष इति। यथात्र लुप्तनिर्दिष्टस्यैवका-रस्यावधारणार्थो गम्यते तद्वदिहाप्यलाभ एवेति। **दुःखे धर्मज्ञानक्षान्ति-[4]तत्सहभुवामित्यपर** इति विस्तरः। दुःखे धर्मज्ञानक्षान्तेस्तत्सहभुवां च वेदना-दीनां धर्माणामलाभः **पृथग्जनत्वम्।** अस्मिन्पक्ष उत्पन्नायामपि दुःखे धर्म-ज्ञानक्षान्तौ परिशिष्टानामार्यधर्माणामलाभोऽस्तीत्यनार्यः स्यादिति यो दोष उक्तः स न संभवति। यदा तर्हि फलप्राप्तिस्तदा दुःखे धर्मज्ञान-क्षान्तितत्सहभुवां विहानिरिति फलप्राप्तावनार्यः स्यादिति दोषपरिहारार्थमाह। **न च तत्त्यागात्।** न च तेषां क्षान्तिसहभुवां त्यागात्। **अनार्यत्वप्रसङ्गः। तदलाभस्यात्यन्तं हतत्वात्।** तस्यालाभस्यात्यन्तविहीनत्वात्। कथम्। असावत्यन्तं हतस्तत्संताने पुनरनुत्पत्तेः। **ते तर्हि त्रिगोत्रा** इति। श्रावक-प्रत्येकबुद्धबुद्धगोत्रा इति। **कतमेषामलाभः। सर्वेषामिति।** श्रावकादिगोत्रा-

---

1 A ०त्वात् भावम० 2 A अभक्ष for अब्भक्ष throughout
3 A वार्थो 4 Mss. ०स्तत्सह०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

णाम्। **एवं तर्हि स एव दोष** इति। बुद्धोऽपि त्रिगोत्रालाभादनार्यः स्यादित्यर्थः। **पुनः स एव परिहार** इति। स तु यो विना लाभेनेति पूर्ववत्प्रपञ्चो यावत्तद्यथा अब्भक्षो[1] वायुभक्ष इति। **यत्नस्तर्हि व्यर्थ** इति। क्षान्तिपरिशिष्टार्यधर्मालाभसद्भावादनार्यः स्यादित्यस्य दोषस्य परिहाराय क्षान्तितत्सहभुवामलाभः पृथग्जनत्वमिति यो यत्नः स व्यर्थः स्यात्। पूर्वपक्षदोषपरिहार एवायमास्थीयते। **अनुत्पन्नार्यधर्मा संततिरिति**। अनुत्पन्ना आर्यधर्मा अस्यामित्यनुत्पन्नार्यधर्मा संततिः **पृथग्जनत्वम्**। अनुत्पन्नार्यमार्गा स्कन्धसंततिरित्यर्थः। अर्थादुत्पन्नार्यधर्मा संततिरार्यत्वमित्युक्तं भवत्याश्रयपरावृत्तेः।

अथेयमप्राप्तिरिति। सर्वधर्माप्राप्तिश्चोद्यते। नार्यधर्माप्राप्तिरेव। **यथा तावदिति**। उदाहरणमेतत्। **तस्य लाभात्तद्विहीयत** इति। तस्यार्यमार्गस्य लाभात्तत्पृथग्जनत्वमलाभलक्षणं विहीयते। किंधातुकं तत्पृथग्जनत्वम्। त्रिधातुकमित्येके। ननु चोपपत्त्याश्रयवशेनालाभो व्यवस्थाप्यते। पृथग्जनत्वं चालाभस्वभावम्। तस्मादस्य कामावचरस्य सत्त्वस्य कामावचरमेव पृथग्जनत्वमस्ति न रूपारूप्यावचरम्। अतस्त्रैधातुकं विहीयत इत्ययुज्यमानमेतत्पश्यामः। अथ पुनरनुत्पत्तिधर्मतां तदापन्नमिति कृत्वा त्रैधातुकं तद्विहीयत इत्युपचारकल्पना। भवत्वेषा। नैषा वार्यते। कामावचरस्यैव त्वेकस्य पृथग्जनत्वस्य प्राप्तिरस्ति। तल्लौकिकाग्रधर्मावस्थायां विहीयत इति वेदयामः। तच्च कामवैराग्ये नवमे विमुक्तिमार्गे प्रहीयते[2]। रूपारूप्यधात्वोरुत्पद्यमानस्य त्वार्यस्य प्रतिभूम्यवस्थितानां पृथग्जनत्वानामार्यमार्गप्राप्तिसामर्थ्यान्नैव प्राप्तिरुत्पद्यते। प्रतिभूमि तु नवमे विमुक्तिमार्गे तेषां प्रहाणं भवतीत्यवगन्तव्यम्।

भूमिसंचाराच्चेति। यदा च कामधातोर्वैराग्यं कृत्वा प्रथमं ध्यानं सञ्चरति तदा च तत्कामावचरं पृथग्जनत्वं विहीयते। न चार्यो भवति प्रथमध्यानभूमिकपृथग्जनत्वप्रादुर्भावात्। एवमारूप्यधातुसंचाराद्रूपावचरं पृथग्जनत्वं विहीयते। ऊर्ध्वभूमेश्चाधरां भूमिं संचरते। ऊर्ध्वभूमिकं पृथग्जनत्वं विहीयत इति वक्तव्यम्। एवमन्येषामपि योज्यमिति। यथार्यमार्गस्य प्राप्त्या पृथग्जनत्वमप्राप्तिर्विहीयत इति योजितम्। एवमन्येषामपि श्रुतचिन्तामयादिकानां धर्माणामप्राप्तिर्विहीयत इति योज्यम्। कथम्। कामावचराणां तावच्छ्रुतचिन्तामयादिकानां धर्माणां प्राप्तिलाभादप्राप्तिर्विहीयते। उपपत्तिलाभिकानां च कुशलानां

---

1 A & C अभक्षो, V अब्भक्षो

2 V विहीयते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्राप्त्या समुच्छिन्नकुशलस्याप्राप्तिर्विहीयते। भूमिसंचाराच्च। यदा चायं कामधातोश्च्युत्वा प्रथमं ध्यानमुपपत्त्या संचरति, तदा च तद्भूमिकानां गतिसंगृहीतानां स्कन्धानामप्राप्तिर्विहीयते। अक्लिष्टाव्याकृता एव हि गतयो वक्ष्यन्ते।

अव्याकृताप्तः सहजा[1]

इति चोक्तम्। एवं प्रथमध्यानभूमिकानां प्रायोगिकाणां गुणानां प्राप्तेरप्राप्तिर्विहीयते। भूमिसंचाराच्च। ऊर्ध्वभूमिकानां गतिसंगृहीतानां स्कन्धानां तद्भूमिसंचाराद्विहीयत इति। इदमेकेषां भूमिसंचारव्याख्यानोदाहरणम्। तत्राविविक्तं पश्यामः। ऊर्ध्वभूमिकानां गतिसंगृहीतानां [2]स्कन्धानामप्राप्तिर्न केवलं भूमिसंचाराद्विहीयते। किं तर्हि, तत्प्राप्तितोऽपीति। इदं त्वसंकीर्णमुदाहरणं पश्यामः। तद्यथा द्वितीयादिध्यानभूमिकानां प्रायोगिकाणां गुणानां तदलाभिनः कामावचरस्य सत्त्वस्याप्राप्तिरस्ति। स यदि कामवैराग्यं कृत्वा प्रथमध्यान उपपद्यते, सा तेषामप्राप्तिर्भूमिसंचाराद्विहीयते। प्रथमध्यानभूमिका तु तेषामप्राप्तिरुद्भवतीति। एवमन्येषामपि योज्यम्।

ननु चैवमनवस्थाप्रसङ्गः प्राप्तीनामिति। प्राप्तेरपि प्राप्तिः, अस्या अप्यन्या, तस्या अप्यन्या इत्यनवस्था। **परस्परसमन्वागमादिति।** प्राप्तिप्राप्तियोगात् प्राप्त्या समन्वागतः। प्राप्तियोगात् प्राप्तिप्राप्त्या समन्वागत इत्यर्थः। **प्राप्त्युत्पादादिति** विस्तरः। प्राप्त्युत्पादात्तेन **धर्मेण** चित्तेन वा **समन्वागतो भवति। प्राप्तिप्राप्त्या च**, समन्वागत इति वर्तते। **प्राप्तिप्राप्त्युत्पत्तेः प्राप्त्यैव समन्वागतो भवतीति।** एवं प्राप्तिरुभयत्र व्याप्रियते। प्राप्तिप्राप्तिस्त्वेकत्रेति। **अतो नानवस्था। कुशलस्य क्लिष्टस्य चेति।** अनयोरग्रजपश्चात्कालजप्राप्तित्वाद्ग्रहणम्। अव्याकृतस्य हि सहजैव प्राप्तिरिति। **द्वितीये क्षण** इति विस्तरः। द्वितीये क्षणे तस्य धर्मस्य तत्प्राप्तेः प्राप्तिप्राप्तेश्च प्राप्तय इति **तिस्रः प्राप्तयः।** प्राप्तियोगाद्धि तैः समन्वागतो भवति। ताभिस्तिसृभिः प्राप्तिभिः समन्वागमार्थं **पुनस्तिस्रोऽनुप्राप्तय उद्भवन्तीति षड्भवन्ति** प्राप्तयः। **प्रथमद्वितीयक्षणोत्पन्नानां द्रव्याणामिति।** धर्मेण सार्धं नवानां द्रव्याणां **नव प्राप्तयः सार्धमनुप्राप्तिभिरष्टादश भवन्ति। एवमुत्तरोत्तरवृद्धिप्रसङ्गेनेति** विस्तरः। उत्तरोत्तरस्य क्षणस्य वृद्धिः प्राप्तिभिः, उत्तरोत्तरे वा क्षणे वृद्धिः प्राप्तीनाम्, तस्याः प्रसङ्ग उत्तरोत्तरवृद्धिप्रसङ्गः,

---

1 Kārikā, II, 38. 2 Mss. स्कन्धायतनानामप्राप्ति०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेन। उत्तरोत्तरवृद्धिप्रसङ्गेन। एताः प्राप्तयो विसर्पन्त्य इति। दिङ्मात्रं दर्शयिष्यामः। चतुर्थे क्षणे प्रथमक्षणोत्पन्नैस्त्रिभिर्धर्मैः प्राप्त्यनुप्राप्तिमद्भिर्भवितव्यम्। द्वितीयक्षणोत्पन्नाभिरपि षड्भिः प्राप्त्यनुप्राप्तिभिः पुनः प्राप्त्यनुप्राप्तिमतीभिर्भवितव्यम्। एवं तृतीयक्षणोत्पन्नाभिरष्टादशभिः प्राप्त्यनुप्राप्तिभिः पुनरपि प्राप्त्यनुप्राप्तिमतीभिर्भवितव्यमिति प्रथमद्वितीयतृतीयक्षणोत्पन्नानां सप्तविंशतिः प्राप्तयः सार्धमनुप्राप्तिभिस्तावतीभिरिति चतुःपञ्चाशत्प्राप्तयश्चतुर्थे क्षणे भवन्ति। पञ्चमे तु क्षणे प्रथमद्वितीयतृतीयक्षणोत्पन्नाः प्राप्त्यनुप्राप्तयः पुनश्चतुःपञ्चाशच्चतुर्थक्षणोत्पन्नप्राप्त्यनुप्राप्तयश्च द्विश्चतुःपञ्चाशद्भवन्ति। त्रीणि चतुःपञ्चाशत्कानि द्वाषष्ट्युत्तरशतं प्राप्तीनां जायते। एवमुत्तरोत्तरवृद्धिप्रसङ्गो वक्तव्यः। **अतीतानागतानामिति**। अत्र प्रत्युत्पन्नाग्रहणमनावश्यकत्वात्। **उत्पत्तिलाभिकानां चेति**। अत्र प्रायोगिकाग्रहणमनावश्यकत्वादेव। **ससंप्रयोगसहभुवामिति**। सवेदनादिसजात्यादीनाम्। **अनाद्यन्तसंसारपर्यापन्नानाम्**। अनादावनन्ते च संसारे संगृहीतानाम्। अनन्ता अप्रमेया एकस्य प्राणिनः। किमङ्ग बहूनाम्। **क्षणे क्षण उपजायन्ते प्राप्तय इति**। अनन्तद्रव्या एव[1]। अनन्तप्राप्तिद्रव्या इत्यर्थः। **अत्युत्सवो बतायं प्राप्तीनामिति**। परिहासवचनमेतत्। **केवलं न प्रतिघातिन्योऽरूपिणीत्वात्**। **यतोऽवकाशं लभन्ते प्राप्तयः** ॥४०॥

[सभागता सत्त्वसाम्यमासंज्ञिकमसंज्ञिषु।
निरोधश्चित्तचैत्तानां विपाकस्ते बृहत्फलाः ॥४१॥

सभागता सत्त्वसाम्यम्

इति विस्तरः। समानो भागो भजनमेषामिति सभागाः। तद्भावः सभागता। समानो वा भागो भजनं सभागः[2]। सभाग एव सभागता। यद्योगात्सभागो भवति तद्द्रव्यम्। **सत्त्वानां साम्यं** सामान्यं सादृश्यमित्यर्थः। सत्त्वग्रहणमसत्त्वनिरासार्थम्। सत्त्वानां सत्त्वसंख्यातानां च धर्माणां सादृश्यं सभागता। असत्त्वसंख्यातानां शालियवादीनां नेष्यते। **निकायसभाग इत्यस्याः शास्त्रे संज्ञेति**। ज्ञानप्रस्थानादिके शास्त्रे निकायसभाग इत्यनया संज्ञयायं चित्तविप्रयुक्तो निर्दिश्यते। इह तु श्लोकबन्धानुगुण्यात् सभागतेत्यनया संज्ञयेत्यभिप्रायः। **सा पुनरभिन्ना भिन्ना चेति**। या सर्वसत्त्ववर्तिनी।

1 Mss. एवम्

2 Mss. भाग:

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतिसत्त्वमन्यान्याप्यभिन्नेत्युच्यते सादृश्यात्। न हि सा यथा वैशेषिकाणामेका नित्या चेति। भिन्ना[1] या क्वचिद्वर्तते क्वचिन्न वर्तते। तत आह। **भिन्ना पुन**रिति विस्तरः। **धातव**स्त्रयः कामादयः। **गतयः** पञ्च नरकादयः। **योनय**श्चतस्रोऽण्डजादयः। **जातयो** ब्राह्मणादयः। **आदि**-शब्देन उपासिकाभिक्षुणीनैवशैक्षनाशैक्षादयः[2] संगृह्यन्ते। **स्कन्धाय-तनधातुत** इति। रूपस्कन्धसभागता यावद्धर्मधातुसभागता। **अविशिष्ट-मिति**। सामान्यरूपम्। **प्रज्ञप्तिश्चेति**। अभिधानं चेत्यर्थः। **एवं स्कन्धादिबुद्धिप्रज्ञप्त्योऽपि योज्या** इति। यदि स्कन्धसभागताद्रव्यमविशिष्टं न स्यादन्योन्यविशेषभिन्नेषु स्कन्धेषु स्कन्धः स्कन्ध इत्यभेदेन बुद्धिर्न स्यात् प्रज्ञ-प्तिश्चेति। एवं धात्वादिबुद्धिप्रज्ञप्त्योऽपि योज्या इत्येके पठन्ति। तेषामेवं वक्तव्यम्। यदि सभागतेति विस्तरेण यावदन्योन्यविशेषभिन्नेषु धातुषु कामा-वचरः कामावचर इत्यभेदेन बुद्धिर्न स्यात्प्रज्ञप्तिश्चेति।

चतुःकोटिक इति। **स्याच्च्यवेतोपपद्येत न च सत्त्वसभागतां विजह्यान्न च प्रतिलभेतेति**। **सत्त्वसभागतामिति**। सत्त्वानां सभागता सत्त्वसभागता मनु-ष्यत्वादिलक्षणा। सत्त्वग्रहणं हि धर्मविशेषणार्थम्। सत्त्वसभागता ह्यत्र चतुःकोटि-के विवक्षिता न धर्मसभागतेति। न तु सत्त्वस्सत्त्व इत्याकारसभागतेहाभिप्रेता। यदि हि साभिप्रेता स्यात्। तृतीया कोटिर्न सिध्येत **गतिसंचारेऽपि**[3] तस्याः सत्त्वसभागतायास्तादवस्थ्यात्। **तत्रैवोपपद्यमान** इति। तद्यथा मनुष्यगतेश्च्युत्वा मनुष्यगतावेवोपपद्यमानो मनुष्यगतेश्च्यवते मरणादुपपद्यते च तस्यामेव प्रति-सन्धिबन्धात्। न चासौ मनुष्यसभागतां विजहाति न च प्रतिलभते। तस्या मनुष्यसभागतायास्तादवस्थ्यात्। **द्वितीया**[4] **नियाममवक्रामन्निति**। स सत्त्व-सभागतां पृथग्जनत्वस्वभावां सभागतां विजहाति। आर्यत्वस्वभावां सभा-गतामपरां प्रतिलभते। **तृतीया गतिसंचारादिति**। तद्यथा मनुष्यगतेश्च्युत्वा देवगतावुपपद्यमानः। च्यवते तथैव मरणादुपपद्यते च प्रतिसन्धिबन्धात्। सत्त्वसभागतां मनुष्यसभागतालक्षणां विजहाति। प्रतिलभते च देवसभागता-लक्षणामपरामिति। **चतुर्थ्येतानाकारान् स्थापयित्वेति**। पूर्वोक्तकोटिस्वभाव-प्रकारान् वर्जयित्वेत्यर्थः। तद्यथा जीवन् पृथग्जन आर्यो वा किंचिदलभमानः।

यदि पृथग्जनसभागता नाम द्रव्यमस्ति किं पुनः पृथग्जनत्वेनार्य-

---

1 Mss. भिन्नाद्द

2 Mss. ०नाशिचादयः

3 Mss. ०सचारेति

4 Mss. द्वितीय

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धर्मालाभस्वभावेन कल्पितेन , प्रयोजनमिति वाक्यशेषः । पृथग्जनसभागतयैव पृथग्जन इति परिच्छिद्यते यथा मनुष्यसभागतयैव मनुष्य इति । **न हि मनुष्यसभागताया अन्यन्मनुष्यत्वं कल्प्यते** वैभाषिकैरलाभवदन्यस्वभावम् । तत्र च साधनम् , न स्वसभागताया अन्यत्पृथग्जनत्वं स्वसभागताप्रत्ययाभिधेयत्वात् , मनुष्यत्ववत् । **नैव च लोकः सभागतां पश्यत्यरूपिणीत्वा**दिति । न लोकश्चक्षुषा सभागतां पश्यत्यरूपिणीत्वादरूपवतीत्वादरूपस्वभावत्वाद्वा । यथा न पश्यति , एवं न शृणोति , यावन्न स्पृशतीति । अनेन प्रत्यक्षासिद्धतां दर्शयति । **न चैनां प्रज्ञया परिच्छिनत्ती**ति । अनेनानुमानेनापि न सिध्यतीति दर्शयति । **प्रतिपद्यते च सत्त्वानां जात्यभेद**मिति । **सत्या अपि तस्याः कथं तत्र व्यापार** इति । जात्यभेदप्रतिपत्तौ जात्यभेदप्रतिपत्तिरस्ति । सा तु न सभागतया द्रव्यान्तरकल्पितया कृता प्रमाणेनानुपलभ्यमानत्वेन तस्या व्यापारासंभवात् । ब्रूयास्त्वम् , न निर्निमित्ता सामान्यबुद्धिर्भवितुमर्हति । तेन यन्निमित्तं तस्याः सामान्यबुद्धेः , तत् सभागता नाम द्रव्यमिति । वयमपि तां सामान्यबुद्धिं सनिमित्तां ब्रूमः । सादृश्यकृता हि सा बुद्धिः । तच्च सादृश्यं न द्रव्यान्तरमिति ब्रूमः । तेनोच्यते । **अपि चासत्त्वसभागतापि किं नेष्यत** इति विस्तरः । न द्रव्यान्तरसभागतानिमित्ता सत्त्वः सत्त्व इति सामान्यबुद्धिः सामान्याकारप्रवृत्तत्वात् । शालियवमुद्गमाषादिसामान्यबुद्धिवत् । शालियवस्वजातिसादृश्यकृता ह्येषा [1]सामान्यबुद्धिः । न च[1] तेषां स्वजातिसादृश्यं [2]स्वतोऽर्थान्तरं भवति । **तासाञ्च सभागताना**मिति विस्तरः । अन्या सत्त्वसभागता अन्या धातुसभागता अन्यागतिसभागतेत्य**न्योन्यभिन्नाः** सभागता इष्यन्ते । **तासां सभागतेति प्रज्ञप्तिरियं** सभागतेयं सभागतेत्यभेदेन **कथं** भवद्भिः **क्रियते** , व्यवहारः प्रत्ययश्च कथं जायते । यद्यत्रापि सभागतान्तरं प्रतिज्ञायेत येन सभागतासामान्यबुद्धिर्भवेत् । भवेत्[3] सोऽयमपक्षः प्राक्पक्षविरोधात् । **वैशेषिकाश्चैवं द्योतिता** इति । ज्वलिताः समर्थिता इत्यभिप्रायः । तेऽपि हि सामान्य**पदार्थवादिनो** भवन्तोपीति । अयं तु तेषां वैशेषिकाणां **विशेषः** । **एकोऽप्यनेकस्मिन् वर्तते स्रक्सूत्रवत्** , भूतकण्ठे गुणवच्चेति , **यदि द्योतिताः** सामान्यपदार्थवादित्वात्[4] , **यदि न द्योतिता** एकानेकनित्यानित्यत्वादिविशेषवादि-

1...1 B सामान्यबुद्धिनः । च
2 A स्वत्वार्थान्तरं
3 Mss. भवेन्न
4 Mss. °परार्थवादित्वात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वात्। नहि परलोकास्तित्वादीनि वैशेषिकैः कल्पितानीति न व्यवस्थाप्यन्ते। स चेदित्थंत्वमागच्छतीति। प्राणातिपातेनासेवितेन भावितेन बहुलीकृतेन नरकेषूपपद्यते। स चेदित्थंत्वमागच्छति मनुष्याणां सभागतां प्राप्नोति प्राणातिपातेनाल्पायुर्भवतीति विस्तरः। इदं प्रकार इत्थम्। तद्भावः इत्थंत्वमिति। शरीरेन्द्रियसंस्थानचेष्टाहारादिसाभाग्यकारणम्[1] अन्योन्याभिरभिसम्बन्धनिमित्तं च सभागतेत्याचार्यसङ्घभद्रः। तदेतदेतेनैव प्रत्युक्तम्। वयमपि ह्येवमिच्छामः। न तु सा सभागता द्रव्यान्तरम्। त एव हि[2] संस्कारास्तथाकारणभावं प्रतिपद्यन्त इति।

आसंज्ञिकमसंज्ञिषु

निरोधश्चित्तचैत्तानाम्

इति विस्तरः। असंज्ञिनामिदमासंज्ञिकम्। असंज्ञिषु वा भवमासंज्ञिकम्। निरुध्यन्तेऽनेन चित्तचैत्ताः। चित्तचैत्तान् वा निरुणद्धीति निरोधः। येनानागतेऽध्वन्यवस्थिताश्चित्तचैत्ताः कालान्तरं तावत्कालं सन्निरुद्ध्यन्ते। नोत्पत्तुं लभन्त इत्यर्थः। तदासंज्ञिकं नाम द्रव्यम्। नदीतोयसन्निरोधवत्। सेतुवदित्यर्थः। ध्यानान्तरिकावदिति। यथा ब्रह्मपुरोहिता नाम ते देवा येषां केचिन्महाब्रह्माणः प्रदेशे भवन्ति ध्यानान्तरिकायाम्। तथा बृहत्फला नाम ते देवा येषामसंज्ञिसत्त्वाः प्रदेशे भवन्ति। न भूम्यन्तरे भवन्ति। उपपत्तिकाले च्युतिकाले च संज्ञिन इति सम्बन्धनीयम्। क्लिष्टेन मनसा प्रतिसन्धिबन्धात्।

उपेक्षायां च्युतोद्भवौ[3]

इति च नियमात्। पूर्वसमापत्तिसंस्कारपरिक्षयादिति। पूर्वसमापत्तिसंस्कारलक्षणस्य विपाकहेतोः परिक्षयात्। ततः समाप्तफलत्वादित्यर्थः। पूर्वसमापत्तिसंस्कारावेधपरिक्षयादित्यपरे व्याचक्षते। [4]अपूर्वानुपचयाच्चेति। चित्ताभावात् कर्मानुपचयादित्यभिप्रायः। क्षिप्ता इव क्षीणवेगा इषवः पृथिवीमिति। उपपद्यन्त इति प्रकृतम्। पूर्वमयं पदिर्जन्यर्थः। इदानीमर्थवशाद्गत्यर्थः[5]। सम्पद्यन्ते गच्छन्तीत्यर्थः। पृथिवीं गच्छन्तीति वाक्यशेष इत्यपरे ॥४१॥

[तथासंज्ञिसमापत्तिर्ध्यानेऽन्त्ये निःसृतीच्छया।

शुभोपपद्यवेद्यैव नार्यस्यैकाध्विकाप्तये ॥४२॥]

असंज्ञिनां सत्त्वानां समापत्तिरसंज्ञा वा समापत्तिरित्यसंज्ञिसमापत्तिः।

---

1 Mss. ०दिसौभाग्यकारणम्
2 Mss. add ते.
3 Kārikā, III, 42.
4 A अनुपूर्वानुपचया० ; V अपूर्वानुपरया०
5 Mss. ०र्थं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अव्याकृतमेव ह्यासंज्ञिकम् । कुशलैव चेयं समापत्तिरिति वक्ष्यते ।

पञ्चस्कन्धको विपाक इति। च्युत्युपपत्तिकाले चित्तचैत्तानां विपाकत्वसद्भावात्[1] । **तत एव तल्लाभीति** । **यत एव परिहीणोऽपि पुनरुत्पाद्यासंज्ञिसत्त्वेषूपपद्यते** तत एव तल्लाभी **नियामं नावक्रामति** । नियामावक्रान्त्यैव [2]ह्यार्योऽपायगत्यासंज्ञिकमहाब्रह्मकौरवोपपत्त्यष्टमभवादीनामप्रतिसंख्यानिरोधं प्रतिलभते । **विनिपातस्थानमिवैनां पश्यन्तीति** । अपायस्थानमिवैनां पश्यन्तीत्यर्थः । गिरितटादिविनिपातस्थानमिवेत्यपरे । **निःसरणसंज्ञिनो हि तां समापद्यन्ते** । पृथग्जना मोक्षसंज्ञिन इत्यर्थः । **न चैवमार्या** विपरीतसंज्ञिनः प्रतिलभन्ते । **ध्यानवदिति** । चतुर्थध्यानलाभादतीतानागतमनादिमति संसारे लब्धपूर्वं चतुर्थध्यानं प्रतिलभन्ते योगिनः । तस्मात् किं तद्वदेवातीतानागतां तां **प्रतिलभन्त** इति पृच्छति । **अन्येऽपि तावन्न प्रतिलभन्त** इति । पृथग्जना अपि तावन्नातीतानागतां प्रतिलभन्ते येषां तावदियमात्मीया समापत्तिः । किं पुनरार्या येषामियमनात्मीयेति । **उचितापि सतीति** । अनादिमति संसारे लब्धपूर्वापि **महाभिसंस्कारसाध्यत्वा**न्महायत्नाभिनिष्पाद्यत्वादित्यर्थः । **अचित्तकत्वाच्च** ।

एकाध्विकाप्यते

समानाध्विका लभ्यत इत्यर्थः । **यथा प्रातिमोक्षसंवर** इति । प्रातिमोक्षसंवरोऽष्टविधोऽपि यदा समादीयते तदा स प्राप्यते । प्राप्तिश्च तस्य तस्मिन्नेव क्षण उत्पद्यते । **लब्धया तु तया समापत्त्या द्वितीयादिषु क्षणेषु** प्रातिमोक्षसंवरवदेव **समन्वागतो भवति यावन्न त्यजति तां समापत्तिम्** । तत्त्यागस्तु परिहाण्या भूमिसञ्चाराद्वा । **अचैत्तिकत्वान्नानागता भाव्यते** । कुशलं हि चित्तमनागतं भाव्यते । न त्वियमचित्तकेति न तद्वदनागता भाव्यते ॥४२॥

निरोधाख्या तथैवेयं विहारार्थं भवाग्रजा ।
शुभा द्विवेद्याऽनियता चार्यस्याप्या प्रयोगतः ॥४३॥

निरोधाख्या तथैव

इति। समापत्तिरिति वर्त्तते । एवशब्दोऽवधारणे । यथाऽसंज्ञिसमापत्तिनिर्देशे तथाशब्देन निरोधश्चित्तचैत्तानामित्यतिदिश्यते । तथैवेहापि निरोधसमापत्तिनिर्देशे स एवंप्रकारोऽतिदिश्यत इति । **शान्तविहारसंज्ञा-**

1 Mss. सम्भवात् ; To. रम्भावात् (misprint?) 2 A ह्यार्योऽपाय

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्वकेण[1] **मनसिकारेणे**ति। विहारः क्रीडा। विहार इव विहारः। समाधिविशेषः। शान्तो विहारः शान्तविहारः। शान्तविहारे संज्ञा शान्तविहारसंज्ञा। सा पूर्वा अस्येति शान्तविहारसंज्ञापूर्वकः। मनसिकारो मनस्कार इति योऽर्थः [2]अलुक्समासात् स[2] मनसिकार इति भवति। संज्ञावेदितसमुदाचारपरिश्रान्ता हि तत्र शान्तविहारसंज्ञिनस्तथाविधेन मनसिकारेणैनां निरोधसमापत्तिं समापद्यन्ते। तां त्वसंज्ञिसमापत्तिं **निःसरणसंज्ञापूर्वकेण** मोक्षसंज्ञापूर्वकेणेत्यर्थः। **अपरपर्यायवेदनीया चे**ति। अपरः[3] पर्यायस्तृतीयादिजन्म तत्र वेदनीया। कथम्। य आर्यः कामधातौ निरोधसमापत्तिमुत्पाद्य भवाग्र उत्पद्येत तस्य सा परिपूरिकोपपद्यवेदनीया। यस्तु ततः परिहीणो रूपधातावुपपद्य कालान्तरेण च पुनरपि भवाग्रं लब्ध्वा निरोधसमापत्तिमुत्पाद्यानुत्पाद्य वा भवाग्र[4] उपपद्यते। तस्य साऽपरपर्यायवेदनीया भवति। यस्त्विह परिनिर्वायात्तस्यानियतेति।

[5]**उच्छेदभीरुत्वा**दिति। सर्वात्मभावोच्छेदभीरुत्वात्

व्यथन्ते ह्यपुनर्भवात् प्रपातादिव वालिशाः।

असंज्ञिसमापत्तौ कस्मादुच्छेदभयं न भवति। तत्र रूपसद्भावात्। रूपे ह्यात्मसंज्ञामभिनिवेश्य तां समापद्यन्ते। निरोधसमापत्तौ त्वारूप्यभूमिकत्वाद्रूपमपि नास्तीति सर्वात्मभावाभावं पश्यन्तो न तां समापत्तुमुत्सहन्ते। ननु चारूप्येषु निकायसभागजीवितेन्द्रियादयश्चित्तविप्रयुक्ताः सन्ति। कस्मात्तत्रात्मसंज्ञामभिनिवेश्य तां न समापद्यन्ते। विप्रयुक्तानामदृश्यत्वात्। **आर्यमार्गबलेन चोत्पादनात्**। कथं पुनर्गम्यत आर्यमार्गबलेन तदुत्पादनमित्यत आह। **दृष्टधर्मनिर्वाणस्य तदधिमुक्ति**त इति। [6]दृष्टे जन्मनि निर्वाणं दृष्टधर्मनिर्वाणम्। तस्य। तदधिमुक्तितः। तदित्यधिमुक्तिस्तदधिमुक्तिः। तेन वाधिमुक्तिस्तदधिमुक्तिः। तदधिमुक्तेस्तदधिमुक्तितः। दृष्टे जन्मन्येतन्निर्वाणमित्यार्यस्तामधिमुच्यते। केचित् पुनरेवं पठन्ति। दृष्टनिर्वाणस्य तदधिमुक्तित इति। एवं च व्याचक्षते। दृष्टं निर्वाणमनेनेति[7] दृष्टनिर्वाणस्तस्यार्यस्य। तस्यामधिमुक्तिस्तदधिमुक्तिः। तदधिमुक्तेस्तदधिमुक्तितः। एतदुक्तं भवति। दृष्टनिर्वाण आर्यस्तामधिमुच्यते नान्य इति। ननु च पृथग्जनोऽपि लौकिकेन मार्गेण दृष्टनिर्वाणः।

---

1 U. ०पूर्विकेण

2...2 अलुक्समासाद

3 To. अपर

4 Mss. भावा०

5 V. उच्छेदभयभीरु०

6 A दृष्ट

7 Mss. ०समेनेति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न पृथग्जनो दृष्टनिर्वाणः ' प्राप्तनिर्वाणस्तु[1] भवेत् ' तदुत्तरां हि भूमिं पृथग्जनः शान्ततः पश्यन् वैराग्यं लभते न निर्वाणमित्यचोद्यमेतत् । प्रयोगलभ्यैवेयमिति ' इयमपि समापत्तिरसंज्ञिसमापत्तिवदेव महाभिसंस्कार-साध्येति[2] । तथैव

एकाध्विकाप्यते[3] ।

कथमित्याह ' न चातीता लभ्यत इति । यदा परिहीणः पुनस्तामुत्पादयति तदा प्रयोगेणापूर्वैव लभ्यते । [4]प्रातिमोक्षसंवरवदिति विस्तरेण व्याख्येया । चित्त-बलेन तद्भावनादिति । चित्तबलेनानागतभावनादित्यर्थः ॥४३॥

बोधिलभ्या मुनेर्न प्राक् चतुस्त्रिंशत्क्षणाप्तितः ।
कामरूपाश्रये तूभे निरोधाख्यादितो नृषु ॥४४॥

बोधिलभ्या मुनेः

[5]प्रयोगलभ्यैवेयमित्युत्सर्गस्यायमपवादः ' श्रावकप्रत्येकबुद्धानां स विधि-रिति कृत्वा ' क्षयानुत्पादज्ञाने [6]बोधिरिति वक्ष्यति[7] । तेनाह ' क्षयज्ञानसमकाल-मिति विस्तरः । सास्रवाश्च क्षयज्ञान इति बुद्धा भगवन्त एतां प्रतिलभन्ते । नास्ति बुद्धानां किञ्चित् प्रायोगिकं नामेति ' यथोक्तं स्तोलकारेण

न ते प्रायोगिकं किंचित् कुशलं कुशलान्तग[8] ।
इच्छामात्रावबद्धा ते[9] यत्र कामावसायिता ॥

इति । कथं पुनर्भगवानुभयतो भागविमुक्त इति ' क्लेशावरणं समा-पत्त्यावरणं चोभयतो भागः ' ततो विमुक्तः । सिध्यत्युत्पादितायामिवेति । सिध्यत्युभयतो भागविमुक्तो भगवान् सम्मुखीकृतपूर्वायामिव । तस्यां वशित्व-लाभात् । तत्सम्मुखीकारणसामर्थ्ययोगतः । प्रागेव तामिति विस्तरः । धर्मतैषा यद्बोधिसत्त्वश्चरमभविको भवाग्रलाभी भूत्वा चतुर्थध्यानसन्निश्रयेण दर्शन-मार्गमुत्पाद्य ततश्च व्युत्थाय भवाग्रं समापद्यते ' ततो निरोधसमापत्तिं समापद्यते । ततो व्युत्थाय पुनश्चतुर्थध्यानसंनिश्रयेण भावाग्रिकभावनाप्रहा-तव्यक्लेशप्रहाणं कृत्वा क्षयज्ञानकालात् प्रभृत्यनुत्तरसम्यक्संबुद्धो भवती-त्येवं शैक्षावस्थायां स तामुत्पादयतीति पाश्चात्त्याः । कश्मीरमण्डलात्

1 Mss. add भवं.
2 A ०संस्कारसमाधिति
3 Kārikā, II, 42.
4 Mss. प्राप्तिमोक्ष०
5 A प्रयोगलभ्यं त्येवेय०
6 A, C & U बौधि०
7 See Kārikā, VI, 70.
8 Mss. कुशलानुगा
9 A, U & V omit ते, but C inserts it in the mergin.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पश्चाद्भवाः पाश्चात्त्याः। नेत्रीपदमिति शास्त्रनाम स्थविरोपगुप्तस्य। यत्रेदं वाक्यम्। निरोधसमापत्तिमुत्पाद्य क्षयज्ञानमुत्पादयतीति वक्तव्यं तथागत इति। सत्याभिसमये षोड़शभिरिति। दुःखे धर्मज्ञानक्षान्तिमारभ्य यावन्मार्गेऽन्वयज्ञानमिति षोडशभिश्चित्तक्षणैः। भवाग्रवैराग्ये चाष्टादशभिरिति। नवप्रकाराणां क्लेशानां भावाग्रिकाणां भावनाहेयानां प्रहाणाय नवानन्तर्यमार्गा नव च विमुक्तिमार्गा इत्यष्टादशभिः। त एते चतुस्त्रिंशद्भवन्ति षोडश चाष्टादश चेति। अधोभूमिका न[1] पुनः प्रहेया भवन्तीति। कामावचरादीनां क्लेशानां लौकिकेन मार्गेण पृथग्जनत्वावस्थायामेव प्रहीणत्वात्। यद्येष नियमः प्रहीणक्लेशप्रतिपक्षोत्पादनं न कर्तव्यमिति। अथ किमर्थं प्रहीणेषु कामावचरेषु क्लेशेषु तत्प्रतिपक्षं धर्मज्ञानपक्षं[2] मार्गमभिसमयकाल उत्पादयति। तन्नान्तरीयकत्वादन्वयज्ञानपक्षस्य मार्गस्य। न ह्यसत्यां धर्मज्ञानपक्षोत्पत्तावन्वयज्ञानपक्षसम्मुखीभावः सम्भवति। एतद्ध्यन्वयज्ञानस्यान्वयज्ञानत्वं यदतः पश्चाद् भवतीति। पाश्चात्त्या आहुः। किं पुनः स्यादिति विस्तरः। को दोषः स्याद् यदि विसभागं सास्रवं चित्तमन्तरा सम्मुखीकुर्यात्। वैभाषिका आहुः। व्युत्थानाशयः स्यादिति विस्तरः। व्युत्थानाभिप्रायो बोधिसत्त्वः स्यात्। व्युत्थानकुशलः स्यादित्यपरे। कुशलमूलार्थो ह्याशयार्थः। तदेतदुक्तं भवति। ईदृशानि कुशलमूलानि बोधिसत्वानां यैः सम्मुखीभूतैस्तावन्न व्युत्तिष्ठन्ते यावदेकासन एवानुत्तरा सम्यक्सम्बोधिः प्राप्तेति। बहिर्देशका आहुः। सत्यमव्युत्थानाशयो न तु यथा भवन्तो वर्णयन्तीति। पूर्वमेव तु वर्णयन्ति। क्षयज्ञानसमकालमिति यः पक्षः।

यद्यप्यनयोर्बहुप्रकारो विशेष इति। एका

ध्यानेऽन्त्ये[3]

अपरा

भवाग्रजा[4]

एकां निःसरणसंज्ञया समापद्यते। अपरां विहारकामतयेत्येवमादि बहुप्रकारो विशेषः। साम्यं त्वनयोः

कामरूपाश्रये तूभे[5]

इति। स्याद्रूपभव इति विस्तरः। यः [6]क्वचिद्रूपभवः सर्वोऽसौ

---

1 V नि
2 Mss. ०पक्ष्यं
3 Mss. ०न्ते : Kārikā, II, 42.
4 Kārikā, II, 43.
5 To. भूते
6 V कश्चि०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवः । पञ्चव्यवचार इति चतुःकोटिकः । स्याद्रूपभवो न चासौ भवः पञ्चव्यवचारः[1] । रूपावचराणां संज्ञिनां देवानां विसभागे चित्ते स्थितानामसंज्ञिसमापत्तिं निरोधसमापत्तिं च समापन्नानामसंज्ञिनां च देवानामासंज्ञिके प्रतिलब्धे यो भवः । स्याद् भवः पञ्च व्यवचारो न चासौ रूपभवः । कामावचराणां सत्त्वानां सभागे चित्ते स्थितानां यो भवः । स्याद्रूपभवः स च भवः पञ्चव्यवचारः । रूपावचराणां संज्ञिनां देवानां सभागे चित्ते स्थितानां [असंज्ञिनां][2] च देवानामासंज्ञिकेऽप्रतिलब्धे यो भवः । स्यान्नैव रूपभवो न चासौ भवः पञ्चव्यवचारः । कामावचराणां सत्वानां विसभागे चित्ते स्थितानामसंज्ञिसमापत्तिं निरोधसमापत्तिं च समापन्नानां यो भवः । आरूप्यभवश्च । तत्र प्रथमा कोटिरुदाहरणम् । रूपभवो रूपावचरं स्कन्धपञ्चकम् । पञ्चव्यवचारः पञ्चस्कन्ध[3] इत्यर्थः । व्यवचार इति काश्यपस्य तथागतस्य स्कन्धसंज्ञा । विशेषेणावचारो व्यवचारः । अन्यथीभावेन विसंवादनमित्यर्थः । सोऽस्यास्तीति व्यवचारः । [4]अर्श आदिभ्योऽजित्यकारो मत्वर्थीयः । विसंवादनीत्यर्थः ।

फेनपिण्डोपमं रूपं वेदना बुद्बुदोपमा[5]

इत्यादिना विसंवादनात् । तत्र[6] यदि रूपधातावसंज्ञिसमापत्तिर्नेष्यते[7] । असंज्ञिसमापत्तिं निरोधसमापत्तिं समापन्नानामिति नोच्येत । तेन रूपावचर्यसंज्ञिसमापत्तिरिति गम्यते । तत्रापि त्वयं विशेष इति । तत्र साधर्म्येऽपि विशेषो भवति । पश्चाद्रूपधाताविति । य आर्या निरोधसमापत्तिमुत्पाद्य ततः परिहीणा ध्यानं च लब्ध्वा रूपधातावुपपद्यन्ते । तैः परिहीणपूर्वैः पूर्वाभ्यासवशाद्रूपधातौ निरोधसमापत्तिरुत्पाद्येत । असंज्ञिसमापत्तिस्तु कामरूपधातौ प्रथमतोऽपि पृथग्जनैरुत्पाद्यत इत्ययं विशेषः ।

किमप्यस्ति परिहाणिरिति । निर्वाणसदृशीयं समापत्तिः । कथमतः परिहाणिरित्यसम्भावयन् पृच्छति । उदायिसूत्रमिति । आर्यशारिपुत्रभाषितमेतत सूत्रम् । उदायी तु तत्र विबन्धक इत्युदायिसूत्रमित्युच्यते । कथमिति श्रावस्त्यां निदानम् । तत्रायुष्मान् शारिपुत्रो भिक्षूनामन्त्रयते स्म । इहायुष्मन्तो भिक्षुः शीलसम्पन्नश्च भवति समाधिसम्पन्नश्च प्रज्ञासम्पन्नश्च । सोऽभीक्ष्णं संज्ञावेदितनिरोधं समापद्यते च व्युत्तिष्ठते च । अस्ति चैतत स्थानमिति यथाभूतं

1 Mss. ०व्यवहारः
2 Supplied from Tib. in To.
3 To. स्कन्धक
4 Pā., V, 2, 127.
5 See Saṃyutta, III, 142.
6 Mss. तद्
7 Mss. ०पत्तिमाप्यते, but corrected in To. on the basis of Tib.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रजानाति । स न हैव दृष्ट एव धर्मे [1]प्रतिपद्येवाज्ञामारागयति । नापि मरण-कालसमये । भेदाच्च कायस्यातिक्रम्य देवान् कवडीकारभक्षानन्यतमस्मिन् दिव्ये मनोमये काय उपपद्यते । स तत्रोपपन्नोऽभीक्ष्णं संज्ञावेदितनिरोधं समापद्यते च व्युत्तिष्ठते च । अस्ति चैतत् स्थानमिति यथाभूतं प्रजानाति । तेन खलु पुन समयेनायुष्मानुदायी तस्यामेव पर्षदि सन्निषण्णोऽभूत् सन्निपतितः । अथायुष्मानुदाय्यायुष्मन्तं शारिपुत्रमिदमवोचत् । अस्थानमेतदायुष्मञ्छारिपुत्रानवकाशो यद्भिक्षुरन्यतमस्मिन् दिव्ये मनोमये काय उपपन्नोऽभीक्ष्णं संज्ञावेदितनिरोधं[2] समापद्यते च व्युत्तिष्ठते च । अस्ति चैतत् स्थानमिति यथाभूतं प्रजानाति । द्विरपि त्रिरप्यायुष्मानुदाय्यायुष्मन्तं शारिपुत्रमिदमवोचत्[3] । अस्थानमेतदायुष्मन्निति पूर्ववत् । अथायुष्मतः शारिपुत्रस्यैतदभवद् यावत्त्रिरपि मेऽयं भिक्षुर्भाषितं प्रतिवहति प्रतिक्रोशति । न च मे कश्चित् सब्रह्मचारी भाषितमभ्यनुमोदते । यं न्वहं येन भगवांस्तेनोपसंक्रामेयम् । अथायुष्माञ्छारिपुत्रो येन भगवांस्तेनोपसंक्रान्तः । उपसंक्रम्य भगवतः पादौ शिरसा वन्दित्वैकान्ते निषण्णः । एकान्ते निषण्णश्चायुष्माञ्छारिपुत्रो भिक्षूनामन्त्रयते स्म । इहायुष्मन्तो भिक्षुः शीलसम्पन्नश्च भवति पूर्ववत् । तेन खलु समयेनायुष्मानुदायी पूर्ववत् । एवं द्विरपि त्रिरप्यायुष्मानुदाय्यायुष्मन्तं शारिपुत्रमिदमवोचत् । पूर्ववत् । अथायुष्मतः शारिपुत्रस्यैतदभवत् । शास्तुरपि मे पुरस्तादयं भिक्षुर्यावत्त्रिरपि भाषितं[4] प्रतिवहति प्रतिक्रोशति । न च मे कश्चित् सब्रह्मचारी भाषितमभ्यनुमोदते । यं न्वहं तुष्णीं स्याम् । अथायुष्माञ्छारिपुत्रस्तुष्णीमभूत् । तत्र भगवानायुष्मन्तमुदायिनमामन्त्रयते स्म । कं पुनस्त्वमुदायिन्नन्यतमं दिव्यं मनोमयं कायं संजानीषे । ननु यावदेवारूपिणां संज्ञामयमेवं भदन्त त्वं तावन्मोहपुरुषान्ध एव [5]सन्नचक्षुश्चक्षुष्मता शारिपुत्रेण भिक्षुणा सार्धमभिधर्मेऽभिविनये[6] संलपितव्यं मन्यस इति । तत्र भगवानायुष्मन्तमुदायिनं सम्मुखमवसाद्यायुष्मन्तमानन्दमामन्त्रयते स्म । त्वमप्यानन्द[7] स्थविरं भिक्षुं विहेठ्यमानमध्युपेक्षसे कारुण्यमपि ते मोहपुरुष[8]नोत्पन्नं स्थविरे भिक्षौ विहेठ्यमान इति । तत्र भगवानायुष्मन्तमुदायिनमायुष्मन्तं

---

1 A & C प्रतिपत्त्ये ॰ 2 A संज्ञानिरोधितकायं

3 V ॰पुत्रमेतदवोचत् 4 Mss. भावितणो

5 A omits न्न leaving some space indicating perhaps the illegibility of the letter in the original; V omits न्न without any indication.

6 Mss. भिनये 7 V. ॰मद्यानन्द 8 V ॰पुरुषे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चानन्दं सम्मुखमवसाद्य [1]भिक्षूनामन्त्रयते स्म। इह भिक्षवो भिक्षुः शीलसम्पन्नश्च भवति समाधिसम्पन्नश्च विस्तरेण यावदस्ति चैतत् स्थानमिति। यथाभूतं प्रजानातीत्युक्त्वा भगवानुत्थायासनाद् विहारं प्राविक्षत् प्रतिसंलयनायेति। अत्रायुष्मानुदाय्यारूप्यावचरोऽयं मनोमयः काय उक्त इति मनसि कृत्वा प्रतिबन्धमकार्षीत्। तत्र हि रूपं नास्ति। मन एव तु ससंप्रयोगमस्ति। तस्मान्मनोमयः कायः। तत्र चेयं समापत्तिर्न समापद्यत इति तस्याभिप्रायः। आर्यशारिपुत्रस्य तु रूपावचरो दिव्यो मनोमयः कायोऽभिप्रेतः शुक्रशोणितमनुपाय्य[2] प्रादुर्भावात्। अतएव चासावायुष्मानुदायी भगवता पृष्टः। कं पुनस्त्वमुदायिन्नन्यतमं दिव्यं मनोमयं कायं संजानीषे। ननु यावदेवारूपिणं संज्ञामयमिति। तेनाप्येवं भदन्तेति प्रतिपन्नम्। भगवानपि रूपावचरमेव दिव्यं मनोमयं कायमभिप्रेत्यार्यशारिपुत्रस्य मतं समर्थयन् तमायुष्मन्तमुदायिनमवसादयति स्म। त्वं तावन्मोहपुरुषान्ध एव सन्नचक्षुश्चक्षुष्मता शारिपुत्रेण भिक्षुणा सार्धमभिधर्मेऽभिविनये संलपितव्यं मन्यस इति। **अस्ति चैतत् स्थानमिति।** यदेतन्निरोधसमापत्तेः समापदनं व्युत्थानं चेत्येतत् स्थानं **यथाभूतं प्रजानाति। प्रतिपद्यते**वेति[3]। पूर्वमेवेत्यर्थः। **आज्ञामाराग[य]तीत्य**र्हत्त्वं प्राप्नोतीत्यर्थः। **इयञ्च समापत्तिर्भावाग्रिकी**ति[4] विस्तरः। निरोधसमापत्तिर्भावाग्रिकी। यश्च तल्लाभी तस्य भवाग्र एवोपपत्तिः स्यान्नरूपधातौ। उक्तं च सूत्रे। स तत्र रूपधातावुपपन्नोऽभीक्ष्णं संज्ञावेदितनिरोधं समापद्यते च व्युत्तिष्ठते चेति। तस्मादस्यतः परिहाणिरिति गम्यते। युज्यत एवैतद् वैभाषिकाणाम्। सौत्रान्तिकानान्तु कथमेतत्। आर्य एव हि निरोधसमापत्तिलाभी। न चार्यमार्गादस्ति परिहाणिरिति सौत्रान्तिकसिद्धान्तः। तस्यार्यस्य कथमुपरिभूमिकादार्यमार्गात् परिहाणिरितीष्यते[5]। तेषामप्येतत् सूत्रं न विरुध्यते। कथम्। यो हि कश्चित् भवाग्रलाभी नियाममवक्रामति सोऽनागामी सन्निरोधसमापत्तिमुत्पादयेत्। स भवाग्रान्निरोधसमापत्तेश्च परिहीयेत। न तु मार्गात्। ऊर्ध्वभूमिकस्यार्यमार्गस्य कदाचिदनुत्पादितत्वात्। स परिहीणो भूत्वा ध्यानमुत्पाद्य रूपधातावुपपद्येत। तस्मादस्यतः परिहाणिर्न चार्यमार्गात् परिहाणिरिति न स्वसिद्धान्तविरोधः। **नवानुपूर्वसमापत्तय इति।**

1 Mss. भिक्षूमाम०

2 A ०मनुप्राय, C & V ०मनपाय

3 Mss. प्रतिपद्यं वेति

4 Mss. omit त्रि.

5 Mss. ०रितिरिष्यते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चत्वारि ध्यानानि चत्वार आरूप्या निरोधसमापत्तिश्च। [1]प्राथमकल्पिकं प्रतीति। आदितः समापत्तिविधायकं प्रतीत्यर्थः।

नियतोभयथावेदनीयत्वादिति। नियतवेदनीयासंज्ञिसमापत्तिरुपपद्यवेदनीयत्वात्। उभयथा वेदनीया निरोधसमापत्तिर्नियता नियतवेदनीयेत्यर्थः। नियतवेदनीया अनागामिनः' अनियतवेदनीया अर्हत इहैव परिनिर्वाणात्। **प्रथमोत्पादनतोऽपीति।** असंज्ञिसमापत्तिं कश्चित् प्रथमं मनुष्येषूत्पादयति' कश्चित् रूपधातौ' निरोधसमापत्तिं तु मनुष्येष्वेवोत्पादयति' परिहीणस्तु रूपधातौ। अथ कस्मान्मनुष्येष्वेवैनामुत्पादयति। संज्ञावेदनाद्वारेण वितर्कविचारादिचैत्तप्रचारपरिखिन्नोऽनागामी तां[2] तेन विहारेण सुखं विहरेयमिति निरोधसमापत्तिमुत्पादयति। रूपधातूपपन्नस्त्वनागामी रूपधातोः शान्तत्वान्न तथा तत्रत्यचैतसिकप्रवृत्त्या पीड्यत इति न प्रथमतस्तत्रोत्पादयति' परिहीणस्तु पूर्वाभ्यासतस्तामुत्पादयति। आरूप्यधातूपपन्नोऽप्यत एव शान्तत्वान्नैवसंज्ञानासंज्ञायतनोपपन्नो नोत्पादयति। निरुपधिशेषनिर्वाणप्रसंगाद्वा। तत्र हि रूपं नास्ति। चित्तचैत्ता यदि निरुध्येरन् परिनिर्वाणमेवास्य स्यात्। चित्तविप्रयुक्तानां केवलानामवस्थानासामर्थ्यान्नियतवेदनीयस्य च[3] कर्मणोऽपरिसमाप्तफलस्य विघ्नभावेनावस्थानान्न परिनिर्वाणसम्भवः। असंज्ञिसमापत्तिं तु मोक्षसंज्ञया निःसरणसंज्ञापूर्वकेण मनसिकारेण समापद्यत इति रूपधातावपि प्रथमतः समापद्यते।

कस्मात् पुनरेते इति विस्तरः। **सर्वचित्तचैत्तनिरोधस्वभावत्वात्**' उभे अप्येते समापत्ती चित्तचैत्तनिरोधे इति वक्तव्ये इत्यभिप्रायः। **तत्प्रातिकूल्येन तत्समापत्तिप्रयोगादिति।** संज्ञावेदनाप्रातिकूल्येन तयोः समापत्त्योः प्रयोगात्। संज्ञाप्रातिकूल्येनासंज्ञिसमापत्तिप्रयोगः संज्ञारोगः संज्ञाशल्यः संज्ञागण्ड एतच्छान्तमेतत् प्रणीतमिति विस्तरः। संज्ञावेदितप्रातिकूल्येन निरोधसमापत्तिप्रयोगः। **परचित्तज्ञानवचनवदिति।** यथा परचित्तज्ञानवचनं न च परचित्तज्ञानेन चैत्ता न ज्ञायन्ते कदाचित्' अथ च परस्य चित्तं ज्ञास्यामीत्येवं प्रथमतः प्रयोगात् परचित्तज्ञानमित्युच्यते न [4]परचित्तचैत्तज्ञानमिति' तद्वदिहाप्यनयोः समापत्त्योस्तथा वचनम्।

तत्राचित्तकान्येव निरोधासंज्ञिसमापत्त्यासंज्ञिकानीति वैभाषिकादयः' अपरिस्फुटमनोविज्ञानसचित्तकानीति स्थविरवसुमित्रादयः' आलयविज्ञानसचित्तका-

---

1 A प्रथम०
2 A & V तां
3 To. following Tib. omits च.
4 C परं चित्त०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नीति योगाचाराः । इति सिद्धान्तभेदः । तस्मादिदमुपन्यस्यते । **कथमिदानीं बहुकालनिरुद्धादिति** विस्तरः । बहुकालनिरुद्धग्रहणं समनन्तरनिरुद्धनिरासार्थम् । समनन्तरनिरुद्धादिदानीं कथं भवति । यदि समनन्तरनिरुद्धमस्तीत्यभ्युपगतं बहुकालनिरुद्धमप्यस्तीति किं नाभ्युपगम्यत इति वैभाषिकाः । न समनन्तरनिरुद्धस्यास्तित्वं ब्रूमः । अपि तु वर्तमानं चित्तमात्मनोऽन्यचित्तहेतुभावं व्यवस्थाप्य निरुध्यतेऽन्यच्चोत्पद्यते तुलादण्डनामोन्नामवत् । तच्च निरुद्धमपरं च चित्तमुत्पन्नं भवतीत्यनन्तरनिरुद्धाच्चित्ताच्चित्तान्तरमुत्पद्यत इत्युच्यते । वर्तमानसामीप्ये वर्तमानवदिति[1] कृत्वा । **अपरे पुनराहुरिति** सौत्रान्तिकाः । **कथं तावदारूप्योपपन्नानामिति** विस्तरः । तावच्छब्दः क्रमार्थः । इदमेव तावद् दृष्टान्तार्थं वक्तव्यमित्यर्थः । रूपस्य हि समनन्तरप्रत्ययो नेष्यते । तत् कथमुत्पद्यते । **तस्माच्चित्तादेव तज्जायते न रूपादिति ब्रूमः[2]** । **अन्योन्यबीजकं ह्येतदुभयमिति** । चित्तेऽपि सेन्द्रियस्य कायस्य बीजमस्ति । काये च सेन्द्रिये चित्तस्येति । **परिपृच्छायामिति** । परिपृच्छा नाम शास्त्रं कृतिः स्थविरवसुमित्रस्य । स तस्यामाह । पञ्चवस्तुकादीन्यपि हि तस्य सन्ति शास्त्राणि । तस्माद्विशिनष्टि । **तस्यैव दोष** इति । कतमः स दोषः । कथमिदानीं बहुकालनिरुद्धाच्चित्तादिति [3]य उक्तः[3] । **त्रयाणां सन्निपात** इति । इन्द्रियविषयविज्ञानानाम् । **संज्ञावेदनयोरप्यत्र निरोधो न स्यादिति** । भदन्तवसुमित्रस्यैतन्मतम् । सचित्तकत्वेऽपि तस्या निरोधसमापत्तेः संज्ञावेदनयोस्तत्र निरोध इति । तस्माद् **भदन्तघोषक[4]** एवं प्रसङ्गं करोति । **अविद्यासंस्पर्शजमिति** । [5]अविद्यासहितः संस्पर्शो[5]ऽविद्यासंस्पर्शः । तस्माज्जातमविद्यासंस्पर्शजम् । **न तु वेदनोत्पत्ताविति** । न तु वेदनोत्पत्तौ **स्पर्शो विशेषित** ईदृशः स्पर्शो वेदनाप्रत्यय इति । स एव भदन्तघोषक उपसंहरति । **तस्मादचित्तिकेति** । **कथमचित्तिकायाः समापत्तित्वमिति** । ध्यानादिसमापत्तित्वमर्हति । समाधिना हि चित्तचैत्ताः समा आपाद्यन्त एकाग्रीक्रियन्त इत्येवं मत्वा पृच्छति । **महाभूतसमतापादनादिति** । महाभूतानि समान्यापद्यन्तेऽनयेति समापत्तिः । एवमस्यां निरोधसमापत्तौ ध्यानादिषु च समापत्तित्वम् । का पुनरिह महाभूतानां

---

1 Pā., II, 3, 131
2 V स्थविरसुमित्र: instead of ब्रूम:
3...3 A leaves a gap, A च उक्त:
4 A घोषक
5...5 To. अविद्यासंहित: स्पर्शो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समता। चित्तोत्पत्तिप्रातिकूल्यसमवस्थानम्। **समागच्छन्तीति** समापद्यन्ते। समागच्छन्ति **तामिति समापत्तिः** कर्मसाधनम्। ध्यानादीन्यपि समागच्छन्ति योगिनः। तस्माद् ध्यानादीनामपि समापत्तित्वं भवति।

द्रव्यत इति। स्वलक्षणतः। **चित्तोत्पत्तिप्रतिबन्धनात्**। [1]यस्माच्चित्तोत्पत्तिं[2] प्रतिबध्नीतः। **न समापत्तिचित्तेनैवेति**। नैतदेवम्। कस्मात्। **समापत्तिचित्तेनैव तत्प्रतिबन्धनात्**। चित्तोत्पत्तिप्रतिबन्धनादित्यर्थः। कथमिति। तत् प्रतिपादयति। **समापत्तिचित्तमेव हीति** विस्तरः। तत् समापत्तिचित्तमेव नान्यद् द्रव्यम्। [3]**चित्तान्तरविरुद्धमनागतचित्तविरुद्धमुत्पद्यते। येन चित्तेन कालान्तरं** नात्यन्तम**प्रवृत्तिमात्रं भवति**। मात्रशब्दो द्रव्यान्तरव्यावर्तनार्थः। **तद्विरुद्धाश्रयापादनात्**। चित्तविरुद्धस्याश्रयस्य सन्तानस्यापादनात् कारणात्। यदेतदप्रवृत्तिमात्रं सासौ **समापत्तिरिति प्रज्ञप्यते**। प्रज्ञप्तिधर्मोऽयं न द्रव्यधर्म इत्यर्थः। यदि न द्रव्यधर्मः कथमसौ संस्कृतमिति प्रज्ञप्यत इत्यत आह। **तच्चाप्रवृत्तिमात्रम्। न पूर्वमभून्नोत्तरकालं व्युत्थितस्य योगिनो भवतीति**। संस्कृतासौ समापत्तिरसंज्ञिसमापत्तिर्निरोधसमापत्तिर्वा प्रज्ञप्यते संव्यवहारतो न तु द्रव्यतः। **अथवेति** विस्तरः। **आश्रयस्यैव तथा समापादनम्**। तथा व्यवस्थानम्। अवस्थाविशेषः समापत्ति[4]जनितो यः सा[4] समापत्तिरित्यर्थः। स चावस्थाविशेषः पूर्वं नासीत् पश्चाच्च न भवति व्युत्थितस्येति संस्कृतत्वं न विरुध्यते। अथवा समापदनमिति पाठः। संस्कृतावस्थाविशेषत्वादस्याः समापत्तेः संस्कृतत्वं सिध्यतीत्यर्थः। **एवमासंज्ञिकमिति** विस्तरः। **चित्तमेवासौ** योगी तत्रासंज्ञिषु **चित्ताप्रवृत्तिविरुद्धं लभते**। तच्चाप्रवृत्तिमात्रं चित्तचैत्तानामिति वाक्यशेषः। **आसंज्ञिकमिति प्रज्ञप्यते** न तु द्रव्यतोऽस्तीत्यभिप्रायः ॥४४॥

आयुर्जीवितमाधार ऊष्मविज्ञानयोर्हि यः।
लक्षणानि पुनर्जातिर्जरा स्थितिरनित्यता ॥४५॥

य ऊष्मण इति विस्तरः। ऊष्मणो **विज्ञानस्य च** जीवितप्रतिबद्धा प्रवृत्तिः। **तस्माज्जीवितमूष्मणो विज्ञानस्य चाधार** उच्यते स्थितिहेतुस्तयोरेव। **नित्यानिवृत्तिप्रसङ्ग** इति। नित्यमेषां स्यातः प्रसज्येत। **निकायसभागस्य स्थिति-**

---

1 A तस्माच्चित्तो०
2 Mss. ०त्ति
3 Mss. चित्तान्तर०
4...4 To. जनिताद्या अस्याः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालावेध इति। निकायसभागो व्याख्यातः। त एव तथाभूताः संस्कारा रूपादिस्कन्धस्वभावा इति। तेषां स्थितिः प्रवन्धः। तस्याः कालो यावत् तेन स्थातव्यम्। त एव तावन्तः संस्कारक्षणाः। तस्या वेधः प्रतिसन्धिक्षणे पूर्वजन्मकर्मणो हेतुभावव्यवस्थानम्। कः पुनरसौ हेतुः। सामर्थ्यविशेषः। स हि स्कन्धप्रवन्धलक्षणायाः स्थितेः क्षणपरम्परया कारणं भवति। अत एव स्थितिकालावेध उच्यते। **तावत्कालं** प्रवाहाक्षेपलक्षणत्वात्। **तावत् सोऽवतिष्ठत** इति। स निकायसभागः **सस्यानां पाककालावेधवत्**। यथा सस्यानां पाककालावेधः सामर्थ्यविशेषस्वभावो बीजेनाङ्कुर एवाधीयते। यः क्षणपरम्परया आ पाककालात् सस्यसन्तानहेतुर्भवात[1] तद्वदेतत्। **क्षिप्तेषुस्थितिकालावेधवच्च**। यथा क्षिप्तस्येषोः शरस्य स्थितिराकाशदेशान्तरोत्पत्तिः सन्तानानुवृत्तिः। तस्याः कालो मर्यादा यतः परेण सा न भवति। तस्यावेधो हेतुव्यवस्थानम्। कः पुनरसौ हेतुः। प्रयत्नभूतातिशयनिर्वृत्तवायुधातुजनितसामर्थ्यविशेषः। तद्यथा क्षिप्तेषुस्थितिकालावेधो न द्रव्यान्तरं तद्वदयमायुर्लक्षणमावेधो द्रष्टव्यः।

यस्तु मन्यत इति वैशेषिकः। **संस्कारो नाम गुणविशेष** इति। पृथिव्यादीनां वैशेषिको गुणः संस्कारो नाम कर्मजः कर्महेतुश्च **वेग**द्वितीयनामा **इषौ जायते**। **यद्वशात्** यस्य गुणस्य वशात्। **गमनमिषोरा पतनाद् भवतीति** तं प्रत्यदृष्टान्त एषः। यथा हि संस्कारो नाम भावान्तरमस्त्येवमायुरपि स्यादिति। तेन तन्म दूषयत्याचार्यः। **तस्येति** विस्तरः। तस्य वैशेषिकस्य **तदेकत्वात्** संस्कारैकत्वात्। **प्रतिबन्धाभावाच्च**। प्रतिबन्धस्य काष्ठप्रत्याघातादिलक्षणस्याभावाच्च। किम्। **देशान्तरैः शीघ्र**[2]**तरतमप्राप्तिकालभेदानुपपत्तिः**। शीघ्रा शीघ्रतरा शीघ्रतमा प्राप्तिः शीघ्रतरतमप्राप्तिः। कैः। सह देशान्तरैराकाशदेशादिभिः। तस्याः[3] कालः। तस्य भेदः। तस्यानुपपत्तिः। शीघ्रा शीघ्रतरा शीघ्रतमा देशान्तरैः सह प्राप्तिर्नोपपद्यते। पूर्वोक्तादस्मात् कारणद्वयात् [4]संस्कारस्याविशिष्टत्वात्। **पतनानुपपत्तिश्च**। पतनं चेषोर्नोपपद्यते सति संस्कारे। न ह्येतदिष्टं सति कारणे कार्यं न भवतीति। **वायुना तत्प्रतिबन्ध इति चेत्** स्यान्मतम्

1 Mss. ०हेतु भवति
2 A & C तरमप्राप्ति, तरप्राप्ति०
3 Mss. तस्या
4 V संस्थानस्या०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वायुरत्र प्रतिबन्धः। प्रतिबन्धविशेषाच्छीघ्रतरतमप्राप्तिकालभेदः पतनं चोपपद्यत इति स्पर्शवद्द्रव्यसंयोगादभावः कर्मण इति वचनात्। अत्रोच्यते। **अर्वाक्पतनप्रसङ्गो** ज्याविभागानन्तरमेवार्वागवरत एव वायुसंयोगात् स इषुः पतेत्। अथ प्रतिबध्यमानोऽपि वायुना नार्वाक् पतेत्। **न वा कदाचित् पतेत्।** न पश्चादपि पतेदित्यर्थः। किं कारणम्। **वायोरविशेषात्।** यथा हि समीपे वायुरेवं दूरेऽपीति।

चतुर्थी विषमापरिहारेणेति। अत्यशनादेर्विषमस्यापरिहारेण। **क्षीणे त्वायुषि पुण्यक्षयस्य मरणे नास्ति सामर्थ्यम्।** तेन तृतीया कोटिर्न प्राप्नोति। **तस्मादुभयक्षये सति मरणमुभयक्षयादिति।** उभयक्षये सतीति योऽर्थः सोऽर्थ उभयक्षयादित्ययमर्थ उक्तो वेदितव्यः। [1]न आयुःक्षया[1]-दपि मरणं भवतीति कथं गम्यते। सस्यादिसाधर्म्यात्। सस्यादीनां हि बीजावेधपरिक्षये सति सत्सु प्रत्ययान्तरेषु क्षेत्रोदकादिषु दृष्टा सन्ताननिवृत्तिर-प्राप्यैव फलकालं फलपाककालं वा। बीजस्य नातिसारत्वात्। सत्यपि च सार-बीजाक्षेपे सलिलादिस्थितिवृद्धिप्रत्ययाभावाद्दृष्टा सन्ताननिवृत्तिः। सारबीजा-क्षेपस्थितिवृद्धिप्रत्ययाभावेऽपि दृष्टा। यदा बीजाक्षेपश्च परिसमाप्तो भवति सलिल-स्य चाभावः। सत्यपि च सारबीजाक्षेपे सलिलादिस्थितिवृद्धिप्रत्यये च जङ्गमाद्युपक्रमकृता दृष्टा सस्यादीनां सन्ताननिवृत्तिरिति। **यस्याश्रयोपघातादु-पघातस्तत्सन्तत्यधीनत्वादिति।** वहिर्देशिकमतमेतत्। आश्रयसन्ततिप्रतिबद्धं तदायुरिति **सन्तत्युपनिबद्धमित्युच्यते।** **काश्मीरमतेऽपि स एवार्थः।** शब्दमात्रं तु भिद्यते। **सान्तरायं निरन्तरायमिति।** अथवा सन्तत्युपनिबद्धमिति स्वसन्तत्युपनिबद्धम्। सन्तानवर्त्येव तत् केवलं न तु सकृदुत्पन्नं तिष्ठतीति सान्तरायमित्युच्यते। अनेनागमेन अस्त्यकालमृत्युरिति दर्शयन्नाह। [2]**सूत्रे-ऽप्युक्तं चत्वार आत्मभावप्रतिलम्भा** इति विस्तरः। **आत्मसञ्चेतना** आत्मना मारणम्। **परसञ्चेतना** परेण मारणम्। **बुद्धानाञ्चेति वक्तव्यम्।** किम्। **आत्मसञ्चेतनैव क्रमते।** स्वयंमृत्युत्वात्। अनुपक्रमणधर्माणो[3] हि बुद्धा भगवन्त[4] आयुरुत्सर्गवशित्वलाभिनश्च। **प्रायेणे**तिग्रहणं चतुर्थकोट्यभि-हितनारकान्तराभविकादिपरिवर्जनार्थम्। **राजर्षयश्चक्रवर्तिपूर्वाः प्रव्रजिताः।** **जिन-**

1...1 To. आयुरक्षया०

2 See Aṅguttara N., II, 159 ; Dīgha N., III, 231.

3 Mss. ०क्रमणं धर्मांणो

4 Mss. & To. भगवन्तो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दूतो यो बुद्धेन भगवता दूतः कश्चित् संप्रेषितः । तद्यथा शुकः कश्चिद् भगवता आम्रपाल्याः प्रेषितो लिच्छविभिश्च योग्यां कुर्वाणैर्दृष्टः । शरजालेनापूर्यमाणोऽपि मारयितुं न शक्यते । यावद्धि स दूतकृत्यं न करोति तावन्नात्मसंचेतना क्रमते न परसञ्चेतना । **जिनादिष्ट** इयन्तं कालमनेन जीवितव्यमिति य आदिष्टो भगवता । **धर्मिलादयः** पूर्वयोगविद्भ्य आगमितव्याः । आदिशब्देन चान्येऽपि तत एव चागमयितव्याः । तेषां नात्मसञ्चेतना क्रमते न परसञ्चेतना । **चरमभविकानां च** ये तस्मिन्नेव जन्मन्यर्हत्त्वं प्राप्नुवन्ति । **बोधिसत्त्वमातुस्तद्गर्भाया** बोधिसत्त्वगर्भायाः । **चक्रवर्तिमातुश्चक्रवर्तिगर्भाया** नात्मसञ्चेतना न परसञ्चेतना । यदि तर्हि सर्वेषां रूपारूप्यावचराणां नात्मसञ्चेतना न परसञ्चेतना । **अथ कस्मात् सूत्र** उक्तमिति विस्तरः । **तत्र चोभयं** नास्तीति । तत्र नैवसंज्ञानासंज्ञायतने स्वभूमिक आर्यमार्गो नास्ति यावदेव संज्ञासमापत्तिस्तावदाज्ञाप्रतिवेध इति वचनात् । नाप्युपरिभूमिसामन्तक ऊर्ध्वभूम्यभावात् । **परभूमिक आर्यमार्ग** इत्याकिंचन्यायतनभूमिकः ।

आर्याकिंचन्यसाम्मुख्याद्भवाग्रे त्वास्रवक्षयः[1]

इति वचनात् । **पर्यन्तग्रहणात् तर्हीति**[2] । तर्हीत्यर्थान्तरविवक्षायां निपातः । **तदादिसंप्रत्यय** इति । तस्य पर्यन्तस्य नैवसंज्ञानासंज्ञायतनस्यादिश्चत्वारि ध्यानानि त्रयश्च शेषा आरूप्याः । न तु कामधातुस्तदादिरसमाहितत्वेन [3]वैसादृश्यात् । समापत्तितो वा ध्यानारूप्या एव तदादिः । नवानुपूर्वसमापत्तय इति वचनात् । तत्र संप्रत्ययस्तदादिसंप्रत्ययः । अस्ति क्वचिदन्यत्राप्येवं दृष्टमिति अस्तीत्याह । **क्वचिदादिना पर्यन्त** इत्यादि । **तद् यथा देवा ब्रह्मकायिका** इति । देवा ब्रह्मकायिकास्तत्पर्यन्तग्रहणाच्च ब्रह्मपुरोहिता महाब्रह्माणश्च **प्रथमा सुखोपपत्तिः** । **तद्यथा देवा आभास्वरा** इति । आभास्वरास्तदादिग्रहणाच्च परीत्ताभा अप्रमाणाभाश्च **द्वितीया सुखोपपत्तिरिति** । तिस्र एव हि सुखोपपत्तय इष्यन्ते ।

सुखोपपत्तयस्तिस्रो नव त्रिध्यानभूमयः[4]

इति वचनात् । **एष हि दृष्टान्तधर्म** इति । एतद्दृष्टान्तचरितं यदेकमपि **तत्प्रकारं निर्दिशते**[5] न सर्वं शेषसंप्रत्ययश्च भवति । तद्यथा ।

1 Kārikā, VIII, 20

2 Mss. drop तर्हीति.

3 Mss. & To. विसादृश्यात्

4 Kārikā, III, 71.

5 Mss. निर्दिश्यते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनित्यः शब्दः कृतकत्वात् । यथा घट इति पटादीन्यपि[1] हि गृह्यन्ते । तद्-यथा शब्दस्य दृष्टान्तवाचकत्वात् । **अनुपसंहार एष** इति । अदृष्टान्त इत्यर्थः । **मनुष्यास्तदेकत्याश्च देवा** इति । तदेके देवाः षट् कामावचरा देवाः । प्रथमाभिनिर्वृत्तवर्ज्याश्च प्रथमध्यानोपपन्ना देवा इत्येतावन्त एव नानात्वकाया नानात्मसंज्ञिनः सत्त्वाः । नैतद्व्यतिरिक्ताः सन्तीति । नायं **तद्यथाशब्दो दृष्टान्तवाचकः । तस्मादुपदर्शनार्थ एवायं द्रष्टव्यः** । उपदर्शनार्थत्वे च सति तदेव स्थितमेतत् । पर्यन्तग्रहणात्तदादिसंप्रत्यय इति ।

विपर्ययादसंस्कृत इति । यत्रैतानि न भवन्ति सोऽसंस्कृत इति । ननु च स्थितिरसंस्कृतलक्षणमस्ति । नासंस्कृतस्य स्थितिर्द्रव्यान्तररूपास्ति । द्रव्यान्तर-रूपाणि चेह संस्कृतलक्षणानीष्यन्त इत्यचार्यमेतत् । **ननु च त्रीणीमानीति**[2] विस्तरः । कथम् । **सूत्रे**[3] **त्रीणीमानि भिक्षवः संस्कृतस्य संस्कृतलक्षणानि** । कतमानि त्रीणि । संस्कृतस्य भिक्षव उत्पादोऽपि प्रज्ञायते व्ययोऽपि प्रज्ञायते स्थित्यन्यथात्वमपीति । **चतुर्थमप्यत्र वक्तव्यं स्यादिति** वैभाषिकाः । **किञ्चात्र नोक्तमिति** चोदकः । **स्थितिरिति** वैभाषिकाः । **यत्तर्हीदं स्थित्यन्यथात्वमपीति** स्थितिशब्दोऽत्र श्रुयते । कथमिदमुच्यते स्थितिर्नोक्तेति चोदकाभिप्रायः । **जराया एव पर्याय** इति । जरेयमुक्ता । स्थितेरन्यथात्वं स्थित्यन्यथात्वमिति । **तद् यथा जातेरुत्पाद** इति पर्यायः । **अनित्यतायाश्च व्ययः** । **तथा जरायाः स्थित्यन्यथात्वं पर्याय** इति । कस्मात् पुनर्लक्षणचतुष्ट्वे[4] सति भगवता त्रीण्येवोक्तानीति । अत आह । **ये हि धर्मा** इति विस्तरः । **उद्वेजनार्थं विनेयानां** जातिजरानित्यता इति धर्माणां लक्षणान्युक्तानि । आभिप्रायिको हि सूत्रनिर्देशो न लाक्षणिको यथाभिधर्मः । **जरानित्यते पुनः प्रत्युत्पन्नादतीत-मिति** । **सञ्चारयत** इत्यधिकारोऽनुवर्तते । जरानित्यते प्रत्युत्पन्नादध्वनोऽतीत-मध्वानं सञ्चारयतः । कस्मात् **दुर्बलीकृत्य विघातात** । जरा दुर्बलीकरोति । अनित्यता निहन्तीति कृत्वा । ननु चानित्यतैव[5] धर्मं प्रत्युत्पन्नादध्वनोऽतीत-मध्वानं सञ्चारयति । न जरा । जरा हि केवलं धर्मं दुर्बलीकरोति । कस्मादे-वमुच्यते जरानित्यते प्रत्युत्पन्नादतीतं सञ्चारयत इति । आह । दुर्बलीकरणमपि

---

1 Mss. पटानीन्यपि

2 A & C ०मानि, V ०मानी

3 See Aṅguttra N., I, 158.

4 To ०चतुष्टे

5 Mss. चानित्यैव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदध्वसञ्चारायैव वर्तते। न ह्यदुर्बलीकृतस्याध्वसञ्चारोऽस्तीति जरापि तत्सञ्चारे व्यवस्थाप्यते। **असंस्कृतस्यापि च स्वलक्षणस्थितिभावादिति।** स्वलक्षणे स्थितिः, स्थित्या भावः, तस्मात् स्थितिभावात्। असौ स्थितिः संस्कृतलक्षणं न व्यवस्थापिता। स्थितिर्ह्यसंस्कृतावस्थाविशेषलक्षणाया स्थित्या सदृशीति तस्याः संस्कृतस्य संस्कृतत्वप्रसङ्गपरिजिहीर्षया न लक्षणमुक्तमित्यभिप्रायो भगवतो धर्मस्वामिनः।

अन्ये पुनः कल्पयन्तीति, सूत्रेऽपि स्थितिरुक्तेति कथयन्ति। **स्थितिं जरां चाभिसमस्य।** स्थितिश्च स्थित्यन्यथात्वं च स्थित्यन्यथात्वमित्यभिसमस्यैकं लक्षणमुक्तं सूत्रे, न विभागशः। कस्मात्, त्रीणीमानि संस्कृतलक्षणानीति [1]वचनविरोधप्रसङ्गात्। किमत्र प्रयोजनमित्यत आह, **एषा ह्येषु संज्ञास्पदमिति** विस्तरः। एषा हि स्थितिरेषु जात्यादिषु संज्ञास्पदं संज्ञस्थानम्, धर्मोऽनया तिष्ठतीत्यतः[2]। **श्रियमिवैनां** स्थितिं **कालकर्णीसहिता**मलक्ष्मीसहितां **दर्शयामास भगवान्** तस्यां स्थित्यामसङ्गार्थम्। नास्यामासङ्गः कर्तव्यो यस्मादियमनित्यतयानुबद्धा लक्ष्मीरिवालक्ष्म्येति तदेकीयं व्याख्यानम्। अपरे तु व्याचक्षते, नास्यामासंक्तव्यम्, यस्मादियं जरयानुबद्धा लक्ष्मीरिवालक्ष्म्येति। जरया ह्यन्यथात्वलक्षणयाऽस्या एकीकरणं नानित्यतयेति। **अतश्चत्वार्येव संस्कृतलक्षणानीति।** उभयोरपि पक्षयोरयमुपसंहारः ॥४५॥

[जातिजात्यादयस्तेषां तेऽष्टधर्मैकवृत्तयः।
जन्यस्य जनिका जातिर्न हेतुप्रत्ययैर्विना ॥४६॥]

अन्यैर्जात्यादिभिर्भवितव्यमिति। जातिसामर्थ्यात् कश्चित् संस्कृतो धर्मो जायते। जातिरपि संस्कृता, तस्मात्तस्या अप्यन्यया जात्या भवितव्यं स्वात्मनि वृत्तिविरोधात्।

सर्वं संस्कृतलक्षणैः[3]

इति च सिद्धान्तात्। एवं जरादयोऽपि योज्याः।

जातिजात्यादयस्तेषाम्

इति, जातिजात्यादयश्च तेषामिति चशब्दो लुप्तनिर्दिष्टो द्रष्टव्यः। **ननु चैकैकस्येति** विस्तरः। एकैकस्य लक्षणस्य **चतुर्लक्षणी**, चतुर्णां लक्षणानां समाहारः चतुर्लक्षणी **प्राप्नोति। अपर्यवसानदोषश्चानिष्ठादोषश्च**, तेषामनु-

---

1 See ante, p. 94, l. 11. 2 To. following Tib. ०ष्ठतीत्यभिप्रायः
3 Kārikā, II, 24.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लक्षणानां पुनरन्यजात्यातिप्रसङ्गात्[1]। जातेर्जातेर्जातिजातेर्यावदनित्यताया अनित्यताया अनित्यतानित्यतायाश्च प्रसङ्गात्।

तेऽष्टधर्मैकवृत्तयः।

त इति पुंलिङ्गनिर्देशो धर्माभिसम्बन्धात्' ते जात्यादिजातिजात्यादिस्वभावा धर्मा यथाक्रममष्टधर्मैकवृत्तयः। जात्यादीनामष्टासु धर्मेषु वृत्तिः' जातिजात्यादीनां चैकधर्मे। **आत्मनवमा** हीति लक्षणानुलक्षणापेक्ष एवमुक्तम्। न हि यथासम्भवं तत्र प्राप्त्यादयो भूतानि भौतिकानि वा नोत्पद्यन्ते।

कामेऽष्टद्रव्यकोऽशब्दः[2]

सर्वं संस्कृतलक्षणैः प्राप्त्या वा[3]

इति चैवमादिवचनात्' **जातिरात्मानं विरहय्येति** विस्तरः। स्वात्मनि वृत्तिविरोध इत्यत आत्मानं विरहय्य मुक्त्वाष्टौ **धर्मान् जनयति**। कतमानष्टौ' तं धर्मं रूपं चित्तं वा स्थितिं जरामनित्यतां जातिजातिं स्थितिस्थितिं जराजरामनित्यतानित्यतां च जनयति। **जातिजातिस्तु तामेव जातिं जनयति**। **एवं जरानित्यते अपि यथायोगं योज्ये** इति। जरात्मानं विरहय्याष्टौ धर्मान् जनयति' जराजरा पुनस्तामेव जराम्। अनित्यतात्मानं विरहय्याष्टौ धर्मान् विनाशयति। अनित्यतानित्यता पुनस्तामेवानित्यतामिति।

तदेतदाकाशं पाट्यत इति' विभिद्यत इत्यभिप्रायः। सप्रतिघद्रव्याभावमात्रमाकाशम्। नाकाशं नाम किञ्चिदस्ति। तद् विभक्तुं यथा न शक्यते न युज्यते वा' एवमिमे जात्यादयोऽसन्तो धर्मा विभक्तुं न शक्यन्ते न युज्यन्ते वा। तत आह' **न ह्येत** इति विस्तरः। नह्येते **द्रव्यतः** स्वलक्षणतः संविद्यन्ते **यथा विभज्यन्ते**' जातिरात्मानं विरहय्याष्टौ धर्मान् जनयतीत्येवं विस्तरेण विभज्यन्ते। **यथा रूपादीनां धर्माणामिति**' अत्रादिशब्देन शब्दादिवेदनादिचक्षुरादीनां ग्रहणम्। तत्र रूपशब्दादि तावत् **प्रत्यक्षेण** चक्षुर्विज्ञानादिलक्षणेन प्रमाणेनोपलभ्यते। वेदनाद्यपि प्रत्यक्षेणैवोपलभ्यते स्वसंवेद्यत्वात्। चक्षुरादि तु चक्षुर्विज्ञानादिना**नुमानेना**नुमीयते। चक्षुर्विज्ञानादिसन्निश्रयो रूपप्रसादश्चक्षुरादीनि तद्भावाभावयोस्तद्भावाभावात्। **आगमोऽपि** चक्षुषा रूपाणि दृष्ट्वेति विस्तरः। एवं श्रोत्रेण शब्दाञ्छ्रुत्वेति विस्तरेण। एवं

---

1 To. following ०जात्यादिप्रसङ्गात् 2 Kārikā, II, 23.
3 Kārikā, II, 24.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गन्धादिष्वपि योज्यम् । तथा यत्किञ्चिद्रूपमतीतानागतप्रत्युत्पन्नमिति विस्तरः । एवं वेदनादिष्वपि योज्यम् । पारसान्तानिकानां त्वरूपिणां वेदनादीनामस्तित्वानुमानमात्मीयवच्छरीरविकारं दृष्ट्वा तत्संप्रतिपत्तेः । आगमोऽपि , चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानं सहजाता वेदना संज्ञा चेतनेति विस्तरः । जात्यादयस्तु न चक्षुरिन्द्रियादिप्रत्यक्षा भवन्ति । न चैषामस्तित्वे समर्थमनुमानमस्ति, न चाप्यागमो द्रव्यतोऽस्तित्वे । **यत्तर्हि सूत्र उक्तमिति** विस्तरः । ननु चायमागमोऽस्ति **संस्कृतस्योत्पादोऽपि प्रज्ञायत** इति विस्तरः । **अर्थश्च प्रतिसरणमुक्तं भगवतेति** । चत्वारीमानि भिक्षवः प्रतिसरणानि । कतमानि चत्वारि, धर्मः प्रतिसरणं न पुद्गलः , अर्थः प्रतिसरणं न व्यञ्जनम् , नीतार्थसूत्रं प्रतिसरणं न नेयार्थम् , ज्ञानं प्रतिसरणं न विज्ञानमिति । **तथाऽर्थप्रतिसरणो भवति न व्यञ्जनप्रतिसरण** इति । **कः पुनरस्यार्थ** इति । अस्योपन्यस्तस्य संस्कृतलक्षणसूत्रस्य । तमर्थमाह, **अविद्यान्धा हि बाला** इति विस्तरः । **संस्कारप्रबन्धमात्मत आत्मीयतश्चाधिमुक्ताः कृतरुचयोऽभिष्वजन्त** इत्यर्थः । **संस्कृतत्वं प्रतीत्यसमुत्पन्नत्वमिति पर्यायावेतौ**। समेत्य सम्भूय प्रत्ययैः कृतं संस्कृतम्, तं तं प्रत्ययं प्रतीत्य समुत्पन्नं प्रतीत्यसमुत्पन्नमिति । **न तु क्षणस्येति** । प्रवाहस्यैव संस्कृतत्वं द्योतयितुकाम इदमाह, न तु क्षणस्य संस्कृतत्वम् । **न हि क्षणस्योत्पादादय** उत्पादव्ययस्थित्यन्यथात्वलक्षणा धर्माः **प्रज्ञायन्ते** क्षणस्य दुरवधारत्वात् । ब्रूयास्त्वम्, अप्रज्ञायमाना अप्येते लक्षणं भवितुमर्हन्तीति । अत आह , **न चाप्रज्ञायमाना एते लक्षणं भवितुमर्हन्तीति** । प्रज्ञायमानमेव हि लक्षणं भवति । तद्यथा जलस्य बलाकेति । **अत एवात्रेति** । अत एवात्र सूत्रे **प्रज्ञायत इति पदग्रहणम्** । अन्यथा हि संस्कृतस्योत्पादोऽपि व्ययोऽपि स्थित्यन्यथात्वमपीत्येवावक्ष्यत् । **संस्कृतत्वे लक्षणानीति** । संस्कृतमिति लक्षणानीत्यर्थप्रतिग्रहार्थं **पुनः संस्कृतग्रहणम्** । **जलबलाकावदिति** । वैधर्मदृष्टान्तोऽयम् । यथा बलाका जलास्तित्वे लक्षणं न पुनर्जलस्य जलत्वे लक्षणम् । **मैवं विज्ञायि**[1] । किम्, **संस्कृतस्य वस्तुनोऽस्तित्वेऽमूनि लक्षणानि । साध्वसाधुत्वे वा कन्यालक्षणवदिति** । यथा कन्यायाः शुभाशुभानि लक्षणानि यथाक्रमं साध्वसाधुत्वे लक्षणानीति । यदि ह्यमूनि तथा संस्कृतस्य वस्तुनोऽस्तित्वे साध्वसाधुत्वे वा लक्षणानीष्येरन् त्रीणीमानि संस्कृतलक्षणानीत्युच्येत । संस्कृतस्य संस्कृतलक्षणानीति न क्रियेत । कृतं

1 A. विज्ञापि, C & U विज्ञयि,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च। तेन ज्ञायते संस्कृतत्वे लक्षणानीति। कथं पुनरविद्यमाना जात्यादयः प्रवाहे व्यवस्थाप्यन्ते प्रज्ञायन्ते वा। न ब्रूमो जात्यादयो न संविद्यन्त इति। यथा तु द्रव्यरूपेण विभज्यन्ते तथा न संविद्यन्त इति ब्रूमः। यथा तर्हि भवतां संविद्यन्ते तथा कथ्यताम्। अत आह। **प्रवाहस्यादिरुत्पाद** इति विस्तरः। **निवृत्तिर्व्यय** इति। प्रवाहस्योपरतिर्व्ययः। **स एव प्रवाहोऽनुवर्तमान** इति। सदृशक्षणानुवृत्तेरनुवर्तमानः **प्रवाहः स्थितिरित्युच्यते**। **तस्याः पूर्वापरविशेष** इति। पूर्वस्मादपरस्य क्षणस्य विशेषः पूर्वापरयोः क्षणयोर्वा विशेषः पूर्वापरविशेषः। **एवञ्च कृत्वोक्तमिति**। प्रवाहरूपानेवोत्पादादीन् कृत्वानित्योपस्थितस्मृतितामायुष्मतः **सुन्दरनन्दस्यारभ्योक्तम्**। प्रवाहगता हि **वेदनास्तस्य विदिता** [1]**इवोत्पद्यन्ते विदिता इव**[2] **तिष्ठन्ते। विदिता इव**[3] **अस्तं**[4] **परिक्षयं पर्यादानं गच्छन्ति** न क्षणगताः। क्षणस्य दुरवधारत्वादिति विदितस्य च क्षणस्यावस्थानासम्भवात्। एतमेवार्थं श्लोकद्वयेन संगृह्णन्नाह। **जातिरादिः प्रवाहस्येति**[5] सर्वम्[6]। **स्थितिस्तु स** इति। स एव प्रवाहः स्थितिः। **तस्यैवेति**। तस्यैव प्रवाहस्य। **तदुच्छेद** इति। प्रबन्धोच्छेदः। **क्षणिकस्य हि धर्मस्येति** श्लोकः। क्षणिको हि धर्मः। **स्थितिमन्तरेण** विनश्येदित्यर्थः। स्थितिरस्तीति मन्यसे चेत्। **स च धर्मो व्येत्येव** सत्यामपि **स्थितौ**। विनश्यत्येव क्षणिकत्वात्। विनाशहेत्वभावात्। तस्माद् **वृथा तत्परिकल्पना**। निष्प्रयोजना स्थितिपरिकल्पनेत्यर्थः। द्वितीयादिक्षणावस्थानेन हि स्थितिपरिकल्पना न वृथा भवेत्। तस्मात् प्रवाह एव स्थितिर्यस्मात् क्षणिकस्य हि धर्मस्य स्थितिपरिकल्पना व्यर्थेति। **एवं च कृत्वायमपीति**। **प्रवाह एव स्थितिरिति** कृत्वेत्यर्थः। **नहि क्षणस्योत्पन्नस्याविनाशोऽस्तीति**। अत्र कस्यचिदेवमभिप्रायो भवेत्। स्थितिसद्भावादेकं क्षणमविनाशो धर्मस्योत्पन्नस्य। यदि हि स्थितिर्न स्यात्। सोऽप्येकः क्षणो न स्यादिति। न। हेतुप्रत्ययपूर्वकत्वात्तदस्तित्वस्य। अस्मिन् सतीदं भवतीति वचनात्। स्थितिरुपगृह्णातीति चेत्। स्यान्मतं हेतुप्रत्ययेभ्य उत्पद्यमानं धर्मं स्थितिरुपगृह्णातीति। यदि स्थितिर्नोपगृह्णीयात् किं स्यात्। आत्मसत्ता धर्मस्य न भवेत्। जनिका तर्हि स्थितिः प्राप्नोति न स्थापिका। सन्तानमवस्थापयतीति चेत्। हेतुप्रत्ययेषु

1 Mss. एवो०
2 Mss. अव०
3 Mss. omit it.
4 To. omit it.
5 To. ०स्येत्यादि
6 To. सर्वमुक्तम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थित्याख्या प्रसज्यते । हेतुप्रत्ययानां सन्तानहेतुत्वात् । **निकायसभागचित्तं युज्यत** इति । एकस्मिन् निकायसभागेऽनेकमपि चित्तमेकमित्युच्यते । एकनिकायसभाग-सम्भूतत्वादित्यभिप्रायः । **तच्चित्तं युज्यत एकस्मिंश्चित्त** इति वक्तुम् । अन्यथा हि कथमेकस्यैव चित्तक्षणस्य जातिश्च मरणं चान्यथात्वं च स्यात् ।

[1]**उत्तरोत्तरक्षणानुबन्धः स्थितिरिति ।** पूर्वस्य क्षणस्योत्तरः क्षणः प्रतिनिधिभूतः सादृश्यात् । अतः स पूर्वः क्षणोऽद्याप्यवतिष्ठत इवेति कृत्वोत्तरः क्षणः स्थितिरुच्यते । **यदा तर्हि सदृशा उत्पद्यन्त** इति । यदा सदृशा उत्पद्यन्ते तदा विसदृशत्वं नास्ति । विसदृशत्वं च स्थित्यन्यथात्वमुक्तम् । अतः सदृशोत्पत्तौ स्थित्यन्यथात्वं नास्तीत्यव्यापि-लक्षणं स्यादित्यभिप्रायः । **क्षिप्ताक्षिप्तबलिदुर्बलक्षिप्तस्येति** विस्तरः । क्षिप्तं च तदक्षिप्तं च क्षिप्ताक्षिप्तम् । बलिदुर्बलाभ्यां क्षिप्तं बलिदुर्बलक्षिप्तम् । क्षिप्ता-क्षिप्तं च तद् बलिदुर्बलक्षिप्तं च क्षिप्ताक्षिप्तबलिदुर्बलक्षिप्तम् । किं तत् । वज्रादि । आदिग्रहणेन लोहपाषाणादेर्ग्रहणम् । अपरे पुनरेवं विग्रहं कुर्वन्ति । क्षिप्तश्चाक्षिप्तश्च क्षिप्ताक्षिप्तौ । बलिदुर्बलाभ्यां क्षिप्तौ बलिदुर्बलक्षिप्तौ । क्षिप्त-स्यैवायं द्विधाभेदः । क्षिप्ताक्षिप्तौ च बलिदुर्बलक्षिप्तौ च क्षिप्ताक्षिप्तबलिदुर्बल-क्षिप्तम् । वज्रमादिरस्य वज्रादिः । अस्मिन् विग्रहे वज्रादि विशेषणम् । क्षिप्ता-क्षिप्तबलिदुर्बलक्षिप्तं विशेष्यम् । तस्य वज्रादेरेवंविधस्य यथासम्भवं चिराशु-तरपातः । क्षिप्तस्य चिरं पातः । अक्षिप्तस्य चिरतरः पातः । दुर्बलक्षिप्त-स्याशुपातः । बलिक्षिप्तस्याशुतरः पातः । तस्य कालः । कालस्य भेदः । **चिराशुतरपातकालभेदात् ।** **तद्भूतानां** बज्रादिमहाभूतानाम् । परिणामविशेषः क्षिप्तस्यान्यथापरिणामो येन चिरं पातः । एवं यावद्बलिक्षिप्तस्यान्यथापरिणामो येनाशुतरः पातः । तस्य परिणामविशेषस्य सिद्धिः । तस्याः परिणामविशेष-सिद्धेः । **न ते निर्विशेषा भवन्तीत्यधिकृतम् ।** **अन्तिमस्य तर्हीति** विस्तरः । **शब्दस्यार्चिषश्च** दीपादेर्योऽन्त्यः क्षणः सन्तानोपरतिकाले निरुपधिशेष-निर्वाणकाले वार्हतः । तस्य **षडायतनस्योत्तरक्षणाभावात्** स्थितिर्नास्ति । स्थितेरभावात् **स्थित्यन्यथात्वं नास्तीत्यव्यापिनी लक्षणव्यवस्था प्राप्नोति ।** येयमुक्ता तस्याविसदृशत्वं स्थित्यन्यथात्वमिति । [2]**यस्यास्ति स्थितिस्तस्यावश्य-मन्यथात्वं भवति ।** यस्य नास्ति स्थितिस्तस्य नास्ति स्थित्यन्यथात्वमित्युक्तं

1 V उत्तरक्षणा० 2 V तस्या०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवति। सम्भवं हि प्रत्येवमुक्तं सूत्रे त्रीणीमानि संस्कृतलक्षणानीति। तस्मादन्त्यशब्दार्चिःक्षणप्रभृतीनामुत्पादव्ययावेव द्वे लक्षणे इत्यभिप्रीयेते। तदन्येषां तु स्थित्यन्यथात्वमपीति[1]। अपर आह। अन्त्यानामपि शब्दार्चिःक्षणप्रभृतीनां स्थितिरस्ति यत् स्वावस्थानम्। तस्याश्चान्यथात्वं पूर्वक्षणापेक्षमिति। तेषामपि त्रीणि संस्कृतलक्षणानि व्यवस्थाप्यन्त इति। **कथमिदानीं स एव धर्मो लक्ष्यः। तस्यैव च लक्षणमिति।** लक्ष्यलक्षणयोर्जलबलाकावदन्यत्वं पश्यन्तश्चोदयन्ति। तद्व्यभिचारयन्तः सौत्रान्तिका आहुः। **कथं तावन्महापुरुषलक्षणानीत्यादि।** महापुरुषलक्षणानि महापुरुषसंगृहीतत्वान्नातोऽन्यानि। ब्रूयात्। न महापुरुषलक्षणमात्रं महापुरुषः। धर्ममात्रं त्वभूत्वा भवति भूत्वा च न भवतीत्यदृष्टान्त एषः। अत्र ब्रूमः। सममेवैतत्। यथा हि महापुरुषलक्षणानि महापुरुषाख्यानि महापुरुषलक्षणाख्यानि च भवन्ति। एवं संस्कृतो धर्मः [2]संस्कृतश्चोच्यते संस्कृतलक्षणं च। उत्पादादिलक्षणेन व्यवस्थाविशेषेण स धर्मो लक्ष्यते। यदा च [3]प्रवाहलक्षणव्यवस्था क्रियते। तदा समुदायिभिः समुदायो लक्ष्यते। यथा महापुरुषसंज्ञः समुदायो महापुरुषलक्षणैः समुदायिभिरिति। एतेन सास्नादीनि लक्षणानि व्याख्यातानि। **काठिन्यादीनि चेति विस्तरः।** उभयसिद्धोऽयं दृष्टान्तः प्रवचनसिद्धत्वात्। कठिनलक्षणो हि पृथिवीधातुरुच्यते। न च पृथिवीधातोरन्यत् काठिन्यम्। एवं सर्वत्र योज्यम्। स एव हि पृथिवीधातुः [4]कठिनो लक्ष्यमाणः कठिनलक्षण उच्यते। एतदेव संस्कृतमभूत्वाभवद्भूत्वाचाभवल्लक्ष्यमाणं संस्कृतलक्षणमुच्यते। लक्ष्यत इति लक्षणमिति कृत्वा। न च तत्तस्मादन्यत्। **यथाचोर्ध्वगमनेनेति विस्तरः।** क्षणिकवादिनो वैभाषिकस्य धूमस्योर्ध्वगमनं नान्यदस्ति। स एवोर्ध्वदेशान्तरेषु निरन्तरमुत्पद्यमान ऊर्ध्वगमनाख्यां लभते। तदूर्ध्वगमनं ततो भिन्नमिव लक्ष्यते। न च धूमस्योर्ध्वगमनत्वमन्यदिष्यते। **न च तत्तस्मादन्यत्।** न च तदूर्ध्वगमनं तस्माद् धूमादन्यत्। **स एवात्र न्याय इति।** एवमुत्पादो विनाशोऽन्यथात्वं च ततो भिन्नमिव लक्ष्यते। न च संस्कृतस्य संस्कृतमन्यद् भवतीति। **न च संस्कृतानां रूपादीनां तावत् संस्कृतत्वं लक्ष्यते गृह्णतापि**

---

1 C मतीति
2 To. संस्कृतश्चो०
3 Mss. प्रवाहे ल०
4 Mss. कथिनो, To. कठिन०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वभावम् ' गृह्णतापि रूपादीनां स्वभावम् ' **यावत् प्रागभावो न ज्ञायते** । यावत् तेषां रूपादीनां प्रागुत्पत्त्यभावो न ज्ञायते । **पश्चाच्च** । किम्' अभावः' प्रागभावश्च प्रध्वंसाभावश्च यावन्न ज्ञायते । **सन्ततेश्च विशेषो** यावन्न ज्ञायत इति वर्तते । **तस्मान्न तेनैव तल्लक्षितं भवति** । न तेनैव संस्कृतत्वेन संस्कृतत्वं लक्ष्यते । किं तर्हि । प्रागभावादिभिस्तत् संस्कृतत्वं लक्ष्यते । यदि हि रूपादीनां स्वभावं गृह्णन् संस्कृतमिति गृह्णीयात् प्रागभावं पश्चादभावं च सन्ततेश्च विशेषमज्ञात्वा तेनैव तल्लक्षितं स्यात् । न त्वेवं जानीत इति । न तेनैव तल्लक्षितं भवति । **न च तेभ्योऽपि** रूपादिभ्यो **द्रव्यान्तराण्येव जात्यादीनि विद्यन्ते** । जातिरादिः प्रवाहस्येति विस्तरेण वचनात् । **एषां सहभूतत्वात्** । जात्यादीनां समानकालोत्पादत्वात् । **न ' कारित्रकालभेदादिति** । नैतदेवम् । कस्मात् । कारित्रकालभेदात् ' पुरुषकारकालभेदादित्यर्थः । तत् प्रतिपादयन्नाह ' **अनागता हि जातिः कारित्रं करोतीति** विस्तरः ।

किमनागतं द्रव्यतोऽस्ति नास्तीति । अनागतमेव तावद्द्रव्यतो नास्तीति प्रतिपादयिष्यते । कुतोऽनागता जातिः कारित्रं करोतीत्यभिप्रायः । **सत्यपि तु तस्मिन्निति** । सत्यपि तु द्रव्यतोऽनागते जातिरनागतावस्थायां कारित्रं **कुर्वती कथमनागता सिध्यति** । अप्राप्तकारित्रं ह्यनागतमिति सिद्धान्तः । स विरुध्येत । तस्मात्तद् वक्तव्यम् ' **कथं वर्तमाना सिध्यतीति** । उपरतकारित्रोऽतीत इष्यते ' जातिश्चानागतैव । उपरतकारित्रे हि वर्तमानावस्थायामेएवातीता प्राप्नोतीति न वर्तमाना भवेदिति **वर्तमानलक्षणं** वक्तव्यमिति । अपरिसमाप्तकारित्रो वर्तमान इति चेत् ' अतीतोऽपि वर्तमानः स्यात् ' अतीतस्यापि हि फलदानकारित्रमिष्यते । **यद्येवं ह्येनं स्थितिरिति** विस्तरः । स्थितिजराविनाशवृत्तयो ह्यन्योन्यविप्रातषिद्धाः । न हि **स एव धर्मस्तिष्ठति च जीर्यति च विनश्यति चेति युक्तो व्यवस्थापयितुम्** । **तस्य क्षणिकत्वं बाध्यत इति** । **प्रथमं स्थितिः स्थापयति ततो जरा जरयति ततोऽनित्यता विनाशयति** । क्षणलयावस्थानात् क्षणिकत्वं बाध्यत इति । **एष एव हि नः क्षण इति** । **कार्यपरिसमाप्तिलक्षणः** । न तूत्पत्त्यनन्तरविनाशलक्षण इत्यर्थः । **एवमपीति** विस्तरः । **सहोत्पन्नानां क्रमेण कारित्रं न युज्यते** । कुत एतत् । **स्थितिस्तावत् स्थापयति । न तु तस्मिन् काले जरा जरयति नाप्यनित्यता विनाशयतीति** । **पुनः केनाबलीयस्त्वं पश्चात् केनाबलीयस्त्वं यदेनां यस्मादेनां स्थितिं सह धर्मेण यस्यासौ स्थितिः** । तेन धर्मेण सहानित्यता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निहन्ति । कृतकृत्या पुनः कर्तुं नोत्सहते जातिवदिति । यथा जातिः कृतकृत्या जन्यं जनयित्वा परिक्षीणशक्तिर्न पुनर्जनयति । तथा स्थितिरपि तद्वदेव न पुनः स्थापयतीति । न हि शक्यमिति विस्तरः । न वर्तमानतामानीतं जन्यं पुनरानेतुं शक्यतेऽनवस्थाप्रसङ्गात् । शक्यं तु खलु स्थित्या स्थाप्यमत्यन्तं स्थापयितुम् स्थितेर्विनाशप्रतिबन्धलक्षणत्वात् । ते एव जरानित्यते इति । ते एव जरानित्यते प्रतिबन्धः । येन स्थितिः स्थाप्यमत्यन्तं स्थापयितुं न शक्नोति । जरा हि स्थितिं दुर्बलीकरोति दुर्बलामनित्यता निहन्तीति ।

आचार्य आह । यदीति सर्वम् । यदि हि ते जरानित्यते बलीयस्यौ स्यातां पूर्वमेव स्यातां स्थितिकारित्रकाले । यतः सा स्थितिर्न लभते कारित्रं कर्तुम् । निवृत्तकारित्रायामिति विस्तरः । यदा निवृत्तकारित्रा स्थितिः । तदा ते अपि जरानित्यते न तिष्ठतः । स चापि धर्मः । स्थितिकारित्वाद्धि तेषां स्थितिः कल्पते । तस्मात्ते अपि न तिष्ठतः । कथमतिष्ठन्त्यौ जरानित्यते कुत्र वा धर्मिण्यतिष्ठति कारित्रं कर्तुमुत्सहिष्येते । किं वा पुनस्ताभ्यां जरानित्यताभ्यां कर्तव्यम् । स्थितिसामर्थ्याद्धि स धर्म उत्पन्नमात्रो न विनष्टोऽभूत् । स तया उपरतकारित्रया स्थित्याप्युपेक्ष्यमाणोऽस्थाप्यमानो ध्रुवं न स्थास्यतीति । अयमेवास्य विनाशो यदिदमनवस्थानम् । किं पुनर्जरानित्यताभ्यां कार्यमित्यभिप्रायः । न च तस्मादेव तस्यान्यप्रकारता युज्यत इति । यदि स एव नासावन्यथा । अथान्यथा[1] न स एव । ययोर्ह्यन्यथात्वं तयोरन्यत्वं दृष्टम् । तद्यथा देवदत्तयज्ञदत्तयोः ।

योऽप्याह निकायान्तरीय इति । आर्यसम्मतीयः[2] । स घटादेर्मुद्गरादिकृतो विनाश इति मन्यते । कालान्तरावस्थायि हि तस्य रूपम् । चित्तचैत्तानां च क्षणिकत्वम् । अत उच्यते । चित्तचैत्तानां च क्षणिकत्वाभ्युपगमात्तदनित्यतायाश्चित्तचैत्तानित्यताया विनाशकारणानपेक्षत्वात् स्वयं विनश्वरत्वात् स्थित्यनित्यते कारित्रं युगपत् कुर्याताम् । अत एकस्य चित्तस्य चैत्तस्य वा युगपत्स्थितिविनष्टता अन्योन्यविरुद्धापि संप्रसज्यते । एवमेतत् सूत्रं सुनीतमिति । यदेतत्त्रीणीमानि भिक्षवः संस्कृतस्य संस्कृतलक्षणानीति ।

---

1 V यथा

2 Mss. आयसंघतीय:

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सति सामग्र्ये भावात् । **असति चाभावादिति** । सति हेतुप्रत्ययानां सामग्र्ये भावाद् जन्यस्य । असति चाभावात् । **न जातेः** । किम् । सामर्थ्यं पश्याम इत्यधिकृतम् । नहि हेतुप्रत्ययसामग्र्येऽपि तज्जन्यं कदाचिद् भवति कदाचिन्न भवति । अत्र भदन्तानन्तवर्माह[1] । यथा चक्षुर्न विनालोकादिभिश्चक्षुर्विज्ञानं जनयति । न चातस्तदुत्पत्तौ न कारणम् । एवं जातिर्न विना हेतुप्रत्ययैर्धर्मं जनयति । न चातस्तदुत्पत्तौ न कारणमिति । अत्रोच्यते । असमानमेतत् । चक्षुर्हि दृष्टसामर्थ्यं सत्स्वालोकादिष्वन्धानन्धयोश्चक्षुर्विज्ञानस्यानुत्पत्त्युत्पत्तिदर्शनात् । न त्वेवं जातिरिति । **सूक्ष्मा अपि हि धर्मप्रकृतय इति** । तद्यथा स्पर्शादीनां चैतसिकानां प्रकृतयः स्वभावाः दुःपरिच्छेद्यत्वात् सूक्ष्माः । अस्त्येतदेवम् । अदृश्यमानोऽपि कश्चिद्धर्मः कारित्रेण निर्धार्यते । न त्वेवं जातिः कारित्रेण निर्धार्यते । स्पर्शस्य हि कारित्रं भगवतैव निर्धारितम् । यः कश्चिद् वेदनास्कन्धः संज्ञास्कन्धः संस्कारस्कन्धः सर्वः स स्पर्शं प्रतीत्येति विस्तरः । [2]**जातमित्येव तु न स्यादसत्यां जाताविति** । स्वलक्षणापेक्षा रूपे रूपबुद्धिः । न तु जातमिति स्वलक्षणापेक्षा जातबुद्धिः । वेदनादिष्वपि भावात् । तस्मादर्थान्तरभूतजातिद्रव्यापेक्षेयं जातबुद्धिरिति निर्धार्यते । **षष्ठीवचनं च न स्याद् रूपस्योत्पाद इति** । वैयधिकरण्ये हि षष्ठीनिर्देशो न सामानाधिकरण्ये । तेनाह । **यथा रूपस्य रूपमिति** । वैधर्म्यदृष्टान्त एषः । यथा रूपं रूपादनन्यदिति कृत्वा षष्ठीनिर्देशो न भवति रूपस्य रूपमिति । तथा रूपस्योत्पाद इति न स्यात् । तस्माज्जातिनिमित्तोऽयं षष्ठीनिर्देश इति गम्यते । **एवं यावदनित्यता यथायोगं वक्तव्येति** । स्थितमेव तु न स्यादसत्यां स्थितौ । षष्ठीवचनं च रूपस्य स्थितिरिति यथा रूपस्य रूपमिति । जीर्णमित्येव तु न स्यादसत्यां जरायाम् । षष्ठीवचनं च रूपस्य जरेति यथा रूपस्य रूपमिति । तथा विनष्टमित्येव तु न स्यादसत्यामनित्यतायाम् । षष्ठी वचनं च रूपस्य विनाश इति यथा रूपस्य रूपमिति ।

तेन तर्हीति विस्तरः । यदि जातमित्येवमादिबुद्धिसिद्ध्यर्थं षष्ठीविधानार्थं च जात्यादयः कल्प्यन्ते **अनात्मत्वमप्येष्टव्यम्** । न हि निर्निमित्तानात्मबुद्धिर्भवितुमर्हति । अथानात्मत्वं प्रज्ञप्तिसदिष्यते । तन्निमित्ता नात्मबुद्धिः । जात्याद्यपि प्रज्ञप्तिसदेष्टव्यम् । तन्निमित्ता

1 A, C & U ०भर्माह, V ०धर्म आह 2 Mss. जात इत्येव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च जात्यादिबुद्धिरिति । साधनं चात्र । प्रज्ञप्तिसज्जात्यादि द्रव्यसदपेक्ष्य गृह्यमाणत्वादनात्मत्ववदिति । सत्तादयोऽपीति । आदिशब्देन द्रव्यत्वरूपघटत्वादि गृह्यते । एकं रूपं द्वे रूपे महदणु पृथक् संयुक्तं [1]विभक्तं परमपरं सद्रूपमिति । तथा द्रव्यमेतद्रूपमिदं घटोऽयमित्येवमादिबुद्धिसिद्ध्यर्थं[2] संख्यादयोऽपि वैशेषिकपरिकल्पिता अभ्युपगन्तव्याः । षष्ठीविधानार्थं च रूपस्य संयोग इति । संयोगग्रहणमुदाहरणमात्रम् । रूपस्य विभागः परत्वापरत्वमित्येवमाद्यपि योज्यम् । एषा च षष्ठी कथं कल्प्यते रूपस्य स्वभाव इति । न हि वैभाषिकाणां रूपादन्यो रूपस्य स्वभाव इष्टः । जातमिति । जातमेव न विनष्टमित्यभूत्वाभावज्ञापनार्थं क्रियते प्रज्ञप्तिः । बहुविकल्प इति । बहुभेदो रूपवेदनादिभेदात् । तस्य विशेषणार्थं रूपस्योत्पाद इति न वेदनादीनामुत्पाद इति विशेषणार्थं षष्ठीं कुर्वन्ति । [3]मान्यः प्रत्यायि रूपसंज्ञक एवोत्पादो न वेदनादिसंज्ञक इति । दृष्टान्तं कथयन्ति । चन्दनस्य गन्धादयः । शिलापुत्रकस्य शरीरमिति । अनर्थान्तरभावेऽपि षष्ठीनिर्देशः क्रियते । गन्धादिसमूहमात्रं हि चन्दनमिति बौद्धसिद्धान्तः । वैशेषिकसिद्धान्तापेक्षया त्वसिद्धश्चन्दन इत्यपरो दृष्टान्त उपन्यस्यते शिलापुत्रकस्य शरीरमिति । शिलापुत्रकशरीरयोर्वैशेषिकाणामपि सिद्धान्ते नार्थान्तरभावः । भवति च षष्ठीनिर्देशः । अर्थान्तरपरिकल्पकृतो हि तथा निर्देशः । एवं स्थित्यादयोऽपि यथायोगं वेदितव्या इति । तस्मात् प्रज्ञप्तिमात्रमेवेदं प्रवाहावस्थानज्ञापनार्थं क्रियते स्थितमिति । स च प्रवाहावस्थानलक्षणा स्थितिर्बहुविकल्पा । तस्या विशेषणार्थं रूपस्य स्थितिरिति षष्ठीं कुर्वन्ति । यथा रूपसंज्ञकैव स्थितिः प्रतीयेत [4]मान्या प्रत्यायीति । तथा प्रज्ञप्तिमात्रमेवैतत् पूर्वापरविशेषज्ञापनार्थं क्रियते जीर्णमिति । सा च पूर्वापरविशेषलक्षणा जरा बहुविकल्पा । तस्या विशेषणार्थं रूपस्य जरेति षष्ठीं कुर्वन्ति । यथा रूपसंज्ञकैव जरा प्रतीयेत मान्या प्रत्यायीति । तथा प्रज्ञप्तिमात्रमेवैतत् प्रवाहनिवृत्तिज्ञापनार्थं क्रियते विनष्टमिति । स च प्रवाहनिवृत्तिलक्षणो विनाशो बहुविकल्पः । तस्य विशेषणार्थं रूपस्य विनाश इति षष्ठीं कुर्वन्ति । यथा रूपसंज्ञक एव विनाशः प्रतीयेत [5]मान्यः

---

1 V omits विभक्तम्.
2 To. सिद्धार्थं
3 Mss. नान्यः
4 A & V नान्या
5 V नान्यः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्यायीति। सर्वत्र च दृष्टान्तद्वयं वक्तव्यम्। तद्यथा चन्दनस्य गन्धादयः। शिलापुत्रकस्य शरीरमिति।

यथा च धर्मतयेति। धर्मता धर्मप्रकृतिर्धर्मस्वभावो धर्मशैलीत्यर्थः। धर्मता धर्मप्रकृतिरिति कुत एतत्। चक्षुः समृद्धे शून्यं नित्येन ध्रुवेण शाश्वतेनाविपरिणामधर्मेणात्मनात्मीयेन च। तत् कस्य हेतोः। प्रकृतिरस्यैषेति। यथा च धर्मतया **न सर्वं जातिमदिष्यते** आकाशादि। **तथा धर्मतया न सर्वं जायत इत्येष्टव्यम्।** न ह्यत्र किञ्चित् कारणमस्ति। यत् संस्कृतमेव जातिमद्भवति नासंस्कृतमित्यन्यत्र धर्मतायाः। एवमसत्यामपि जातौ संस्कृतमेवोत्पद्यते। नासंस्कृतमिति। **यथा च तुल्यजातिमतां** केषाञ्चिद्रूपवेदनादीनाम्। **तदन्ये प्रत्ययाः**। तेभ्यो रूपोत्पत्तिप्रत्ययेभ्योऽन्ये वेदनाद्युत्पत्तिप्रत्ययास्तदन्ये। ते तदन्ये **प्रत्ययास्तदन्यस्योत्पादने न समर्था भवन्ति।** तेभ्यो वेदनादिभ्योऽन्यत् तदन्यत्। किं तत्। रूपम्। तस्य तदन्यस्य ते वेदनादिप्रत्यया उत्पादने यथा न समर्था भवन्ति। **एवमसंस्कृतस्या**काशादेरुत्पादने **सर्वेऽपि** रूपवेदनादिप्रत्यया **न समर्थाः** स्युरिति। पूर्वं स्वभावनियमेनोक्तमिदानीं शक्तिनियमेनेति।

न हि दूषकाः सन्तीति विस्तरः। **यथा न मृगाः सन्तीति यवा नोप्यन्ते।** उप्यन्त एवेत्यर्थः। द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः। **यथा न मक्षिकाः पतन्तीति मोदका न भक्ष्यन्ते।** किं तर्हि। भक्ष्यन्त एव। तथा न दूषकाः सन्तीत्यागमोऽभिधर्मशास्त्राण्यपास्यन्ते। **तस्माद्दोषेषु प्रतिविधातव्यम्।** दोषेषु परव्यवस्थापितेषु परिहारः कर्तव्यः। **सिद्धान्तश्चानुसर्तव्यो** न परित्याज्य इत्यभिप्रायः ॥४६॥

[नामकायादयः संज्ञावाक्याक्षरसमुक्तयः।
कामरूपाप्तसत्त्वाख्या निष्यन्दाव्याकृतास्तथा ॥४७॥]

नामकायादयः संज्ञावाक्याक्षरसमुक्तयः

इति। **संज्ञासमुक्तयो** नामकायाः। **वाक्यसमुक्तयः** पदकायाः। **अक्षरसमुक्तयो** व्यञ्जनकायाः। **संज्ञाकरणमिति** लोकभाषेयम्। संज्ञाकरणं नामधेयमिति पर्यायः। तथा हि लोके वक्तारो भवन्ति। देवदत्त इत्यस्य संज्ञाकरणमिति। संज्ञायाः करणं संज्ञाकरणम्। येन संज्ञा चैतसिको धर्मः क्रियते जन्यते। संज्ञैव वा करणं संज्ञाकरणम्। संज्ञाग्रहणं चान्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करणनिवृत्त्यर्थम् । करणग्रहणं चैतसिकविशेषणार्थम् । यदि हि संज्ञा नामेत्युच्येत चैतसिकोऽपि सम्भाव्येत । तत् पुनः संज्ञाकरणं नाम **रूपं शब्दो रसो गन्धो** वेत्येवमादि । **वाक्यं पदमिति** । पद्यते गम्यतेऽनेनेति । पदं तु सुप्तिङन्तं पदं गृह्यते[1] । तेनाह । **यावतार्थपरिसमाप्तिस्तद्यथा**

अनित्या बत संस्काराः

इत्येवमादीति । आदिशब्देन

उत्पादव्ययधर्मिणः

उत्पद्य हि निरुध्यन्ते ।

तेषां व्युपशमः सुखम्

इत्येवमादि । अस्या गाथाया एवमर्थं व्याचक्षते । अनित्या बत संस्कारा इति प्रतिज्ञा । उत्पादव्ययधर्मिण इति हेतुः । यस्मादुत्पादव्ययधर्मवन्तस्तस्मादनित्या इति परिच्छिद्यन्ते । उत्पद्य हि निरुध्यन्त इति दृष्टान्तः । य उत्पद्यन्ते निरुध्यन्ते च तेऽनित्याः । तद्यथा घटादयः । तथा च संस्कारा इति । अपरे पुनर्व्याचक्षते । असिद्धहेतुसाधनार्थमेतदिति । कथमेतद्गम्यते । उत्पादव्ययधर्मिणस्त इति यस्मादेते उत्पद्य निरुध्यमाना दृष्टा इति । अपरे वर्णयन्ति । अनित्या बत संस्कारा उत्पादव्ययधर्मिण इति पर्यायद्वयमेतदुच्यते । कस्मादित्याह । यस्मादुत्पद्य निरुध्यन्त इति हेतुवचनम् । तेषां व्युपशमः सुखम् । ये ह्यनित्यास्ते दुःखा अतस्तेषां व्युपशमः सुखमिति विनेयजनं नियोजयति । **येन क्रियागुणकालसम्बन्धविशेषा गम्यन्ते** । साव्ययकारकविशेषणं वाक्यमिति वाक्यविदो वदन्ति । तद्यथा पचति पठति गच्छतीति कृष्णो गौरो रक्त इति पचति पक्ष्यत्यपाक्षीदिति क्रियागुणकालानां सम्बन्धविशेषा गम्यन्ते । **तत् पदम्** । तथा हि सामान्ये[2] वर्तमानानां पदानां यद्विशेषेऽवस्थानं स वाक्यार्थ इत्याहुः । तदेवं स्वलक्षणाभिद्योतकं नाम क्रियादिसम्बन्धविशेषाभिद्योतकं पदमित्युक्तं भवति । **व्यञ्जनमक्षरमिति** । वर्ण इत्यर्थः । न तु हल् एव । अचामपि व्यञ्जनत्वेनेष्टत्वात् ।

1 A & C. गृह्यन्ते

2 To. सामान्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ननु चाक्षराण्यपि लिप्यवयवानां नामानीति । लिपयो मनुष्यादिभिः पत्रादिषु ये लिखिताः , तेषामक्षराणि नामानि । रूपनामग्रहणे रूपप्रतीतिवद् व्यञ्जनग्रहणे लिपिप्रतीतिः । अतो व्यञ्जनमपि लिप्यवयवानां नाम भवतीति लक्षणसाङ्कर्यम् । ततश्च यदभिप्रेतं नाम्नो व्यतिरिक्तमन्यदेव व्यञ्जनमक्षरमिति तन्नोपपद्यते । **न वै लिप्यवयवानामिति** विस्तरः । विपरीतमेतदिति व्याचष्टे , यत्तु व्यञ्जनग्रहणे लिपिप्रतीतिरिति , तत्प्रत्याय्यप्रत्यायकभावेन सङ्केतितत्वात् , न तु तन्नामभावात् ।

समुक्तिरित्युच समवाय[1] इत्येतस्य धातोः क्तिनि समुक्तिरित्येतद्रूपं भवति । योऽर्थः समवाय इति , सोऽर्थः समुक्तिरिति , समवाय[2] इत्यर्थः ।

ननु च ते इति सौत्रान्तिकवचनम् । **नैते वाक्स्वभावा** इति विस्तरेण वैभाषिकवचनम् । **न च घोषमात्रेणेति** , नानक्षरात्मकेन घोषेणा- **र्थोऽवगम्यते** , **किं तर्हि** , **वाङ्नाम्नि प्रवर्तते** , **तन्नामात्मरूपतामिव वाच आपादयदर्थत्वं द्योतयति** । तां वाचमुपादाय पदार्थं द्योतयति , प्रत्याययतीत्यर्थः । सौत्रान्तिक आह । **न वै घोषमात्रं वागिति** विस्तरः । न वयं घोषमात्रं वागिति वर्णयामः , कश्चिदेव तु घोषो वर्णात्मकः । **सैव वाग्- योऽर्थेषु कृतावधिः** । कृतमर्यादः । एतेन सङ्केतापेक्षः शब्दोऽर्थं प्रत्याययति , न यः कश्चिच्छब्द इति दर्शयति , कृतसङ्केतः शब्दोऽर्थं प्रत्याययतीति । **तच्चैतच्छब्द- मात्रात् प्रतीतपदार्थकात् सिध्यतीति** । तच्चैतदर्थद्योतनं नामरहिताच्छब्दाज्जात्याद्यभिधेयपदार्थकात् सिध्यतीत्ययमस्यार्थ इति । **यद्युत्पादयतीति** विस्तरः । वाचि सत्यां स चित्तविप्रयुक्त उत्पद्यत इतीष्यते , तेनाशंक्यते यद्युत्पादयतीति । **एवं चेत् सर्वं घोषमात्रं** वृषभादिगर्जितमपि **नामोत्पादयिष्यति** , **घोषस्वभावा वागिति कृत्वा** । **ब्रूयास्त्वं विशिष्ट एव घोषो** यो वर्णात्मकः सम्भावितः स एव नामोत्पादयतीति । **अत्रोच्यते** । यादृशो वा घोषविशेष इष्यते नाम्न उत्पादकः **स एवार्थस्य द्योतको भविष्यति** । न तु स चित्तविप्रयुक्त इत्यभिप्रायः । **अथ प्रकाशयतीति** विस्तरः । घोषेणोत्पद्यमानेन स चित्तविप्रयुक्त उत्पद्यते , स तं प्रकाशयत्यर्थद्योतनायेति यदीष्यते , **अत्रोच्यते** । **सर्वं घोषमात्रं नाम प्रकाशयिष्यतीति** पूर्ववद्वाच्यम् । **न खल्वपि शब्दानां सामग्र्यमस्तीति** । यदनेकाक्षरं नाम

1 Dhā, IV, 114.,

2 To. following Tib. suggests समुदाय.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदुत्पत्तिपरिकल्पोऽनेकशब्दापेक्षः । तेनैवं विचार्यते' इहोच्चरितप्रध्वंसिनः शब्दाः' तस्मादेषां युगपदवस्थानं नास्ति । **एकस्य च** द्रव्यसतो **धर्मस्य भागशः खण्डश उत्पादो न युक्तो** यथा घटपटादेः प्रज्ञप्तिसतः कल्प्यत इति **कथमुत्पादयन्ती वाङ्नामोत्पादयेत्** । यदा तदुत्पादयति तदा कथं सा तदुत्पादयतीति वाक्यार्थः । वर्तमाना हि वाङ्नामोत्पादयन्त्युत्पादयेत्' न च सर्वे वाक्छब्द[1]-क्षणा युगपद्वर्तमाना भवन्ति । यदा हि रूपमिति र-शब्दो वर्तमानो भवति तदा ऊकारपकाराकारा अनागता भवन्ति ' यदा ऊकारो वर्तमानो भवति तदा रशब्दोऽतीतः ' पकाराकारावनागतौ । एवं पकाराकारावपि क्रमशो यदा वर्तमानौ भवतस्तदेतरे न वर्तमाना इति ' एवं सा वाङ्नाम नैवोत्पादयेत् । ब्रूयास्त्वं वर्तमानो रशब्दस्तस्य रूपनाम्नः पूर्वं भागमुत्पादयति ' ऊशब्दोऽपि वर्तमानो द्वितीयं भागम् ' एवं यावदकारशब्दस्तस्य चतुर्थभागमुत्पादयतीति । तदयुक्तम् । एकस्य धर्मस्य भागश उत्पादासम्भवादिति । उक्तमेतत् । **कथं ताव-दतीतापेक्षः पश्चिमो विज्ञप्तिक्षण उत्पादयत्यविज्ञप्तिमिति** ' प्रातिमोक्षसंवर-समादाने कायवाग्विज्ञप्तयः प्रवर्तन्ते ' तासां नास्ति सामग्र्यम् । अथ चातीत-कायवाग्विज्ञप्तिक्षणापेक्षः पश्चिमो विज्ञप्तिक्षणः प्रातिमोक्षसंवरसंगृहीताम-विज्ञप्तिमुत्पादयति । एवमतीतशब्दक्षणापेक्षः पश्चिमो वाक्छब्दक्षणो[2] नामोत्-पादयतीति । **एवं तर्हीति** विस्तरः । **पश्चिमशब्द एव नाम्न उत्पादात् योऽपि तमेवैकं शृणोति** योऽपि पश्चिममेवैकं शब्दं शृणोति रूपमिति । **सोऽप्यर्थं प्रति-पद्येत** । सोऽपि रूपनामार्थं गृह्णीयात् । तन्नामोत्पत्तेः । न चैवं प्रतिपद्यते । तस्मादयुक्तमेतत् । **अथाप्येवं कल्प्येत** इति विस्तरः । क्षणप्रतिभासा वर्णवाग् व्यञ्जनमपि तत्प्रतिभासमिति पक्षान्तरमुपन्यस्यते । **वाग् व्यञ्जनं जनयति' व्यञ्जनं तु नाम जनयतीति** । **अत्रापि स एव प्रसङ्गो व्यञ्जनानां सामग्र्या-भावात्** । कथम् ' न खलु व्यञ्जनानां सामग्र्यमस्ति । न चैकस्य धर्मस्य भागश उत्पादो युक्त इति कथमुत्पादयद् व्यञ्जनं नामोत्पादयेत् ' कथं तावदतीतापेक्षः पश्चिमो विज्ञप्तिक्षण उत्पादयत्यविज्ञप्तिम् । एवं तर्हि पश्चिम एव व्यञ्जने नाम्न उत्पादाद् योऽपि तमेवकं पश्चिमं व्यञ्जनोत्पादकं शब्दं शृणोति' यो वा तदेवैकं

---

1 Mss. & To. वाच्छब्द° 2 To. वाच्छब्द°

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पश्चिमं व्यञ्जनं शृणोति । सोऽप्यर्थं प्रतिपद्येत[1] । **एष एव तु प्रसङ्गो नाम्नः प्रकाशकत्वे[2] वाच** इति । न खल्वपि शब्दानां सामग्र्यमस्ति । न चैकस्य धर्मस्य भागशः प्रकाशो युक्त इति कथं प्रकाशयन्ती वाङ् नाम प्रकाशयेत् । कथं तावदतीतापेक्षः पश्चिमो विज्ञप्तिक्षणः प्रकाशयत्यविज्ञप्तिम् । एवं तर्हि पश्चिम एव शब्दे नाम्नः प्रकाशाद् योऽपि तमेवैकं शब्दं शृणोति । सोऽप्यर्थं प्रतिपद्येत । अथाप्येवं कल्प्येत । वाग् व्यञ्जनं प्रकाशयति । व्यञ्जनं तु नामेति । अत्रापि स एव प्रसङ्गो व्यञ्जनानां सामग्र्यभावात् । यस्य तर्हि शब्दमात्रं नामानेकाक्षरं च नाम भवति न च शब्दानां सामग्र्यमस्ति । तस्य कथं नामार्थं प्रत्याययति । सर्वाक्षरस्मृत्यनन्तरत्वादर्थप्रतिपत्तेः । अतएव च नान्तरीयकन्यायेन प्रथमाक्षरश्रवणकाल एव शेषाक्षरानुस्मृतिबलेन कश्चिदर्थं प्रतिपद्यत एवेति । **व्यञ्जनस्यापि वाङ् नैवोत्पादिका न प्रकाशिका युज्यत** इति । पूर्वं शब्दस्योत्पाद्यं शब्दस्य व्यङ्ग्यं वा व्यञ्जनमभ्युपगम्य दोष उद्ग्राहितः । इदानीं शब्दव्यतिरिक्तानुपलब्धेरुत्पाद्यव्यङ्ग्यत्वमपि तस्य नास्तीति तदेवोन्मूलयति । न तु शब्दानां सामग्र्यभावादिति दोषो वक्तव्यः । न ह्यनेकशब्दापेक्षा व्यञ्जनप्रतिपत्तिः । अपि च घोषस्वभावत्वाद् वाचः सर्वं घोषमात्रं व्यञ्जनमुत्पादयिष्यति प्रकाशयिष्यति वा । यादृशो वा घोषविशेष इष्यते व्यञ्जनस्योत्पादकः प्रकाशको वा स एव व्यञ्जनार्थं करिष्यतीति । **अथाप्यर्थसहजं नाम जात्यादिवदिष्येतेति** विस्तरः । अथ सहजे नाम्नि कल्प्यमाने वाचोत्पाद्यं प्रकाश्यं वा नामेत्येवमादिघोषप्रसङ्गो न भविष्यतीति मत्वा पक्षान्तरमिदं विकल्प्यते । यथा जात्यादीनि लक्षणान्यर्थसहजान्येवेष्यन्ते नातीतानागतस्यार्थस्य वर्तमानानि भवन्ति । एवमेव यदि नामेष्येत[3] । **अतीतानागतस्यार्थस्य वर्तमानं नाम न स्यात्** । ततश्चातीतानागतार्थव्यवहारो न शक्येत कर्तुम् । न ह्यतीतानागतं नामार्थं द्योतयितुमर्हति । यथातीतानागता वाङ् नाम नोत्पादयितुं व्यञ्जयितुं चार्हति । नामबहुत्वे च न सहजं नाम परिच्छिद्येत । **असंस्कृतानां चानुत्पत्तिमत्त्वात् सहजं[4] नाम न स्यादित्यनिष्टिरेवेयम्** । न कर्तव्यैवेयमिष्टिरित्यभिप्रायः ।

नामसंनिश्रिता गाथा

इति । गाथा वाक्यम् । सा नामानि संनिश्रिता नामसूत्पन्नेषु

---

1 Mss. ०पद्यते

2 U adds वाचकत्वे.

3 To. ०ष्यते

4 To. सहज.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावात्। तस्मात् सन्ति नामानि वाक्यं चेति वचनावकाशोऽस्तीत्याह। **तत्रार्थेषु कृतावधिः शब्दो नामेति** विस्तरः। अर्थकृतावधिशब्दस्वभावानां **नाम्नां रचनाविशेषो गाथा।** विन्यासविशेष इत्यर्थः। **पंक्तिवदिति।** यथा पंक्तिः पिपीलिकादीनां रचनाविशेषो न ततो द्रव्यान्तरमुपपद्यते। तद्वत्। एककालवर्तिनां पङ्क्तिपिपीलिकादीनां रचनाविशेषः पंक्तिरित्युच्यते। क्रमवर्तिनां तु शब्दानां न रचनाविशेषः। तेन वैषम्यमिति वचनावकाशमभिसमीक्ष्य द्वितीयो दृष्टान्त उपन्यस्यते। **चित्तानुपूर्व्यवच्चेति।** यथानुक्रमवर्तिभ्यश्चित्तेभ्यो नान्यदानुपूर्व्यमस्ति। तद्वत्। **अपार्थिका तत्प्रक्लृप्तिरिति।** निष्प्रयोजना नामपदयोरर्थान्तरपरिकल्पनेत्यर्थः। **न हि सर्वे धर्मास्तर्कगम्या** इति। केचिदेव तर्कगम्या न सर्वे। ये हि तथागतज्ञानगोचरपतिता एव न ते तर्कगम्या इत्यभिप्रायः।

चित्तविप्रयुक्तप्रभेदविवक्षयेदमुपन्यस्यते। **अथ किं प्रतिसंयुक्ता** इति विस्तरः। कस्मिन् धातौ प्रतिसंयुक्ताः किंप्रतिसंयुक्ताः। **सत्त्वाख्यासत्त्वाख्येति किमिति।**

कामरूपाप्तसत्त्वाख्या निष्यन्दाव्याकृता

इति। कामरूपाप्ता एव सत्त्वाख्या एव निष्यन्दा एवाव्याकृता एव चेत्यवधारणम्। **ते त्वनभिलाप्या** इति। ते त्वारूप्याप्ता नामकायादयोऽकथ्या वाचस्तत्राभावात्। कथं ते सन्तीति गम्यन्ते। यदा ते नाभिलप्यन्ते। तस्मात् कामरूपाप्ता एव नारूप्याप्ता इति वैभाषिकाः। सत्त्वाख्या एव च सत्त्वप्रयत्नाभिनिर्वृत्तवर्णादिस्वभावत्वात्। **यश्च द्योतयति। स तैः समन्वागत** इति। कुतः पुनरियमाशङ्का। अन्योन्यस्य तैः समन्वागमः स्यादिति। अस्येदं नामेति व्यपदेशात्। यथा चक्षुरिन्द्रियेण द्रष्टैव समन्वागतो न दृश्यः सत्त्वः। तथा द्योतयितैव तैः समन्वागतो न द्योत्यः। **नैष्यन्दिकाः** सभागहेतुजनितत्वात्। न विपाकजा इच्छातः प्रवृत्तेः। नौपचयिका अरूपिणां चयाभावादिति। **अनिवृताव्याकृताश्च।** न कुशला नाकुशलाः। कस्मात्। समुच्छिन्नकुशलमूलकामवीतरागाणामपि तत्समन्वागमप्रसङ्गात्। इतरथा हि यदा समुच्छिन्नकुशलमूलः कुशलान् धर्मान् द्योतयति। तदास्य कुशलधर्मसमन्वागमः स्यात्। एवं कामवीतरागस्याप्यकुशलधर्मद्योतने योज्यम्। तस्मादनिवृताव्याकृता एव। अनिवृताव्याकृतानां कुशलाकुशलैरविरोधात्॥४७॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[सभागता विपाकापि त्रैधातुक्याप्तयो द्विधा ।
लक्षणानि च निष्यन्दः समापत्त्यसमन्वयाः ॥४८॥]

तथा सभागतेति। तथाशब्देन सत्त्वाख्यनैष्यन्दिकाव्याकृतत्वमेव सभागताया अतिदिश्यते । त्रिधात्वाप्तााया अपवादरूपेण वक्ष्यमाणत्वात् । **सा त्विति।** तुशब्दो विशेषणार्थः । नामकायादिभ्यो हि सभागता विशिष्यते । कथमित्याह ।

विपाकापि

इति । विपाकजापीत्यर्थः । न केवलमियं नैष्यन्दिकी । किं तर्हि । विपाकजापीति । न त्वौपचयिकी तथैव चयाभावात् ।

आप्तयो द्विधा

इति द्विधाशब्देन नैष्यन्दिकविपाकजत्वप्रभेदावेव प्राप्तीनामुच्येते । प्रभेदान्तरत्वोक्तत्वात् । **लक्षणानामपि** जात्यादीनां तावेव प्रभेदावेवमेव वक्तव्यौ । **असमन्वागमः** अप्राप्तिः । सानिवृताव्याकृतापि न विपाकजा । न हि विपाकस्याप्यसमन्वागमो विपाको भवितुमर्हति । तथा ह्यकुशलस्य कुशलसास्रवस्य च विपाक इष्यते । न चानयोरप्राप्तिर्विपाको भवितुमर्हति । यो हि बुद्धिपूर्वकश्चेतनात्मकस्तत्संप्रयुक्तसमुत्थो वा धर्मः स विपाकहेतुः । न चासमन्वागम एवं बुद्धिपूर्वककर्मकृत इत्यतो न विपाकजः । **शेषमेषां वक्तव्यमुक्तमिति।** एषां प्राप्तिलक्षणसमापत्त्यसमन्वागमानां वक्तव्यं व्याख्यातव्यमुक्तं व्याख्यातमित्यर्थः । किं पुनस्तच्छेषमिति । धात्वाप्तता सत्त्वासत्त्वाख्यता कुशलाकुशलाव्याकृतता च । कथं पुनस्तदुक्तम् । प्राप्तेस्तावद्धात्वाप्ततोक्ता

स्वधातुका तदाप्तानाम्[1]

इति वचनात् । सत्त्वाख्यतोक्ता समन्वागमवचनात् । न ह्यसत्त्वसंख्यातेन संस्कृतेन सन्ति समन्वागमाः ।

प्राप्त्यप्राप्ती स्वसन्तानपतितानाम्[2]

इति वचनात् । कथं कुशलाकुशलाव्याकृततोक्ता ।

---

1 Kārikā, II, 37.

2 Ibid., II, 36.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुभादीनां शुभादिका[1]

इति वचनात्। लक्षणानामपि त्रैधातुकप्रतिसंयुक्ततोक्ता

सर्वं संस्कृतलक्षणैः[2]

इति वचनात्। सत्त्वासत्त्वाख्यताप्यत एवोक्ता। सर्वसंस्कृतसहभूत्वात्। अतएव च कुशलाकुशलाव्याकृतताप्युक्ता।

चैत्ता द्वौ संवरौ तेषां चेतसो लक्षणानि च।
चित्तानुवर्तिनः कालफलादिशुभतादिभिः ॥[3]

इति वचनात्। असंज्ञिसमापत्ते रूपधात्वाप्ततोक्ता

ध्यानेऽन्त्ये[4]

इति वचनात्। कुशलतापि

शुभा[5]

इतिवचनात्। सत्त्वाख्यताप्यत एव

उपपद्यवेद्यैव[6]

इति वचनात्। निरोधसमापत्तेरप्यारूप्यधात्वाप्ततोक्ता

भवाग्रजा[7]

इति वचनात्। कुशलतापि

शुभा

इति वचनात्। सत्त्वाख्यताप्यत एव कुशलसंस्कृतत्वात्। असमन्वागमस्य त्रिधात्वाप्ततोक्ता

कामाद्याप्तामलानां च[8]

इति वचनात्। सत्त्वाख्यता समन्वागमवचनात्। अव्याकृतताप्युक्ता

अक्लिष्टाव्याकृता प्राप्तिः[9]

इति वचनात्। शेषयोश्चासंज्ञिकजीवितयोः। किम्। वक्तव्यमुक्तमिति वर्तते। आसंज्ञिकस्य रूपाप्तसत्त्वाख्यविपाकाव्याकृततोक्ता

1 Ibid., II, 37.
2 Ibid., II, 23.
3 Ibid., II, 51.
4 Ibid., II, 42.
5 Ibid.
6 Ibid.
7 Ibid., II, 43.
8 Ibid., II, 40.
9 Ibid., II, 39.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विपाकस्ते बृहत्फलाः[1]

इति वचनात् । जीवितस्य त्रिधातवाप्तोक्ता

आयुर्जीवितम्[2]

इति वचनात् । आयुषश्च त्रैधातुकत्वात् । सत्त्वाख्यताप्युक्ता

विपाको जीवितम्[3]

इति सूत्रात् । विपाको हि सत्त्वाख्य एव

विपाकोऽव्याकृतो धर्मः सत्त्वाख्यो व्याकृतोद्भवः[4]

इति वचनात् । अत एवास्यानिवृताव्याकृतताप्युक्तेति । आचार्येण तु यद्दर्शनं वक्तव्यमुक्तं तद्विवृतम् । कथं प्राप्त्यादीनां[5] सत्त्वाख्यतोक्ता समन्वागमवचनादित्यादि ॥४८॥

[कारणं सहभूश्चैव सभागः संप्रयुक्तकः ।
सर्वत्रगो विपाकाख्यः षड्विधो हेतुरिष्यते ॥४९॥]

क इमे हेतवः के च प्रत्यया इति । हेतूनां प्रत्ययानां च कः प्रतिविशेषः । न कश्चिदित्याह । तथा ह्युक्तं भगवता । द्वौ हेतू द्वौ प्रत्ययौ सम्यग्दृष्टेरुत्पादाय । कतमौ द्वौ । परतश्च घोषोऽध्यात्मं च योनिशोमनस्कार इति । हेतुः प्रत्ययो निदानं कारणं निमित्तं लिङ्गमुपनिषदिति पर्यायाः । उपनिषच्छब्दस्तु कदाचिदुपांशौ कदाचित् प्रामुख्य इति । तद् यथापि सूर्योपनिषदो देवा इति । उपांशुप्रयोग उपनिषत्प्रयोग इति । यदि प्रतिविशेषो नास्ति किमर्थं हेतूनां प्रत्ययानां च पृथङ्निर्देशः । अन्येनार्थविशेषेण हेतुनिर्देशोऽन्येन प्रत्ययनिर्देशः । हेतुनिर्देशे ह्यविनाभावसहभूत्वसदृशत्वादिरर्थविशेष उक्तः । प्रत्ययनिर्देशे तु हेतुसमनन्तरत्वादिभिरपरोऽर्थविशेष उक्त इति । अथ कतमस्मिन् सूत्रे षड्ढेतव उक्ताः । सर्वो ह्यभिधर्मः सूत्रार्थः सूत्रनिकषः सूत्रव्याख्यानमिति । अन्तर्हितं तत् सूत्रमिति वैभाषिकाः । तथा ह्येकोत्तरिकागम आ शताद्धर्मनिर्देश आसीत । इदानीं त्वा दशकाद् दृश्यन्त इति कथयन्ति । अपि तु सन्ति प्रतिनियतहेतुवाचकानि सूत्राणि । तान्युदाहरिष्यामः । चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानमिति कारणहेतुः । जननाविघ्नभावेन ह्येष व्यवस्थाप्यते । इमानि त्रीणि मार्गाङ्गानि सम्यग्दृष्टिमनुपरिवर्तन्ते । तैः

1 Kārikā, II, 41.
2 Ibid., II, 45.
3 Ibid., II, 10.
4 Ibid., II, 58.
5 To. प्राप्त्यादीनां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सह जाता वेदना संज्ञा चेतना चेति सहभूहेतुः। अन्योन्यानुपरिवर्तनैककृत्यार्थेन ह्येष व्यवस्थाप्यते। समन्वागमोऽयं पुद्गलः कुशलैरपि धर्मैरकुशलैरपि यावदस्ति चास्याणुसहगतं कुशलमूलमसमुच्छिन्नं यतोऽस्य कुशलमूलादन्यत् कुशलमूलमुत्पत्स्यते। एवमयं पुद्गल आयत्यां विशुद्धिधर्मा भविष्यतीति सभागहेतुः। एष ह्यतीतप्रत्युत्पन्नानां धर्माणां [1]स्वफलनिर्वर्तनार्थेन व्यवस्थाप्यते। इयमुच्यते दर्शनमूलिका श्रद्धा वेत्यज्ञानसम्प्रयुक्ता। यद्विजानाति तत् प्रजानातीति सम्प्रयुक्तकहेतुः। एकालम्बनकृत्यार्थेन ह्येष व्यवस्थाप्यते। मिथ्यादृष्टेः पुरुषपुद्गलस्य यच्च कायकर्म तद्दृष्टेर्यच्च वाक्कर्म या चेतना यः प्रणिधिर्ये च संस्कारास्तदन्वयाः सर्वेऽप्येते धर्मा अनिष्टत्वाय संवर्तन्तेऽकान्तत्वायाप्रियत्वायामनआपत्वाय। तत् कस्य हेतोः। दृष्टिर्ह्यस्य पापिका यदुत मिथ्यादृष्टिरिति सर्वत्रगहेतुः। एष हि सभागविसभागक्लिष्टधर्मप्रबन्धजनकार्थेन व्यवस्थाप्यते। इह कृतस्य कर्मणः कुशलस्य सास्रवस्य भावनामयस्य तत्रोत्पन्ना विपाकं प्रतिसंवेदयन्ते। संचेतनीयस्य कर्मणः कृतस्योपचितस्य विपाक इति विपाकहेतुः। एष हि विसदृशफलाक्षेपकत्वेन व्यवस्थाप्यते। इत्यत एते षड्हेतवः सूत्रत एव प्रसिद्धा इति।

षड्विधो हेतुरिष्यते।

वैभाषिकैरित्यभिप्रायः॥४६॥

स्वतोऽन्ये कारणं हेतुः सहभूर्ये मिथःफलाः।
भूतवच्चित्तचित्तानुवर्तिलक्षणलक्ष्यवत्॥५०॥

स्वतोन्ये

इत्यात्मनोऽन्य इत्यर्थः। स्वात्मनि वृत्तिविरोधात् स्वात्मा न हेतुः। **सर्वधर्माः** संस्कृतासंस्कृताः कारणहेतुरिति। कारणमेव हेतुः कारणहेतुः। यो हेतुर्विशेषसंज्ञया नोच्यते सामान्यं हेतुभावं परिगृह्योच्यते। स कारणहेतुः। अन्येषु हि विशेषसंज्ञानिरुक्तेषु हेतुषु यो न विशेषितः कारणं च। तस्य तदेव विशेषणं भवति। यथा रूपायतनमुक्तमिति। उत्पादं प्रत्यविघ्नभावावस्थानादिति। यस्मादुत्पादं प्रत्युत्पत्तिमतां स्वतोऽन्ये धर्मा अविघ्नभावेनावतिष्ठन्ते तस्मात् कारणहेतुरित्युच्यते।

[1] Mss. सफल०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ननु च येऽस्याजानत इति विस्तरः। ज्ञानञ्चेन्नोदपत्स्यत[1]। **उदपत्स्यन्तास्रवास्त** इति विस्तरो लृङोऽर्थः[2]। तेनाह। **अस्याजानत** अनुत्पन्नदर्शनभावनामार्गपुद्गलस्य ये दर्शनभावनामार्गवध्या[3] रागादय **आस्रवा उदपत्स्यन्त**। **जानत** उत्पन्नदर्शनभावनामार्गस्यास्य[4] पुद्गलस्य[5] तद्वध्यास्ते रागादयो **नोत्पद्यन्ते**। ततः किमित्याह। **ज्ञानमेषां विघ्नमुत्पत्तौ करोति** दर्शनभावनामार्गसंगृहीतम्। **सूर्यप्रभा च ज्योतिषां दर्शनस्य**। विघ्नमुत्पत्तौ करोतीत्यधिकृतम्। एवं सति **कथं स्वभाववर्ज्याः सर्वधर्माः संस्कृतस्य कारणहेतुर्भवन्ति**। यस्मादास्रवोत्पत्तौ न ज्ञानं कारणहेतुः। ज्योतिर्दर्शनोत्पत्तौ च सूर्यप्रभा। एवं हि वक्तव्यं स्यात्। आस्रवोत्पत्तौ स्वभावज्ञानवर्ज्याः सर्वधर्माः कारणहेतुः। ज्योतिर्दर्शनोत्पत्तौ च स्वभावसूर्यप्रभावर्ज्याः सर्वधर्माः कारणहेतुरिति। **उत्पद्यमानस्याविघ्नभावावस्थानादिति**। समग्रेषु हेतुप्रत्ययेष्वनन्तरभावी धर्म उत्पद्यमान उच्यते। तस्योत्पद्यमानस्योत्पादं प्रति सर्वधर्मा एवाविघ्नभावेनावतिष्ठन्ते। न सर्वस्येत्यवगन्तव्यम्। ज्ञाने पुनः सति [6]त आस्रवा[6] नोत्पद्यमाना भवन्ति। प्राप्त्याद्यभावेन प्रत्ययसामग्र्यभावात्। ज्योतिर्दर्शनमपि प्रत्ययवैकल्यादेव नोत्पद्यमानमिति योज्यम्। अतस्तदवस्थमिदं स्वभाववर्ज्याः सर्वधर्माः संस्कृतस्य कारणहेतुर्भवन्तीति। **तद्यथाऽनुपद्रोतारं भोजकमिति** विस्तरः। अनुपद्रवकरं ग्रामपतिमभिसन्धाय मनुष्या **ब्रूयुः। स्वामिना स्मः सुखिता** इति। कस्मात् त एवं वक्तारो भवन्ति। यस्मादसावुपद्रवकरणे समर्थ **उपद्रवं न करोति। तद्यथा निर्वाणस्यानुत्पत्तिधर्माणां च**। किम्। कथं हेतुभावः **सर्वोत्पत्तौ। नारकादीनाञ्च** नारकतिर्यग्योन्यादिकानामारूप्यस्कन्धोत्पत्तौ कथं हेतुभावः। नारकादिग्रहणं मनुष्यादीनां कदाचिद् भवेदुपदेशादिनेत्यभिप्रायः। **असन्तोऽपि ह्येवेति**। असन्तोऽपि ह्येते निर्वाणादयस्तथैव। **यथा सन्तो** विद्यमाना **विघ्नं कर्तुमसमर्थाः स्युः**। अतोऽसतां सतां चैषां निर्वाणादीनां विघ्नकरणे निर्विशिष्टत्वम्। असत्तुल्यास्त इत्यर्थः। **असमर्थेऽपीति** विस्तरः। उपद्रवं **कर्तुमसमर्थेऽपि भोजके ग्रामीणास्तथा वक्तारो**

1 To. °न्नोदयन्त्यते

2 Mss. लृङार्थः, To. लृड्यर्थः

3 Mss. °वध्या

4 To. °मार्गस्य

5 To. पुद्गलस्यास्य

6...6 Mss. ततसास्रवा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवन्ति । स्वामिना स्मः सुखिता इति । स एवात्र दृष्टान्तो यः प्राक्तनः । अतोऽनेनैव दृष्टान्तेन विघ्नयितुमसमर्थानामपि निर्वाणादीनामविघ्नभावावस्थानात् कारणहेतुभावः सिद्धः । कस्मात् पुनरसत्तुल्यानां निर्वाणादीनां कारणहेतुत्वमिष्यते । न पुनरसतां शशविषाणादीनाम् । असद्दृष्टान्ताभावात् । न ह्यसन्तं भोजकमधिकृत्य ग्रामीणा भवन्ति वक्तारः स्वामिना स्मः सुखिता इति । न वा शशविषाणेन स्मः सुखिता इति । अचोद्यमेतत् । सामान्येनैव[1] निर्देश इति । यश्च प्रधानः कारणहेतुर्यश्चाप्रधानः सर्वमधिकृत्योक्तम् ।

स्वतोऽन्ये कारणं[2] हेतुः

इति । यो हि प्रधानो जनकः स कारणहेतुः । स सुतरामविघ्नभावेनावतिष्ठते न केवलमितरः । आहारः शरीरस्योत्पादनेऽपि समर्थ इत्यधिकृतम् । आहारसमुदयात् कायसमुदय[3] इति वचनात् । रसादिपरिणामयोगात् । बीजादयोऽङ्कुरादीनामिति । बीजाङ्कुरनालगण्डप्रसवादीनामुत्पादने समर्था इत्येवम् ।

यस्त्वेवं चोदयतीति विस्तरः । कारणे सति कार्येण भवितव्यमिति मत्वा चोदयति । कस्मान्न सर्वस्योत्पादो युगपद् भवति । यथा च प्राणातिपातकारकः प्राणातिपातभाग् भवति[4] । तथा सर्वेऽपि कस्मान्न तद्भाजो भवन्तीति । न कारकभावेनेति । न मुख्यवृत्त्यास्य कारणत्वमिति दर्शयति । तेन सर्वस्य तावद् युगपदुत्पादो न प्राप्नोति प्रत्ययसामग्र्यभावेनानुत्पद्यमानत्वात् । प्राणातिपातयोगश्च भवत्यकारकत्वात् । यस्तु कारकः स प्राणातिपातभागेव भवति ।

मनोविज्ञानमुत्पद्यते कुशलाकुशलमिति । कुशलं मनोविज्ञानमिति निर्वाणालम्बनत्वात् । निर्वाणालम्बनात् कुशलादकुशलाद्वा मनोविज्ञानमुत्पद्यते । ततश्चक्षुर्विज्ञानमिति । एवं परम्परया तस्यापि निर्वाणस्य प्रत्ययीभावादस्ति सामर्थ्यम् । क्व । चक्षुर्विज्ञान[5] इत्यधिकृतम् । एवमन्यस्यापि प्रतिपत्तव्यमिति । नारकादीनामप्यारूप्यस्कन्धोत्पत्तौ[6] सामर्थ्यम् । कथम् । अमी बत नारकप्रेतादयः परमदुःखिता इति नारकाद्यालम्बनं मनोविज्ञानं कुशलमुत्पद्यते । यतः क्रमेण शीले व्यवस्थितस्य भावनायां प्रयोगादारूप्यसमापत्तिरुपपत्तिश्चोपपद्यत इति ।

---

1 Mss. ०नैष
2 To. कारण-
3 Mss. कायस्य समु०
4 Mss. भवतीति
5 Mss. ०नम्
6 Mss. ०मप्यारूप्यारूप्य०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सहभूर्ये मिथःफलाः

इति। हेतुरिति वर्तते। सहभूर्हेतुस्ते धर्मा भवन्ति ये धर्मा मिथःफलाः। ये परस्परफला इत्यर्थः। सहभूहेतुः सहभुव इति नोक्तम्। कस्मात्। सन्ति हि धर्माः केचित् सहभुवो न तु सहभूहेतुः। तद्यथा नीलाद्युपादायरूपं भूतैः सहभूर्भवति। न चान्योन्यं सहभूहेतुः। अतो मिथःफला इत्यर्थपरिग्रहः। इदञ्च सावशेषं लक्षणम्। अतो वक्ष्यति विनापि चान्योन्यफलत्वेन धर्मोऽनुलक्षणानां सहभूहेतुः। न तानि तस्येत्युपसंख्यातव्यमिति। उपसंख्यानकरणञ्च महाशास्त्रताप्रदर्शनार्थम्। सोपसंख्यानं हि व्याकरणादि महाशास्त्रं दृश्यते।

भूतवत्

इति। तद्यथार्थे वति प्रत्ययः। **एवञ्च कृत्वा सर्वमेव संस्कृतं सहभूहेतुर्यथायोगमिति।** यस्मात् संस्कृतलक्षणानि लक्ष्यस्य सहभूहेतुः। सोऽपि तेषाम्। अतो यथायोगं यथासम्भवं सर्वं संस्कृतं सह हेतुः। संस्कृतस्य लक्षणवत्त्वात्। लक्ष्यलक्षयोश्च सहभूहेतुत्वात्। नतु सर्वं सर्वस्य। [1]अपरलक्षणैरसहभूहेतुत्वादिति यथायोगग्रहणम्॥५०॥

चैत्ता द्वौ संवरौ तेषां चेतसो लक्षणानि च।
चित्तानुवर्तिनः कालफलादिशुभतादिभिः॥५१॥

तेषाञ्च ये जात्यादयश्चित्तस्य चेति। तेषाञ्च चित्तसम्प्रयुक्तानां चेतनादीनां ध्यानसंवरस्यानास्रवसंवरस्य ये जात्यादयश्चत्वारो धर्माश्चित्तानुपरिवर्तिन उच्यन्ते।

कालफलादिशुभतादिभिः

इति। कालेन च फलादिभिश्च शुभतादिभिश्चेति कालफलादिशुभतादिभिः। **कालतस्तावदिति विस्तरः।** चित्तेन सहैते एकोत्पादा एकस्थितय एकनिरोधाश्च। तद्भावः। तया। **एकोत्पादस्थितिनिरोधतयेति।** एकमध्वानं पतिताः एकाध्वपतिताः। तद्भावः। तेन। **एकाध्वपतितत्वेन चतुर्थेनेति।** कालतश्चित्तमनुपरिवर्तन्ते। **एकफलतयैकविपाकतयैकनिष्यन्दतया च चित्तमनुपरिवर्तन्ते।** फलमिह पुरुषकारफलं विसंयोगफलं च। विपाकफलनिष्यन्दयोः पृथग्गृहीतत्वात्। अधिपतिफलं तु सर्वसाधारणत्वान्नात्र गण्यते। अयं

---

1 To. अस्वलक्षणै॰

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चैकशब्दः संख्याने साधारणे वा एकफलतयेत्यादि ' पूर्वकस्त्वेकशब्दः सहार्थे चित्तेन सहोत्पादस्थितिनिरोधतयेत्यर्थः । न ह्यत्र संख्यानार्थः सम्भवति । न हि यश्चित्तस्योत्पादः स एव चित्तानुपरिवर्तिनाम् ' यो वा तेषां स चित्तस्येति । **एवं दशभिः कारणैरिति** । कालतश्चतुर्भिरेकोत्पादतयैकस्थिततयैकनिरोधतयैकाध्वपतितत्वेन चेति । ननु चैकोत्पादस्थितिनिरोधतयेत्येतेनैवैकाध्वपतितत्वमुक्तम् ' न सर्वमुक्तम् । अनुत्पत्तिधर्मिणि हि चित्ते ते चित्तानुपरिवर्तिन एकाध्वपतिता भवन्ति ' नैकोत्पादस्थितिनिरोधा इति । तस्मादेकाध्वपतितत्वं चतुर्थं कारणमुच्यते । एकफलविपाकनिष्यन्दतयेति त्रिभिः ' **कुशलाकुशलाव्याकृततया चेति** पुनस्त्रिभिरिति दशभिः । पर्यायवृत्तिं जातिं वा प्रत्येवमुक्तं दशभिरिति । न ह्येकत्र चित्ते दश कारणानि भवन्ति । न हि कुशले चेतस्यकुशलाव्याकृते कारणे भवतः ' न चाकुशलाव्याकृते चित्ते अनुत्पत्तिधर्मिणि[1] । एकाध्वपतितत्वेनैकफलनिष्यन्दताभ्यामव्याकृतत्वेन चेति चतुर्भिः । उत्पत्तिधर्मिणि त्वेभिरेव चतुर्भिरेकोत्पादस्थितिनिरोधताभिश्चेति सप्तभिः । अनास्रवेऽप्येवम् । अव्याकृततां तु केवलमपनीय कुशलता प्रक्षेप्तव्या । अकुशले तु कुशलसास्रवे [2]चानुत्पत्तिधर्मिण्यकुशलतया कुशलतया च यथावस्त्वेकाध्वपतितत्वेनैकफलविपाकनिष्यन्दताभिश्चेति पञ्चभिः । उत्पत्तिधर्मिणि तु तस्मिन्नेभिरेव पञ्चभिरेकोत्पादस्थितिनिरोधताभिश्चेत्यष्टाभिः ।

सर्वाल्पं चित्तमिति । सर्वेभ्यो यदल्पपरिवारं चित्तं तत् सर्वाल्पमित्युच्यते । तत्पुनः कतमत् । द्वितीयध्यानात् प्रभृत्यूर्ध्वमनिवृताव्याकृतं चित्तम् । तत्र वितर्कविचारौ न स्तः । न चापि कुशलादिमहाभूमिका केवलमहाभूमिका एव दश भवन्ति । तल्लक्षणानामिति । दशमहाभूमिकलक्षणानाम् ' न तदनुलक्षणानाम् ' विप्रकृष्टत्वात् । स्वानुलक्षणानां तु भवति सन्निकृष्टत्वात् । अत आह ' **अष्टानाञ्च स्वलक्षणानुलक्षणानामिति** । **स्वान्यनुलक्षणानि स्थापयित्वेति** ' लक्षणेष्वनुलक्षणानां व्यापारः ' न विशिष्टे[3] च चित्ते[4] । न्यूनानि तानि । राजायते हि चित्तं लक्षणानुलक्षणानाम् । अतश्चित्तमनुलक्षणानां सहभूहेतुः ' न तु तानि चित्तस्य । लक्षणानां तु चित्तेऽस्ति व्यापार **इति तानि चित्तस्य सहभूहेतुर्भवन्ति** ।

---

1 To. following Tib. add अव्याकृते चित्ते अनुत्पत्तिधर्मिणि.

2 Mss. चानुत्पत्तिकधर्मि० 3 Mss. विशिष्टं 4 Mss. चित्तं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चतुर्दशेत्यपर इति। यथानुलक्षणानां नास्ति धर्मे व्यापारः। किं तर्हि ' धर्मस्य लक्षणेषु। अतो न तेषां हेतुभावो धर्म इष्यते। तथा सम्प्रयुक्तेष्वेव तल्लक्षणानां व्यापारो न चित्त इति न तानि चित्तस्य सहभूहेतुः। चित्तं तु तेषां राजकल्पमिति सहभूहेतुर्भवतीत्यपरेषामभिप्रायः। **प्रकरणग्रन्थो ह्येवं विरुध्येत** ' दशानां महाभूमिकानां यानि चत्वारिंशल्लक्षणानि तानि यदि चित्तस्य सहभूहेतुर्नेष्येरन्। यस्मात् प्रकरणेषूक्तम् ' चत्वार्यार्यसत्यानि दुःखसत्यं यावन्मार्गसत्यम्। एषां कति सत्कायदृष्टिहेतुकानि न सत्कायदृष्टेर्हेतुः ' कति सत्कायदृष्टेर्हेतुर्न सत्कायदृष्टिहेतुकानि ' कति सत्कायदृष्टिहेतुकानि सत्कायदृष्टेश्च हेतुः ' कति नैव सत्कायदृष्टिहेतुकानि न सत्कायदृष्टेर्हेतुरिति प्रश्ने कृते विसर्जनं करोति। द्वे नैव सत्कायदृष्टिहेतुके न सत्कायदृष्टेर्हेतुः ' निरोधसत्यं मार्गसत्यं च। द्वयोर्भेदः। दुःखसमुदयसत्ययोर्विभङ्गः। कथमिति। दुःखसत्यं स्यात् सत्कायदृष्टिहेतुकं न सत्कायदृष्टेर्हेतुः ' स्यात् सत्कायदृष्टिहेतुकं सत्कायदृष्टेश्च हेतुः ' स्यान्नैव सत्कायदृष्टिहेतुकं न सत्कायदृष्टेर्हेतुरिति त्रिकोटिकम्। द्वितीया कोटिर्नास्ति। तत्र **सत्कायदृष्टिहेतुकं न सत्कायदृष्टेर्हेतुः** ' अतीतप्रत्युत्पन्नान्[1] दुःखदर्शनप्रहातव्याननुशयांस्तत्संप्रयुक्तं च दुःखसत्यं स्थापयित्वा। अतीतप्रत्युत्पन्नान् समुदयदर्शनप्रहातव्यान् सर्वत्रगाननुशयान् तत्संप्रयुक्तं च दुःखसत्यं स्थापयित्वा। अनागतं च सत्कायदृष्टिसंप्रयुक्तं दुःखसत्यं स्थापयित्वा। **सत्कायदृष्टेस्ततसंप्रयुक्तानां च धर्माणां जातिं जरां स्थितिमनित्यतां च स्थापयित्वा यत्तदन्यत् क्लिष्टं दुःखसत्यम्। सत्कायदृष्टिहेतुकं सत्कायदृष्टेश्च हेतुर्यदेतत् स्थापितमिति।** नैव सत्कायदृष्टिहेतुकं न सत्कायदृष्टेर्हेतुरक्लिष्टं दुःखसत्यम्। यथा दुःखसत्यमेवं समुदयसत्यमिति प्रकरणग्रन्थः। तस्यार्थं विवृन्महे ' येऽतीतप्रत्युत्पन्ना दुःखदर्शनप्रहातव्या दशानुशयाः सत्कायदृष्ट्यादयः ' ते स्थापिताः। तैर्दशभिरनुशयैः सम्प्रयुक्तं दुःखसत्यं वेदनादिकं स्थापितम्। किमत्रास्थापितम्[2]। एत एवानागता दशानुशयास्तत्सम्प्रयुक्तं च वेदनादिकं दुःखसत्यं वर्जयित्वानागतसत्कायदृष्टिसम्प्रयुक्तं दुःखसत्यम्। तद्धि स्थापयिष्यते ' अनागतं च सत्कायदृष्टिसम्प्रयुक्तं दुःखसत्यं स्थापयित्वेति वचनात्। तत्प्राप्तिजात्यादयश्चास्थापिता वर्जयित्वा सत्कायदृष्टेस्तत्सम्प्रयुक्तानां च धर्माणां जात्यादीन्। ते हि स्थापयिष्यन्ते ' सत्कायदृष्टेस्तत्सम्प्रयुक्तानां च धर्माणां जातिं जरां स्थिति-

---

1 A अनागतप्रत्युत्०,

2 A drops किमत्रास्थापितम्.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनित्यतां च स्थापयित्वेति वचनात्। तदेवं तावदनागतोऽनुशयस्तत्सम्प्रयुक्तं च स्थापितादन्यत्। तदन्यत् क्लिष्टमित्युच्यते सत्कायदृष्टिहेतुकम्। सत्कायदृष्टिर्हेतुरस्येति सत्कायदृष्टिहेतुकम्। सभागहेतुना सर्वत्रगहेतुना चातीतप्रत्युत्पन्नसत्कायदृष्टिहेतुकत्वात्। न तु सत्कायदृष्टेर्हेतुः। न ह्यनागतो धर्मः सभागहेतुः सर्वत्रगहेतुर्वा व्यवस्थाप्यते। न च सहभूहेतुः संप्रयुक्तकहेतुर्वात्र सम्भवति। न हि सत्कायदृष्टिः सत्कायदृष्ट्या सह भवति सम्प्रयुज्यते वा एकस्मिन् कलापे द्वितीयसत्कायदृष्ट्यभावात्। न चाप्यन्तग्राहदृष्ट्यादिभिः सह भवति सम्प्रयुज्यते वा पृथक्कलापत्वात्। विप्रयुक्तास्तेषामतीतप्रत्युत्पन्नानां दुःखदर्शनहेयानां प्राप्तयो जात्यादयश्चास्थापिताः। ते स्थापितकादन्ये क्लिष्टाश्च। तेऽपि सर्वत्रगहेतुना पूर्वोत्पन्नसत्कायदृष्टिहेतुकाः। न तु ते सत्कायदृष्टेर्हेतुः। कस्मात्। प्राप्तयस्तावद् वृत्तप्रपाटिकावत् स्वसर्वत्रगेभ्यो बहिरवस्थितत्वान्न सर्वत्रगा व्यवस्थाप्यन्ते। सर्वत्रगत्वाभावाच्च न सत्कायदृष्टेः सर्वत्रगहेतुः। सर्वत्रगजात्यादयोऽपि यद्यपि सर्वत्रगा इष्टाः

प्राप्तिवर्ज्याः सहभुवो येऽप्येभिस्तेऽपि सर्वगाः[1]

इति सिद्धान्तवचनात्। न तु ते चित्तचैत्तवत् पश्चिमानां चित्तचैत्तानां सर्वत्रगहेतुः। स्वलक्षणव्यापारपरत्वेनाप्राधान्ये सति चित्तचैत्तान्तरेषु [2]सर्वत्रगत्वे सति पुरुषकाराभावात्[2]। सर्वत्रगव्यवस्थानं तु तेषां जात्यादीनां स्वसन्तानसर्वत्रगहेतुत्वात्। तस्मान्न ते सत्कायदृष्टेर्हेतुरिति शास्त्रार्थो लक्ष्यते। सभागहेतुस्तर्हि कस्मान्न भवति। सभागहेतुव्यवस्था हि[3] पुरुषकारापेक्षयापि। यस्य हि धर्मस्य जनने यः पुरुषकारवान् धर्मः स तस्य सभागहेतुः। इदमेव च ज्ञापकं यथेष्टं सभागहेतुव्यवस्थेति। विभाषायामप्येवमुक्तम्। चक्षुश्च चक्षुषः सभागहेतुर्देवदत्तचक्षुषो देवदत्तचक्षुः सभागहेतुः। दक्षिणं दक्षिणस्य वामं वामस्य यावच्चक्षुर्द्रव्यं चक्षुर्द्रव्यान्तरस्य। बाह्येष्वपि यवो यवस्य शालिः शालेरिति। यदि हि सर्वचक्षुः सर्वस्य चक्षुषः सभागहेतुरिष्येत 'अव्याकृतत्वं तुल्यमिति कृत्वा नैवं विशेषणमुच्येत। तस्मान्न ते सत्कायदृष्टेः सभागहेतुरित्यवगन्तव्यम्। अपरे त्वाहुः 'सावशेषमेतद् भाष्यम्। तस्मात् सजात्यादिका-

---

1 Kārikā, V, 13. 2...2 To. सर्वत्रगपुरुषकारभावात्

3 Mss. पि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्तेऽनुशयास्तत्सम्प्रयुक्ताश्च धर्माः स्थापिता वेदितव्याः। ये हि धर्मस्य तत्सम्प्रयुक्तानां च जात्यादयः सहभूहेतुर्भवन्ति, तैः सार्धं ते धर्माः पूर्वोत्पन्नाः सर्वत्रगहेतुः सभागहेतुर्वा भवन्तो भवन्ति।

प्राप्तिवर्ज्याः सहभुवो येऽप्येभिस्तेऽपि सर्वगाः[1]

इति सिद्धान्तात्। अत एवोक्तम्, सत्कायदृष्टेस्तत्संप्रयुक्तानां च धर्माणां जातिं जरां स्थितिमनित्यतां च स्थापयित्वेति। तस्माज्जात्यादयोऽपि केचित् स्थापिताः। अतोऽन्यदस्थापितमित्यवगन्तव्यम्। युक्तिरिह द्रष्टव्या। यतो युक्तिस्ततोऽवगन्तव्यम्। समुदयदर्शनप्रहातव्या अपि ये सर्वत्रगा अतीतप्रत्युत्पन्नास्तत्सम्प्रयुक्तं च दुःखसत्यं वेदनादिकम्, तत् स्थापितम्। किमन्यत् समुदयदर्शनप्रहातव्यमस्थापितम्। ये सर्वत्रगा अनागतास्तत्सम्प्रयुक्तं च दुःखसत्यं वेदनादिकम्, तदस्थापितम्। येऽप्यसर्वत्रगा रागादयस्त्रैयध्विका अपि, याश्च तेषां सर्वेषां प्राप्तयः, न ते स्थापिताः। जात्यादयस्त्वेकस्मिन् पक्षे नैव स्थापिताः, पक्षान्तरे तु केचित् स्थापिताः केचिन्न स्थापिताः। तदेतत् सर्वमस्थापितं समुदयदर्शनप्रहातव्यं सर्वत्रगहेतुना सत्कायदृष्टिहेतुकं भवति, पूर्वोत्पन्नसत्कायदृष्टिहेतुकत्वात्। न तु सत्कायदृष्टेर्हेतुः, सर्वत्रगाणां तत्सहभुवां चानागतत्वेनासर्वत्रगहेतुत्वात्। असर्वत्रगाणां च रागादीनां तत्सहभुवां च वेदनादीनां जात्यादीनां चैकस्मिन् पक्षे सर्वप्राप्तीनां चासर्वत्रगत्वात्। निरोधमार्गदर्शनप्रहातव्या भावनाप्रहातव्याश्च क्लिष्टा अनुशयतत्सम्प्रयुक्ततत्समुत्थजात्यादिस्वभावा अस्थापिताः। ते सर्वत्रगहेतुना सत्कायदृष्टिहेतुकाः। न तु ते सत्कायदृष्टेर्हेतुः, सर्वत्रगहेतुत्वासम्भवादितरहेत्वयोगाच्च। सत्कायदृष्टिहेतुकं सत्कायदृष्टेश्च हेतुर्यदेतत् स्थापितमिति। येऽतीतप्रत्युत्पन्ना दुःखदर्शनप्रहातव्या दशानुशयास्तत्संप्रयुक्तं च दुःखसत्यं यच्च पक्षान्तरे जात्यादिकं तत् सभागहेतुना सर्वत्रगहेतुना च पूर्वसत्कायदृष्टिहेतुकम्। ये च सत्कायदृष्टिजात्यादयस्तत्सम्प्रयुक्तजात्यादयश्च ते सहभूहेतुना पूर्वोक्ताभ्यां च हेतुभ्यां तद्धेतुकाः। ये पुनः सत्कायदृष्टिसम्प्रयुक्तास्ते सम्प्रयुक्तहेतुना च पूर्वोक्तैश्च हेतुभिस्तद्धेतुकाः। सत्कायदृष्टेश्च ते[2] तथैव हेतुः। येऽप्यतीतप्रत्युत्पन्नाः समुदयदर्शनप्रहातव्याः सर्वत्रगास्तत्सहभुवश्च वेदनादयो जात्यादयश्च पक्षान्तरे, ते सर्वत्रगहेतुनैव सत्कायदृष्टिहेतुकाः, सत्कायदृष्टेश्च हेतुः।

---

1 Kārikā, V, 13.

2 To. omits ते.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्वोत्पन्ना हि सत्कायदृष्टिस्तेषां हेतुः । ते च पूर्वोत्पन्नाः सत्कायदृष्टेरिति । असंक्लिष्टं तु दुःखसत्यं कुशलमनिवृताव्याकृतं च न सत्कायदृष्टिहेतुकं न च सत्कायदृष्टेर्हेतुः । पञ्चविधहेतुत्वासम्भवात् । जनको ह्यत्र हेतुरधिक्रियते । न कारणहेतुः । साधारणत्वात् । विपाकहेतोश्चेहायोगः । सत्कायदृष्टेर्निवृताव्याकृतत्वेनाविपाकत्वात् । तत्र यदेतदुक्तं सत्कायदृष्टेस्तत्सम्प्रयुक्तानां च धर्माणां जातिं जरां स्थितिमनित्यतां च स्थापयित्वेति तद्विरुध्येत । यदि हि सत्कायदृष्टिसम्प्रयुक्तधर्मजात्यादयो न सहभूहेतुर्भवेयुः । न ते स्थाप्येरन् । ये हि स्थापितास्ते सत्कायदृष्टिहेतुकाः । सत्कायदृष्टेश्चहेतुरिति । **ये तर्हि तत्सम्प्रयुक्तानामित्येतन्न पठन्ति** । तेषां कथं प्रकरणग्रन्थो विरुध्येतेत्यध्याहार्यम् । ते हि सत्कायदृष्टेर्जातिं जरां स्थितिमनित्यतां च स्थापयित्वेत्येवं पठन्ति । तत्सम्प्रयुक्तेष्वेव तल्लक्षणानि व्याप्रियन्ते । न सत्कायदृष्टौ । अतस्तानि तस्या न सहभूहेतुरिति तेषामेवंवादिनामभिप्रायः । **तैरप्येतत् पठितव्यमिति** । एवमपाठे दोष इत्यतस्तैरेतत् परं पठितव्यम् । तत्संप्रयुक्तानां चेति । तत्सम्प्रयुक्ता हि सत्कायदृष्टेरात्मकल्पा एकालम्बनकृत्याद्यर्थत्वात् । तस्माद् यथा तेषु तत्सम्प्रयुक्तेष्वेतानि लक्षणानि सहभूहेतुस्तथा सत्कायदृष्टावपीति वैभाषिकाभिप्रायः । **अर्थतो वैवं बोद्धव्यमिति** । सत्कायदृष्टिग्रहणेन सत्कायदृष्टिसम्प्रयुक्तानामपि ग्रहणम् । अधिकारानुवृत्तेर्वा तेनैवं[1] बोद्धव्यम् । तत्सम्प्रयुक्तानाञ्चेति । **काश्मीरा** न बहिर्देशका इति दर्शयति ।

सहभ्वपि तदिति । चैत्तादि । चित्तस्य हि चैत्तास्तानि च लक्षणानि **सहभूहेतुः सहभूनि च तानि भवन्ति । धर्मस्यानुलक्षणानीति** विस्तरः । धर्मस्य जातिजात्यादीनि सहभूनि । **न सहभूहेतुना हेतुर्विप्रकृष्टत्वात्** । जात्यादिषु हि तेषां व्यापारो न धर्मे । **तानि चान्योन्यम्** । तानि चानुलक्षणान्यन्योन्यं सहभूनि जात्यादिषु व्यापारात् । न सहभूहेतुना हेतुः । धर्मस्तु तेषां सहभूहेतुर्भवति । प्राधान्यात् । स हि राजेव यात्रायां सभृत्यस्तद्भृत्यवर्गं सर्वं स्वकलापमाकर्षन्निव प्रवर्तते । [2]**चित्तानुपरिवर्त्यनुलक्षणानि चेति**[2] । चित्तानुपरिवर्तिनां[3] चैत्तध्यानानास्रवसंवराणाम्[4] अनुलक्षणानि च **तथैव चित्तस्य** सहभूनि । न तु सहभूहेतुना हेतुः । एवशब्दोऽर्थप्रदर्शनार्थः । **तानि चान्योन्य**-

---

1 To. following Tib. तैरेवं

2...2 Mss. omit it.

3 Mss. अनुपरिवर्तिनां

4 To. adds तेषां च लक्षणानाम्.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनुपरिवर्त्यनुलक्षणानि सहभूनि । न तु सहभूहेतुना हेतुः । **सप्रतिघं चोपादायरूपमन्योन्यम**ष्टद्रव्यकादिषु परमाणुषु रूपशब्दगन्धरसस्प्रष्टव्यात्मकं सहभूः । न तु सहभूहेतुना हेतुः । सप्रतिघग्रहणमप्रतिघनिरासार्थम् । अप्रतिघं हि ध्यानानास्रवं संवररूपं सप्तविधाविज्ञप्तिस्वभावं परस्परं सहभूः । सहभूहेतुना च हेतुरिति । **सर्वं च भूतै**रिति । सप्रतिघं चाप्रतिघं चोपादायरूपं यथास्वभूतैः सहभूः । न तु सहभूहेतुना हेतुः । **प्राप्तयश्च सहजाः प्राप्तिमतो धर्मस्य सहोत्पादेऽपि न सहभूहेतुः** पूर्वपश्चात्कालजात् प्राप्तीनाम् । असहभूत्वादेव सहभूहेतुत्वाप्रसङ्ग इति । सहज इति विशेषणम् । **कस्मा**दित्याह । **अनेकफलविपाकनिष्यन्दत्वा**दिति । यस्मात्तासां प्राप्तिमता सह नैकं फलं पुरुषकारफलं वृक्षप्रपाटिकावत् पृथक्स्रोतत्वात् । नाप्येकं विपाकफलम् ।

नाद्येपिके समापत्ती अचित्ते प्राप्तयो न च[1]

इति वचनात् । न चाप्येकनिष्यन्दफलं प्राप्तीनां हि प्राप्तय एव निष्यन्दफलं पृथक्सन्तानत्वात् । चित्तानुपरिवर्तिनामेवैकं फलं विपाकनिष्यन्दफलं चेष्यते । **न प्राप्तीनाम्** । न चैत्ताः[2] **सहचरिष्णवः** सहचरणशीलाः ।

सर्वमप्येतत् स्यादिति । यत्तावत् सहभूहेतुना हेतुरिति विस्तरेण यदुक्तम् । **बीजादीना**मिति । आदिशब्देनाङ्कुरनालकाण्डादीनां ग्रहणम् । **एष न्यायो न दृष्ट** इति । सहोत्पन्नयोर्हेतुफलभावलक्षणो न्यायो न दृष्टः । पूर्वं हि बीजं पश्चादङ्कुरः । पूर्वमभिघातः पश्चाच्छब्द इति । **तद्यथा प्रदीपप्रभयोरङ्कुरच्छाययोश्च** । किम् । हेतुफलभाव इति वर्तते । प्रदीपः सप्रभ एवोत्पद्यते न निष्प्रभः । अङ्कुरस्यातपे उत्पद्यमानस्यैव छाया भवति । अथ च प्रदीपः प्रभायाः सहोत्पन्नाया हेतुर्भवति छायायाश्चाङ्कुरः । तद्वत् । **संप्रधार्यं ताव**दिति विस्तरः । असिद्धो दृष्टान्त इति परस्याभिप्रायः । यस्मात् **पूर्वोत्पन्नैव** वर्तिस्नेहादिका **सामग्री सप्रभस्य प्रदीपस्योत्पत्तौ हेतुः** । प्रदीपस्य प्रभायाश्च सैव सामग्री हेतुः । न तु प्रदीपः प्रभाया हेतुरिष्यते । एवं सच्छायस्याङ्कुरस्योत्पत्तौ पूर्वोत्पन्नैव सामग्री बीजातपादिका वाच्या । **नियमत** इति । यस्य धर्मस्य भावे यस्य धर्मस्य भावो नियमेन न यदृच्छया । **स हेतुः** । **इतरो हेतुमान्** [3]कार्यधर्म इत्यर्थः । **सहभुवां च धर्माणाम्** । तद्यथा भूतानां चतुर्णां चित्तचैत्तानुपरिवर्तिनां लक्ष्य-

---

1 Kārikā, IV, 96. 2 To. ताश्चित्तं ः

3 Mss. कार्यौ धर्म

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लक्षणानां चैकस्य भावे सर्वेषां भाव एकस्य चाभावे सर्वेषामभाव इति युक्तो हेतुफलभावः ।

स्यात्तावत् सहोत्पन्नानामिति विस्तरः । सहोत्पन्नानां हेतुफलभाव इष्यते । तद्यथा चक्षुः सहोत्पन्नमपि चक्षुर्विज्ञानेन तदुत्पत्तौ हेतुर्भवति । **परस्परं तु कथम्** । न हि चक्षुर्विज्ञानं तस्य चक्षुषो हेतुर्भवतीति । आह । **अत एव कारणाद्** भावाभावयोस्तद्वत्त्वादित्यर्थः । चैत्तादीनां भावे चित्तस्य भावादभावे चाभावात् तेऽपि चित्तस्य हेतवो भवन्तीति । **एवं तर्हीति** विस्तरः । यद्येकस्य भावे सर्वेषां भावः सर्वेषां चाभाव एकस्येत्यतोऽन्योन्यं हेतुफलभावः ।

कामेऽष्टद्रव्यकः[1]

इत्यविनाभाविनोऽपि रूपरसगन्धस्प्रष्टव्यस्वभावस्योपादायरूपस्यान्योन्यमेष **प्रसङ्गः** । अन्योन्यसहभूहेतुप्रसङ्ग इत्यर्थः । **भूतैश्च सार्धमुपादायरूपस्य** सहभूहेतुत्वप्रसङ्गः । **चित्तानुलक्षणादीनां चेति**[2] । आदिशब्देन चित्तानुपरिवर्त्यनुलक्षणानां च । **चित्तादिभिरिति** । अत्राप्यादिशब्देन चित्तानुपरिवर्तिभिश्चान्योन्यहेतुप्रसङ्गः । तेनैव चादिशब्देन प्राप्तिभिः सहजाभिः प्राप्तिमतामेष प्रसङ्ग इति वक्तव्यम् । **त्रिदण्डान्योन्यबलावस्थानवदिति** । अन्योन्यबलेनावस्थानमन्योन्यबलावस्थानम् । त्रिदण्डस्यान्योन्यबलावस्थानं त्रिदण्डान्योन्यबलावस्थानम् । तद्वत्[3] । त्रिदण्डान्योन्यबलावस्थानवत्[4] । यथा त्रिदण्डस्य दण्डत्रयस्यान्योन्यबलेनावस्थानम् । **एवं सहभुवां चित्तचैत्तादीनां हेतुफलभावः सिध्यति । मीमांस्यं तावदेतदिति** विस्तरः । परीक्ष्यमेतत् । न सिद्धोऽयं दृष्टान्त इत्यभिप्रायः । सहोत्पन्नास्त्रयो दण्डास्तेषां बलम् । तेन **सहोत्पन्नबलेन किमेषां** दण्डानामवस्थानम् । **आहोस्वित् पूर्वसामग्रीवशात्तथोत्पादः** । आहोस्विद् यथैवैषामवस्थितः पूर्वभूतभौतिकसमुदायलक्षणसामग्रीवशात् सहभावस्तथैव पश्चादपि परस्पराश्रितानामुत्पाद इति । **अन्यदपि च तत्र किंचिद् भवति** । नान्योन्यबलमेवेति दर्शयति । किं तदित्याह । **सूत्रकं** दण्डत्रयं निवेशितम् । **शङ्कुको वा** । कीलको वेत्यर्थः । **पृथिवी वा धारिकाधस्तात्** । **एषामपि नामेति** । एषामपि सहभुवामन्येऽपि सभागसर्वत्रगविपाककारणा हेतवः सूत्रकादिस्थानीया भवन्तीति सिद्धः सहभूहेतुः ॥५१॥

---

1 Kārikā, II, 22.
2 Mss. omit इति.
3 Omitted in Mss.
4 To. omits this.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[सभागहेतुः सदृशाः स्वनिकायभुवोऽग्रजाः ।
अन्योन्यं नवभूमिस्तु मार्गः समविशिष्टयोः ॥५२॥]

क्लिष्टाः क्लिष्टानामिति । क्लिष्टा अकुशला निवृताव्याकृताश्च । क्लिष्टत्वसामान्येन सभागहेतुत्वमेषाम् । तेनाकुशला अकुशलानां सभागहेतुः' निवृताव्याकृता निवृताव्याकृतानाम् । अकुशला निवृताव्याकृतानाम् । निवृताव्याकृताश्चाकुशलानां सभागहेतुरिति दर्शितं भवति । अव्याकृता अव्याकृतानामिति । अनिवृताव्याकृता अनिवृताव्याकृतानामित्यर्थः ।

रूपमव्याकृतमव्याकृतो रूपस्कन्धः पञ्चानां स्कन्धानां सभागहेतुः । चत्वारस्तु स्कन्धा वेदनादयो न रूपस्य सभागहेतुर्विशिष्टत्वात् । न हि विशिष्टो न्यूनस्य सभागहेतुरिष्यते ।

समविशिष्टयोः

इति वचनात् । कुशलाकुशलं तु रूपमाभिसंस्कारिकत्वात् समं विशिष्टं चेति चत्वारस्तस्य सभागहेतुर्भवन्ति ।

कललं कललादीनामिति । पञ्च गर्भावस्थाः कललार्बुदपेशीघनप्रशाखावस्थाः' पञ्च जातावस्था बालकुमारयुवमध्यवृद्धावस्थाः' इत्येते दश दशानामवस्थानां सभागहेतुः । कललं कललान्तरस्य यावद् वार्धस्य । अर्बुदमर्बुदस्य यावद्वार्धस्य । एवं यावद्वार्धं वार्धस्यैव । एकैकापहासेन एकैकपरिहारेण एकस्मिन्निकायसभागे वक्तव्यम् । अन्येषु समानजातीयेषु निकायसभागेषु यदा मनुष्यजन्मनो मनुष्यजन्मैवोत्पद्यते तदा दशाप्यवस्था दशानामप्यवस्थानाम् । वृद्धावस्थापि यावद्दशानामवस्थान्तराणाम् । सा हि वृद्धावस्था क्षणान्तरे तज्जन्मवृद्धावस्थायाः सभागहेतुः । अन्या तु जन्मान्तरकललादीनां दशानामप्यवस्थानां सभागहेतुरित्यवगन्तव्यम् । बाह्येष्वपि यवो यवस्येति विस्तरः । यवो यवस्य सभागहेतुर्न शालेः' शालिः शालेरेव न यवस्य' इत्यनेन तुल्येऽप्यव्याकृतत्वे स्वसन्तान एव सभागहेतुत्वं नान्यसन्ताने जननशक्त्यभावादिति दर्शयति ।

अतीतानि महाभूतान्यनागतानां महाभूतानां हेतुरधिपतिरिति । हेतुप्रत्ययोऽधिपतिप्रत्ययश्चेत्यर्थः । अयुगपद्भावान्न सहभूहेतुः' अत एवाचित्तचैत्तत्वाच न सम्प्रयुक्तकहेतुः' असर्वत्रगत्वान्न सर्वत्रगहेतुः' अव्याकृतत्वान्न विपाकहेतुः' पारिशेष्यात् सभागहेतुरेवेत्यवगम्यते । यदि सदृशाः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सदृशानां सभागहेतुः। एवं पश्चादुत्पन्नोऽपि पूर्वोत्पन्नस्य सभागहेतुः प्राप्नोति। सहोत्पन्नोऽपि सहोत्पन्नस्य। अनुत्पन्नोऽप्यनुत्पन्नस्य। इत्यत आह। **तेऽपि न सर्वे। किं तर्हि।**

अग्रजाः।

अग्रे जाता अतीताः प्रत्युत्पन्ना वा सभागहेतुः। अनागता न सभागहेतुरित्यर्थादुक्तं भवति। **एवमतीतान्यतीतप्रत्युत्पन्नाना-मिति।** पूर्वोत्पन्नान्यतीतानि पश्चादुत्पन्नातीतानामिति विभज्यव्याख्यम्। **अतीतप्रत्युत्पन्नान्यनागतानां** सभागहेतुर्न त्वनागतान्यनागतानामित्युक्तम्। अतो गम्यते नास्त्यनागतः सभागहेतुरिति। **न कदाचिदिति।** न कदाचिन्न हेतुरित्यधिकृतम्। हेतुरेवेत्यर्थः। तस्मादस्त्यनागतः सभागहेतुरित्य-भिप्रायः। **सहभ्वेति** विस्तरः। सहभूसम्प्रयुक्तकविपाकहेतुष्वभिसन्धिरभि-प्रायः। तेन वचनम्। तस्मात्। **सहभूसम्प्रयुक्तकविपाकहेत्वभिसन्धि-वचनाददोषो** न कदाचिन्न हेतुरिति वचने। बाहुलिको ह्येष निर्देश इष्यते। **चरमामवस्थामभिसन्धायेति।** अन्त्यामनागतावस्थामभिप्रेत्येत्यर्थः। अन्यत्रयेऽपि हेतुर्भवतीति तस्याभिप्रायः। **तस्यायमपरिहार** इति विस्तरः। तस्य वादिनोऽयमपरिहारः। कस्मात्। यस्मात् **स धर्म उत्पद्यमाना-वस्थायाः पूर्वं सभागहेतुरभूत्वा पश्चाद् भवति।** न नित्यं सभागहेतुरित्यर्थः। बह्वीनामनागतावस्थानामेका चरमावस्था सभागहेतुत्वे नियतीभूता। तदन्या बह्व्यस्तत्रानियतीभूताः सन्ति। तत्र च सामान्येनोक्तं न कदाचिन्न हेतुरिति। एवं कृत्वायमपरिहारः। [1]एकस्यामपि ह्यवस्थायां स न सभाग-हेतुरिति शक्यमेवं वक्तुं स्यात्। **यो धर्मो यस्य धर्मस्य समनन्तर इति।** समनन्तरप्रत्यय इत्यर्थः। **शक्यमनया कल्पनयेति।** स धर्म उत्पद्यमानावस्थायां समनन्तरप्रत्ययत्वे नियतीभूतो भवति। अतः शक्यं तां चरमावस्थामभिसन्धायेत्यनया कल्पनया **वक्तुं स्यान्न कदाचिन्न समनन्तर इति। कस्मादेवमाह।** **यदि स धर्मो नोत्पन्नो भवतीति।** यदि स धर्मोऽना-गतो भवति नासौ समनन्तरप्रत्ययो भवतीत्यर्थः। चरमावस्थावाद्याह। **द्विमुख-**

---

1 Tib. suggests एवमस्यामपि.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सन्दर्शनार्थमिति विस्तरः। यथा तत्र यो धर्मो यस्य धर्मस्य हेतुः ' कदाचित् स धर्मस्तस्य धर्मस्य न हेतुः। आह ' न कदाचिदिति। तथेहापि कर्तव्यम्। यो धर्मो यस्य धर्मस्य समनन्तरः कदाचित् स धर्मस्तस्य धर्मस्य न समनन्तर इति। आह ' न कदाचिदिति कर्तव्यम। [1]यदि स धर्मो नोत्पन्नो भवतीति[1] ' यथा चेह तथा तत्रेति। कथम् ' यो धर्मो यस्य धर्मस्य समनन्तरः कदाचित् स धर्मस्तस्य धर्मस्य न समनन्तरः। आह ' यदि स धर्मो नोत्पन्नो भवतीति ' एवं तत्र कर्तव्यम्। कथम् ' यो धर्मो यस्य धर्मस्य हेतुः कदाचित् स धर्मस्तस्य धर्मस्य न हेतुः। आह ' यदि स धर्मो नोत्पन्नो भवतीति। यदि स धर्मोऽनागतो भवति नासौ हेतुप्रत्ययो भवतीत्यर्थः।

अत्राचार्य आह ' एवं सति को गुण इति विस्तरः। इति द्विमुख-सन्दर्शनेन कश्चिद् गुणो लभ्यते। नैव ह्युत्पद्यमानावस्थायां स धर्मो हेतुः समनन्तरो वा मुख्यवृत्त्या भवतीत्यकौशलमेवात्र शास्त्रकारस्यैवं सम्भाव्यते। क्वचित् सावकाशं ब्रुवतः ' क्वचिन्निरवकाशम्। सावकाशं तावद् यदिदमुक्तम्। यो धर्मो यस्य धर्मस्य हेतुः कदाचित् स धर्मस्तस्य धर्मस्य न हेतुः। आह ' न कदाचिदिति। कथं न कदाचिन्न हेतुरित्ये-वमुक्त्वा पुनर्वर्णयति ' चरमावस्थायां सभागहेतुरिति। निरवकाशं यदि स धर्मो नोत्पन्नो भवति न समनन्तरः ' उत्पन्नस्तु समनन्तर इति। अयमत्राभिप्रायार्थ ऐकान्तिकमर्थं व्यवस्थाप्य पुनरन्यथाकरोतीति ' तस्मात् पूर्वक एवैष परिहारः साधुरिति। सहभूसम्प्रयुक्तकविपाकहेत्वभिसन्धि-वचनाददोष इति।

यत्तर्हीदमुक्तमिति विस्तरः। कुत एतदायातम्। अनागतो नैव सभागहेतुरित्युक्तम्। तद् यद्यनागतो नैव सभागहेतुः ' कस्मा-दनागता सत्कायदृष्टिः स्थापिता। यद्धि स्थापितं तत् सत्कायदृष्टि-हेतुकं[2] सत्कायदृष्टेश्च हेतुरिति व्याख्यातम्। तत्र कथमनागता सत्कायदृष्टिः सत्कायदृष्टेर्हेतुः। न तावत् सहभूहेतुः सम्प्रयुक्तकहेतुर्वा सम्भवत्यसह-भूत्वात्। न विपाकहेतुरव्याकृतत्वात् ' न कारणहेतुः साधारणत्वेनागराय-मानत्वात् ' पारिशेष्यात् सभागहेतुः सर्वत्रगहेतुर्वा भवन्ती[3] भवेत्। इह च

1...1 Tib. omits this. 2 Mss. & To. °हेतु'

3 A भवन्तीति, C भवन्तीति with ति scratched, To. भवतीति.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सभागहेतुरेव सर्वत्रगहेतुः। अतो यद्यनागता सत्कायदृष्टिः सत्कायदृष्टेर्न सभागहेतुः कस्मादसौ तृतीयकोऽप्यर्थं स्थापितेति। वैभाषिक आह। अनागतसत्कायदृष्टिसम्प्रयुक्तकं दुःखसत्यं स्थापयित्वेत्येवमेतत् कर्तव्यमिति। सत्कायदृष्टिसम्प्रयुक्तकमेव स्थापयितव्यम्। न तु सत्कायदृष्टिः। तद्धि वेदनादिकं सहभूहेतुना सम्प्रयुक्तकहेतुना वा सत्कायदृष्टिहेतुकं सत्कायदृष्टेश्च हेतुः। न सभागहेतुना। विनष्टको ह्ययमनागतां सत्कायदृष्टिमिति पाठः। [1]पश्चात्पदस्थेन तच्छब्देन सह न पठितव्यः। सम्प्रयुक्तदुःखसत्यविशेषणार्थं तु समस्यैतत् पदद्वयं पठितव्यम्। अनागतसत्कायदृष्टिसम्प्रयुक्तकमिति। अर्थतो वैवं बोद्धव्यं यद्येवं न क्रियते पाठः। भाष्याक्षेपनिर्वृत्तः पाठो न तन्त्रमित्यभिप्रायः। प्रज्ञप्तिभाष्यं कथं नीयते सर्वधर्माश्चतुष्के नियता इति। हेतौ नियता यस्य धर्मस्य यो धर्मो हेतुः। स धर्मस्तस्य धर्मस्य न कदाचिन्न हेतुः। त्रिष्वपि कालेषु हेतुरित्यर्थः। एवं फले नियता यस्य धर्मस्य यो धर्मः फलं पुरुषकारादि योज्यम्। एवमाश्रये नियता यस्य धर्मस्य चक्षुर्विज्ञानादेर्यो धर्म आश्रयश्चक्षुरादिरिति योज्यम्। एवमालम्बने नियता यस्य धर्मस्य चक्षुर्विज्ञानादेर्यो धर्म आलम्बनं रूपादिरिति योज्यम्। तेन धर्माणां हेतौ नियतत्वात् त्रिष्वपि कालेषु सभागहेतुर्भवतीति चोदकाभिप्रायः। सर्वहेत्वनभिसन्धेरदोष इति दर्शयन् वैभाषिक आह। हेतुरत्र सम्प्रयुक्तकहेतुः सहभूहेतुश्च। न सभागहेतुः सर्वत्रगहेतुर्वा। अनागतावस्थायामव्यवस्थापितत्वात्। न विपाकहेतुः। अनानिञ्जयस्य कर्मणः कस्यचिद् गत्यन्तरेऽपि विपाकादानात्। फलं पुरुषकारफलमधिपतिफलं च। तयोः सहभूसम्प्रयुक्तकहेत्वोः फलत्वात्। वैभाषिकाणामेतन्मतम्। अनागतं विद्यमानमुत्पद्यत इति। तस्मादयं प्रसञ्जयति। ननु चैवं सति सभागहेतुरभूत्वा अनागतावस्थायां हेतुर्भवति वर्तमानावस्थायामिति प्राप्तं प्रसक्तमित्यर्थः। इष्यत एवावस्थां प्रति न द्रव्यमिति। इष्यत एव सभागहेतोः सभागहेतुत्वावस्था पूर्वं नासीदिदानीं भवतीति। न तु द्रव्यस्वलक्षणं पूर्वं नासीदिदानीं भवतीति। अवस्थाफलं हि सामग्र्यं न द्रव्यफलमिति। हेतुप्रत्ययसामग्र्या वर्तमानावस्थाफलं न द्रव्यम्। यस्मादनागतोऽपि स धर्मो द्रव्यतोऽस्ति। न पुनः प्रत्युत्पन्न एवेति। चोदक आह। किं पुनः स्यादिति विस्तरः। वैभाषिक आह। शास्त्रे तस्य ग्रहणं

1 An additional सह precedes this word in Mss.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्यादिति । तस्यानागतस्य सभागहेतोः । न चास्ति ग्रहणम् । न हि तत्र शास्त्र उक्तम् । अनागतानि कुशलमूलान्यनागतानां कुशलमूलानां सभागहेतुरिति । चोदक आह । य एव हीति विस्तरः । चोदकस्यायमभिप्रायः । यद्यप्यनागतोऽस्ति सभागहेतुर्न त्वसौ फलदानग्रहणक्रियायां समर्थः । य एव हि फलदानग्रहणक्रियासमर्थः फलाक्षेपक्रियासमर्थश्च तस्यैव सभागहेतोरतीतस्य वर्तमानस्य च ग्रहणात् । अदोषोऽनागतस्य सभागहेतोरग्रहणम् । तस्य फलदानग्रहणक्रियायामसामर्थ्यात् । तस्मादस्त्यनागतः सभागहेतुः । अथ च शास्त्रे नोक्त इति । वैभाषिक आह । नैतदस्तीति विस्तरः । नैतद् युज्यते । निष्यन्दफलेन हि सफलः सभागहेतुः ।

सभागसर्वत्रगयोर्निष्यन्दः ।[1]

निष्यन्दो हेतुसदृशः[2]

इति वचनात् । तच्चानागतस्यायुक्तम् । तन्निष्यन्दफलमयुक्तम् । कस्मात् । पूर्वपश्चिमताभावात् । अनागतावस्थायामिदं पूर्वमिदं पश्चिममिति न परिच्छिद्यते विप्रकीर्णत्वात् । न चासति पूर्वापरभावे सदृशः सदृशस्य निष्यन्दो युज्यते । [3]अथ मतम् । उत्पन्नमतीतं वर्तमानं वा अनागतस्य निष्यन्द इति । अत आह । न चोत्पन्नमनागतस्य निष्यन्दो युज्यत इति । यथातीतं वर्तमानस्य निष्यन्दो न भवति । तथाऽनागतस्याप्युत्पन्नो न निष्यन्दो भवितुमर्हति । कस्मादित्याह । मा भूद्धेतोः पूर्वं फलमिति दोषात् । विपाकफलस्य पूर्वं सह चायोगादिति । मा भूद्धेतोः पूर्वं फलमिति पूर्वमयोगः । सह चायोगोऽनागतावस्थायाम् । न हि प्रत्युत्पन्नावस्थायां सहभूहेतोरिव विपाकहेतोः सहोत्पन्नं फलमुपलभ्यते । तस्मात् । अनागते चाध्वनि पूर्वपश्चिमताभावात् । विप्रकीर्णत्वादनागतस्याध्वनो न पूर्वं विपाकहेतुः पश्चाद् विपाकफलं युज्यते । तस्माच्च सभागहेतुवद् विपाकहेतुरप्यनागतो न प्राप्नोति । वैभाषिक आह । नैतदस्ति यदुक्तं विपाकहेतुरप्येवमिति । न चान्योन्यनिष्यन्दता युक्तिमतीति । यस्य यः सभागहेतुः सदृशो धर्मस्तस्य स एव धर्मस्तदानीमेव कथं निष्यन्दो योच्यते । न हि पुत्रः स्वस्यैव पितुस्तदानीमेव पिता भवतीति । न त्वेवं[4] विपाकहेतुः । किम् । अन्योन्यहेतुफलता न[5] पौर्वापर्येण विना सम्प्रयुज्यते[6] प्राप्नोति । कस्मात् । भिन्नलक्षणत्वाद्धेतुफलयोः । हेतोरन्यल्लक्षणं स्वभाव

1 Kārikā, II, 56.
2 Kārikā, II, 57.
3 A अप्य०
4 Mss. त्वेव
5 Omitted in Mss.
6 To. following Tib. सम्प्रसज्यते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्यर्थः । अकुशलता कुशलसास्रवता वा तस्य लक्षणम् । फलस्य चान्यल्लक्षण-मनिवृताव्याकृतत्वम् ।

विपाकहेतुरशुभाः कुशलाश्चैव सास्रवाः[1] ।

विपाकोऽव्याकृतो धर्मः[2]

इति वचनात् । तस्मादिति विस्तरः । **अवस्थाव्यवस्थित एव सभागहेतुः** । अवस्थायां व्यवस्थितः । अतीतावस्थः प्रत्युत्पन्नावस्थश्च सभागहेतुर्नानागतावस्थः । **लक्षणव्यवस्थितस्तु विपाकहेतुः** । लक्षणेन व्यवस्थितस्त्रिष्वपि कालेषु यथोक्तलक्षण **इत्यनागतोऽपि** विपाकहेतुर्न वार्यते न प्रतिषिध्यते । इदमिह विचार्यते । किमनागतेऽध्वनि सदृशा धर्मा विप्रकीर्णा इति न शक्यते परिच्छेत्तु-मयं हेतुरिदमस्य निष्यन्दफलमित्यतो नानागतः सभागहेतुर्व्यवस्थाप्यते । आहोस्विद् यो धर्मो यस्य धर्मस्य सभागहेतुर्भवेत् स धर्मस्तस्य हेतुप्रत्ययवशा-न्निष्यन्दफलं भवेदित्यतोऽनागतः सभागहेतुर्न व्यवस्थाप्यते । नैतद् व्याख्यान-कारैर्विचारितम् । मम तु पूर्वक एवायं पक्षः प्रतिभातीति ।

किमेष नियम इति । किं स्वभूमिक एवेत्यवधार्यते । नान्यथाप्यस्तीत्यभिप्रायः ।

अन्योन्यं नवभूमिस्तु मार्गः

इति । तुशब्दो विशेषणे । मार्ग इति मार्गसत्यं विवक्षितम् । सास्रवान्मार्ग-सत्यं विशिष्यते । सास्रवो हि धर्मः स्वभूमिक एव सभागहेतुर्नान्य-भूमिकः । मार्गस्त्वन्यभूमिकोऽपि सभागहेतुः । इह भूमिग्रहणे सास्रवानास्रव-ग्रहणम्[3] । धातुग्रहणे[4] तु सास्रवस्यैव । इत्यत आह । यत् सास्रवाणां मार्गस्य च तुल्ये भूमिभेदे मार्ग एव **नवभूमिकोऽन्योऽन्यं सभागहेतुर्न** सास्रव इति । कुत इत्याह । **आगन्तुको ह्यसौ तासु भूमिषु न तद्धातुपतितः । तद्भूमिका-भिस्तृष्णाभिरस्वीकृतत्वादिति** । न हि कामरूपारूप्यचर्यस्तृष्णाः[5] सास्रवानिवा-नास्रवान् धर्मान् स्वीकुर्वन्ति । यदा तर्हि निर्वाणं मार्गं वाभिलषति कुशलोऽसौ धर्मच्छन्दः न रागः । तस्य वर्ज्यत्वादिति वचनात् । **समानजातीयस्ये**त्यनास्रव-जातीयस्य । एवं तर्हि सर्वः सर्वस्य सभागहेतुः प्राप्नोति । अत आह ।

---

1 Kārikā, II, 54.
2 Ibid., II, 57.
3 Mss. ०ग्रहण
4 Mss. look like त्वात्तु ग्रहणे
5 A, U & V insert just before चर्यः नवभूमिसंनिश्रयाधिगम्यत्वान्नवभूमिको न तद्भूमिसंगृहीतत्वात् । The passage put in C in the margin seems to be an explanation of न तद्धातुपतितः in the preceding line.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समविशिष्टयोः

इति। अन्योन्यग्रहणं तर्हि किमर्थम्। ऊर्ध्वभूमिकाधरभूमिकयोरन्योन्यमित्येवमर्थम्। ऊर्ध्वभूमिकोऽप्यधरभूमिकयोः समविशिष्टयोः सभागहेतुर्भवति। अधरभूमिकोऽप्यूर्ध्वभूमिकयोरिति। तद्यथेति विस्तरः। **दुःखे धर्मज्ञानक्षान्तिस्तस्या** एवानागतायाः समेति कृत्वा **सभागहेतुः। विशिष्टस्य** च दुःखे धर्मज्ञानस्य दुःखेऽन्वयज्ञानक्षान्तेर्यावदनुत्पादज्ञानस्य। न तु न्यूनस्य। न हि दुःखे धर्मज्ञानमनागताया दुःखे धर्मज्ञानक्षान्तेः सभागहेतुर्भवति। **दर्शनभावनाशैक्षमार्गास्त्रिद्व्येकेषामिति।** दर्शनमार्गो दर्शनमार्गान्तरस्य भावनामार्गस्याशैक्षमार्गस्य च सभागहेतुरिति त्रयाणाम्। भावनामार्गो भावनामार्गान्तरस्याशैक्षमार्गस्य च सभागहेतुः। न दर्शनमार्गस्येति द्वयोः। अशैक्षमार्गोऽशैक्षमार्गान्तरस्य न दर्शनमार्गभावनामार्गयोरित्येकस्य सभागहेतुः। **तत्रापीति।** तत्र दर्शनमार्गादिषु **मृद्विन्द्रियमार्गो** दर्शनमार्गस्वभावो **मृदुतीक्ष्णेन्द्रियमार्गस्य** तत्स्वभावस्यैव। **तीक्ष्णेन्द्रियमार्गस्तीक्ष्णेन्द्रियमार्गस्यैव।** न मृद्विन्द्रियमार्गस्य। न्यूनत्वात्। एवं भावनामार्गोऽशैक्षमार्गश्च वक्तव्यः। तद् दर्शयन्नाह। तद्यथेति विस्तरः। एकस्यापि मृद्विन्द्रियस्य पुद्गलस्य षन्मार्गाः सन्ति। प्रकृतितीक्ष्णेन्द्रियस्य त्रयः। तत्र **श्रद्धानुसारिमार्गः** श्रद्धानुसारिमार्गान्तरस्यात्मीयस्य सभागहेतुः। धर्मानुसारिमार्गस्य चात्मीयस्यानागतावस्थस्य श्रद्धाधिमुक्तदृष्टिप्राप्तसमयविमुक्तासमयविमुक्तमार्गाणां चात्मीयानां यथायोगमुत्पत्त्यनुत्पत्तिधर्माणां[1] चेति षण्णां **सभागहेतुः। श्रद्धाधिमुक्तमार्गः** श्रद्धाधिमुक्तमार्गान्तरस्य दृष्टिप्राप्तसमयविमुक्तासमयविमुक्तमार्गाणां चापरेषामपि त्रयाणामिति **चतुर्णां** सभागहेतुः। **समयविमुक्तमार्गः** समयविमुक्तमार्गान्तरस्यासमयविमुक्तमार्गस्य चेति द्वयोः सभागहेतुः। न तु श्रद्धाधिमुक्तमार्गः श्रद्धानुसारिधर्मानुसारिमार्गयोर्हेतुः पूर्वकालीनत्वाद् दर्शनमार्गस्य। [2]भावनामार्गस्य च विशिष्टत्वात्। एवमन्यत्रापि योज्यम्। **धर्मानुसारिमार्गो** धर्मानुसारिमार्गान्तरस्य दृष्टिप्राप्तासमयविमुक्तमार्गयोश्चेति त्रयाणां सभागहेतुः। **दृष्टिप्राप्तमार्गो** दृष्टिप्राप्तमार्गान्तरस्यासमयविमुक्तमार्गस्य चेति द्वयोः। **असमयविमुक्तमार्गो**ऽसमयविमुक्तमार्गान्तरस्यैवेत्येकस्य सभागहेतुः। न तु धर्मानुसारिमार्गः श्रद्धानुसारिमार्गस्य सभागहेतुः। धर्मानुसारिमार्गस्येन्द्रियतो विशिष्टत्वात्। नापि श्रद्धाधिमुक्तमार्गस्येन्द्रियतो विशिष्टत्वात्।

---

1 Mss. यथायोगमुत्पत्तिधर्माणां

2 A स्वभावना०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नापि समयविमुक्तमार्गस्येन्द्रियतो विशिष्टत्वात्। समयविमुक्तमार्गस्तर्हीन्द्रियतो विशिष्टस्य दृष्टिप्राप्तमार्गस्य सभागहेतुः प्राप्नोति। न प्राप्नोति। अशैक्षमार्गसंगृहीतत्वात्। न हि पूर्वकालीनं फलं पश्चात्कालीनो हेतुरिति। दृष्टिप्राप्तमार्गः पुनः समयविमुक्तमार्गस्य न सभागहेतुरिन्द्रियतो न्यूनत्वात्। **कथं** पुनरिति विस्तरः। कथं पुनरूर्ध्वभूमिकस्य द्वितीयध्यानात् प्रभृति यावदाकिञ्चन्यायतनभूमिकस्य दर्शनमार्गस्य भावनामार्गस्य वा अशैक्षमार्गस्य वा यथायोगमधोभूमिको मार्गो विज्ञानानन्त्यायतनात् प्रभृति यावदनागम्यभूमिको यथायोगं दर्शनमार्गो भावनामार्गो वा अशैक्षमार्गो वा **समो वा विशिष्टो वा** भवति। कथंचन भवितव्यम्। हीनत्वादधराया भूमेः। **इन्द्रियतो हेतूपचयतश्च**। इन्द्रियतस्तावत् समो भवति विशिष्टो वा। दर्शनमार्गे श्रद्धानुसारिमार्गश्चतुर्थध्यानभूमिकोऽधरभूमिकस्य तस्यैव श्रद्धानुसारिमार्गस्य समः। उभयोर्मृद्विन्द्रियत्वात्। तस्यैवाधरभूमिको धर्मानुसारिमार्गो विशिष्टः। तीक्ष्णेन्द्रियत्वात्। तथा धर्मानुसारिमार्गश्चतुर्थध्यानभूमिकोऽधरभूमिकस्य धर्मानुसारिमार्गस्य समः। एवमेतावेव श्रद्धानुसारिधर्मानुसारिमार्गौ चतुर्थध्यानभूमिकावधरभूमिकयोर्भावनाशैक्षमार्गयोः प्रत्येकं भूमीन्द्रियभेदभिन्नयोः समौ वा विशिष्टौ वेति सम्भवतो योज्यौ। तथा भावनामार्गे आकिञ्चन्यायतनभूमिकस्य श्रद्धाधिमुक्तमार्गस्याधरभूमिकः श्रद्धाधिमुक्तमार्गः समः। उभयोर्मृद्विन्द्रियत्वात्। तस्यैवाधरभूमिको दृष्टिप्राप्तमार्गो विशिष्टः। तीक्ष्णेन्द्रियत्वात्। तथा तस्यैव समयविमुक्तमार्गोऽधरभूमिकः समः। उभयोर्मृद्विन्द्रियत्वात्। तस्यैवासमयविमुक्तमार्गोऽधरभूमिको विशिष्टः। तीक्ष्णेन्द्रियत्वात्। एवमशैक्षमार्गे[1] आकिञ्चन्यायतनभूमिकस्याशैक्षमार्गस्याधरभूमिकः समो विशिष्टो वेति यथायोगं योज्यम्। अनया दिशा सर्वभूमयो योज्याः। कथं हेतूपचयतः। ऊर्ध्वभूमिकस्याधरभूमिको मार्गः समो विशिष्टो वा भवतीत्यत इदमुच्यते। तत्र दर्शनादिमार्गाणामिति विस्तरः। आदिग्रहणेन भावनाशैक्षमार्गोपसंग्रहः। ऊर्ध्वभूमिकाया दुःखे धर्मज्ञानक्षान्तेरधोभूमिकं दुःखे धर्मज्ञानं हेतूपचयतो विशिष्टं भवति। दुःखे धर्मज्ञानादप्यूर्ध्वभूमिकादधरभूमिका दुःखेऽन्वयज्ञानक्षान्तिर्यावदूर्ध्वभूमिकान्मार्गे धर्मज्ञानादधरभूमिका मार्गेऽन्वय-

1 A ०मार्गेण

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञानक्षान्तिर्हेतूपचयतो विशिष्टा भवति । एकैकाधिकसभागहेतूपचितत्वात् । दर्शनमार्गादूर्ध्वभूमिकादधोभूमिको भावनामार्गो हेतूपचयतो विशिष्टो भवति । दर्शनमार्गो हि दर्शनमार्गहेतूपचितो भावनामार्गस्तु दर्शनभावनामार्गहेतूपचितः । ऊर्ध्वभूमिकाभ्यां दर्शनभावनामार्गाभ्यामधरभूमिकोऽशैक्षमार्गो हेतूपचयतो विशिष्टो भवति । दर्शनभावनामार्गहेतूपचितत्वात् । ऊर्ध्वभूमिकस्य दर्शनमार्गस्याधोभूमिको दर्शनमार्गो हेतूपचयतः समानक्षणापेक्षया समो भवति । एवं भावनामार्गस्य भावनामार्गोऽशैक्षमार्गस्याशैक्षमार्ग इति । तदेवं कश्चिदिन्द्रियतः समो भवति हेतूपचयतो विशिष्टः सत्यप्यधरभूमिकत्वे । तद्यथा प्रथमध्यानभूमिकाच्छ्रद्धानुसारिमार्गादधरभूमिकौ श्रद्धाधिमुक्तसमयविमुक्तमार्गौ । कश्चिद्धेतूपचयतः समो भवतीन्द्रियतो विशिष्टः । तद्यथा चतुर्थध्यानभूमिकाच्छ्रद्धानुसार्यादिमार्गादधोभूमिकधर्मानुसार्यादिमार्गः समानक्षणापेक्षया । कश्चिन्द्रियतो हेतूपचयतश्च विशिष्टः । तद्यथा चतुर्थध्यानभूमिकाच्छ्रद्धानुसारिमार्गादधरभूमिकौ दृष्टिप्राप्तासमयविमुक्तमार्गौ । **मृदुमृद्वादीनां चोत्तरोत्तरे हेतूपचिततरा** इति । दर्शनमार्गवर्ज्याः । तस्मिन् मृदुमृद्वाद्यसम्भवात् । तत्र मृदुमृदोः प्रकारादूर्ध्वभूमिकादधरभूमिकोऽपि मृदुमध्यो यावदधिमात्रमध्यादधिमात्राधिमात्रः समानासमानक्षणापेक्षया हेतूपचयतः समो विशिष्टो वा भवति । एकैकाधिकप्रकारहेतूपचितत्वात् । यदुक्तं श्रद्धानुसारिमार्गः षण्णां सभागहेतुरिति कथं श्रद्धानुसारिमार्गो धर्मानुसारिमार्गस्य सभागहेतुर्भवति । न हि तयोरेकसन्ताने सम्मुखीभावोऽस्ति । तेनाह । **यद्यप्येकसन्ताने श्रद्धाधर्मानुसारिमार्गयोरसम्भवः** । उत्पन्नस्त्वनागतस्य हेतुरिति । असम्भवो ह्यत्रासम्मुखीभावः । न त्वभावः । सन्ति हि मृद्विन्द्रियाणां मृद्विन्द्रियमार्गवदात्मीयास्तीक्ष्णेन्द्रियमार्गा अपि । दृष्टिप्राप्तासमयविमुक्तमार्गास्तु तत्सन्ताने सम्मुखीभवेयुरपि यदीन्द्रियसञ्चारः क्रियेत । तस्मादुत्पन्नः श्रद्धानुसारिमार्गोऽनुत्पत्तिधर्मिणो धर्मानुसारिमार्गस्य श्रद्धाधिमुक्तदृष्टिप्राप्तसमयविमुक्तासमयविमुक्तमार्गाणां च यथायोगमनागतानामुत्पत्तिधर्मणामनुत्पत्तिधर्माणां वा समविशिष्टानां सभागहेतुरिति । आचार्यवसुमित्रस्त्वाह । उत्पन्नः श्रद्धानुसारिमार्गोऽनुत्पन्नस्य धर्मानुसारिमार्गस्य दृष्टिप्राप्तमार्गस्य वा हेतुर्यदा श्रद्धानुसार्यादय इन्द्रियाणि सञ्चरन्तो धर्मानुसारिमार्गादीन् सम्मुखीकुर्वन्ति । तदयुक्तम् । न हि श्रद्धानुसारीन्द्रियाणि सञ्चरति । श्रद्धाधिमुक्तादयस्तु सञ्चरेयुः ॥५२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[प्रयोगजास्तयोरेव श्रुतचिन्तामयादिकाः ।
सम्प्रयुक्तकहेतुस्तु चित्तचैत्ताः समाश्रयाः ॥५३॥]

प्रायोगिका इति । प्रयोगेण निर्वृत्ताः प्रायोगिकाः । प्रायोगिकग्रहणमुपपत्तिप्रतिलम्भिकनिरासार्थम् । **कामावचराः श्रुतमया** इति । ये बुद्धवचनश्रुतेन निर्याताः । ते श्रुतमयाः । **चिन्तामयाश्च चिन्तामयानामिति** । चिन्तामयानामेव न श्रुतमयानाम् ।

तयोरेव समविशिष्टयोः[1]

इति वचनात् । **भावनामयाभावादिति** । कामधातोरसमाहितत्वाद् भावनामया न सन्ति । **चिन्तामयाभावादिति** । यदा हि चिन्तयितुमारभन्ते । तदैषां समाधिरेवोपतिष्ठत इति चिन्तामयाभावकारणम् । **तेषामपीति** । श्रुतमयादीनाम् । **मृदुमृदवः सर्वेषामिति** । मृदुमृदवो मृदुमृद्वन्तराणां समानां मृदुमध्यादीनां चान्येषामष्टानां विशिष्टानामिति सर्वेषां सभागहेतुः । **मृदुमध्या अष्टानां** मृदुमृदुप्रकार[2]मपास्य तस्य[2] न्यूनत्वात् । **एषा नीतिरिति** । तद्यथा मृद्वधिमात्राः सप्तानां मध्यमृदवः षण्णां यावदधिमात्राधिमात्रा अधिमात्राधिमात्रान्तराणामेकरूपाणां सभागहेतुरिति । पूर्वान् पूर्वानपास्य तेषां तेषां न्यूनत्वात् । **उपपत्तिप्रतिलम्भिकास्तु कुशला** इति । उपपत्त्या प्रतिलम्भ उपपत्तिप्रतिलम्भः । स एषामस्तीत्युपपत्तिप्रतिलम्भिकाः । अत इनिठनाविति[3] ठन् । **सर्वे ते नव प्रकाराः परस्परं सभागहेतुः** । मृदुमृदूनां यावदधिमात्राधिमात्राणामेव । अधिमात्राधिमात्रा मृदुमृदूनां यावदधिमात्राधिमात्राणां सभागहेतुः । न समविशिष्टानामेव । अनाभिसंस्कारिकत्वात् । आभिसंस्कारिकस्य हि सभागहेतोर्न्यूनं फलं नेष्यते । नानाभिसंस्कारिकस्य । **क्लिष्टा अप्येवमिति** । सर्वे नव प्रकाराः परस्परं सभागहेतुरप्रायत्निकत्वात् । पूर्वोत्पन्नाः सर्वे समानभूमिकानां पश्चाद्वर्तिनां सर्वेषां सभागहेतुः । नात्र समविशिष्टते अपेक्ष्येते । **ते यथाक्रमं चतुस्त्रिद्व्येकेषां सभागहेतुरिति** । विपाकजाविपाकजादीनां चतुर्णां सभागहेतुः । ऐर्यापथिका ऐर्यापथिकादीनामेव त्रयाणाम् । न विपाकजानाम् । तेषामनाभिसंस्कारिकत्वेन न्यूनत्वात् । शैल्पस्थानिका द्वयोः शैल्पस्थानिकनैर्माणिकयोः । नैर्माणिका नैर्माणिकाना-

1 See the preceding Kārikā. 2...2 To. मपास्यतेऽस्य

3 Pā., V, 2, 115.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेव। न पूर्वेषाम्। उत्तरेषामुत्तरेषामाभिसंस्कारिकत्वात्। **निर्माणचित्तमपि कामावचरं चतुर्ध्यानफल**मिति। चतुर्णां ध्यानानां फलं प्रथमद्वितीयतृतीयचतुर्थध्यानफलमिति चतुष्प्रकारं कामावचरं निर्माणचित्तम्। तद्यथाक्रमं चतुस्त्र्येकेषां च सभागहेतुरिति वर्तते। प्रथमध्यानफलं चतुर्णां प्रथमद्वितीयतृतीयचतुर्थध्यानफलानां सभागहेतुः। द्वितीयध्यानफलं त्रयाणां द्वितीयतृतीयचतुर्थध्यानफलानाम्। तृतीयध्यानफलं द्वयोस्तृतीयचतुर्थध्यानफलयोः। चतुर्थध्यानफलमेकस्य चतुर्थध्यानफलान्तरस्यैव सभागहेतुः। का पुनरत्र युक्तिर्ययैवं नियम इति तां युक्तिं [1]निर्दिदिक्षुराह। **नोत्तरध्यानफलमधरध्यानफलस्ये**ति विस्तरः। न चतुर्थध्यानफलं कामावचरं निर्माणचित्तं प्रथमध्यानफलस्य कामावचरस्य निर्माणचित्तस्य यावत् तृतीयध्यानफलस्य कामावचरस्य निर्माणचित्तस्य सभागहेतुः। कस्मादित्याह। **न ह्याभिसंस्कारिकस्य** महायत्नसाध्यस्य **सभागहेतोर्हीयमानममहायत्नसाध्यं [2]फलं भवति**। यादृशेन हि यत्नविशेषेण प्रथमं ध्यानं यावत् तृतीयं ध्यानं निष्पाद्यते। न तादृशेनैव चतुर्थं ध्यानं निष्पाद्यते। किं तर्हि। उत्कृष्टतरेण यत्नविशेषेण निष्पाद्यते। तस्मात् फलमस्योत्कृष्टतरेणैव यत्नविशेषेण निष्पाद्यत इत्यवगम्यते। तेन अधरध्यानफलमुत्तरध्यानफलस्य सभागहेतुः। न तूत्तरध्यानफलमधरध्यानफलस्य। यथा च चतुर्थध्यानफलं योजितम्। एवं तृतीयद्वितीयध्यानफलमपि योज्यम्। **अत एवाहुरिति**। यस्मादाभिसंस्कारिकस्य सभागहेतोर्हीयमानं फलं न[3] भवति। तस्मादाहुरित्यर्थः। किमाहुरित्याहुः। **स्यादुत्पन्न** इति विस्तरः। **दुःखे धर्मज्ञानमनास्रवमुत्पन्नमनुत्पत्तिधर्माणामनास्रवाणां दुःखे धर्मज्ञानक्षान्तीनां** न हेतुः। दुःखे धर्मज्ञानक्षान्तिभ्यो दुःखे धर्मज्ञानस्याभिसंस्कारिकत्वेन विशिष्टत्वात्। एवं हि तद् विशिष्टम्। यत् क्लेशविसंयोगप्राप्त्या सहोत्पद्यते। **विशिष्टं च न्यूनस्य न हेतुः**। तद्यथार्हत्त्वात् परिहीणस्याशैक्षो मार्गः पूर्वोत्पन्नः सकृदागाम्यनागामिमार्गयोः पश्चादुत्पद्यमानयोर्न सभागहेतुः। **स्यादेकसन्ताननियतः पूर्वप्रतिलब्ध** इति विस्तरः। **अनागता दुःखे धर्मज्ञानक्षान्तयः** प्रथम एव क्षणे प्रतिलब्धा एकसन्तानगताः। दुःखे धर्मज्ञानं द्वितीयक्षणोत्पन्नम्। तस्य ता न[4] हेतुः। **यस्मान्न पूर्वतरं**

1 To. निर्दिद्युः०

2 A ०मानमहायत्नसाध्यं

3 A omits न.

4 Mss. ब

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

फलम्। पूर्वतरं हि दुःखे धर्मज्ञानं दुःखे धर्मज्ञानक्षान्तिभ्यः। तस्योत्पन्नत्वात्, तासाञ्चानुत्पन्नत्वात्। **अनागतो वा धर्मो यस्मान्न सभागहेतुः।** अनागता दुःखे धर्मज्ञानक्षान्तयोऽपरिमिताः प्रतिलब्धा एव न तूत्पन्नाः। **स्यात् पूर्वोत्पन्न** इति विस्तरः। पूर्वं प्रतिलब्धमात्रो धर्मः पृष्टो न तूत्पन्नः। अनुत्पन्नश्च न सभागहेतुर्भवतीति। इदानीं पूर्वोत्पन्नोऽपि किमस्ति न सभागहेतुरित्यतिशयरूपेण पृच्छ्यते। **अधिमात्रो न्यूनस्येति**, विशिष्टो न्यूनस्येत्यर्थः। **तद्यथोत्तरफलपरिहीणस्य** अर्हत्त्वफलपरिहीणस्यानागामिफलपरिहीणस्य वा **अधरफलसम्मुखीभावे**ऽनागामिफलसम्मुखीभावे सकृदागामिफलसम्मुखीभावे वा योऽर्हत्त्वमार्गोऽधिमात्रः पूर्वोत्पन्नः स पश्चादुत्पन्नस्यानागामिफलस्य सकृदागामिफलस्य वा न सभागहेतुः, न्यूनत्वात्। एवमनागामिफलपरिहीणस्य योऽनागामिफलमार्गः स पूर्वोत्पन्नः पश्चादुत्पन्नस्य सकृदागामिफलस्य न सभागहेतुः, न्यूनत्वात्। **दुःखे धर्मज्ञानप्राप्तिश्चेति** विस्तरः। दुःखे धर्मज्ञानप्राप्तिर्या पूर्वोत्पन्ना, सा **उत्तरक्षणसहोत्पन्नानामुत्तरैः** क्षणैर्दुःखेऽन्वयज्ञानक्षान्तिक्षणादिभिरा मार्गेऽन्वयज्ञानक्षान्तेः **सहोत्पन्नानां दुःखे धर्मज्ञानक्षान्तिप्राप्तीनां न सभागहेतुः।** किं कारणम्। तासां **न्यूनत्वात्**, तस्याश्च विशिष्टत्वात्। कथं पुनस्तासां न्यूनत्वं तस्याश्च विशिष्टत्वम्। दुःखे धर्मज्ञानक्षान्तेर्दुःखे धर्मज्ञानं विशिष्टं तद्वध्यक्लेशप्राप्तिविमुक्तत्वात्[1], हेतूपचिततरत्वाच्च। तस्माद्धेतूपचिततराभ्योऽपि दुःखे धर्मज्ञानक्षान्तिप्राप्तिभ्यो[2] दुःखे धर्मज्ञानप्राप्तिर्विशिष्टा। ताश्च न्यूनास्तत्प्राप्तित्वात्। किञ्च प्रथमक्षणोत्पन्नाया दुःखे धर्मज्ञानक्षान्तिप्राप्तेर्दुःखे धर्मज्ञानप्राप्तिस्तस्मादेव हेतुद्वयाद्विशिष्टा। न्यूना च सा दुःखे धर्मज्ञानक्षान्तिप्राप्तिः। अतस्तत्पूर्विका अप्यन्या उत्तरक्षणसहोत्पन्ना दुःखे धर्मज्ञानक्षान्तिप्राप्तयो हेतूपचिततरत्वेऽपि न्यूना एवेति। तस्मान्न सा तासां सभागहेतुरिति।

सम्प्रयुक्तकहेतुस्तु चित्तचैत्ताः

इति। तुशब्दोऽवधारणे भिन्नक्रमश्च। चित्तचैत्ता एव सम्प्रयुक्तकहेतुरिति, **एवं सतीति** विस्तरः। यदि चित्तचैत्ता एव सम्प्रयुक्तकहेतुरित्येतावदुच्यते **भिन्नकालजा अपि** भिन्नकालजैः सह **भिन्न-**

1 To. °प्राप्तेर्विमुक्तत्वात्

2 Mss. add दुःखधर्मज्ञानप्राप्तिभ्यो.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सन्तानजा अपि च भिन्नसन्तानजैः सह सम्प्रयुक्तकहेतुः संप्रयुज्यते[1]। न हि ते कालसन्तानभिन्ना न चित्तचैत्ता भवन्ति। एकाकारालम्बनास्तर्हीति। यदि चित्तचैत्ता एकाकारा एकनीलाद्याकारा एकालम्बनाश्च एकनीलाद्यालम्बना एवं ते संप्रयुक्तकहेतुर्नान्यथेति। एवं भिन्नकालजत्वं भिन्नसन्तानजत्वं च व्यावर्तितं भवतीत्यभिप्रायः। एवमपि स एव प्रसङ्गः। भिन्नकालसन्तानजानामन्योन्यं संप्रयुक्तकहेतुत्वप्रसङ्ग इत्यर्थः। सम्भवति हि भिन्नकालसन्तानजानामपि चित्तचैत्तानामेकाकारालम्वनत्वम्। भिन्नसन्तानजानामपि प्रसङ्ग इति। भिन्नकालजत्वमेकं परिहृतम्। नवचन्द्रादीनि हि पश्यतां बहूनामेकाकारालम्बनाश्चित्तचैत्ता वर्तन्ते।

समाश्रयाः

इति। समः अभिन्न आश्रय एषामिति समाश्रयाः। तुल्यार्थे समशब्दग्रहणे हि जातितुल्यत्वात् स एव प्रसङ्गः स्यात्।

अन्योन्यफलार्थेनेति विस्तरः। यथा सहसार्थिकानां परस्परबलेन मार्गप्रयाणम्' एवं चित्तं चैत्तस्य फलम्' चैत्तोऽपि चित्तस्येत्यन्योन्यफलमिति तेनार्थेन सहभूहेतुः। पञ्चभिरिति विस्तरः। पञ्चभिः समताभिः[2]' आश्रयालम्वनाकारकालद्रव्यसमताभिरित्यर्थः। समप्रयोगार्थेन समप्रवृत्त्यर्थेन सम्प्रयुक्तकहेतुः। यथा तेषामेव सार्थिकानामन्योन्यबलेन मार्गं गच्छतां [3]समोऽन्नपानस्नानशयनादिपरिभोगक्रियाया प्रयोगः' तद्वत् समप्रयोगत्वमेषामन्योन्यं भवति। अत एवाह। एकेनापि हि विना न सर्वे सम्प्रयुज्यन्त इति ॥५३॥

सर्वत्रगाख्यः क्लिष्टानां स्वभूमौ पूर्वसर्वगाः।
विपाकहेतुरशुभाः कुशलाश्चैव सास्रवाः ॥५४॥

पूर्वसर्वगाः

इति। पूर्वे च ते सर्वगाश्च पूर्वसर्वगाः[4]। पूर्वोत्पन्नाः सर्वगा इत्यर्थः।

---

1 To. संप्रसज्यते
2 V समेताभिः
3 Mss. सममन्न०
4 Mss. सर्वपूर्वगाः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वभूमिकाः पूर्वोत्पन्ना अतीताः प्रत्युत्पन्ना वा **सर्वत्रगा** अनुशयाः **क्लिष्टानां** क्लेशस्वभावसम्प्रयुक्तसमुत्थानां **पश्चिमानां** पश्चादतीतप्रत्युत्पन्नानामनागतानां च **सर्वत्रगहेतुः** । **व्याख्यास्याम** इति ।

सर्वत्रगा दुःखहेतुदृग्घेया दृष्टयस्तथा ।
विमतिः सह ताभिश्च याविद्यावेणिकी च या ॥[1]

इत्यत्र पञ्चमे कोशस्थाने निर्देक्ष्यामः । **क्लिष्टधर्मसामान्यकारणत्वेनेति** विस्तरः । यस्मादयं सर्वत्रगहेतुः क्लिष्टानामेव सामान्येन पञ्चनिकायाना-मपि भवति । सभागहेतुस्तु क्लिष्टानां चाक्लिष्टानां च । **तस्मात् पृथग्व्यवस्थाप्यते** । कथं क्लिष्टधर्मसामान्यकारणत्वमस्येति प्रति-पादयन्नाह । **निकायान्तरीयाणामपि हेतुत्वादिति** । **एषां हि प्रभावे-णेति** । एषां हि सर्वत्रगाणां प्रभावेण **अन्यनैकायिका** अन्यनिकायभवाः **क्लेशा रागादय उपजायन्ते** । के पुनस्ते । दुःखदर्शनप्रहातव्यस्य सर्वत्रगहेतोः समुदयनिरोधमार्गदर्शनभावनाप्रहातव्या निकायान्तरीया भवन्ति । समुदय-दर्शनप्रहातव्यस्य सर्वत्रगहेतोर्दुःखनिरोधमार्गदर्शनभावनाप्रहातव्या निकाया-न्तरीया भवन्ति । सर्वान् क्लेशनिकायान् गच्छन्ति भजन्ते आलम्बन्ते[2] । सर्वेषां वा क्लेशनिकायानां हेतुभावं गच्छन्तीति सर्वत्रगाः । अत एवोक्तम् । सत्कायदृष्टि-मूलकाः सर्वक्लेशाः सत्कायदृष्टिप्रभवाः सत्कायदृष्टिसमुदया इति । आत्मग्राहद्वारेण रागमानप्रतिघादिसमुदाचारात् । **किमार्यपुद्गलस्यापीति** । सर्वत्रगा आर्यपुद्गलस्य सर्व एव प्रहीणा दर्शनप्रहातव्यत्वात् । रागादयश्च शैक्षाणां समुदाचरन्ति । ते रागादयस्तेषां न सर्वत्रगहेतुका इति मन्यमान एवं पृच्छति । **क्लिष्टा धर्मा** इति । अविशेषितत्वात् पृथग्जनार्यसन्तानजा इति गम्यते ।[3] **यश्च दर्शनप्रहात-व्यानां धर्माणां विपाक** इति । अर्थपरिसमाप्त्यर्थमेतदुक्तम् । नैतदुदाहरणम् । **अव्याकृताः संस्कृता धर्मा** इति । निवृताव्याकृता अनिवृताव्याकृताश्च गृह्यन्ते ।

1 Kārikā, V, 12.

2 Mss. and To. आलम्बने

3 C puts the following in the upper margin of fol. 111a: दर्शनहेयैः सर्वत्रगैर्विना पृथग्जनावस्थायां क्लिष्टानामभावात् ते तेषां हेतुत्वेन व्यवस्थिता इति । सामान्यतोदृष्टानुमानाद्यस्य च यो हेतुर्न कदाचित् स तस्य न हेतुरिति । प्रहीणा अपि ते क्लिष्टानां धर्माणां हेतुत्वेन व्यपदिश्यन्ते ।१

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निवृताव्याकृताः कामधातौ सत्कायान्तग्राहदृष्टितत्सम्प्रयुक्तसमुत्था धर्मा रूपारूप्यावचराश्च क्लिष्टा धर्माः । संस्कृतग्रहणमाकाशाप्रतिसंख्यानिरोधनिरासार्थम् ।

परमव्याकृते ध्रुवे[1]

इति तयोरव्याकृतत्वात् । तत्र कामावचराः क्लिष्टा धर्मा यथायोगं सभागसर्वत्रगसहभूसम्प्रयुक्तकहेतुभूतैस्तैरेव सत्कायदृष्ट्यादिभिरव्याकृतहेतुकाः । नान्यै[2] रागादिभिः । ऊर्ध्वभूमिकस्त्वन्यैरपीति सुगममेतत् । अनिवृताव्याकृताः सभागहेतुनानिवृताव्याकृतहेतुकाः । अकुशलाः कामावचरा रागादयः । ते च सर्वत्रगहेतुना सत्कायदृष्ट्यादिहेतुकः । इदमत्रोदाहरणम् । **अकुशलाश्चेति** ह्यविशेषितत्वाद् दर्शनप्रहातव्या भावनाप्रहातव्याश्च गृह्यन्ते । इदमत्र द्वितीयज्ञापकम् । **यत् तदन्यत् क्लिष्टं दुःखसत्यमिति** तृतीयं ज्ञापकम् । तदन्यद्धि क्लिष्टं दुःखसत्यं दर्शनप्रहातव्यं भावनाप्रहातव्यं चाविशेषितत्वाद् गृह्यते । सर्वत्रगहेतुना हि भावनाप्रहातव्यं पृथग्जनानामिवार्याणामपि सत्कायदृष्टिहेतुकं न सत्कायदृष्टेर्हेतुरिति व्याख्यातमेतत् । **इदं तर्हि प्रज्ञप्तिभाष्यमिति** । यद्यकुशला अव्याकृतहेतुका अपि भवन्ति न केवलमकुशलहेतुकाः प्रज्ञप्तिभाष्यं **कथं नीयते** । **स्यात्** । **आर्यपुद्गलः कामवैराग्यात् परिहीयमाणो यस्तत्प्रथमतः[3] क्लिष्टां[4] चेतनां संमुखीकरोतीति** । कामवैराग्यपरिहाणिकाले हि सा आर्यपुद्गलस्य चेतना [5]सहभूहेतुना च सम्प्रयुक्तकहेतुना च[5] अकुशलहेतुकैव । नाव्याकृतहेतुका । सत्कायान्तग्राहदृष्ट्योः प्रहीणत्वात् । इति प्रज्ञप्तिभाष्यार्थो लक्ष्यत इति । अनेनाभिप्रायेण चोदयति । वैभाषिक आह । **अप्रहीणं हेतुमेतत् सन्धायोक्तमिति** ।[6] अप्रहीणं सहभूहेतुं सम्प्रयुक्तकहेतुञ्च सन्धाय अभिप्रेत्य एतत् प्रज्ञप्तिभाष्यमुक्तम् । **दर्शनप्रहातव्यो हि** सत्कायदृष्ट्यादिकः **तस्याश्चेतनाया हेतुः** । **प्रहीणत्वात्** **दर्शनमार्गेण नोक्तः** प्रज्ञप्तिभाष्य इति ।

अकुशलाः कुशलसास्रवाश्चेति । अकुशला अवश्यं साश्रवा एवेति न

1 Kārikā, IV, 11.

2 A हेतुकारा नान्यै, V हेतुकारा यै

3 A या तत्र प्रथमतः

4 Mss. क्लिष्टा

5...5 Mss. सहभूहेतुनायै

6 A and C add a line in the lower margin of fol. 111a: न सत्कायान्तग्राहदृष्टिभ्यामन्येऽव्याकृता धर्माः कारणहेतुत्वं मुक्त्वाऽन्येन हेतुनाऽकुशलानां हेतुत्वं प्रतिपद्यन्ते । कारणहेतुत्वे वान्येभ्यो नार्थातिशयः ।२

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशेष्यन्ते। कुशलास्तु द्विप्रकाराः सास्रवा अनास्रवाश्चेति। अतो विशेष्यन्ते। ये[1] सास्रवाः कुशलाः। ते विपाकहेतुर्नानास्रवा[2] इति। **विपाकधर्मत्वादिति।** विपक्तिप्रकृतित्वादित्यर्थः।

दुर्बलत्वात् पूतिबीजवदिति विस्तरः। यथा पूतीनि बीजान्यभिष्यन्दितान्यपि दुर्बलत्वान्नाङ्करोत्पत्तिहेतुर्भवन्ति। एवमव्याकृता धर्मास्तृष्णाभिष्यन्दिता अपि न विपाकोत्पत्तिहेतुर्भवन्ति दुर्बलत्वात्। **अनास्रवा** बलवन्तोऽपि **तृष्णानभिष्यन्दितत्वाद्विपाकं न निर्वर्तयन्ति। यथाद्भिरन**भिष्यन्दितत्वाच्छुष्काणि[3] बलवन्त्यपि **सारबीजानि नाङ्कुरं निर्वर्तयन्ति।** तद्वत्। पूर्वेषां स्वशक्तिवैकल्यमपरेषां सहकारिकारणान्तरवैकल्यम्। **किंप्रतिसंयुक्तमिति।** कस्मिन् प्रतिसंयुक्तं किंप्रतिसंयुक्तम्। **विपाकमप्रतिसंयुक्ताः** कामादिष्वप्रतिसंयुक्ता अनास्रवा **अभिनिर्वर्तयेयुः**[4]। प्रतिसंयुक्तेन विपाकेन भवितव्यम्। नाप्रतिसंयुक्तेन। कामधात्वादिप्रतिसंयुक्तधर्मस्वभावत्वात्। **शेषास्त्विति** विस्तरः। अकुशलाः कुशलसास्रवाश्च शेषा **उभयविधत्वात्** उभयप्रकारत्वात्[5] बलवदभिष्यन्दितप्रकारत्वादित्यर्थः। **निर्वर्तयन्ति विपाकं यथा साराण्यभिष्यन्दितानि बीजान्यङ्कुरम्।** तद्वत्।

विपाकस्य हेतुरिति विस्तरः। यदि विपाक इति भावसाधनो घञ् विपक्तिर्विपाक इति। तत्र षष्ठीसमासो विपाकस्य हेतुरिति। अथ विपच्यते स्वयमिति कर्मसाधनो घञ्। तत्र कर्मधारयो[6] **विपाक एव हेतुर्विपाकहेतुरिति।** किंचातः। कश्चातो दोषः। **यदि** विपाकस्य **हेतुरिति** भावसाधनपरिग्रहः। **विपाकजं चक्षुरित्येतन्न प्राप्नोति।** न हि चक्षुर्विपक्तेर्जातम्। किं तर्हि। विपक्तिहेतोः कर्मण इत्यर्थः। न हि विपाको हेतुः। **अथ** विपाक एव हेतुरिति कर्मसाधनपरिग्रहः। सिध्यते तद् विपाकजं चक्षुरिति। कर्मैव हि विपाको विपच्यत इति कृत्वा। **किन्तु कर्मणो विपाक इत्येतन्न प्राप्नोति।** विपाको हि कर्मैवोच्यते न विपक्तिः। कर्मणो विपाक इति चात्र भावसाधनार्थ

1 Mss. अन्ये

2 A विपाकहेतूनां नास्रवाः

3 A ॰च्छुष्काणि

4 Mss. consulted by To. ॰येषु

5 A प्रकामत्वात्

6 To. कर्मसाधनो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इष्टे न कर्मसाधनार्थ इति। तस्मात् कर्मणो विपाक इत्येतन्न प्राप्नोति। उभयथापि योग इत्युक्तं प्रागिति[1]।

विपाकजौपचयिकाः पञ्चाध्यात्मम्[2]

इत्यत्रोक्तं विपाकहेतोर्जाता विपाकजाः। मध्यपदलोपाद् गोरथवदिति भावसाधनपरिग्रहः। फलकालप्राप्तं वा कर्म विपाक इत्युच्यते। विपच्यत इति कृत्वा। तस्माज्जाता विपाकजा इति कर्मसाधनपरिग्रहः। फलं तु विपक्तिरेवेति विपाकः। फलविवक्षायां भावसाधन एवं परिगृह्यत इत्यर्थः। तस्माद् विपाकजं चक्षुरिति मध्यपदलोपात् कर्मसाधनपरिग्रहाद् वा सिध्यति। कर्मणो विपाक इति च सिध्यति। भावसाधनपरिग्रहात्। विवक्षितपूर्विका हि शब्दप्रतिपत्तिरिति। **विसदृशः पाको** विपाक इति। हेतोर्विसदृशं फलमित्यर्थः। हेतुर्हि व्याकृत एव। फलं त्वव्याकृतमेवेति। **सहभूहेत्वादीनां तु सदृश एव पाक** इति विशेषणम्। अभिधर्मशास्त्र एवं व्युत्पाद्यते तेनेदं प्रत्यादिश्यते[3]।

एकस्कन्धको विपाकहेतुरेकफल इति विस्तरः। इह प्राप्तयो वृक्षप्रपाटिकावच्चित्तादिभ्यः पृथगवस्थिताः। तासां परिपूरकन्यायेन पृथक् फलं वर्ण्यते। एकः स्कन्धोऽस्येत्येकस्कन्धको विपाकहेतुः। यत्र स्कन्धे प्राप्तयः। तत्रैव[4] च तज्जात्यादय इत्येकस्कन्धकः। यदेव च प्राप्तीनां फलं तदेव तज्जात्यादीनामिति। साधारणफलत्वादेकफलः। **द्विस्कन्धक** एकफलो विपाकहेतुः। **कायवाक्कर्मतज्जात्यादयश्च**। कायवाक्कर्मणो रूपस्कन्धसंगृहीतत्वात् तज्जात्यादीनां च संस्कारस्कन्धसंगृहीतत्वाद् द्विस्कन्धकः। एकफलश्च। तेषामपृथक्फलत्वात्। **चतुःस्कन्धक** एकफलः **कुशलाकुशलाश्चित्तचैत्ता** इति। ते सह जात्यादिभिरिति। तेषां चित्तचैत्तानां यथायोगं वेदनासंज्ञासंस्कारविज्ञानस्कन्धसंगृहीतत्वात्। जात्यादीनाञ्च संस्कारस्कन्धसंगृहीतत्वाच्चतुःस्कन्धको विपाकहेतुरेकफलः साधारणफलत्वात्। न हि चित्तस्यान्यत् फलमन्यच्चैत्तादीनामिति। असमाहितत्वात्। कामधातौ पञ्चस्कन्धको विपाकहेतुर्नास्ति। न ह्यत्र रूपस्कन्धसंगृहीतं कायवाक्कर्मचित्तचैत्तैरेकफलं भवति। पृथक्कलापत्वात्। त्रिस्कन्धकस्तु त्रिष्वपि धातुषु नास्ति चित्तचैत्तानामवश्यमेकफलत्वात्। यथायोगं चतुःस्कन्धस्वभावत्वात्।

---

1 C puts in the lower margin of fol. 111b चिन्तानिद्रा मनस्कारजं भावनाहेतुं रागादिकम्।

2 Kārikā, I, 36.

3 Mss. प्रत्यायिष्यते

4 C तत्रैव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपधातावेकस्कन्धक इति विस्तरः। **प्राप्तिः** सह जात्यादिभिः। संस्कारस्कन्धसंगृहीतेत्येकस्कन्धकः। तथैव साधारणफलत्वादेकफलः। **असंज्ञिसमापत्तिरपि** सह जात्यादिभिस्तथैव वक्तव्या। विज्ञप्ते रूपस्कन्धसंगृहीतत्वात्। जात्यादीनाञ्च संस्कारस्कन्धस्वभावत्वात्। द्विस्कन्धक एकफलः पूर्ववत्। **कुशले चेतस्यसमाहितेऽनुपरिवर्तिरूपं** नास्तीति रूपस्कन्धवर्जितवेदनादिस्कन्धसंगृहीतत्वाच्चतुःस्कन्धकः। **पञ्चस्कन्धकः समाहिते चेतसि**। अनुपरिवर्तिरूपस्य चित्तादिभिरेकत्रवर्तित्वात्। **आरूप्यधाताविति** विस्तरः। तत्र सर्वमेव रूपं नास्तीत्येकस्कन्धकश्चतुःस्कन्धकश्च विपाकहेतुः। **प्राप्तिरिति**। तत्र सह स्वजात्यादिभिरेकस्कन्धकः पूर्ववत्। **निरोधसमापत्तिरपि** सह स्वजात्यादिभिरेकस्कन्धको विपाकहेतुरेकफल इति सुगमम्[1]।

अस्ति कर्मेति विस्तरः। यस्य जीवितेन्द्रियं विपाकः। तस्य कर्मणोऽवश्यं तज्जीवितेन्द्रियं तज्जात्यादयश्च विप्रयुक्ता विपाकः। तच्चैतत् सर्वं धर्मायतनसंगृहीतमित्येकमायतनं विपाको विपच्यते। **यस्य मन आयतनं तस्य द्वे मनोधर्मायतने**। तस्य हि मनआयतनस्य कलापे अवश्यं वेदनादयः सहभुवो जात्यादयश्च विपाकरूपा भवन्ति। वेदनादिजात्यादयो धर्मायतनसंगृहीता इति ते द्वे मनोधर्मायतने विपाको विपच्यते। **एवं यस्य स्प्रष्टव्यायतनमिति**। तस्य स्प्रष्टव्यस्यावश्यं जात्यादयः सन्तीति धर्मायतनमपि विपच्यते। न केवलं स्प्रष्टव्यायतनमिति द्वे आयतने तस्य विपच्येते। **यस्य कायायतनं तस्य त्रीणि**। तदेव कायायतनं स्प्रष्टव्यायतनं च तदाश्रयभूतचतुष्कम्। तस्यावश्यं भूतचतुष्काश्रितत्वात्। तस्य च जात्यादिभिर्भवितव्यमिति धर्मायतनमपि तत्र तृतीयं विपच्यते। **एवमिति** विस्तरः। एवं यस्य रूपगन्धरसायतनानामन्यतमद् विपाकस्तस्य त्रीण्यायतनानि विपाकः। तदेवायतनं रूपादीनामन्यतमत् स्प्रष्टव्यायतनं च तदाश्रयभूतस्वभावं धर्मायतनं च तज्जात्यादिस्वभावमिति। **यस्य चक्षुरायतनम्। तस्य चत्वारि**। तदेव चक्षुःकायायतनं चावश्यं चक्षुषः[2] कायप्रतिबद्धवृत्तित्वात्। स्प्रष्टव्यधर्मायतने च पूर्ववत्। **एवं यस्येति** विस्तरः। एवं यस्य श्रोत्रादीनामन्यतमद् विपाकस्तस्यापि चत्वार्यायतनानि विपाकः। तदेव श्रोत्रादीनामन्यत-

1 A. सुगमो   2 To. चक्षुः-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मदायतनं कायस्प्रष्टव्यधर्मायतनानि च पूर्ववत्। **अस्ति तत् कर्मे**ति विस्तरः। **पञ्च यावदेकादशायतनानी**ति सम्भवतः। न तु द्वादशायतनानि विपाकः ' शब्दायतनस्याविपाकस्वभावत्वात्।

अत्राचार्यवसुमित्रो व्याख्यापयति[1]। अस्ति कर्म यस्यैकमेव धर्मायतनं विपाको विपच्यत इति नोपपद्यते। किं कारणम् ' आक्षेपककर्मफलत्वाज्जीवितेन्द्रियस्य। यदि तावत् कामधातौ जीवितं विपाको विपच्यते ' कर्मणस्तत्रावश्यं कायजीवितेन्द्रिये भवतः कललाद्यवस्थासु अनुत्पन्ने षडायतने। उत्पन्ने तु षडायतने सप्तभिरायतनैर्भवितव्यम्। चक्षुरादिभिः षड्भिर्मनआयतनेन चेति। रूपधातावपि सप्तभिरारूप्यधातावपि मनोधर्मायतनाभ्यामवश्यं भवितव्यम् ' सकलजन्माक्षेपकफलत्वाज्जीवितेन्द्रियस्य। को वात्र धातुरभिप्रेत इति ब्रूमः। आरूप्यधातुः। ननु च तत्राक्षेपककर्मफलत्वाज्जीवितेन्द्रियस्यावश्यं मनआयतनेनापि भवितव्यम्। न च जीवितेन्द्रियमेव विपाको विपच्यते। वेदनाप्रभावितत्वाद् विपाकस्येति। वेदनयापि तत्र भवितव्यमिति। अत्रोच्यते ' क्षणोत्पत्तिमेतत् सन्धायोक्तम्। यस्मिन् क्षणे आरूप्योपपन्नस्य विपाकजं चित्तं न समुदाचरति ' तस्मिन् क्षणे जीवितेन्द्रियमेव विपाको विपच्यते। विपाकस्य जीवितेन्द्रियस्यैवोत्पादान्मनआयतनस्य चासमुदाचारादिति किमर्थं तत्समुदाचारे मनआयतनमपरं न भवतीति तस्य द्वे मनोधर्मायतने इति। तदिदं विचार्यते। भवत्येवं चाक्षेपकस्य कर्मणो जीवितेन्द्रियं विपाक इति। जीवितेन्द्रिये च विपच्यमाने मनआयतनादीन्यपि विपच्यन्ते। नायतनान्तरविपाकः प्रतिषिध्यते। विपाकहेतुरिह[2] चिन्त्यते। अस्ति तत् कर्म ' यस्यैकमेव धर्मायतनं विपच्यते। नान्यदायतनमित्येतावद् विवक्षितम्। अथ मतं जीवितेन्द्रियाक्षेपकस्यैव कर्मणो मनआयतनादीन्यपि विपच्यन्ते ' नैकमायतनमिति। अत्र ब्रूमः। तस्यैव कर्मणोऽन्येऽपि मनआयतनादयस्तत्र वर्तमाना विपाको न पुनरन्यस्य कर्मण इति ' किं कृतोऽयं नियमः। अस्ति हि सम्भवो यदेकस्य कर्मणो निकायसभागो विपाकोऽन्यस्य जीवितेन्द्रियम् ' अन्यस्यैव च मनआयतनादीनीति। ब्रूयास्त्वम्। यथा यस्य चक्षुरायतनं तस्य चक्षुःकायस्प्रष्टव्यधर्मायतनानीति वचने यस्य

---

1 Mss. व्याख्यानयति 2 Mss. हेतुरिवह

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्षुरायतनं विपाकस्तस्य कायायतनमावश्यकत्वात्, एवं मनआयतनादीन्यपि तस्यैव कर्मणो विपाक इति। तन्न, क्वचिदेव कस्यचित् प्रतिबद्धवृत्तित्वात्। न हि विना कायेन्द्रियेण चक्षुरिन्द्रियप्रादुर्भावोऽस्ति। असत्यपि तु विपाके मनसि जीवितेन्द्रियप्रादुर्भावोऽस्तीत्यसममेतत्[1]। आचार्यसङ्घभद्रस्त्वाह। अस्ति[2] कर्म यस्य धर्मायतनमेव विपाको विपच्यते, यस्य जीवितेन्द्रियम्, यस्य चक्षुरायतनम्, तस्य पञ्च चक्षुःकायरूपस्प्रष्टव्यधर्मायतनानि। एवं यावज्जिह्वायतनम्। यस्य कायायतनम्, तस्य चत्वारः। कायरूपस्प्रष्टव्यधर्मायतनानीति। रूपाविनाभावित्वाद् रूपायतनमपि तस्यैव चक्षुर्निर्वर्तकस्य कर्मणो विपाक इति समयान्तरमिच्छति। अयं त्वाचार्यो न रूपायतनमवश्यं तस्यैव कर्मणो विपाक इत्यपरं पक्षमवलम्बते। यस्य कायायतनं तस्य त्रीणि, यस्य चक्षुरायतनं तस्य चत्वारीति। न ह्यन्योन्यमविनाभाविनो जीवितनिकायसभागादीन्यावश्यकमेकस्यैव[3] कर्मणो विपाक इत्यभिप्रायः। तावेतौ पक्षौ विभाष्यकारैर्लिखितौ। तयोर्यो यस्मै रोचते, स तेन परिगृह्यते। इत्यलं प्रसङ्गेन।

अथ कथं कस्यचित् कर्मण एकमायतनं विपाको विपच्यते। कस्यचिद् यावदेकादशेत्यत आह। **विचित्राविचित्रफलत्वात् कर्मणो बाह्यबीजवदिति** विस्तरः। **पद्मदाडिमन्यग्रोधादीनां** बीजानि **विचित्रफलानि**। मूलाङ्कुरनालपत्रकेशरकिञ्जल्क[4]कर्णिकारैश्च रूप्यं हि पद्मबीजादीनाम्। अनेकस्कन्धशाखाविटपपत्रपल्लवाङ्कुरपुष्पफलसमृद्धाश्च न्यग्रोधादयः पादपा जलधरायमाना दृश्यन्ते। कानिचिदविचित्रफलानि। **तद्यथा यवगोधूमादीनां** बीजानि। एकरूपफलत्वात्, बीजधर्मतैषा। **एकाध्विकस्य कर्मणोऽतीतस्य त्रैयध्विको विपाको विपच्यते** अतीतप्रत्युत्पन्नानागतः। न तु द्वैयध्विकस्याप्यतीतस्य प्रत्युत्पन्नस्य चैकाध्विकोऽनागतः। **न तु विपर्ययादिति**। बहुक्षणिकस्य कर्मण एकक्षणिकः। मा भूदतिन्यूनं हेतोः फलमिति वर्तते। **न च कर्मणा सह** विपाको विपच्यते। सहोत्पन्ने सहभूसम्प्रयुक्तकहेत्वोर्व्यापारात्, विपाकहेतोश्च विसदृशपाकापेक्षत्वात्। **नाप्यनन्तरं** विपाको विपच्यते। किं कारणम्। **समनन्तरप्रत्ययाकृष्टत्वात् समनन्तरक्षणस्य**। यस्मात् समनन्तरक्षणः समनन्तरप्रत्ययबलेनाकृष्टो न विपाक-

1 A ०त्यय सममेतत्

2 Mss. नास्ति

3 Mss. ०सभागादत्यावश्यमेकस्यैव

4 To. ०केशराकिञ्जल्क

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतुबलेन। यद्यप्यसौ समनन्तरप्रत्ययो विपाकहेतुरित्थं चैतदेव[1]। यस्मात् समनन्तरक्षणो विपाकहेतोः समनन्तरप्रत्ययात् कदाचित् कुशलः कदाचिदकुशलः कदाचिदव्याकृतः। अन्यथा हि अव्याकृत एव स्यात्। अथ वा समनन्तरक्षणस्याविपाकस्वभावस्य समनन्तरप्रत्ययाकृष्टत्वादित्यभिप्रायः। प्रवाहापेक्षो हि विपाकहेतुश्चित्तचैत्तादिप्रवाहे सत्यतिक्रान्ते विपाकहेतुर्विपाकं[2] दद्यात्। धर्मतैषेत्यभिप्रायः ॥५४॥

सर्वत्रगः सभागश्च [3]द्व्यध्वकौ [4]त्र्यध्वकास्त्रयः।
संस्कृतं सविसंयोगं फलं नासंस्कृतस्य ते ॥५५॥

उक्तमेषामर्थतोऽध्वनियम इति। अर्थत उक्तो न शब्दत इत्यर्थः। द्विविधं हि वचनं स्वशब्दाभिहितमर्थोक्तं च। कथम्।

सभागहेतुः सदृशाः स्वनिकायभुवोऽग्रजाः।[5]

तथा

सर्वत्रगाख्यः क्लिष्टानां स्वभूमौ पूर्वसर्वगाः[6]

इति वचनात्। सभागसर्वत्रगहेतू अतीतप्रत्युत्पन्नावेव स्तो नानागतौ। अविशेषवचनादेव सहभूसम्प्रयुक्तकविपाकहेतवस्त्रैयध्विका इत्यर्थत उक्ताः। सभागसर्वत्रगहेतू एव हि पूर्वोत्पन्नौ। पूर्वोत्पन्नावेव च तावित्यवधारणात्। परस्परफलत्ववचनात्। चिन्ताद्यकुशलादिस्वाभाव्याच्चैषामनध्वपतितत्वं व्यावर्तितम्। **सूत्र्यत** इति। सूत्रं सूत्री वा क्रियते सूत्रयते। उक्तं **चात्र कारणमिति**। कथमुक्तम्। निष्यन्दफलेन हि सफलः सभागहेतुः। तच्चानागतस्यायुक्तं पूर्वपश्चिमताभावादित्येवमादि। यच्चैतत् कारणमुक्तं सभागहेतोः। सर्वत्रगहेतोरप्युक्तरूपं वेदितव्यम्। सभागहेतुकल्पो हि सर्वत्रगहेतुः। सभागहेतुर्हि क्लिष्टः क्लिष्टानाम्। सर्वत्रगहेतुरपि क्लिष्टः क्लिष्टानामेव। क्लिष्टधर्मसामान्यकारणत्वेन त्वयं सभागहेतोः[7] पृथग्व्यवस्थाप्यत इत्युक्तमेतत्। सभागहेतुवदेव चायं नानागतः। निष्यन्दफलेन च सफल इति। तद्वदेवास्य वार्ता।

त्र्यध्वकास्त्रयः

---

1 Mss. °देवं
2 A विपाकहेतुकं
3 Poussin, Fragment des Kārikā द्व्यध्वगौ
4 Ibid. त्र्यध्वगा°
5 Kārikā, II, 52.
6 Ibid., II, 54.
7 To. °हेतुः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति । त्र्यध्वका एव त्रयस्त्रय एव त्र्यध्वका इत्यवधारणात् । कारणहेतुरन्यथा-भवति । कथं चान्यथा । [1]सर्वाध्वकश्चाध्वविनिर्मुक्तश्चेति । स्वतोऽन्ये हि स्वभाववर्ज्याः सर्वधर्माः कारणहेतुरिति । अत एवमेव भवति नान्यथा ।

हेतुः फलमित्यन्योन्यापेक्षयैतद्द्वयमित्यतः पृच्छति । किं पुनस्तत् फलं यस्यैतद्धेतव इति ।

संस्कृतं[2] सविसंयोगं फलम्

इति । आकाशाप्रतिसंख्यानिरोधवर्ज्याः[3] सर्वधर्माः फलमित्युक्तं भवति ।

एवं तर्हीति विस्तरः । फलत्वादसंस्कृतस्य फलमसंस्कृतमिति कृत्वा हेतुना स्वतोऽन्येनास्य भवितव्यम् । यस्य हेतोस्तदसंस्कृतं फलम् । हेतु-त्वाच्चासंस्कृतस्य स्वतोऽन्येनास्य फलेन[4] भवितव्यम् । यस्य फलस्य तदसंस्कृतं हेतुः । नासंस्कृतस्य ते हेतुफले । असंस्कृतं प्रतिसंख्यानिरोधलक्षणं विसंयोगफलं भवति । न च तस्य हेतुरजन्यत्वात् । हेतुश्च भवति संस्कृतोत्पादाविघ्नभावाव-स्थानात् । न च तस्य फलं व्यवस्थाप्यते । फलप्रतिग्रहणादानासमर्थत्वाच्च । अत एव च षड्विधहेत्वसम्भवादिति[5] विस्तरः । न सहभूहेतुरस्य सम्प्रयुक्तकहेतुर्वा सम्भवति । तेन कस्यचिद् धर्मस्यासहभवत्वात् । असम्प्रयोगाच्च । न सभाग-हेतुरस्य कश्चिद् भवति । असंस्कृतस्यासदृशत्वात् । समानभूमित्वायोगाच्च । अत एव चास्य न सर्वत्रगहेतुः । अस्य चाक्लिष्टत्वात् । न चास्य विपाकहेतुः । असंस्कृतस्याविपाकस्वभावत्वात्[6] । विपाको हि सत्त्वसंख्यातो धातुपतितो धर्मः । अनुत्पाद्यत्वादेव चास्यैते हेतवो न भवन्ति । अनुत्पाद्यत्वादेव चास्य कारणहेतुर्न भवति । अत एवोच्यते । कस्मान्मार्गो विसंयोगस्य कारणहेतुर्नेष्यते । यस्मात् स उत्पादाविघ्न-भावेन व्यवस्थापितः । न चासंस्कृतमुत्पत्तिमदिति । अनध्वपतितत्वाच्चास्य हेतवो न भवन्ति । अध्वपतितस्य हि धर्मस्य हेतुर्व्यवस्थाप्यते । एवं षड्विधहेत्व-सम्भवान्नासंस्कृतस्य हेतुः । पञ्चविधफलासम्भवाच्च नासंस्कृतस्य फलम् ।

---

1 To. सर्वाध्वग०

2 To. संस्कृत-

3 Mss. ०निरोधिवर्ज्याः

4 A & V फले च

5 Mss. ०सम्भवादि

6 Mss. add च.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कस्मात् । सामान्यतस्तावदध्वविनिर्मुक्तस्य फलप्रतिग्रहणदानासमर्थत्वात् । तथा ह्युक्तम् ।

वर्तमानाः फलं पञ्च गृह्णन्ति द्वौ प्रयच्छतः[1]

इत्येवमादि । किञ्च न तावदधिपतिफलं भवति । तद्धि सहोत्पन्नं पश्चादुत्पन्नं चेष्यते ।

अपूर्वः संस्कृतस्यैव संस्कृतोऽधिपतेः फलम्[2]

इति । तच्चानुत्पत्तिमदिति नास्य सहजं पश्चाज्जातं वा फलं भवति । अनुत्पत्तिमत्त्वादेव । न च निष्यन्दफलम् । उत्पत्तिमतो हि सदृशो धर्म उत्पत्तिमान् निष्यन्दफलम् । अत एव च न पुरुषकारफलमसंस्कृतस्य पुरुषकाराभावात्[3] । यस्य हि बलेन य उत्पद्यते प्राप्यते वा स तस्य पुरुषकारफलम् । अत एव च न विसंयोगफलम् । मार्गस्यैव हि बलेन विसंयोगः प्राप्यः[4] । न चासंस्कृतो मार्ग इति । न चापि विपाकफलम् । विपाकहेतुवैधर्म्यात् । सास्रवो हि विपाकहेतुः । न चासंस्कृतं सास्रवमिति । अथ वा पञ्चविधहेतुवैधर्म्यात् पञ्चविधफलासम्भव इति नासंस्कृतस्य फलं सम्भवति । यदि मार्गो विसंयोगस्य कारणहेतुर्नेष्यते कस्येदानीं तत् फलम् । हेतुमता हि फलेन भवितव्यं कथं वा केन वा प्रकारेण तत् फलम् । आह । यत्तावदुक्तं कस्येदानीं तत् फलमिति । मार्गस्य । यदप्युक्तं कथं वा तत् फलमिति । फलं तद्बलेन मार्गबलेन प्राप्तेरित्यर्थः । अथ वैवं पदसम्बन्धः । कस्य तत् फलमिति । मार्गस्य तत् फलम् । कथं वा तत्फलमिति । तद्बलेन प्राप्तेरिति । प्राप्तिरेव तर्हि मार्गस्य फलं प्राप्नोति । तस्यामेव प्राप्तौ तस्य मार्गस्य सामर्थ्यान्न विसंयोगः । किम् । मार्गस्य फलमित्यधिकृतम् । तत्रासामर्थ्यादिति । एवं तत्र विसंयोगे मार्गस्यासामर्थ्यादित्यर्थः । तस्मान्न च तावदस्य मार्गः कथञ्चिदपि हेतुः । षण्णां हेतूनामन्यतमोऽपि हेतुरस्य मार्गो न भवति । फलं चास्य विसंयोगः । प्राप्यं फलं न जन्यमित्यभिप्रायः । पञ्चविधो हि हेतुरिति केचिदिच्छन्ति । कारको ज्ञापको व्यञ्जको ध्वंसकः प्रापकश्चेति । कारको हेतुर्बीजमङ्कुरस्य । ज्ञापको धूमोऽग्नेः । व्यञ्जको दीपो घटस्य ।

1 Kārikā, II, 59.
2 Ibid. II, 58.
3 Mss. add च.
4 Mss. प्राप्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ध्वंसको मुद्गरो घटस्य । प्रापको रथो देशान्तरप्रापणीयस्येति । तदेवं मार्गः प्रापकोऽस्य । न जनको हेतुः । प्राप्यं च विसंयोगफलं न जन्यमिति दर्शितं भवति । **अथासत्यधिपतिफल** इति विस्तरः । असंस्कृतस्य यदि फलं स्याद-धिपतिफलं स्यात् । तस्य कारणहेतुत्वेन व्यवस्थापनात् ।

नासंस्कृतस्य ते

इति वचनात्तदप्यस्य निवारितमिति परिच्छिन्ने चोदकः पृच्छति । अथासत्यधिपतिफले **कथमसंस्कृतं कारणहेतुः । उत्पत्त्यनावरणभावेन कारण-हेतुः** । उत्पत्त्यनावरणभाववचनात् । संस्कृतमेव प्रतीदमसंस्कृतं कारणहेतुर्व्य-वस्थाप्यते । नासंस्कृतं प्रतीति दर्शितं भवति । कस्मादस्य संस्कृतवत् फलं न व्यवस्थाप्यत इत्यत आह । **न चास्य फलमस्ति । अध्वविनिर्मुक्तस्य फलप्रति-ग्रहणदानासमर्थत्वादिति** । अध्वसंगृहीतस्यैव हि धर्मस्य फलप्रतिग्रहणदान-सामर्थ्यमस्ति । नान्यस्य । वक्ष्यति हि

वर्तमानाः फलं पञ्च गृह्णन्ति द्वौ प्रयच्छतः[1]

इति । **उक्तं तु पर्यायेण हेतुरिति** । पर्यायेणोक्तं न स्वशब्देनेत्यर्थः ।

तेऽप्यनित्या इति । तेऽप्यनित्या एवेत्यवधारणादर्थान्न नित्यो[2] हेतुरित्युक्तं भवति । **आलम्बनप्रत्ययोऽपीति**[3] । यथा हेतवोऽत्रानित्या उक्ताः । एवं प्रत्यया अप्यनित्या एवोक्ता ये हेतवो ये प्रत्यया इति वचनात् । तस्मादसंस्कृतमालम्बन-प्रत्ययो न प्राप्नोति । **उत्पादायेत्यवधारणादिति** । ये हेतवो ये प्रत्यया रूपस्योत्पादाय तेऽप्यनित्याः । न तु येऽनुत्पादाय । द्विविधा हि प्रत्ययाः । जनकाश्चाजनकाश्च । आलम्बनप्रत्ययश्चाजनक आलम्बनमात्रत्वात् । आलम्बन-प्रत्ययो हि निरुध्यमाने धर्मे कारित्रं करोति । वर्तमानैश्चित्तचैत्तैर्ग्रहणात् ।

निरुध्यमाने कारित्रं द्वौ हेतू कुरुतः[4]

इति वचनात् । **ननु च हेतवोऽपीति** विस्तरः । हेतुरपि जनकश्चाजनकश्च । तस्मादसंस्कृतस्यानावरणभावमात्रेणाजनकस्यापि कारणहेतुत्वाप्रतिषेधः । **उक्त आलम्बनप्रत्ययः सूत्र** इति । चतस्रः प्रत्ययता इत्यत्र सूत्रे । **न तु प्रतिषिद्धः** । धर्मताया अविरोधान्न दोष इत्यभिप्रायः । **सूत्राणि च बहून्यन्तर्हितानि** । मूलसङ्गीतिभ्रंशात् । अत्राचार्यो न निर्बन्धं करोति । धर्मताविरोधो नास्तीति । किन्तु असंस्कृतमेव विचार्यतेऽस्ति वा न वेति ।

---

1 Kārikā, II, 59.

2 Mss. नित्या

3 Mss. ०प्रत्ययापीति

4 Kārikā, II, 63.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वमेवासंस्कृतमिति। न केवलं प्रतिसंख्यानिरोधः। **रूपवेदनादिव**दिति। आदिशब्देन संज्ञादीनां ग्रहणम्। यथा रूपाद् वेदनाभावान्तरं वेदनायाश्च संज्ञा यावत् संस्कारेभ्यो विज्ञानम्। तथा न रूपादिभ्यः पञ्चभ्योऽसंस्कृतं भावान्तरमस्ति। अतो नासंस्कृतं द्रव्यमिति सौत्रान्तिकाः। **स्प्रष्टव्याभावमात्र**मिति। सप्रतिघद्रव्याभावमात्रमित्यर्थः। **अविन्दन्त** इत्यलभमानाः। **उत्पन्नानुशयजन्मनिरोधे** उत्पन्नानामनुशयानां जन्मनश्च निरोधे **प्रतिसंख्याबलेन** प्रज्ञाबलेन **अन्यस्यानुशयस्य जन्मनश्चानुत्पादः प्रतिसंख्यानिरोधः।** तदेवमनुशयनिरोधः समुदयसत्यनिरोधो जन्मनिरोधो दुःखसत्यनिरोध इत्युक्तं भवति। सोपधिशेषनिरुपधिशेषनिर्वाणव्यवस्थापनार्थं चोभयनिरोधवचनम्। सौत्रान्तिकनयेन केऽनुशयाः। कथं च तेषां जन्मनश्च प्रतिसंख्याबलेन निरोधः। अष्टानवतेरनुशयानां वासनानुशयः। यस्य चानुशयस्य यः प्रतिपक्षो मार्गः प्रतिसंख्या तेन[1] सह प्रथमे क्षणे सोऽनुशय उत्पद्यते। तद्बलाद् द्वितीयादिषु क्षणेषु तस्य निरोधः। तद्बलादेव च पौनर्भविकस्य जन्मनोऽप्रतिसन्धिको निरोधः। **तद्यथा निकायसभागशेषस्ये**ति विस्तरः। निकायसभागो मनुष्यत्वादिलक्षणः। आत्मभावो वा पञ्चस्कन्धलक्षणः। तस्य शेषस्तल्लक्षण एवोत्पद्यमानः। तस्य निकायसभागशेषस्या**न्तरामरणे** आयुष्यपरिसमाप्त एव **प्रत्ययवैकल्याद् योऽनुत्पादः सोऽप्रतिसंख्यानिरोधः।** प्रत्ययवैकल्यं पुनरन्त्यानां स्कन्धानां मरणभवाख्यानां निकायसभागसम्बन्धने यदसामर्थ्यमुपकरणादिप्रत्ययासामग्र्यात्। **अतोऽसौ प्रतिसंख्यानिरोध** इति। सोपधिशेषो निर्वाणधातुः। **दुःखस्यानुत्पाद** इति निरुपधिशेषः। सोऽपि तु दुःखस्यानुत्पादो योऽप्रतिसंख्यानिरोध इत्युक्तः। **नान्तरेण प्रतिसंख्यां सिध्यति**। उत्पत्तिकारणानुशयवैकल्यस्य प्रतिसंख्यानकृतत्वात्। अतः प्रतिसंख्यानिरोध एवासौ। **स्वरसं निरोधा**दिति। स्वात्मना निरोधान्न प्रज्ञासामर्थ्येनेत्यर्थः। **अविनष्टे तद्भावा**दिति। अविनष्टे तस्मिन्ननुशये तस्याप्रतिसंख्यानिरोधस्याभावात्। **अकुतोत्पत्तिप्रतिबन्धाना**मिति। अकुत उत्पत्तौ प्रतिबन्ध एषामित्यकुतोत्पत्तिप्रतिबन्धाः। तेषाम्। य उत्पत्तिप्रतिबन्धभावः। **एतदत्र प्रप्रिसंख्यायाः सामर्थ्यम्। यदि तर्ह्यनुत्पाद एवे**ति विस्तरः। प्रहाणं हि निर्वाणमभिप्रेतम्।

---

1 Mss. अनेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनागतस्यैव चानुत्पाद इति यदि निर्वाणमुच्यते । अतीतप्रत्युत्पन्नस्योत्पन्नत्वान्नास्त्यनुत्पाद इति **कथमिदमुक्तं सूत्रे । अतीतानागतप्रत्युत्पन्नस्य दुःखस्य प्रहाणाय संवर्तन्त** इति तत् सूत्रपदं कथं नीयते । यस्य पुनर्द्रव्यान्तरं निर्वाणं तस्यातीतप्रत्युत्पन्नयोरपि तदासेवनादिभिर्निर्वाणं प्राप्यत इति सुनीतमिदं सूत्रं भवतीति । **तदालम्बनक्लेशप्रहाणादिति ।** अतीतप्रत्युत्पन्नदुःखालम्बनक्लेशप्रहाणादित्यर्थः । **यो रूपे च्छन्दराग इति ।** छन्दोऽनागतेऽर्थे प्रार्थना । रागस्तु प्राप्तेऽर्थेऽध्यवसानम् । **विस्तरेण यावद् विज्ञानमिति ।** यो वेदनायां संज्ञायां संस्कारेषु विज्ञाने च्छन्दरागस्तं प्रजहीत । छन्दरागे प्रहीणे एवं वस्तद्विज्ञानं प्रहीणं भविष्यति । **एवं त्रैयध्विकस्यापि[1] दुःखस्येति ।** छन्दरागप्रहाणमेव रूपादिदुःखप्रहाणम् । तस्य चानागतस्य च्छन्दरागस्यानुत्पादो भवति । अतस्त्रैयध्विकस्यापि[2] दुःखस्य प्रहाणं युज्यत इति दर्शयति । **एष एव नय इति ।** यद्यतीतानागतप्रत्युत्पन्नस्य क्लेशस्य प्रहाणायेति पाठस्तत्राप्येष एव नय इति । यः क्लेशो रागे द्वेषे वा च्छन्दरागस्तं प्रजहीतेति विस्तरः । तदालम्बनक्लेशप्रहाणादपि क्लेशस्य प्रहाणम् । न स्वभावत एवेति त्रैयध्विकस्यापि क्लेशस्य प्रहाणं युज्यत इत्यर्थः । **अथवेति[3]** विस्तरः । पूर्वजन्मनि भवः **पौर्वजन्मिकः** । इहजन्मनि भव **ऐहजन्मिकः** । तदेवमैकक्षणिकः क्लेशः पर्युदस्तो भवति । कथमेतत् प्रत्येतव्यम् । पौर्वजन्मिकः सर्वक्लेशः सम्बध्यते ऐहजन्मिकश्च । न पुनरैकक्षणिक इत्यत आह । [4]अन्यत्राप्येवंदर्शनादेवं प्रत्येतव्यम्[4] । **यथा तृष्णाविचरितेष्विति** विस्तरः । अष्टादश तृष्णाविचरितानि कथमतीतेऽध्वन्येकस्मिन् क्षणे योज्यन्त इत्यतोऽतीतं **जन्माधिकृत्योक्तम्** । अष्टादश तृष्णाविचरितानि । अस्मीति भिक्षवः सतीत्थमस्मीति भवति । एवमस्मीत्यन्यथास्मीति सदस्मीत्यसदस्मीति भवति । भविष्यामीत्यस्य भवति । न भविष्यामीत्थं भविष्याम्येवं भविष्याम्यन्यथा भविष्यामीत्यस्य भवति । स्यामित्यस्य भवति । इत्थं स्यामेवं स्यामन्यथा स्यामित्यस्य भवति । अपि स्यामित्यस्य भवति । अपीत्थं स्यामप्येवं स्यामप्यन्यथा स्यामित्यस्य भवति । **एवं यावत् प्रत्युत्पन्नम्** । तथेहापि पौर्वजन्मिकः कृत्स्नः क्लेशप्रवाह ऐहजन्मिकश्च सम्बध्यते नैकक्षणिक इति । तदेवं प्रसाध्यताभिप्रायं ब्रवीति । **तेन च**

---

1 To. त्रियध्विकस्यापि

2 Mss. & To. अतस्त्रियध्विकस्यापि

3 A अथ चेति

4...4 The sentence has been printed in To. after the next sentence यथा...विस्तरः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्लेशद्वयेनेति विस्तरः। पौर्वजन्मिकेनैहजन्मिकेन चेति क्लेशद्वयेनास्यां सन्ततौ प्रत्युत्पन्नायां बीजभावो वासनालक्षणं सामर्थ्यमाहितोऽनागतेऽस्योत्पत्तये। तस्य बीजभावस्य प्रहाणात्तदपि क्लेशद्वयं प्रहीणं भवति। यथा विपाकक्षयाद् विपाकोपभोगात्[1] कर्म क्षीणं भवतीत्युपचर्यते। तद्वत्। अनागतस्य तर्हि कथं प्रहाणं व्यवस्थाप्यते। न हि तेन सन्ततौ बीजभाव आहितो यस्य प्रहाणात् प्रहाणं भवेदित्यत आह। अनागतस्य पुनर्दुःखस्य क्लेशस्य वा बीजाभावादत्यन्तमनुत्पादः प्रहाणमिति। बीजाभावश्च प्रतिसंख्याबलेन भवति। न हि निरुद्धेऽतीते निरोधाभिमुखे च प्रत्युत्पन्ने यत्नः प्रतिपक्षोत्पादने यत्नः सार्थकः सप्रयोजनमित्यर्थः। विरागस्तेषामग्र इति। रागक्षयो विरागः प्रतिसंख्यानिरोध इत्यर्थः। कथमसतामसन्नग्रो भवितुमर्हतीति। कथमसतामाकाशादीनामसंस्कृतानामसन्नसंस्कृतो विरागोऽग्रो भवितुमर्हतीति। अस्योत्तरं ब्रवीति। अभावोऽपि कश्चिदिति विस्तरः। द्वितीयस्य चेति। द्वितीयस्य समुदयसत्यस्यानन्तरं दृष्टं स्वयं प्रज्ञया उद्दिष्टं परेभ्यो देशनया त्रयाणां पूरणं तृतीयं भवति। किं स्यादिति। को दोषः स्यादित्यर्थः। किञ्च पुनः स्यादिति। को गुणः स्यादित्यर्थः। किञ्च पुनः स्यादिति गुणपरिप्रश्न आह। वैभाषिकपक्षः पालितः स्यादिति। यत्तूक्तं किं स्यात् को दोषः स्यादित्यत्रोच्यते। अभूतं तु परिकल्पितं स्यादिति। दोषः स्यादित्यर्थः। रूपवेदनादिवदिति। प्रत्यक्षतः। चक्षुरादिवदिति। कर्मतोऽनुमानत इत्यर्थः। असकृद् [2]व्याख्यातमेतत्। वस्तुन इति। रागादिवस्तुनः। हेतुफलादिभावासम्भवादिति। आदिशब्देन स्वस्वाम्यवयवावयविसम्बन्धादयो गृह्यन्ते। न हि वस्तुनो निरोधे[3] हेतुः फलमवयवावयवीत्येवमादि। तस्यैतर्हि प्राप्तिनियम[4] इति विस्तरः। तस्य निरोधस्य योऽयं प्राप्तेर्नियमः। अस्यैव निरोधस्य प्राप्तिर्नान्यस्येति तस्मिन् प्राप्तिनियमे को हेतुः। न हि निरोधस्य प्राप्त्या सार्धं कश्चित् सम्बन्धोऽस्ति हेतुफलादिभावासम्भवात्। [5]दृष्टधर्मनिर्वाणप्राप्त

---

1 A & V विपाकोपयोगात्
2 Mss. व्याख्यानमेतत्
3 A निरोधो ; Mss. निरोध्यं
4 V प्राप्तिर्नियम
5 V दृष्टिधर्म०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति। प्रत्यक्षे जन्मनि निर्वाणप्राप्तः[1] सोपधिशेषनिर्वाणस्थ इत्यर्थः। **यद्यभावः कथमस्य प्राप्तिः स्यात्** । प्रतिपक्षलाभेनेति विस्तरः। आर्यमार्गलाभेन **क्लेशस्य पुनर्भवस्य चोत्पादेऽत्यन्तविरुद्धस्याश्रयस्य लाभात् प्राप्तं निर्वाणमित्युच्यते**। **अभावमात्रत्वमिति**। मात्रशब्दो द्रव्यान्तरत्वनिवृत्त्यर्थः। **यत् खल्वस्येति** विस्तरः। **प्रहाणं यावदप्रादुर्भाव** इति पर्यायशब्दा एते। अप्रादुर्भाव इत्येतत् स्फुटमित्युदाहरणमुक्तम्। **नास्मिन् प्रादुर्भाव इत्यतोऽप्रादुर्भाव** इत्यधिकरणसाधनमिति दर्शयन्ति। न तु अप्रादुर्भूतिरप्रादुर्भाव इति भावसाधनमित्यर्थः। **यत एव तत्प्राप्तिः परिकल्प्यते** यतो मार्गात् प्रहाणप्राप्तः[2] परिकल्प्यते। **तस्मिन् सति मार्गे प्राप्ते वा दुःखस्येष्यतामप्रादुर्भावः**। किमन्येन निर्वाणेन परिकल्पितेन। **विमोक्षस्तस्य चेतस** इति। निरुपधिशेषनिर्वाणकाले भगवतः। **यथावस्तु** यथालम्बनम्। **संयोगस्य वस्तु** यत्र क्लेशेन संयुज्यते। **सवस्तुका धर्मा** इति सहेतुकाः। **परिग्रहवस्तु**। परिगृह्यत इति परिग्रहः। स एव वस्तु परिग्रहवस्तु ॥५५॥

[विपाकः फलमन्त्यस्य पूर्वस्याधिपजं[3] फलम्।
सभागसर्वत्रगयोर्निष्यन्दः पौरुषं द्वयोः ॥५६॥]

अन्तेऽभिहितत्वादिति। कारिकाया अन्ते विपाकहेतुः पठितः। तस्य विपाकफलमेव। पूर्वः कारणहेतुः श्लोकादौ पठितत्वात्। तस्य

अधिपजं फलम्।

अधिपतिरधिपः। तस्माज्जातमधिपजम्। अधिपतिफलमित्यर्थः। पूर्वस्याधिपतमिति केचित् पठन्ति। अधिपतेरिदं फलमाधिपतमिति। आधिपत्यमिति तु प्राप्नोति। दित्यदित्यादित्यपत्युत्तरपदाण्ण्य[4] इत्यपवादात्। अथापवादविषयेऽप्युत्सर्गसमावेश इति भवेत्। भवेदेतद्रूपम्[5]। **एतदेवाधिपत्यमिति**। यदनावरणभावमात्रावस्थानम्। **अङ्गीभावोऽपि वास्तीति**। प्रधानभावोऽपि जनकभावोऽपीत्यर्थः। तदनेन द्विविधस्यापि कारणहेतोः कारकस्य वाऽभ्युपेक्षकस्य वाधिपतिफलमस्तीति दर्शितं भवत्यन्यत्रासंस्कृतात्। यस्माद् वक्ष्यति।

1 To. omits it. ; C adds इत्यर्थः

2 To. प्रहाणः प्राप्तः

3 Poussin, Fragment des kārikās °धिपतं

4 Pā., IV, 1, 85.

5 To. भवेच्च तद्रूपम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपूर्वः संस्कृतस्यैव संस्कृतोऽधिपतेः फलम्[1]

इति। **दशानामायतनानामिति**। चक्षूरूपायतनयोर्यावत् कायस्प्रष्टव्यायतनयोः। चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानं यावत् कायं प्रतीत्य स्प्रष्टव्यानि चोत्पद्यते कायविज्ञानमिति वचनात्। कारणहेतुरेव चायम्। न हि चक्षुरादीन्यायतनानि चक्षुर्विज्ञानादीनां सहभूहेत्वादयः पञ्च हेतवः सम्भवन्ति। मनआयतनं तु मनोविज्ञानस्य सभागहेत्वादि सम्भवति। धर्मायतनमपि सहभूसम्प्रयुक्तकहेत्वादि सम्भवतीति न कारणहेतुरेवेत्यवधार्यते। तस्माद् दशानामित्युक्तं न द्वादशानामिति। **भाजनलोके च कर्मणाम्**। किम्। **अङ्गीभात्रोऽस्ति**। कारणहेतोरित्यधिकृतम्। भाजनलोको हि कुशलाकुशलकर्मजनितोऽप्यव्याकृतोऽपि न विपाकफलमिष्यते। सत्त्वाख्यो विपाक इति[2] लक्षणात्। तस्मात् कारणहेतोरेतदधिपतिफलम्। **श्रोत्रादीनामपि**। न केवलं चक्षुषोऽस्ति। किम्। **चक्षुर्विज्ञानस्योत्पत्तौ पारम्पर्येणाधिपत्यम्**। न साक्षाद् यथा चक्षुषः। कथं ज्ञायत इत्याह। **श्रुत्वा द्रष्टुकामतोत्पत्तेः**। द्रष्टुकामतायां च चक्षुर्विज्ञानमुत्पद्यत इत्यभिप्रायः। **एवमादि योज्यमिति**। घ्रात्वा द्रष्टुकामतोत्पत्तेरित्यादि योज्यम्।

सभागसर्वत्रगयोर्निष्यन्दः।

फलमिति वर्तते। सभागसर्वत्रगहेत्वोरेव निष्यन्दफलमित्यवधार्यते। पुरुषकारफलमपि हि तयोरनन्तरं सम्भवति।

पौरुषं द्वयोः

इति। **पुरुषकारफलमेव सहभूसम्प्रयुक्तकहेत्वोरित्यवधारणम्**। पुरुषकारस्य फलं पौरुषम्। पुरुषकारफलमित्यर्थः। **पुरुषभावाव्यतिरेकात् पुरुषकारः** पुरुषभावान्न व्यतिरिक्तः। पुरुषकर्मैव हि पुरुषकारो न पुरुषादन्यः। न हि कर्म कर्मवद्भ्योऽन्यदिष्यते बौद्धैः। तस्मात् पुरुषकारस्य यत् फलं तत् पुरुषस्यैवेति पौरुषमित्युच्यते। **यस्य धर्मस्य यत् कारित्रमिति**। यस्य धर्मस्य यत् कर्म या क्रिया सा तस्य पुरुषकार इत्यर्थः। ननु चान्तर्व्यापारपुरुषाभावे धर्ममात्रं पुरुष इत्यतो धर्मकार इति प्राप्नोति। न पुरुषकार इत्यत आह। **पुरुषकार इव हि पुरुषकारः**। यथा लोके कल्पितस्य पुरुषस्य

1 Kārikā, II, 58.

2 See Kārikā, II, 57

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुरुषकार एवं धर्मस्यापीति पुरुषकार इव पुरुषकारः। दृष्टान्तं कथयति काकजङ्घा ओषधिरित्यादि। काकजङ्घाकारा ओषधिः काकजङ्घेत्युच्यते। मत्तहस्तीव यो दृष्टः शूरो वा स मनुष्यो मत्तहस्तीति। किमन्येषामिति। हेतूनाम्। अन्येषामप्यस्तीति। सभागसर्वत्रगकारणहेतूनाम्। अन्यत्र विपाकहेतोः। कस्मादित्याह यस्मात् सहोत्पन्नं समनन्तरोत्पन्नं वा पुरुषकारफलमिति। सहभूसम्प्रयुक्तकहेत्वोर्हि सहोत्पन्नं फलमुक्तम्। तच्च पुरुषकारफलमेव। न ह्यन्यत् फलं सहोत्पन्नमस्ति। सभागसर्वत्रगहेत्वोरनन्तरोत्पन्नमेव पुरुषकारफलम्। कारणहेतोस्तूभयथा। किं पुनर्निष्यन्दफलादधिपतिफलाद् वान्यत् पुरुषकारफलम्। नेत्युच्यते। तदेव हि फलं तत्तन्नाम लभते। तथा हि तद्धेतुसदृशोत्पत्तेर्निष्यन्दफलम्। तद्बलेनोत्पत्तेः पुरुषकारफलम्। अविघ्नभावावस्थानेनोत्पत्तेश्चाधिपतिफलमिति। न चैव विपाकः। किम्। सहोत्पन्नो वा समनन्तरोत्पन्नो वेत्यधिकृतम् ॥५६॥

[विपाकोऽव्याकृतो धर्मः सत्त्वाख्यो व्याकृतोद्भवः।
निष्यन्दो हेतुसदृशो विसंयोगः क्षयो धिया ॥५७॥]

विपाकोऽव्याकृतो धर्मः

इति विस्तरः। अव्याकृत एव सत्त्वाख्य एव व्याकृतोद्भव एवेत्यवधारणम्। अव्याकृत इति अनिवृताव्याकृतो विवक्षितः। सत्त्व इति आख्या यस्य सः

सत्त्वाख्यः।

सत्त्वसन्तानज इत्यर्थः। व्याकृतादुद्भवतीति

व्याकृतोद्भवः।

औपचयिकनैष्यन्दिकौ तु न व्याकृतादुद्भवतः। ननु च इन्द्रियमहाभूतोपचया ध्यानविशेषसमापन्नस्य भवति असावपि व्याकृतादुद्भवति स विपाकः प्राप्नोति निर्माणचित्तं चापि तथैव समाधिचित्तसम्भूतत्वात्। नैष दोषः। व्याकृतोद्भव इत्युच्छब्द उत्तरकालार्थः। व्याकृतात् कुशलादकुशलाद्वा य उत्तरकालमेव भवति न युगपन्नाप्यनन्तरं स विपाक इति। समाधिजस्तूपचयः समाधिना सह चानन्तरञ्च भवति। निर्माणचित्तं त्वनन्तरमेव च भवति। विपाकश्च समानभूमिक एवाभिप्रेत इत्येतच्चोभयं भिन्नभूमिकमपि भवतीति न विपाकस्य प्रसङ्गः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निष्यन्दो हेतुसदृशः

इति । कुशलक्लिष्टानिवृताव्याकृतसादृश्यमधिकृत्य । यद्येवम् ' कुशलसास्रवस्य हेतोरनास्रवं निष्यन्दफलं प्राप्नोति कुशलसादृश्यात् । न ' निकायसादृश्याभावात् । समाननिकायो हि सभागहेतुरिष्यते ' न सर्वः । **भूमितः क्लिष्टतया चास्य सादृश्यमिति** । अस्य सर्वत्रगहेतोः सादृश्यं भूमितः क्लिष्टतया च । केन सह । स्वफलेन । कथमिति । भूमितस्तावत् सर्वत्रगहेतुः कामावचरो यावद्भावाग्रिकः[1] । तत्फलमपि कामावचरं [2]यावद्भावाग्रिकमिति । क्लिष्टतया च सर्वत्रगहेतुरपि क्लिष्टः ' तत्फलमपि क्लिष्टम् । **न तु प्रकारतः** सादृश्यं यथा सभागहेतोः । **यस्य तु प्रकारतोऽपि सादृश्यम्** । यस्य सर्वत्रगहेतोः स्वफलेन सह प्रकारतोऽपि सादृश्यम् ' स सर्वत्रगहेतु**रभ्युपगम्यत एव सभागहेतुरिति** । भूमिक्लिष्टत्वसादृश्याद्धि सर्वत्रगहेतुर्भवति ' सभागहेतुश्च स भवति प्रकारतोऽपि सादृश्यात् । **अत एव चतुष्कोटिकः क्रियते** । उभयस्वभावतया तृतीयकोटिसम्भवात् । **प्रथमा कोटिरसर्वत्रगः सभागहेतुरिति** । रागादिकः सभागहेतुः । स हि सभागहेतुरेव स्वनैकायिकस्य क्लेशस्य ' न तु सर्वत्रगहेतुरसर्वत्रगस्वभावत्वात् । **द्वितीयान्यनैकायिकः सर्वत्रगहेतुरिति** । सत्कायदृष्ट्यादिकः सर्वत्रगः । स हि सर्वत्रगहेतुरेव सर्वत्रगस्वभावत्वात् ' अन्यनैकायिकक्लिष्टहेतुत्वाच्च । न सभागहेतुः ' अन्यनैकायिके क्लिष्टे सभागहेतुत्वाभावात् । **तृतीयैकनैकायिकः सर्वत्रगहेतुरिति** । सत्कायदृष्ट्यादिकः सर्वत्रगः । स ह्येकनैकायिकस्य क्लेशस्य सभागहेतुः ' एकनैकायिकक्लिष्टसादृश्यात् । सर्वत्रगहेतुश्च सः ' तस्य सर्वत्रगत्वादेकनैकायिकक्लिष्टहेतुत्वयोगेन सर्वत्रगहेतुत्वयोगाच्च । **चतुर्थ्येतानाकारान् स्थापयित्वेति** । त्रिकोट्युक्तां धर्मप्रकारां वर्जयित्वेत्यर्थः । तद्यथा क्लिष्टा धर्माः कुशलानां न सभागहेतुरसादृश्यात् । न सर्वत्रगहेतुरत एव कुशलानां चाक्लिष्टत्वात् ' एवं कुशलाः क्लिष्टानां योज्यम् । क्लिष्टा अपि क्लिष्टानां न सभागहेतुः ' नापि सर्वत्रगहेतुर्भवन्ति । तद्यथा रागादयोऽन्यनैकायिकानां क्लिष्टानां न सभागहेतुरन्यनैकायिकत्वात् ' न सर्वत्रगहेतुरसर्वत्रगत्वाद् रागादीनामिति । सर्वत्रगा अपि धर्माः क्लिष्टानामेक-

---

1 & 2 Mss. यावद्भवा०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नैकायिकानामपि न सभागहेतुर्न सर्वत्रगहेतुः। यद्यनागतास्ते भवन्तीति योज्यम्।

विसंयोगः क्षयो धिया

इति। धिया प्राप्यमाणो निरोधो विसंयोगफलमित्यर्थः। तेनेति। तेन कारणेन। यस्मात् क्षयो निरोधः। धीः प्रज्ञा। तेन कारणेन प्रतिसंख्यानिरोधो विसंयोगफलमित्युक्तं भवतीत्याचष्टे ॥५७॥

[यद्बलाज्जायते यत्तत् फलं पुरुषकारजम्।
अपूर्वः संस्कृतस्यैव संस्कृतोऽधिपतेः फलम् ॥५८॥]

यद्बलाज्जायते

इति विस्तरः। यस्य बलं यद्बलमिति षष्ठीसमासः। यस्य बलाज्जायते

यत्

संस्कृतम्।

तत् फलम्

तस्य

पुरुषकारजम्।

पुरुषकाराज्जातं पुरुषकारजं पुरुषकारफलमित्यर्थः। उदाहरणं कथयति। तद्यथा अधरभूमिकस्य कामावचरस्य प्रथमध्यानभूमिकस्य वा तत्प्रयोगचित्तस्योपरिभूमिकः प्रथमध्यानभूमिको द्वितीयध्यानभूमिको वा समाधिः। फलं पुरुषकारजमित्यधिकृतम्। सास्रवस्य धर्मस्यानास्रवः। ध्यानचित्तस्य निर्माणचित्तं तदेव फलं भवति। आदिशब्देनान्यदपि। तद्यथा कामावचरान्मरणचित्ताद्रूपावचरः प्रथमोऽन्तराभवक्षण इत्येवमादि विजातीयोदाहरणं निष्यन्दफलविवेचनार्थम्। अधरभूमिकस्य हि प्रयोगचित्तस्योपरिभूमिकः समाधिर्न निष्यन्दफलम्। भिन्नभूमिकं हि न हेतुसदृशम्। नापि सास्रवस्यानास्रवमिति वक्तव्यम्। न तु सर्वं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निष्यन्दफलं पुरुषकारफलं भवति। यद्धि यस्य बलाज्जायते सदृशं समानभूमिकमनन्तरं च भवति। तत्तस्य पुरुषकारफलं निष्यन्दफलं च भवति। चतुःकोटिकं चात्र भवति। अस्ति पुरुषकारफलमेव न निष्यन्दफलम्। यथोदाहृतम्। अस्ति निष्यन्दफलमेव न पुरुषकारफलम्। सभागसर्वत्रगहेत्वोर्व्यवहितं फलम्। अस्त्युभयम्। समनन्तरोत्पन्नं सभागसर्वत्रगहेत्वोः फलम्। अस्ति नोभयम्। तद्यथा विपाकहेतोर्विपाकफलम्। प्रतिसंख्यानिरोधोऽपि पुरुषकारफलमिष्यते। न चासौ हेतुबलाज्जायते नित्यत्वादित्यतः कारिकायामनुक्तं तदुपसंचष्टे। **प्रतिसंख्यानिरोधस्तु यद्बलात् प्राप्यत इति** वक्तव्यमिति। प्रतिसंख्याबलेन हि प्रतिसंख्यानिरोधः प्राप्यते। तस्मात् स प्रतिसंख्यायाः पुरुषकारफलं भवति।

अपूर्वः

इति विस्तरः। अपूर्वः **पूर्वोत्पन्नादन्यः**। कः पुनरसौ। सहोत्पन्नः पश्चादुत्पन्नश्च। न हि पूर्वं फलं पश्चाद्धेतुर्भवति। **संस्कृत एव धर्मोऽधिपतिफलं** नासंस्कृतः। संस्कृतस्यैव नासंस्कृतस्य फलप्रतिग्रहणदानासमर्थत्वात्। **सर्वस्येति**। जनकस्याविघ्नभावावस्थायिनश्च। **कर्तुः पुरुषकारफलमिति**।

यद्बलाज्जायते यत्तत् फलं पुरुषकारजम्

इति वचनात्। **अकर्तुरप्यधिपतिफलमिति**।

अपूर्वः संस्कृतस्यैव संस्कृतोऽधिपतेः फलम्

इति वचनात्। **अन्येषामधिपतिफलमेवेति**। अशिल्पिनामविघ्नभावावस्थायिनां तच्छिल्पमधिपतिफलमेव न पुरुषकारफलम्। तदेवं चतुःकोटिकं भवति। अस्ति पुरुषकारफलमेव नाधिपतिफलम्। तद्यथा विसंयोगफलम्। अस्त्यधिपतिफलमेव न पुरुषकारफलम्। उदासीनस्य हेतोर्व्यवहितश्च फलम्। अस्त्युभयम्। सहोत्पन्नानन्तरोत्पन्नश्च कारकस्य हेतोः। अस्ति नोभयम्। तद्यथा आकाशमप्रतिसंख्यानिरोधश्चेति ॥५८॥

[वर्तमानाः फलं पञ्च गृह्णन्ति द्वौ प्रयच्छतः।

वर्तमानाभ्यतीतौ द्वावेकोऽतीतः प्रयच्छति ॥५९॥]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वर्तमानाः फलं पञ्च

इति। वर्तमाना एव फलं

गृह्णन्ति

इत्यवधारणम्। **प्रतिगृह्णन्तीति**। आक्षिपन्ति हेतुभावेनावतिष्ठन्त इत्यर्थः। **कारणहेतुरप्येवमिति**। वर्तमान एव फलं प्रतिगृह्णाति नातीतो नानागतो वा। **स तु नावश्यं सफल इति नोच्यते**। तथा ह्यसंस्कृतं कारणहेतुरिष्यते। न चास्य फलमस्ति। अनागतश्च कारणहेतुः। न च पूर्वमुत्पद्यमानेन धर्मेण सफलः।

द्वौ प्रयच्छतः

इति। वर्तमानावधिकृतम्। **सहभूसम्प्रयुक्तकहेतू वर्तमानावेव फलं प्रयच्छतः**। **युक्तं तावद् यदतीताविति**। निष्यन्दफलेन सफलावेतावुक्तौ।

सभागसर्वत्रगयोर्निष्यन्दः[1]

इति वचनात्। **अथ कथं वर्तमानौ निष्यन्दफलं प्रयच्छतः**। न हि तयोर्वर्तमानावस्थायां निष्यन्दो दृश्यत इत्यत आह। **समनन्तरनिर्वर्तनात्**। किम्। फलं प्रयच्छत इत्यधिकृतम्। **तौ चाभ्यतीतौ**[2] **भवत इति**। हेतुफलयोरसमवधानात्। **न पुनस्तदेव दत्त इति**। न पुनस्तदेव फलं प्रयच्छत इत्यर्थः। दत्त इति ह्याख्यातपदं द्विवचनान्तम्। वर्तमानावस्थायामेव दत्तत्वात्। न हि वर्तमानतामानीतं पुनरानेतुं शक्यते। यदा च तावतीतौ फलं प्रयच्छतस्तदैव तत् स्वफलं प्रयच्छतः। उत्पद्यमानावस्थायामेव हि फलं निर्वर्तते नान्यदा। केवलं तु व्यवहितं तत् फलमित्यवगन्तव्यम्। **कुशलमूलानि समुच्छिन्दन् याः प्राप्तीः सर्वपश्चाद्विजहातीति**। इह कुशलमूलानि क्रमेण समुच्छिद्यन्ते। कथम्। मिथ्यादृष्टिर्नवप्रकारा। मृदुमृद्वी यावदधिमात्राधिमात्रा। कुशलमूलान्यपि नवप्रकाराणि तद्विपर्ययेण मृदुमृद्व्या मिथ्यादृष्ट्याधिमात्राधिमात्राणि कुशलमूलानि समुच्छिद्यन्ते यावदधिमात्राधिमात्रया मिथ्यादृष्ट्या मृदुमृदूनि कुशलमूलानि समुच्छिद्यन्ते। भावनाहेयक्लेशवत्। तत्रान्त्यावस्थायां मृदुमृदूनि कुशलमूलानि न समुदाचरन्ति। प्राप्तयस्तु तेषां मृदुमृदूनां

1 Kārikā, II, 56. 2 To. चाप्यतीतौ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समुदाचरन्ति । ताः सर्वपश्चिमादिका[1] यास्तदा[2] विजहाति । तासां प्राप्तीनां प्राप्तीर्निरोधयतीत्यर्थः । ताः प्राप्तयोऽन्त्यावस्थाः कुशलः सभागहेतुः फलं प्रतिगृह्णाति । फलपरिग्रहं करोति । न ददाति स्वनिष्यन्दफलम् । कुशलस्य क्षणान्तरस्य जन्यस्याभावात् । द्वितीया कोटिः । ददाति न प्रतिगृह्णातीति । कुशलमूलानि प्रतिसन्दधानो याः सर्वप्रथमं प्रतिलभते । याः प्राप्तीः सर्वपूर्वं प्रतिलभते ताः कुशलः सभागहेतुः फलं ददातीति । प्राप्तिं स्वनिष्यन्दं जनयति । न तु प्रतिगृह्णाति पूर्वमेव प्रतिगृहीतत्वात् । अयं तु सावद्यो द्वितीयकोटिनिर्देशः । कुशलमूलप्रतिसन्धानकाले हि नवप्रकाराणामपि कुशलमूलानां प्राप्तयोऽतीतानागतप्रत्युत्पन्नाः समं प्रतिलभ्यन्ते । तासां या अतीताः प्राप्तयः स कुशलः सभागहेतुः फलं ददाति न प्रतिगृह्णाति प्रतिगृहीतत्वादिति युक्तमेतत् । यास्तु वर्तमानास्तथैव प्रतिलब्धाः प्राप्तयः स कुशलः सभागहेतुः कथमवधार्यते फलं ददात्येव न प्रतिगृह्णातीति । स हि प्रतिगृह्णाति च ददाति चेति । एवमविशेषितत्वात् सावद्योऽयं द्वितीयकोटिनिर्देशः । तस्मादाचार्य आह । एवं तु वक्तव्यं स्यात् । ता एव प्रतिसन्दधानस्येति । ता एव प्राप्तयः कुशलः सभागहेतुः फलं ददात्येव स्वनिष्यन्दफलदानात् । न प्रतिगृह्णाति पूर्वप्रतिगृहीतत्वात् । तृतीया कोटिः । फलं प्रतिगृह्णाति ददाति चेति । असमुच्छिन्नकुशलमूलस्य शेषास्ववस्थास्विति । द्वे अवस्थे हित्वा । यस्यामवस्थायां कुशलमूलानि समुच्छिन्दन् याः प्राप्तीः सर्वपश्चाद्विजहाति । यस्यां चावस्थायां कुशलमूलानि प्रतिसन्दधानो याः सर्वप्रथमं प्रतिलभते । यथास्मदादीनां कुशलाः प्राप्तयः फलं प्रतिगृह्णन्ति ददति चेति । विसभागक्षणान्तराव्यवहित इति वक्तव्यम् । न वक्तव्यम् । विसभागक्षणान्तरव्यवधानेऽपि प्राप्तिलक्षणस्य सभागहेतोः फलप्रतिग्रहणदानसम्भवात् । चतुर्थ्येतानाकारान् स्थापयित्वा । तद्यथा ऊर्ध्वभूमेः परिहीणस्य ऊर्ध्वभूमिकानां कुशलानां याः प्राप्तयस्ताः कुशलः सभागहेतुर्न फलं प्रतिगृह्णाति । पूर्वं प्रतिगृहीतत्वात् । न ददाति । तद्भूमिपरिहीणस्य तद्भूमिकानां कुशलमूलानां धर्माणां प्राप्त्यभावात् । एवं समुच्छिन्नकुशलमूलावस्थायामपि वक्तव्यम् ।

अत्राचार्यः सङ्घभद्र आह । नैतद् युज्यते यदुक्तम् । एवं तु

1 To. ०पश्चिमका

2 To. omits या.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वक्तव्यं स्यात् ' ता एव प्रतिसन्दधानस्येति । कस्मात् ' न हि यास्ताः सर्वपश्चाद्विहीनास्तासामेव तन्निष्यन्दफलम् । याः प्रतिसन्दधानः सर्वप्रथमं प्रतिलभत इति ' पूर्वनिरुद्धस्यापि हि तत्प्राप्तिसन्तानस्य स निष्यन्द इति । अतः कथं फलग्रहणात् कृत्स्न एव तत् सभागहेतुर्गृहीतः स्यादिति तदर्थमेवेदमुच्यते । तस्माद् यथान्यास एव साध्विति । [1]तदेवमुभयत्रापि पाठदोष उद्ग्राहिते कतरः पाठः श्रेयानिति । अत्राभिधर्मपाठ एव श्रेयानिति पश्यामः । ननु चोक्तम् ' अविशेषितत्वात् कुशलप्रतिसन्धानकाले प्रतिलब्धा वर्तमानाः प्राप्तयः फलं ददति प्रतिगृह्णन्त्यपि । ननु ददत्येव न प्रतिगृह्णन्तीति दोष इति । नैष दोषः । कुशलमूलानि प्रतिसन्दधान इति कुशलमूलप्राप्त्युत्पद्यमानावस्थायामेतदुच्यते न वर्तमानावस्थायाम् । तत्र च न काश्चिदपि कुशलमूलप्राप्तयो वर्तमाना भवन्ति । ताः कथं फलं प्रतिगृह्णन्ति ददति चेति शक्यते वक्तुम् । अतीतास्तु स्वसन्ताने कुशलमूलप्राप्तयः सर्वा अपि सभागहेतुभूताः स्वनिष्यन्दफलं तदानीं ददत्येव समनन्तरनिर्वर्तनन्यायेन ' न प्रतिगृह्णन्ति पूर्वं प्रतिगृहीतत्वात् । इत्यनया युक्त्याऽभिधर्मपाठमेव समर्थयामः । ननु चैवमविशेषिते पाठेऽनागतानां कुशलमूलप्राप्तीनां द्वितीयकोटित्ववचनप्रसङ्गः ' ता अपि हि तदानीमतीतप्राप्तिवत् प्राप्यन्ते । नैष दोषः ' अनागतानां सभागहेतुत्वाभावात् सभागहेतोश्चेहाधिकृतत्वात् । एवमपि न प्राप्तय एव वक्तव्याः । या एव सर्वप्रथमं प्रतिलभत इति । एवं तु वक्तव्यं स्यात् । यान् सर्वप्रथमं प्रतिलभत इति । यान् कुशलान् धर्मानित्यर्थः । चित्तचैत्ता अपि हि कुशलप्रतिसन्धाने प्रथमतः प्रतिलभ्यन्ते ' न केवलं तत् प्राप्तयः । अस्त्येतत । किन्तु प्राप्तीनामेव कुशलप्रतिसन्धाने आवश्यकत्वादेवं वचनम् । कुशलप्राप्तयो हि सम्यग्दृष्ट्या विचिकित्सयापि वा कुशलप्रतिसन्धानेऽवश्यमुत्पद्यन्ते । चित्तचैत्तास्तु विचिकित्सया कुशलप्रतिसन्धाने न तावदुत्पद्यन्त इति प्राप्तय एवोत्पद्यन्त इति वर्णयन्ति ।

अकुशलस्येति विस्तरः । अकुशलोऽपि सभागहेतुश्चतुष्कोटिकः । अस्त्यकुशलः सभागहेतुः फलं प्रतिगृह्णाति न ददातीति विस्तरेण । **प्रथमा कोटिः** ' **कामवैराग्यमनुप्राप्नुवन् याः प्राप्तीः सर्वपश्चाद्विजहाति** ' ता अकुशलः सभागहेतुः फलं प्रतिगृह्णाति न ददाति । कथं कृत्वा । इह क्लेशो नवप्रकारः ' मार्गोऽपि

1 Mss. & To. तदेव उभयत्रापि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नवप्रकारः। तत्र मृदुमृदुना मार्गेणाधिमात्राधिमात्रः क्लेशप्रकारः प्रहीयते। यावदधिमात्राधिमात्रेण मृदुमृदुः प्रहीयते। तत्प्राप्तयोऽपि तथैव प्रहीयन्ते। कामवैराग्यमनुप्राप्नुवन् या मृदुमृदूनामकुशलानां प्राप्तीः सर्वपश्चाद्विजहाति। ता अकुशलः सभागहेतुः फलं प्रतिगृह्णाति न ददाति। अकुशलप्राप्तिक्षणान्तराभावात्। **द्वितीया। कामवैराग्यात् परिहीयमाणो याः सर्वप्रथमं प्रतिलभतेऽकुशलानां प्राप्तीः।** ता अकुशलः सभागहेतुः फलं ददाति न प्रतिगृह्णाति। पूर्ववद् वक्तव्यम्।

अत्राचार्यो ब्रवीति। **एवं तु वक्तव्यं स्यात्। ता एव परिहीयमाणस्येति।** ता एव याः कामवैराग्यमनुप्राप्नुवन् प्राप्तीः सर्वपश्चाद् विजहातीति। ता हि प्रतिगृहीतत्वान्न प्रतिगृह्णन्ति। ददत्येव तु केवलं फलम्। पूर्वपाठे तु द्वितीया कोटिर्न सम्भवति। यथोक्तं प्राक्।

अत्राचार्यसङ्घभद्रस्तथैव प्रत्याचष्टे। नैतद् युज्यत इति। पूर्वेण समानमेतत्। सर्वं प्रपञ्चयितव्यम्।

तृतीया। कामावीतरागस्य शेषास्त्ववस्थास्विति। द्वे अवस्थे हित्वा। एते एव यथोक्ते प्रथमद्वितीयावस्थे शेषास्त्ववस्थासु। यथास्माकम्। या अकुशलानां प्राप्तयस्ता अकुशलः सभागहेतुः फलं प्रतिगृह्णाति ददाति च। **चतुर्थी। एतानाकारान् यथोक्तान् स्थापयित्वा।** तद्यथा कामवीतरागस्यापरिहाणधर्मणो या अकुशलानां प्राप्तयः। सोऽकुशलः सभागहेतुर्न फलं प्रतिगृह्णाति। पूर्वं प्रतिगृहीतत्वात्। न ददाति। तस्य प्राप्त्यभावात्। **एवं निवृताव्याकृतस्यापीति** विस्तरः। एवं निवृताव्याकृतस्यापि चतुःकोटिकविधानम्। **अर्हत्त्वप्राप्तितोऽर्हत्त्वपरिहाणितश्च यथायोगं योज्यम्।** अस्ति निवृताव्याकृतः सभागहेतुः फलं प्रतिगृह्णाति न ददातीति विस्तरः। प्रथमा कोटिः। अर्हत्त्वं[1] प्राप्नुवन् याः प्राप्तीः सर्वपश्चाद्विजहाति। स निवृताव्याकृतः सभागहेतुः फलं प्रतिगृह्णाति न ददाति। क्लिष्टक्षणान्तराभावात्। द्वितीया। अर्हत्त्वात् परिहीयमाणो याः सर्वप्रथमं प्रतिलभते। एवं तु वक्तव्यं स्यात्। ता एव परिहीयमाणस्येति। एवं हि फलदानमेवैकमुपपादितं भवति। पूर्वपाठसमर्थनमपि तेनैवानुक्रमेण वक्तव्यम्।

---

1 Mss. अर्हत्व

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीया ' भवाग्रावीतरागस्य शेषास्ववस्थासु । चतुर्थी ' एतानाकारान् स्थापयित्वा । तद्यथा अर्हत्त्वं प्राप्तस्य यास्त्रिधातुक्यो निवृताव्याकृतानां प्राप्तयो यथासम्भवम् ' स निवृताव्याकृतः सभागहेतुर्न फलं प्रतिगृह्णाति ' प्रतिगृहीतत्वात् । न ददाति ' प्रहीणत्वात् । **अनिवृताव्याकृतस्य पश्चात्पादक इति** । पश्चात्पादकलक्षणं व्याख्यातमिति न पुनरुच्यते । योऽनिवृताव्याकृतः सभागहेतुः फलं प्रतिगृह्णाति ददात्यपि सः । आह । **यस्तावद्ददाति प्रतिगृह्णात्यपि सः** । अनिवृताव्याकृतस्या परिनिर्वाणात् सन्निहितत्वात् । **स्यात् प्रतिगृह्णाति न ददाति । अर्हतश्चरमाः स्कन्धाः** सर्वोपधिनिःसर्गेणानिवृताव्याकृतनिष्यन्दाभावात् । **सालम्बन नियमेन तु क्षणश इति** । पूर्वमनालम्बनानां सम्भवतो नियम उक्तः सालम्बननियमेन तु चित्तचैत्तानामेव सभागहेतुत्वमुच्यते क्षणशः क्षणान्तरापेक्षया । न तु पर्यादाय विच्छेदत इत्यर्थः । **कुशलचित्तानन्तरमिति** विस्तरः । यदा कुशलचित्तानन्तरं क्लिष्टमव्याकृतं वा चित्तं सम्मुखीकरोति ' तदा तत् कुशलं चित्तं फलं प्रतिगृह्णाति यतस्तत्सन्तानपतितं व्यवहितमनागतं कुशलं फलं भविष्यति । अनुत्पत्तिधर्मि वा । न ददाति । यस्मादस्यानन्तरं कुशलमेव नास्ति । सदृशेन हि फलेन सफलः सभागहेतुरिष्यते । **द्वितीया ' विपर्ययादिति** । यदा क्लिष्टानिवृताव्याकृतचित्तानन्तरं कुशलं चित्तं सम्मुखीकरोति ' तदा येन कुशलेन चित्तेन तत् कुशलं चित्तं फलत्वेन प्रतिगृहीतमासीत् ' तद् ददाति न तत् प्रतिगृह्णाति ' पूर्वं प्रतिगृहीतत्वात् । **तृतीया ' कुशलचित्तानन्तरं कुशलमेवेति** । सम्मुखीकरोतीत्यधिकृतम् । तत्पूर्वकं कुशलं चित्तं द्वितीयं चित्तं फलत्वेन प्रतिगृह्णाति ददाति च ' समनन्तरनिर्वर्तनात् । **चतुर्थी ' एतानाकारान् स्थापयित्वेति** । यदा क्लिष्टाव्याकृतचित्तानन्तरं क्लिष्टमव्याकृतं वा चित्तं सम्मुखीकरोति । तदासौ सालम्बनः कुशलः सभागहेतुर्न फलं प्रतिगृह्णाति ' प्रतिगृहीतत्वात् । न ददाति ' क्लिष्टाव्याकृतचित्तसम्मुखीभावात् । **एवमकुशलादयोऽपि योज्या इति** । अस्ति सालम्बनोऽकुशलः सभागहेतुः फलं प्रतिगृह्णाति न ददाति चतुःकोटिकः । प्रथमा कोटिः । अकुशलानन्तरं कुशलमनिवृताव्याकृतं वा चित्तं सम्मुखीकरोति । द्वितीया ' विपर्ययात् । तृतीया ' अकुशलानन्तरमकुशलमेव । चतुर्थी ' एतानाकारान् स्थापयित्वा । आदिशब्देन निवृताव्याकृतोऽनिवृताव्याकृतश्च सभागहेतुर्योज्यः । निवृतस्य तावत् प्रथमा कोटिः ' निवृताव्याकृतचित्तानन्तरं कुशलमनिवृताव्याकृतं वा चित्तं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्मुखीकरोति । द्वितीया ' विपर्ययात् । तृतीया ' निवृताव्याकृतचित्तानन्तरं निवृताव्याकृतमेव । चतुर्थी ' एतानाकारान् स्थापयित्वा । अनिवृतस्य प्रथमा कोटिः ' अनिवृताव्याकृतानन्तरं कुशलं क्लिष्टं वा चित्तं सम्मुखीकरोति । द्वितीया ' विपर्ययात् । तृतीया ' अनिवृताव्याकृतानन्तरमनिवृताव्याकृतमेव । चतुर्थी ' एतानाकारान् स्थापयित्वा । तस्य बीजभावोपगमनादिति । तस्य फलस्य हेतुभावोपगमनादित्युपमा सौत्रान्तिकप्रक्रियैषा । क्वचित् पुस्तके नास्त्येवंपाठः[1] । यथा जलमण्डलमिति विस्तरः । यथेति दृष्टान्तप्रदर्शनम् । जलमण्डलं वायुमण्डलस्य[2] प्रतिष्ठाफलम् ' यावच्छब्देन जलमण्डलस्य काञ्चनमयी पृथिवी ' काञ्चनमय्याः पृथिव्यास्तथा सस्यौषधिप्रभृतयः प्रतिष्ठाफलमित्यधिकारः[3] । अशुभायाः स्मृत्युपस्थानान्यारभ्य यावदनुत्पादज्ञानम् । एवमन्यस्याप्यानापानस्मृत्यादेः । [4]प्रयोगस्य फलं योज्यम्[4] । सामग्र्याः फलं सामग्रीफलम् । चक्षुरादीनामिति । आदिशब्देन चक्षूरूपालोकमनस्काराणां ग्रहणम् । एवं भावनायाः फलं [5]भावनाफलमिति समासः । एतत्तु सर्वमिति विस्तरः । एतच्चतुर्विधं फलं पुरुषकाराधिपतिफलयोरन्तर्भूतम् । प्रतिष्ठाफलमधिपतिफलान्तर्भूतम् ' प्रयोगफलादि पुरुषकाराधिपतिफलयोः ॥५६॥

[क्लिष्टा विपाकजाः शेषाः प्रथमार्या यथाक्रमम् ।
विपाकं सर्वगं हित्वा तौ सभागश्च शेषजाः ॥६०॥]

क्लिष्टा इति विस्तरः । क्लेशतत्सम्प्रयुक्ततत्समुत्थाः क्लिष्टाः । विपाकहेतुजाता विपाकजाः । दुःखे धर्मज्ञानक्षान्तितत्सहभुवः प्रथमानास्रवाः । तेभ्यश्च शेषाः क्लिष्टादिभ्यस्त्रिभ्यः । विपाकवर्ज्या अव्याकृता ऐर्यापथिकशैल्पस्थानिकनैर्माणिकाः । प्रथमानास्रवक्षणवर्ज्याश्च कुशला इति । कुशलग्रहणेन सास्रवानास्रवा गृह्यन्ते । तत्र दुःखे [6]धर्मज्ञानकलापादयः सर्वे एव शैक्षाशैक्षमार्गा लौकिकाश्च कुशलाः शेषा इत्यवगन्तव्यम् । शेषाश्चात्र तृतीयो राशिः क्रियते । तेनाह ' त एते चतुर्विधा धर्माः

---

1 Mss. नास्त्येव पाठः   2 Mss. वाश्रापमण्डलस्य

3 Mss. ०त्यविचारः

4...4 Mss. after leaving a blank space reads मस्य फलस्य सम ×

5 Mss. omit भावनाफलम्.   6 Mss. धर्मज्ञानं कला०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्लिष्टा विपाकजाः शेषाः प्रथमार्या यथाक्रमम्।

विपाकं सर्वगं हित्वा तौ सभागञ्च शेषजाः॥

इति। विपाकमिति विपाकहेतुम्। क्लिष्टा धर्मा विपाकहेतुं हित्वा शेषेभ्यः पञ्चभ्यः कारणसहभूसभागसम्प्रयुक्तकसर्वत्रगेभ्यो यथासम्भवं जायन्ते। स्वभाववर्ज्यात् सर्वधर्मलक्षणात् कारणहेतोः। स्वकलापचित्तादिलक्षणात् सहभूहेतोः। पूर्वोत्पन्नस्वसन्तानक्लिष्टलक्षणात् सभागहेतोः। स्वकलापचित्तलक्षणात् सम्प्रयुक्तकहेतोः। यस्मात्ते चित्तचैत्तस्वभावाः पूर्वोत्पन्नसत्कायदृष्ट्यादिलक्षणात् सर्वत्रगहेतोर्जायन्ते। न तु विपाकहेतोः। विपाकफलेन हि सफलो विपाकहेतुः। न च क्लिष्टा धर्मा विपाकस्वभावा इति ते न ततो जायन्ते। विपाकजाः सर्वत्रगहेतुं हित्वा शेषेभ्यः पञ्चभ्य एव हेतुभ्यो जायन्ते। न तु सर्वत्रगहेतोः। विपाकजानामक्लिष्टत्वात्। सर्वत्रगाख्यः क्लिष्टानामिति हि सर्वत्रगहेतुलक्षणम्। यद्यपि मिथ्यादृष्ट्यादिभ्यः सर्वत्रगेभ्यो विपाकजा जायन्ते। न तु सर्वत्रगहेतोरिति कृत्वा ततो जायन्ते। किं तर्हि। विपाकहेतोरिति। शेषा इति विस्तरः। शेषाणामविपाकस्वभावत्वान्न विपाकहेतुरस्ति। अक्लिष्टस्वभावत्वाच्च न सर्वत्रगहेतुरस्ति। अतस्तौ विपाकसर्वत्रगहेतू वर्जयित्वा शेषेभ्यश्चतुर्भ्यो जायन्ते। पूर्ववद्व्याख्यानम्। प्रथमानास्रवास्तौ विपाकसर्वत्रगहेतू पूर्वोक्तौ। चशब्देनानुकृष्टौ सभागहेतुं च हित्वा शेषेभ्यः कारणसहभूसम्प्रयुक्तकहेतुभ्यो यथासम्भवं जायन्ते। अनास्रवाणामविपाकस्वभावत्वान्न विपाकहेतुरस्ति। अक्लिष्टत्वान्न सर्वत्रगहेतुः। मार्गस्य पूर्वमनुत्पादितत्वान्न सभागहेतुरस्ति। न हि सास्रवा [1]अग्रधर्मा अनास्रवस्य कलापस्य सभागहेतुर्युज्यते। तस्मान्न तेभ्यो जायन्ते॥६०॥

[चित्तचैत्तास्तथान्येऽपि सम्प्रयुक्तकवर्जिताः।

चत्वारः प्रत्यया उक्ता हेत्वाख्याः पञ्च हेतवः॥६१॥]

चित्तचैत्ताः

इति। सम्प्रयुक्तकहेतुसम्भवार्थं चित्तचैत्तग्रहणम्। प्राप्तिजात्यादयश्च चित्तविप्रयुक्ताः। अनास्रवसंवरश्च रूपिस्वभावोऽनास्रवेषु वेदितव्यः। ते चित्तविप्रयुक्ता रूपिणश्च चित्तचैत्तेभ्योऽन्ये क्लिष्टादयः क्लिष्टविपाकज-

1 V अव धर्मा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शेषप्रथमानास्रवसंगृहीतास्तथैवोत्पद्यन्ते यथा चित्तचैत्ताः। केवलं तु सम्प्रयुक्तकहेतुनैकेन वर्जिताः। तेषामसम्प्रयुक्तकस्वभावत्वान्न सम्प्रयुक्तकहेतोर्जायन्ते। कथमिति। [1]क्लिष्टाश्चित्तविप्रयुक्तरूपिणो विपाकसम्प्रयुक्तकहेतू हित्वा शेषेभ्यश्चतुर्भ्यो हेतुभ्यो जायन्ते। विपाकजा अपि सम्प्रयुक्तकसर्वत्रगहेतू हित्वा शेषेभ्यश्चतुर्भ्य एव। शेषा विपाकसर्वत्रगसम्प्रयुक्तकहेतून् हित्वा शेषेभ्यस्त्रिभ्यः। प्रथमानास्रवा विपाकसर्वत्रगहेतू सभागहेतुं च सम्प्रयुक्तकहेतुं च हित्वा शेषाभ्यां हेतुभ्यां जायन्त इति। एकहेतुसम्भूतो नास्तीति। कारणसहभूहेत्वोरवश्यमविनाभावात्।

जन्यस्य[2] जनिका जातिर्न [3]हेतुप्रत्ययैर्विना[4]

इत्युक्तम्। अतो हेतुविस्तरवचनानन्तरं पृच्छति प्रत्ययाः कतम इति। प्रत्ययजातिः प्रत्ययतेति। प्रत्ययप्रकार इत्यर्थः। गोतावत् ॥६१॥

[चित्तचैत्ता अचरमा उत्पन्नाः समनन्तरः।

आलम्बनं सर्वधर्माः कारणाख्योऽधिपः स्मृतः ॥६२॥]

चित्तचैत्ताः

इति विस्तरः। चित्तचैत्ता एव समनन्तर इत्यवधारणम्। अचरमग्रहणं सोत्तराणां समनन्तरत्वात्। उत्पन्नग्रहणमनागतनिरासार्थम्। समश्चायमनन्तरश्च प्रत्यय इति समनन्तरप्रत्यय इति। समानार्थे संशब्दः। कामावचरस्य रूपस्येति। अविज्ञप्तिरूपस्य कदाचित् कामावचरमविज्ञप्तिरूपं रूपावचरं चाविज्ञप्तिरूपमुत्पद्यते सास्रवध्यानसम्मुखीभावे गृहीतसंवरस्य। कदाचित् कामावचरं चानास्रवं चानास्रवध्यानसम्मुखीभावे। न तु कामावचरचित्तानन्तरं कदाचित् कामावचरं रूपावचरं च युगपच्चित्तमुत्पद्यते। कामावचरं चानास्रवं चेत्याकुलो रूपसंमुखीभावः।

द्वितीयोत्पत्तेरिति। द्वितीयौपचयिकोत्पत्तेः। यदा हि भुक्त्वा स्वपिति ध्यानं वा समापद्यते तदाहारज औपचयिकः स्वप्नजश्च समाधिजो वा औपचयिक उत्पद्यते।

1 Mss. & To. क्लिष्टाचित्त०
2 Mss. & To. जनस्य
3 V हेतुप्रत्ययं विना
4 Kārikā, II, 47.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अल्पबहुतरोत्पत्तेरिति। किम्। रूपं न समनन्तरप्रत्यय इति प्रकृतम्। भदन्तः स्थविरः सौत्रान्तिकः।

कुशलाकुशलाव्याकृतेषु चित्तेष्विति।

सवितर्कविचारित्वात्[1] कुशले कामचेतसि।
द्वाविंशतिश्चैतसिकाः कौकृत्यमधिकं क्वचित्॥
आवेणिके त्वकुशले दृष्टियुक्ते च विंशतिः।
[2]क्लेशैश्चतुर्भिः क्रोधाद्यैः[2] कौकृत्येनैकविंशतिः॥
निवृतेऽष्टादशान्यत्र द्वादशाव्याकृते मताः।

[3]इत्यनेन क्रमेण कदाचिद्बहुभ्यश्चैत्तेभ्यस्त्रयोविंशतेरेकविंशतिरष्टादश द्वादश वाल्पे चैत्ता उत्पद्यन्ते। कदाचिदल्पाद्बहवो विपर्ययात्। सवितर्कविचारादौ च समाधित्रये। अस्ति सवितर्कः सविचारः समाधिः। अस्त्यवितर्को विचारमात्रः। अस्त्यवितर्कोऽविचार इति। एतस्मिन् समाधित्रये चैत्तानामल्पबहुतरोत्पत्तिः। अतश्च चित्तचैत्ता अपि न समनन्तरप्रत्ययाः स्युरिति। अस्ति जात्यन्तरं प्रति न स्वजातिमिति। अस्त्यल्पबहुतरोत्पत्तिर्जात्यन्तरं प्रति न स्वजातिम्। वितर्कविचारादीनां हि क्वचिच्चित्ते जात्यन्तरभूतानां सतां वृत्तिरवृत्तिश्च भवति। न कदाचिद्बहुतरा वेदनेति। नहि कदाचिद्वेदनैकस्मिंश्चित्ते एका क्वचिदपरस्मिन् द्वे तिस्रो वेति। रूपस्य तु स्वजातिं प्रत्यल्पबहुतरोत्पत्तिः।

किं पुनः स्वजातेरेवेति। किं वेदना वेदनाया एव समनन्तरप्रत्ययः। अनेकवेदनोत्पत्तावसामर्थ्यात्। एवं संज्ञादयः। न परजातेः। न वेदना संज्ञादीनाम्। यतश्चैत्तानामल्पबहुतरोत्पत्तिर्न परिगृहीता भवेत्।

सान्तानसभागिकास्त्विति विस्तरः। चित्तं चित्तान्तरस्य समनन्तरप्रत्ययः। न वेदनायाः। वेदना वेदनान्तरस्य। न चित्तस्येति। सन्तानसभागः सभागहेतुरित्यर्थः। सन्तानसभागेन दीव्यन्ति व्यवहरन्ति वा सान्तानसभागिकाः केचिदाभिधर्मिकाः। यदि सन्तानः सन्तानान्तरस्य सभाग-

---

1 Kārikā in the Benares edition reads ०विचारत्वात्.

2...2 Mss. here drop this portion which is found inserted at the bottom of the next folio.

3 Kārikā, II, 29-31.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतुः । अक्लिष्टानन्तरं यदा क्लिष्टमुत्पद्यते । कथं तत्र समनन्तरप्रत्यय-व्यवस्थेति । अत आह । यदा त्वक्लिष्टानन्तरमिति विस्तरः । तस्य क्लेशस्य पश्चादुत्पन्नस्य पूर्वनिरुद्धक्लेशः क्षणान्तरव्यवहितः समनन्तरप्रत्यय इति व्यवस्थापयन्ति तुल्यजातीयेन चित्तान्तरेणाव्यवधानात् । अक्लिष्टेन व्यवधानं त्वव्यवधानमेव । अतुल्यजातीयत्वात् । तद्यथा निरोधसमापत्ति-चित्तं व्युत्थानचित्तस्य । चित्तान्तरेणाव्यवधानात् । समापत्तिद्रव्येण व्यवहितमपि समनन्तरप्रत्ययो व्यवस्थाप्यते । तद्वत् ।

त्रैधातुकाप्रतिसंयुक्तानां युगपत्सम्मुखीभावादिति । कामधात्ववीतरागस्यार्यस्य कामावचर्याः प्राप्तेरनन्तरं त्रैधातुकाप्रतिसंयुक्तानां प्राप्तय उत्पद्यन्ते । त्रैधातुकैः क्लेशैः समन्वागतत्वात् । एवं तज्जात्यादयोऽप्युत्पद्यन्ते । इत्येवं व्याकुलसंमुखीभावात् विप्रयुक्ता अपि संस्काराः प्राप्तिजात्यादयो न समनन्तरप्रत्ययः ।

कस्मादनागत इति विस्तरः ।

उत्पन्नाः समनन्तरः

इत्यतीतप्रत्युत्पन्ना एव समनन्तरप्रत्यय इति पूर्वमुक्तम् । अत एवं पृच्छति । व्याकुलत्वादिति । व्याकुलत्वादनागतो नेष्यते समनन्तरप्रत्ययः । व्याकुलत्वं पुनरनागतस्याध्वनः पूर्वोत्तरोभावात् । पूर्वोत्तरताया अभावात् । वर्तमानो ह्यनागतात् पूर्वो वर्तमानादतीत इति शक्यते वक्तुम् । पूर्वोत्तरकालयोगात् । न त्वनागतस्य पूर्वपश्चिमतास्ति । अत एव च वर्तमानो वर्तमानस्य न समनन्तर-प्रत्यय इष्यते । पूर्वपश्चिमताया अभावात्तुल्यकालत्वात् । अतीतसाम्प्रता-नुमानादिति । अतीतेन च साम्प्रतेन चानुमानात् । अतीतेनानुमानमिति दर्शयन्नाह । अतीतं किलाध्वानं पश्यतीति विस्तरः । साम्प्रतेनानुमान-मिति दर्शयन्नाह । इदं चापि सम्प्रत्येवंजातीयकमिति विस्तरः । अपरान्तं न जानीयादिति । सर्ववित्त्वमस्य हीयेतेत्यभिप्रायः । फलचिह्नभूतः । फललिङ्ग-भूतः । न साक्षात्कारी । न साक्षाद्दर्शी ।

अनागतो नेष्यते समनन्तरप्रत्ययो व्याकुलत्वात् [1]पूर्वपश्चिमताया अभावा[1]-दित्युक्तेऽयमाह । कस्मादग्रधर्मानन्तरमिति विस्तरः । तस्य वैभाषिकः

1...1 Mss. ०पश्चिमता अभावा ; To. ०पश्चिमतायाऽभावा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिहारमाह । **यस्य यत्प्रतिबद्ध उत्पाद** इति विस्तरः । यस्य धर्मस्य दुःखे धर्मज्ञानक्षान्त्यादेर्यस्मिन् धर्मे लौकिकाग्रधर्मादौ प्रतिबद्ध उत्पादः । स **तस्यानन्तरमुत्पद्यते । तद्यथा बीजादीनामङ्कुरादयः ।** अङ्कुरस्य हि बीजे प्रतिबद्ध उत्पादः । तस्मात्तदनन्तरमुत्पद्यते । एवं काण्डादीना-मङ्कुरादिषु । **विनापि समनन्तरप्रत्ययेना**सत्यपि समनन्तरप्रत्यये । अपिशब्दात् सति समनन्तरप्रत्यये सुतरामुत्पद्यत इत्यभिप्रायः । तस्मान्नास्ति च क्रमनियमावस्थानम् । तद्वत् समनन्तरोत्पत्तिनियमश्च भवतीति वाक्यार्थः ।

कस्मादर्हतश्चरमा इति ।

अचरमाः

इति वचनादयं प्रश्न आगतः । **अन्यचित्तासम्बन्धादिति ।** यस्मात् तदनन्तरमन्यचित्तं न सम्बध्नन्ति । **आश्रयभावप्रभावितं मन** इति । यथा चक्षुरुत्पन्नं चक्षुर्विज्ञानाश्रयभावेनावस्थितम् । यदि कारणान्तरवैकल्या-चक्षुर्विज्ञानं नोत्पद्यते न तत्र चक्षुरपराध्यते । एवमर्हतोऽपि चरमं चित्तमा-श्रयभावेनास्थितम् । **कारणान्तरवैकल्यात्तु विज्ञानान्तरं नोत्पद्यत** इति न तदपराध्यते । **तद्धि न कारित्रप्रभावितम्** । न जननपुरुषकारप्रभावितमित्यर्थः । यदि हि तज्जननप्रभावितं स्यात् । जायमान एव सति कार्ये तन्मनः स्यात् । न चैवम् । अतोऽसत्यपि जन्ये तन्मनो भवत्येव । **कारित्रप्रभावितस्तु समनन्तर-प्रत्ययः** सत्येव जन्ये समनन्तरप्रत्ययो भवति । नासति । **तेन यो धर्मः फलं प्रतिगृहीतः** । तेन समनन्तरप्रत्ययेन यो धर्मः फलं प्रतिगृहीतो जायतामेतदिति । **स सर्वैरपि धर्मैरबुद्धिमद्भिः** सर्वप्राणिभिर्वा सच्चिन्त्यकारिभिर्न **शक्यः प्रतिबन्धुं यथा नोत्पद्येत** मोत्पादीति ।

ये धर्माश्चित्तसमनन्तरा इति विस्तरः । समनन्तरप्रत्ययचित्तजनिताश्चित्त-समनन्तराः । चित्तस्य समाश्च तेऽनन्तराश्च ते इति चित्तसमनन्तराः । अथ वा चित्तं समनन्तरम् । समनन्तरप्रत्यय एषामिति चित्तसमनन्तराः । क्षणान्तराव्यवहितात्तु **चित्तनिरन्तराः । ते** पुनश्चित्तसमनन्तराश्चित्तचैत्ता **द्वे च समापत्ती** असंज्ञिनिरोधसमापत्ती । नासंज्ञिकं चित्तसमनन्तरं शास्त्रे पठितं कर्मसामर्थ्योत्पत्तेः । **प्रथमा कोटिरिति** विस्तरः । **समापत्तिव्युत्थानचित्तं** समापत्तिप्रवेशचित्तजनितम् । अतश्चित्तसमनन्तरं न चित्तनिरन्तरम् । समापत्ति-क्षणव्यवहितत्वात् । **द्वितीयादयश्च समापत्तिक्षणाः** । प्रथमक्षणवर्ज्या इत्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चित्तसमनन्तराः तत्प्रत्ययजनितत्वात् न चित्तनिरन्तराः यथायोगं प्रथमादिक्षणाव्यवहितत्वात्। द्वितीया। प्रथमस्य समापत्तिक्षणस्य जात्यादयश्चित्तनिरन्तराः क्षणान्तराव्यवहितत्वात्। न तु चित्तसमनन्तराः अचित्तसमनन्तरस्वभावत्वात्। चित्तचैत्ता एव हि सह समापत्तिद्वयेन चित्तसमनन्तरा इष्टाः। सचित्तिकावस्थायाश्च जात्यादयः। तेषामविशेषितत्वात् सर्वेषां चित्तचैत्तादीनां जात्यादयः। आदिग्रहणेन च सर्व एव विप्रयुक्ता गृह्यन्ते समापत्तिद्वयं वर्जयित्वा। ते च तथैव चित्तनिरन्तरा न चित्तसमनन्तराः। पूर्ववद् व्याख्यानम्। सचित्तिकावस्थेति। यदा चित्ताच्चित्तान्तरमुत्पद्यते तदा पश्चिमाश्चित्तचैत्ताः पूर्वकेण चित्तेन चित्तसमनन्तराश्चित्तनिरन्तराश्च भवन्ति। चतुर्थी। द्वितीयादीनां समापत्तिक्षणानां[1] व्युत्थानचित्तस्य च जात्यादयः न चित्तसमनन्तराः अचित्तसमनन्तरस्वभावत्वात् न चित्तनिरन्तराः प्रथमादिसमापत्तिक्षणाव्यवहितत्वात्। ये तृतीयचतुर्थ्यौ ते प्रथमद्वितीये इति विस्तरः। प्रथमा कोटिः प्रथमसमापत्तिक्षणः सचित्तिका चावस्था। ते हि चित्तसमनन्तराः समनन्तरप्रत्ययजनितत्वात् न समापत्तिनिरन्तराः प्रथमसमापत्तिक्षणस्य सर्वसमापत्तिक्षणाभावेन न तन्निरन्तरत्वाभावात् सचित्तिकावस्थायाश्च समापत्त्यभावात्। द्वितीया। द्वितीयादीनां समापत्तिक्षणानां जात्यादयो व्युत्थानचित्तस्य च इमे धर्माः समापत्तिनिरन्तरा न चित्तसमनन्तराः। तृतीया। अचित्तिकायाः समापत्तेर्व्युत्थानचित्तं द्वितीयादयश्च समापत्तिक्षणाः। एते चित्तसमनन्तराः समापत्तिनिरन्तराश्च। चतुर्थी। प्रथमस्य समापत्तिक्षणस्य सचित्तिकायां चावस्थायां जात्यादयः इमे धर्मा न चित्तसमनन्तरा न समापत्तिनिरन्तरा अचित्तसमनन्तरस्वभावत्वात् पूर्वसमापत्तिक्षणाभावाच्च।

ससम्प्रयोगस्य सचैतसिकस्य। तथालक्षणत्वादिति। आलम्ब्यलक्षणत्वात्। आयतनद्रव्यक्षणनियमेनेति। आयतनञ्च द्रव्यञ्च क्षणश्च तेषां नियमः तेनैव। ते चित्तचैत्ताः स्वस्मिन् स्वस्मिन्नालम्बने नियताः। यथा तावच्चक्षुर्विज्ञानं ससम्प्रयोगं रूपायतने आलम्बने नियतं न शब्दायतनादौ एवमायतननियमेन। तत्राप्यायतने द्रव्यनियमेन नीलरूपे नीलरूपग्राहकमेव

1 A adds व्युत्पत्तिचक्षणानां.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्षुर्विज्ञानं ससम्प्रयोगं नियतम् ' नान्यत्र पीतादौ । एवं द्रव्यनियमेन । तत्रापि नीलरूपे आलम्बने यो नीलरूपक्षणो यस्यालम्बनं स तस्यैव ' नान्यस्य । इत्येवं क्षणनियमेन । एवं शब्दायतनादिष्वपि श्रोत्रादिविज्ञानं ससम्प्रयोगं योज्यम् । **किमाश्रयनियमेनापीति** । किं चक्षुराद्याश्रयनियमेनाप्येते चित्तचैत्ता नियताः । **ओमित्याह** । एवमित्यर्थः ।

आलम्बनप्रत्ययोऽपि सर्वधर्मा इति मनोविज्ञानापेक्षया । **अधिकोऽयं प्रत्यय इत्यधिपतिप्रत्यय** इति । हेतुप्रत्ययादिभ्यः । **हेतुप्रत्ययो हि परं पञ्च हेतवः । आलम्बनप्रत्ययो हि सहभुवां न सम्भवतीति** नाधिकः । **अधिकस्य वा प्रत्यय** इति । पूर्वमधिकः पतिरधिपतिः ' स प्रत्यय इति समासः । इदानीमधिकस्य भूयसः पतिरधिपतिः ' स प्रत्यय इत्यधिपतिप्रत्यय इति समासः । कथमित्याह । **सर्व** इति विस्तरः । सर्वः संस्कृतासंस्कृतः **सर्वस्य संस्कृतस्य स्वभाववर्ज्यस्य** सालम्बनस्यानालम्बनस्य च प्रत्ययोऽधिपतिप्रत्ययः ' आलम्बनप्रत्ययस्तु सालम्बनस्यैव नानालम्बनस्य । प्रथमे विग्रहे प्रत्ययस्याधिक्यं दर्शितम् ' द्वितीये प्रत्ययवतः ॥६२॥

[निरुध्यमाने कारित्रं द्वौ हेतू कुरुतस्त्रयः ।
जायमाने ततोऽन्यौ तु प्रत्ययौ तद्विपर्ययात् ॥६३॥]

निरुध्यमाने कारित्रम्

इति । निरुध्यमान एवेत्यवधारणम् ' मिथःफलत्वात् समाश्रयत्वाच्च सहभूसम्प्रयुक्तकहेत्वोर्यथाक्रमम् ।

त्रयो जायमाने

इति । जायमान एवेत्यवधारणम् ।

ततोऽन्यौ तु प्रत्ययौ तद्विपर्ययात्

इति । समनन्तरप्रत्ययः पूर्वोक्तस्तं पश्चादुक्तं कारित्रकालनियममाश्रयते । जायमाने कारित्रं करोतीत्यर्थः । पश्चादुक्त आलम्बनप्रत्ययः पूर्वोक्तं कारित्रकालनियममाश्रयते । निरुध्यमाने कारित्रं करोतीत्यर्थः । एवं तौ विपर्ययात् कारित्रं कुरुतः । तेनाह ' **समनन्तरप्रत्ययो जायमाने कारित्रं करोत्यवकाशदानात् ' आलम्बनप्रत्ययो निरुध्यमाने । वर्तमानैश्चित्तचैत्तैर्वर्तमान-**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ग्रहणादिति। ग्रहणार्थेन ह्यालम्बनप्रत्ययो व्यवस्थाप्यते। न चातीतानागताश्चित्तचैत्ता ग्राह्यमर्थं गृह्णन्तीति।

एतदेवास्य कारित्रमिति। यदनावरणभावेन सर्वस्यामवस्थायामवस्थानम्। एतदेवास्याधिपतिप्रत्ययस्य कारित्रमिति सुगमत्वान्नाधिपतिप्रत्ययस्य कारित्रकालनियमः सूचित इत्यभिप्रायः ॥६३॥

[चतुर्भिश्चित्तचैत्ता हि समापत्तिद्वयं त्रिभिः।
द्वाभ्यामन्ये तु जायन्ते नेश्वरादेः क्रमादिभिः ॥६४॥]

द्विविधो हेतुरिति। सम्प्रयुक्तकसर्वत्रगविपाकहेतूनामसम्भवात्। समानभूमिकाः कुशला धर्मा इति। निरोधसमापत्तेर्भावाग्रिकाः कुशला धर्माः सभागहेतुर्हेतुप्रत्ययः। असंज्ञिसमापत्तेरपि चतुर्थध्यानभूमिकाः। येषां बलेन ते समापत्ती भवतः। समनन्तरप्रत्ययः ससम्प्रयोगं समापत्तिचित्तमिति। सर्वेषां निरोधसमापत्तिक्षणानामसंज्ञिसमापत्तिक्षणानाञ्च चित्तान्तरेणाव्यवधानात्। पूर्ववदिति। स्वभाववर्ज्याः सर्वधर्माः। चित्ताभिसंस्कारजत्वादिति। चित्ताभोगजत्वादित्यर्थः। चित्तोत्पत्तिविबन्धनान्न समनन्तर प्रत्यय इति। समनन्तरप्रत्ययस्य चित्तोत्पत्तिहेतुत्वात्।

द्वाभ्यामन्ये तु

इति। तुशब्दोऽवधारणे भिन्नक्रमश्च। द्वाभ्यामेव हेत्वधिपतिप्रत्ययाभ्यामन्ये वै चित्तचैत्तसमापत्तिद्वयविनिर्मुक्ता धर्मा जायन्ते। ईश्वरपुरुषप्रधानादिकमिति। आदिशब्देन कालस्वभावपरमाण्वादि गृह्यते। ननु चात एवेति। यदि वेश्वर एकं कारणं पुरुष इति वात्र पक्षे को हेतुरिति हेतुर्मृग्यते। ईश्वरव्यतिरिक्तं हेतुं कृत्वा तत्सिद्धेरित्यभ्युपगतं भवति। तदभ्युपगमाच्चैकमीश्वरः पुरुष इति वा कारणं सर्वस्य जगत इत्यस्य वादस्य व्युदासः परित्यागः प्राप्नोतीति पिण्डेन वाक्यार्थः।

नेश्वरादेः क्रमादिभिः

इति। नेश्वरादेर्भावा जायन्ते। कस्मात्। क्रमादिभिः। आदिग्रहणेन देशकालादीनां ग्रहणम्। अथ वानेककारणत्वानवस्थाप्रसङ्गादन्यपुरुषकाल-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निह्नवादीनां ग्रहणम्। **यदि ह्येकमेवेति** विस्तरः। यदि ह्येकमेव **कारणमीश्वरः स्यात्** महादेवो वा वासुदेवो वा **अन्यद्वा** पुरुषादि वेत्यर्थः ' **युगपत् सर्वेण जगता भवितव्यं** कारणस्य सद्भावात्। न ह्येतदिष्टम् ' सति कारणे कार्यं न भवतीति। **दृश्यते च भावानां** कललादीनामङ्कुरादीनाञ्च **क्रमसम्भवः।** तस्मात् स्वकारणपरम्परानिर्वृत्त इति नेश्वरादि कारणमिति गम्यते। ईश्वराद्येककारणं जगदिति हि प्रतिजानानस्य स्वकारणक्रमोत्पादितादिलक्षणेन[1] धर्मविशेषेण तस्य सापक्षालत्वं पक्षस्योपलक्ष्यते। **स तर्हि छन्दवशादिति।** स क्रमभेद इच्छावशादीश्वरस्य स्यात्। कथमित्याह। **अयमिदानीं भाव उत्पद्यतां यावदयं पश्चादुत्पद्यतामिति।** एवं क्रमसम्भवश्च भावानामीश्वरश्च कारणमितीश्वरकारणिकाभिप्रायः। **छन्दभेदादिति** विस्तरः। ईश्वरच्छन्दभेदादनेककारणत्वाभ्युपगमात्[2] प्राक्पक्षविरोधाद्[3] धर्मस्वरूपविपर्ययः पक्षस्योत्पद्यते। **स चापीति** विस्तरः। स चापि **छन्दभेदो युगपत् स्यात्** ' तद्धेतोश्छन्दभेदहेतोरीश्वरस्याभिन्नत्वादेकत्वादित्यर्थः। ततश्चैव स पूर्वोक्तो दोषो युगपत् स्यादिति। अथ मन्यसे ' अन्यदपि कारणान्तरं भिन्नं तदुत्पत्तावीश्वरोऽपेक्षत इत्यत इदमुच्यते। **कारणान्तरभेदापेक्षणे चेति** विस्तरः। **नेश्वर एव** कारणमित्यभ्युपगमे स एव दोषः। **तेषामपि चेति** विस्तरः। तेषामपि च कारणान्तराणां **क्रमोत्पत्ता**विष्यमाणायां कारणान्तरभेदानामपि पुनः **कारणान्तरभेदापेक्षणादनवस्थाप्रसङ्गः** ' तेषामपि कारणान्तरभेदापेक्षणं तेषामपि कारणान्तरभेदापेक्षणमित्यपर्यवसानप्रसङ्गः **स्यात्। शाक्यपुत्रीयमेव न्यायमिति। अनादिः** संसार इति शाक्यपुत्रीयं न्यायं **नातिक्रान्तः स्यात्। यौगपद्येऽपीति** विस्तरः। अथापि स्यात्। यौगपद्ये**ऽपीश्वरच्छन्दानां न जगतो यौगपद्यम्।** कस्मात् ' **यथाच्छन्दमुत्पादात्।** यश्छन्दोऽयमिदानीमुत्पद्यतामिति ' तस्य तस्माच्छन्दादिदानीमेवोत्पत्तिः। यः पश्चादुत्पद्यतामिति ' तस्य तस्मात् पश्चादुत्पत्तिः। इदं च पश्चात् [4]पश्चात्तरमेवंप्रकारमिति तस्य तस्मात् पश्चात्तरं[5] तथैवोत्-

---

1 To. क्रमोत्पादित्वादिलक्षणेन 2 To. ०भेदाच्चैककारणत्वाभ्युपगमाच्च

3 Mss. add धारापाती after विरोधाद्. 4 Mss. पश्चान्तर०

5 Mss. पश्चान्तरं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पत्तिरिति । **तच्च न । तेषां पश्चाद्विशेषाभावात् ।** तेषां छन्दानां पश्चान्न कश्चिद्विशेष इति । यथैव पूर्वं नारभन्ते तथा पश्चादपि नारभेरन् । यथा वा पश्चादारभन्ते तथा पूर्वमपीति । अथ वा एक एवोत्पादयिता नेतर इति तेषां विशेषाभावः । अतः प्राप्तमेव भावानामीश्वरच्छन्दानामिव यौगपद्यम् । कारणान्तरापेक्षत्वे वा छन्दविशेषाणां पूर्ववद्दोषः । **न तस्यामीश्वरः स्यादिति ।** न तस्यां प्रीतावीश्वरः स्यात् । **विनोपायेन तत्कारणाशक्तेः ।** एतदीश्वरस्येश्वरत्वम् । यदसौ कारणान्तरानपेक्षः कुर्यात् । **तथैव चान्यस्मिन्निति ।** यथा प्रीतावनीश्वर एवमन्यस्मिन्नपि त्रैलोक्ये नेश्वर इत्यनुमीयते । **यदि चेश्वर** इति विस्तरः । **नरकादिषु प्रजां सृष्ट्वा बहुभिश्चेतिभिरुपसृष्टाम् ।** बहुभिरनेकैः प्रकारैरीतिभिरुपसर्गै रोगादिभिरुपसृष्टामुपद्रुतां प्रजां सृष्ट्वा **यदि** प्रीयेत **नमोऽस्तु तस्मै** इत्युत्प्रासवचनमेतत् । **सुगीतश्चेति** विस्तरः । सूक्तश्चायं **तमारभ्य** तमीश्वरमधिकृत्य **श्लोकः शतरुद्रीये**[1] व्यासेन

यन्निर्दहति

इत्यादि । यस्मान्निर्दहति तस्माद्रुद्र इत्येवं सर्वत्र । **अन्येषामिति ।** बीजादीनामङ्कुरादिषु **प्रत्यक्षः पुरुषकारो निह्नुतः स्यात् । कारणेभ्योऽन्यस्य व्यापारादर्शनादिति ।** चक्षूरूपालोकमनस्कारादिभ्यश्च चक्षुर्विज्ञानाद्युत्पत्तौ बीजक्षेत्रोदकादिभ्यश्चाङ्कुराद्युत्पत्तावन्यस्य व्यापारानुपलब्धेः । यथा हि चक्षुरादीनां चक्षुर्विज्ञानाद्युत्पत्तौ बीजादीनां चाङ्कुराद्युत्पत्तौ व्यापारो दृश्यते । तद्भावे भावात्तदभावे चाभावात्[2] । न तथा चक्षुरादिभावे बीजादिभावे चेश्वरस्याभावे चक्षुर्विज्ञानाङ्कुराद्यभावो दृष्टः । पुनश्च तद्भावे भावः यतस्तस्यापि तदुत्पत्तौ व्यापारो गम्येत[3] ।[4]इत्यतस्तद्व्यापारादर्शनात् **सह कारणैरीश्वरं कारणं कल्पयतां,केवलो भक्तिवादः स्यात् । किं च सहकारिषु** चेति विस्तरः । यानि सहकारीण्यन्यानि तस्येश्वरस्य । **किं तेष्वीश्वरो नेश्वरः स्यात् ।** तानि हि कार्योत्पत्तौ स्वसामर्थ्येन व्याप्रियन्ते । अन्येषु तु सहकारिष्वीश्वरः स्यादित्यन्य-

---

1 Mbh. (Kumbhakonam Edition), Droṇa, 203, 144.

2 A वाभावात्

3 To. गम्यते

4 To. अत०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ग्रहणम् । आदिसर्ग ईश्वरहेतुकः । तथा हि प्रत्यक्षपुरुषकारनिह्नवो न स्यात् । कारणेभ्योऽन्यस्य व्यापारादर्शने चादोषो जगतश्चेश्वरः[1] कारणमिति । तस्याप्यन्यकारणानपेक्षत्वान् । तस्याप्यादिसर्गस्यान्यकारणानपेक्षत्वात् । ईश्वर एवैकः कारणं नान्यदिति । ईश्वरवदनादित्वप्रसङ्गः । अनिष्टं चैतत् । तस्मान्नेश्वरः कारणम् ।

एवं प्रधानेऽपि यथायोगं योज्यमिति । प्रधानमचेतनम् । तस्मात्तत्र छन्दविकल्पनां[2] हित्वा शेषप्रतिषेधविधानं योज्यम् । यद्येकमेव कारणं प्रधानं स्यात् युगपत् सर्वेण जगता भवितव्यं स्यात् । दृश्यते च भावानां क्रमसम्भवः । कारणान्तरभेदापेक्षणे वा न प्रधानमेव कारणं स्यात् । तेषामपि क्रमोत्पत्तौ कारणान्तरभेदापेक्षणादनवस्थाप्रसङ्गः स्यादिति विस्तरः । एवं खल्वपि जगतः कारणं परिगृह्णता अन्येषामर्थानां प्रत्यक्षः पुरुषकारो निह्नुतः स्यात् । सहापि च कारणैः कारणं प्रधानं कल्पयतां केवलो भक्तिवादः स्यात् । कारणेभ्योऽन्यस्य व्यापारादर्शनात् सहकारिषु चान्येषु कारणेषु तत् प्रधानमप्रधानं स्यात् । अथादिसर्गः प्रधानहेतुकः । तस्यापि महदाद्युत्पादस्वभावस्यादिसर्गस्याद्यलक्षणत्वात् प्रधानवदनादित्वप्रसङ्गः । नित्यं हि प्रधानं प्रधानञ्च महतः कारणमिति पूर्वप्रधानं पश्चान्महानिति न सिध्यति । प्रसवधर्मि च प्रधानमिति तेन नित्यं प्रवर्तितव्यं कारणान्तरनिरपेक्षत्वात् । नहि प्रकाशः प्रकाश्यमर्थं प्रकाश्य पुनर्न प्रकाशयतीति । स्वभावो हि कृतार्थतां नोपेक्षते । अकृतबुद्धयः । परमार्थशास्त्रैरसंस्कृतबुद्धय इत्यर्थः ॥६४॥

[द्विधा भूतानि तद्धेतुर्भौतिकानि तु पञ्चधा ।
त्रिधा भौतिकमन्योन्यं भूतानामेकधैव तत् ॥६५॥]

द्विधा भूतानि तद्धेतुः

इति । पूर्वोत्पन्नानि भूतानि पश्चादुत्पन्नानां स्वासन्तानिकानां सभागहेतुरविनिर्भागवर्तीनि सहभूहेतुः । भूतानुविधायित्वादिति । भौतिकं भूतान्यनुविधत्ते ।

1 Mss. ०श्वरस्य 2 Mss. छन्दकल्पनां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्विकारे विकारात्। आचार्यादिनिश्रयवदिति। यथा भिक्षुराचार्यमाश्रयते। आदिशब्देन उपाध्यायञ्च निश्रयते। तद्वद्भूतानि भौतिकं निश्रयते। एवमेषामिति विस्तरः। जन्महेतुत्वमेषां भूतानामाख्यातं तु भौतिकस्य तेभ्य उत्पत्तेः। विकारहेतुत्वं तदनुविधायित्वात्। आधारहेतुत्वमाधारभावात्। स्थितिहेतुत्वमनुच्छेदहेतुत्वात्। वृद्धिहेतुत्वमुपबृंहणहेतुत्वादिति। अविशेषवर्तित्वादिति। अविभिन्नभावावस्थानेनान्येषामपि हेतुत्वादित्यर्थः। अन्योन्यं चित्तानुपरिवर्तिकायवाक्कर्मेति। कायकर्म चित्तानुपरिवर्ति ध्यानानास्रवसंवरसंगृहीतं त्रिविधं प्राणातिपातादत्तादानकाममिथ्याचारविरतिभेदेन। वाक्कर्मापि चित्तानुपरिवर्ति ध्यानानास्रवसंवरसंगृहीतमेव चतुर्विधम्। मृषावादपैशुन्यपारुष्यसम्भिन्नप्रलापविरतिभेदेन। तदेवं सप्तविधं कायवाक्कर्मान्योन्यं सहभूहेतुः। प्राणातिपातविरतिरुपादायरूपमितरेषां षण्णां सहभूहेतुः। तान्यपि षट् तस्य सहभूहेतुरिति सर्वं योज्यम्। नान्यदिति। चक्षुरादिकं सर्वमुपादायरूपं प्रातिमोक्षसंवरादिसंगृहीतमपि यावन्नान्योन्यं सहभूहेतुः पृथक्कलापत्वात्। सभागस्येति। कुशलं कुशलस्य स्वासन्तानिकस्य क्लिष्टं क्लिष्टस्येत्यादि। यस्य कायवाक्कर्मण इति। विज्ञप्त्यविज्ञप्तिस्वभावस्य समाहितस्यासमाहितस्य वा यथायोगम्। एकधैव तदिति। विपाकहेतुरेवैक इत्यवधारणम्। कारणहेतोस्तथैवागण्यमानत्वात्। पृथक्कलापत्वादिति सहभूहेत्वाद्ययोगात् ॥६५॥

[कुशलाकुशलं कामे निवृतानिवृतं मनः।
रूपारूप्येष्वकुशलादन्यत्रानास्रवं द्विधा ॥६६॥]

रूपधातावकुशलं नास्तीति। स विविक्तं कामैर्विविक्तं पापकैरकुशलैर्धर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसम्पद्य विहरतीति वचनात्। तत्र रूपधातावकुशलं नास्ति। अकुशलविवेकाद्धि यज्जातं शुभं [1]तद्विवेकजमित्युच्यते। यथा च हेतुः। तथा फलमिति। तत्रोपपत्तावपि नास्त्यकुशलमिति गम्यते। रूपारूप्यधातौ सर्व एव क्लेशोपक्लेशाववविपाकत्वान्निवृता एव नाकुशलाः ॥६६॥

[कामे नव शुभाच्चित्ताच्चित्तान्यष्टभ्य एव तत्।
दशभ्योऽकुशलं तस्माच्चत्वारि निवृतं तथा ॥६७॥

---

1 To. तद्विवेकमित्यु०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चभ्योऽनिवृतं तस्मात् सप्त चित्तान्यनन्तरम् ।
रूपे दशैकञ्च शुभान्नवभ्यस्तदनन्तरम् ॥६८॥
अष्टभ्यो निवृतं तस्मात् षट् त्रिभ्यो निवृतं पुनः ।
तस्मात् षडेवमारूप्ये तस्य नीतिः शुभात् पुनः ॥६९॥
नव चित्तानि तच्छक्षान्निवृतात् सप्त तत्तथा ।
चतुर्भ्यः शैक्षमस्मात्तु पञ्चाशैक्षं तु पञ्चकात् ॥७०॥]

[1]**अनन्तरमिति** **पश्चाद्वक्ष्यत** इति कारिकान्ते। तदिह सम्बन्धनीयम् । **समापत्तिकाले कुशलमिति ।** कामावचरप्रायोगिककुशलचित्तानन्तरं प्रथमध्यानभूमिकं सामन्तकीयं मौलीयं वा चित्तमुत्पद्यते। **प्रतिसन्धिकाले निवृतमिति ।** कामावचरोपपत्तिप्रतिलम्भिकमरणचित्तानन्तरं रूपावचरं निवृताव्याकृतं चित्तमुत्पद्यते प्रतिसन्धिकाले·।

उपपत्तिभवः क्लिष्टः सर्वक्लेशैः स्वभूमिकैः[2]

इति वचनात् । उपपत्तिरत्रान्तराभवोपपत्तिरभिप्रेता । एवमन्तराभवप्रतिसन्धिरपि क्लिष्टो वेदितव्यः । **चतसृभिर्दूरताभिर्दूर** इति । तत्रेयमाश्रयदूरता ' यदारूप्यावचरेणाश्रयेण कामावचरः कश्चिदपि धर्मो न सम्मुखीक्रियते । यथा रूपावचरेणाश्रयेण कामावचरं निर्माणचित्तं सम्मुखीक्रियत इति । अनयाश्रयदूरतया कामधातोरारूप्या दूरे भवन्ति । **आकारदूरता** ' यदारूप्यावचरेण चित्तेन कामधातुर्नाकार्यते । यथा रूपावचरेण औदारिक इत्यादिभिराकारैः । **आलम्बनदूरता** ' यदारूप्यावचरेण चित्तेन न कामधातुरालम्ब्यते । यथा रूपावचरेण । ननु च रूपधातुरपि नारूप्यावचरेण चित्तेनालम्ब्यते '

न मौलाः कुशलारूप्याः सास्रवाधरगोचराः[3]

इति वचनात् । तत् कथमिदमुच्यते कामधातोरेवारूप्या दूरत इति । सत्यं न मौलारूप्यावचरेण चित्तेन रूपधातुरध्यालम्ब्यते । किन्त्वाकाशानन्त्यायतनसामन्तकचित्तेनौदारिकाद्याकारैश्चतुर्थध्यानमालम्ब्यत इति । अतो न कामधातोरिव रूपधातोरारूप्या दूरे व्यवस्थाप्यन्ते । **प्रतिपक्षदूरता** ' यदारूप्या न कामधातोः प्रतिपक्षः । यथा रूपधातुः । इत्येवमाश्रयालम्बनाकारप्रतिपक्षदूरताभि-

1 Mss. अनन्तमि० 2 Kārikā, III, 38.
3 Ibid., VIII, 21.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रपि[1] कामधातोरारूप्या दूरे भवन्ति। तस्मान्न कामावचरकुशलानन्तरमारूप्यावचरं कुशलमुत्पद्यते। **शैक्षमशैक्षञ्चेति।** कामावचरप्रायोगिककुशलचित्तानन्तरं समापत्तिकाले लब्धपूर्वं शैक्षमुत्पद्यते। तथैव चाशैक्षम्। **क्लिष्टसमापत्त्युत्पीडितस्येति।** क्लिष्टया समापत्त्योत्पीडितस्य योगिनोऽधरायाः कुशलाया भूमेः संश्रयणान्निवृताव्याकृतादपि कुशलं चित्तमुत्पद्यते। वरमधरापि कुशला भूमिर्नोर्ध्वा क्लिष्टेति। **सर्वेभ्यो रूपारूप्यचित्तेभ्य** इति। कुशलाव्याकृतचित्तस्य मरणसम्भवात्।

तस्माच्चत्वारि

इति। **तस्मादकुशलाच्चत्वारि स्वभूमिकान्येव।** अकुशलस्योर्ध्वभूमिकुशलप्रयोगत्वासम्भवादप्रहाणाच्चोर्ध्वभूम्युपपत्तिचित्तानुत्पादात्। **कुशलं निर्माणचित्तादनन्तरमिति।** निर्माणाद्व्युत्थानकाले। **तस्मादनन्तरमेकादशेति।** प्रतिसन्धिसमापत्तितद्व्युत्थाननिर्माणप्रवेशकालेष्वेकादशचित्तोत्पत्तिसम्भवः। कथम्। स्वभूमिकानि त्रीणि कामावचराणि च। व्युत्थानकाले कुशलम्। प्रतिसन्धिकाले क्लिष्टद्वयम्। अनिवृताव्याकृतं च निर्माणचित्तम्। आरूप्यावचरं च निवृताव्याकृतं प्रतिसन्धिकाले। कुशलं च समापत्तिकाले। शैक्षमशैक्षं चेति। **न त्वारूप्यावचरमनिवृताव्याकृतम्।** अवश्याक्लिष्टत्वात्। समापत्त्याद्ययोगाच्च[2]। न हि तत् प्रयोगलभ्यं यथा रूपावचरं कामावचरं च निर्माणचित्तम्। **कामावचरं च क्लिष्टद्वयमारूप्यावचरं चानिवृताव्याकृतं हित्वेति।** न कामावचरात् क्लिष्टद्वयाद्रूपावचरं कुशलमुत्पद्यते। तस्य क्लिष्टद्वयस्य तत्प्रयोगानर्हत्वात्। अत एव च नारूप्यावचरादनिवृताव्याकृतात्तदुत्पद्यते। कुशलेन च प्रतिसन्धिबन्धाभावात्। **कामावचरं क्लिष्टद्वयं शैक्षाशैक्षे च स्थापयित्वेति।** न कामावचरात् क्लिष्टद्वयाद्रूपावचरं निवृताव्याकृतमुत्पद्यते। तदप्रहाणे रूपधातौ प्रतिसन्धिबन्धाभावेन निवृताव्याकृतचित्तासम्भवात्। न शैक्षाशैक्षाभ्याम्। ततस्तेन क्लिष्टेन व्युत्थानासम्भवात्। **कामावचराणि चेति।** त्रीणीत्यधिकृतम्। प्रतिसन्धिकाले क्लिष्टद्वयं क्लिष्टसमाध्युत्पीडितस्य च कुशलम्। **कामावचरे च क्लिष्टे आरूप्यावचरं चेति।** प्रतिसन्धिकाले। **अधरधातुकानि च क्लिष्टानि** प्रतिसन्धिकाले। **आरूप्यावचरात् कुशलान्नवेति।** स्वभूमिकानि त्रीणि। रूपावचरं कुशलं तत्समापत्तिव्युत्थानकाले प्रतिलोम-

---

1 A रयं

2 Mss. समापद्याद्य°

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समापत्तौ च। अधरभूमिकानि च क्लिष्टानि प्रतिसन्धिकाले। शैक्षमशैक्षं च। कामावचरं कुशलं [1]कामरूपावचरे चानिवृताव्याकृते[1] हित्वेति। न कामावचरेण कुशलेन तत्समापत्तेर्व्युत्थानं सम्भवत्यतिविप्रकृष्टत्वात्। अत एव च नानिवृताव्याकृतेनाप्यपटुत्वाच्च[2]। अत एव च न रूपावचरेणानिवृताव्याकृतेन व्युत्थानम्। न चैभिः प्रतिसन्धिबन्धोऽस्तीति नैषामत उत्पत्तिः। तत् षण्णामनन्तरमिति वर्तते। रूपावचरात् कुशलादिति। समापत्तिकाले। शैक्षाशैक्षाभ्यां चेति। व्युत्थानकाले। रूपावचरं कुशलमिति। क्लिष्टसमाध्युत्पीडितस्य। निवृतं चेत्यादि। प्रतिसन्धिकाले। कामरूपावचराणि क्लिष्टानि शैक्षाशैक्षे च हित्वेति। अधोभूम्यवीतरागस्य तेन प्रतिसन्धेरभावात्। शैक्षाशैक्षाभ्याञ्च तेन व्युत्थानासम्भवान्न तेभ्यस्तदुत्पत्तिः। तान्येव चत्वार्यशैक्षं चेति। त्रीणि त्रैधातुकानि कुशलानि व्युत्थानकाले। शैक्षं च प्रवाहे। वज्रोपमानन्तरं क्षयज्ञानमित्यशैक्षं चेति पञ्च। पञ्चकादत एवानन्तरोक्तादिति। त्रैधातुकेभ्यः कुशलेभ्यः समापत्तिकाले। वज्रोपमानन्तरोत्पत्तौ प्रवाहे चेति। तस्माच्चत्वारीति। शैक्षं हित्वा। न ह्यशैक्षात् शैक्षमुत्पद्यते। परिहाणिकाले कथं नोत्पद्यते। क्लेशोत्पादव्यवहितत्वात्। व्युत्थितस्यैव परिहाणेश्च ॥६७-७०॥

[तस्माच्चत्वारि चित्तानि द्वादशैतानि विंशतिः।
प्रायोगिकोपपत्त्याप्तं शुभं भित्त्वा त्रिषु द्विधा ॥७१॥
विपाकजैर्यापथिकशैल्पस्थानिकनैर्मितम्।
चतुर्धा व्याकृतं कामे रूपे शिल्पविवर्जितम् ॥७२॥]

प्रायोगिकं चोपपत्तिलाभिकं चेति। प्रायोगिकं यत्प्रयोगाल्लभ्यते। श्रुतचिन्ताभावनामयं त्रिषु धातुषु यथासम्भवम्। [3]उपपत्तिलाभिकं कामरूपधात्वोरन्तराभवप्रतिसन्धिक्षणे प्रथमतो यस्य प्राप्तिरुत्पद्यते। आरूप्यधातौ चोपपत्तिभवे यस्य प्राप्तिरुत्पद्यते। विपाकजमैर्यापथिकं शैल्पस्थानिकं निर्माणचित्तं चेति। हेतुकर्मभेदादयं भेदः। विपाकहेतोर्जातं विपाकजम्। ईर्यापथेषु शयनासनस्थितिचंक्रमणेषु[4] भवमैर्यापथिकम्। शिल्पस्थानेषु भवं शैल्पस्थानिकम्। निर्माणे चित्तं निर्माणचित्तम्। निर्मिते निर्माणे वा भवं नैर्मितं नैर्माणिकमिति वा। तदेवोच्यते। पुनर्विंशतिर्भवन्तीति। कथमित्याह। षोढा

1...1 To. कामरूपावचरानिवृताव्याकृते
2 To. omits च.
3 Mss. उत्पत्ति॰
4 Mss. omit स्थिति which To. suggests. Tib. འགྲེང་བ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुशलमनिवृताव्याकृतं च सप्तधा भित्त्वेति। त्रिषु धातुषु प्रायोगिकोपपत्तिप्रतिलम्भिकभेदेन कुशलं षोढा भित्त्वा। कामरूपधात्वोश्चानिवृताव्याकृते सप्तधा भित्त्वा। कामधातौ विपाकजैर्यापथिकशैल्पस्थानिकनैर्माणिकभेदेन। रूपधातौ च विपाकजैर्यापथिकनैर्माणिकभेदेनेति। तान्येतानि त्रयोदश शेषाणि च सप्ताभिन्नान्येव। तद्यथा ' कामावचरमकुशलं निवृताव्याकृतं च ' रूपावचरं निवृताव्याकृतमेव ' आरूप्यावचरं निवृताव्याकृतमनिवृताव्याकृतं च। शैक्षमशैक्षं चेति विंशतिचित्तानि भवन्ति। **ईर्यापथाद्यभावादिति।** ईर्यापथशिल्पस्थाननिर्माणाभावात्। एतानि त्रीण्यारूप्यधातौ न सन्ति। आलम्बनभूतस्य रूपस्याभावात्। **रूपगन्धरसस्प्रष्टव्यान्येषामालम्बनमिति।** तत्र शय्यासनरूपादयः स्वशरीरावयवरूपादयश्चैर्यापथिकस्यालम्बनम् ' शैल्पस्थानिकस्य शिल्पस्थानरूपादयः ' नैर्माणिकस्य निर्माणरूपादयः। **शैल्पस्थानिकस्य तु शब्दोऽपीति।** तुशब्दो विशेषणे। अपिशब्देन रूपादयः। शब्दोऽप्यस्यालम्बनम्। शिल्पोपदेशशब्दमालम्ब्य मनोविज्ञानेन शिल्पं शिक्षत इति। विपाकजस्यावचनात् सर्वेऽपि रूपादय आलम्बनमित्यवगन्तव्यम्। **मनोविज्ञानान्येवेति।** मनोविज्ञानस्वभावान्यैर्यापथिकादीनि त्रीणि। विकल्पाभिसंस्करणे प्रवृत्तत्वात्। विपाकजमवचनात् षड्विज्ञानस्वभावमिति ज्ञापितं भवति। **पञ्च तु विज्ञानकायमैर्यापथिकशैल्पस्थानिकयोः प्रायोगिका इति।** तत्प्रयोगावस्थायां भवत्वात् प्रायोगिकाः। यस्मात्ते दृष्ट्वा यावत् स्पृष्ट्वोत्पद्यन्त[1] इति। विपाकस्य प्रयोगो नास्ति ' कर्मसामर्थ्येन स्वरसवाहित्वात्।

ऐर्यापथिकाभिनिर्हृतमिति विस्तरः। ऐर्यापथिकेन मनोविज्ञानेनाभिनिर्हृतमुत्पादितं **मनोविज्ञानमस्ति द्वादशायतनालम्बनम्।** चक्षुरायतनालम्बनं यावद्धर्मायतनालम्बनमनिवृताव्याकृतस्वभावमित्यपरे। तदेवं प्रदर्शयन्ति। अन्यदप्यनिवृताव्याकृतमस्ति यदैर्यापथिकादिषु नान्तर्भवतीति। इत्थमेव च प्रतिपत्तव्यम्। अन्यथा हि॰यद् वक्ष्यति

कायाक्षिश्रोत्रविज्ञानं विज्ञप्त्युत्थापकञ्च यत्।
द्वितीयादौ तदाद्याप्तमक्लिष्टाव्याकृतञ्च तत्॥[2]
स्वभूमिकेन निर्माणं भाषणं त्वधरेण च।[3]

---

1 Mss. स्पृष्ट्वोत्पद्यन्त 2 Kārikā, VII, 13.
3 Ibid., VII, 56.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्यादि । तानि विज्ञानान्येषां चतुर्णां कतमेन संगृहीतानि । न तावद् विपाकजानि । ऊर्ध्वोपपन्नानामधरभूमिकविपाकासम्भवात् । नैर्यापथिकादीनि । ईर्यापथाद्यभावात् । अज्ञानादिवासनाचित्तं च क्व प्रवेशयितव्यम् । भदन्तानन्तवर्मणापि विभाषाव्याख्यान उक्तम् । एतच्चतुष्टयव्यतिरिक्तान्यव्याकृतानि विज्ञानानि सन्तीति । सावशेषमेतद् भाष्यमित्यवगन्तव्यम् ।

अन्यत्राभिज्ञाफलादिति । कामावचरं निर्माणचित्तं रूपावचरप्रायोगिकानन्तरमेवोत्पद्यते । न कामावचरप्रायोगिकानन्तरम् । **रूपावचरं प्रायोगिकं शैक्षमशैक्षं चेति ।** समापत्तिकाले । **स्वेभ्यः कुशलक्लिष्टेभ्य इति ।** स्वाभ्यां कुशलाभ्यां क्लिष्टाभ्यां च । प्रयोगकाले क्लिष्टासद्भावात् । क्लेशपरिखिन्नस्य च प्रायोगिकोत्पत्तेः । नानिवृताव्याकृतेभ्यो दुर्बलानभिसंस्कारित्वात् । **रूपावचराभ्यां प्रायोगिकक्लिष्टाभ्यामिति ।** प्रायोगिकात् क्लिष्टात् । **शैक्षाशैक्षाभ्यां च** व्युत्थानकाले । क्लिष्टात् क्लिष्टसमाध्युत्पीडितस्य । **रूपारूप्यावचरे च क्लिष्टे इति ।** प्रतिसन्धिकाले । सम्भवति ह्युपपत्तिप्रतिलम्भिकचित्तस्य मरणम् । **पूर्ववदिति ।** अन्यत्राभिज्ञाफलादित्यर्थः । तद्धि रूपावचरप्रायोगिकानन्तरमेवेत्युक्तम् । रूपावचराभ्यां चेति विस्तरेण पूर्ववद् व्याख्यानम् । **अकुशलनिवृताव्याकृतानन्तरमिति ।** अकुशलानन्तरं निवृताव्याकृतानन्तरं चेति विभक्तव्यम् । तुल्यत्वाद्धि तद्युगपद्वचनम् । **रूपावचरेभ्यश्चतुर्भ्यः । अन्यत्र प्रायोगिकाभिज्ञाफलाभ्यामिति ।** प्रतिसन्धिकाले । प्रायोगिकेऽभिज्ञाफले च स्थितस्य नास्ति मरणम् । अतस्ताभ्यां तत् क्लिष्टद्वयं नोत्पद्यते । शेषेषु तु स्थितस्यास्ति मरणम् । अतस्तेभ्यस्तत् क्लिष्टद्वयमुत्पद्यते । प्रतिसन्धिकाले । एवमन्यत्राप्यन्यत्र प्रायोगिकादिति व्याख्येयम् । **षडन्यत्र प्रायोगिकाभिज्ञाफलाभ्यामिति ।** दुर्बलानभिसंस्कारिकत्वात्[1] । अनयोरनन्तरं प्रायोगिकं नोत्पद्यते । रूपावचरप्रायोगिकानन्तरोत्पत्तेश्च न ताभ्यामभिज्ञाफलोत्पत्तिः । **रूपारूप्यावचरे च क्लिष्टे इति ।** प्रतिसन्धिकाले । **शैल्पस्थानिकानन्तरं षडिति ।** तत्रस्थस्य मरणासम्भवादैर्यापथिकविपाकजवदिह रूपारूप्यावचरक्लिष्टयोरसम्भवः । **स्वं चाभिज्ञाफलमेवेति ।** प्रवाहकाले । **रूपावचरं च प्रायोगिकमिति ।** तद्व्युत्थाने । न तदित्यप्रविश्य[2] ध्यानमभिज्ञाफलाद्व्युत्थानमस्तीति । **तदप्यस्मादेव द्वयादिति ।** तदभिज्ञाफलं

1 To. °संस्कारकत्वात्

2 To. ह्यप्रविश्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रवाहे तत्प्रवेशकाले च। कामावचरकुशले इति। व्युत्थानकाले। अस्ति हि सम्भव उपपत्तिप्रतिलम्भिकेनापि समापत्तिव्युत्थानं पटुत्वात्। अतो द्वयोरपि कुशलयोर्ग्रहणम्। अभिज्ञाफलं चेति। कामावचरं निर्माणचित्तम्। आरूप्यावचरप्रायोगिकशैक्षाशैक्षाणि[1] समापत्तिकाले। अन्यत्रैर्यापथिकविपाकजाभ्यामिति। तयोर्दुर्बलानभिसंस्कारिकत्वात्। प्रायोगिकक्लिष्टाभ्यामिति। व्युत्थानक्लिष्टसमापत्त्युत्पीडितकालयोः। कामावचरं क्लिष्टे इति प्रतिसन्धिकाले। अन्यत्राभिज्ञाफलादिति। निर्माणचित्तस्य प्रायोगिकानन्तरोत्पत्तेः। आरूप्यावचरं क्लिष्टमिति। प्रतिसन्धिकाले। कुशलक्लिष्टानीति। कुशले च क्लिष्टे च कुशलक्लिष्टानीति समासः। कुशलाधरभूमिकाश्रयणात् कुशले। क्लिष्टे तु प्रतिसन्धिकाले। कामावचरेभ्य इति विस्तरः। प्रतिसन्धिकाले। प्रायोगिकशैल्पस्थानिकाभिज्ञाफलेषु मृत्युर्नास्तीति न तेभ्यः। कामावचरे क्लिष्टे इति। प्रतिसन्धिकाले। आरूप्यावचरमपि क्लिष्टमस्मिन्नेव स्वं[2] प्रायोगिकमतो नोत्पद्यते। ऐर्यापथिकस्य दुर्बलानभिसंस्कारित्वेन प्रयोगानर्हत्वात्। एवं विपाकजमिति। यथैर्यापथिकमुक्तं तथेदं विपाकजानन्तरं सप्त यावदन्यत्राभिज्ञाफलादिति। तावेव ग्रन्थार्थौ। अभिज्ञाफलानन्तरं द्वे स्वे इति। व्युत्थाने प्रवाहे च। तदप्याभ्यामेवेति। प्रवेशे प्रवाहे च। रूपावचरं प्रायोगिकमिति। व्युत्थानकाले। एवं शैक्षमशैक्षञ्च[3] स्वानि चत्वारीति। कुशलं भवतीति स्फुटम्। क्लिष्टमास्वादनाकालेऽनिवृताव्याकृतं तु व्युत्थानकाले। रूपावचरात् प्रायोगिकादिति। समापत्तिकाले। अन्यत्र विपाकजादिति। दुर्बलानभिसंस्कारवाहित्वादिति कारणं वक्ष्यते। शैक्षाशैक्षाभ्याञ्चेति। समापत्तिकाले। अधरधातुकानि च क्लिष्टानीति। रूपावचरकामावचराणि प्रतिसन्धिकाले। प्रायोगिकक्लिष्टे इति। प्रायोगिकं क्लिष्टसमाध्युत्पीडनात। क्लिष्टं प्रतिसन्धिकाले। कामावचरेऽपि क्लिष्टे प्रतिसन्धिकाल एव। कामावचररूपावचरेभ्य इति विस्तरः। तच्चित्तस्थमरणसम्भवात्। अन्यत्र प्रायोगिकादिति। विपाकजानन्तरं प्रायोगिकानुत्पत्तेः। अधराणि त्रीणि क्लिष्टानीति।

---

1 To. आरूप्यावचरं प्रायोगिकं शैचाशैचच 2 Mss. add तेभ्यः.
3 To. ०मशैचं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्विधातुकानि[1] प्रतिसन्धिकाले। कामावचरमुत्पत्तिलाभिकमिति। पटुत्वादेतच्छैक्षादव्युत्थानचित्तं सम्भवति। पटुत्वादिति कारणं वक्ष्यति। न तु तथा रूपारूप्यावचरे उपपत्तिलाभिके पटुनी इति न ते सम्भवतः। शैक्षं प्रवाहे अशैक्षं च वज्रोपमानन्तरम्। शैक्षमेकं हित्वेति। अशैक्षाच्छैक्षं नोत्पद्यते। तस्मादशैक्षानन्तरं पञ्च। न तु षट् यथा शैक्षात्। तानि च पञ्च शैक्षवद्वक्तव्यानि।

अत्र विंशतिचित्तानां समनन्तरप्रत्ययस्यासूत्रितस्य सूत्ररूपाः संग्रहश्लोकाः।

प्रायोगिकाच्छुभात् कामे दशाष्टभ्यस्तदन्यतः।
शुभान्नवैकादशतस्तत् सप्त क्लिष्टतः पृथक्॥
चतुर्दशभ्यस्तेऽष्टावैर्यापथिकविपाकजात्।
ते तु सप्ततः षट् शैल्पस्थानिकात्तत्तु सप्ततः॥
[2]नैर्मिताद्द्वे द्वयोश्चैतद्रूपे प्रायोगिकाच्छुभात्।
द्वादशैतत्तु दशतः शुभादष्टावयत्नजात्॥
तत् पञ्चभ्यो नव क्लिष्टात्तदेकादशतः पुनः।
विपाकजैर्यापथिकात् सप्त तत् पञ्चतो द्वयम्॥
द्वे अभिज्ञाफलाच्चित्ताद्द्वाभ्यामेव तथैव तत्।
आरूप्ये यात्निकात् सप्त कुशलात् षड्भ्य एव तत्॥
अयात्निकाच्छुभात् सप्त चतुर्भ्यस्तत् पुनः स्मृतम्।
क्लिष्टादष्टौ दशभ्यस्तत् षट् चित्तानि विपाकजात्॥
चतुर्भ्यस्तत्तु षट् शैक्षाच्चतुर्भ्यः पुनरेव तत्।
अशैक्षात् पञ्च तदपि पञ्चभ्यः समनन्तरम्॥

ईर्यापथशिल्पाभिसंस्करणप्रवृत्तत्वात्। न पुनरेभ्यः प्रायोगिकमुत्पद्यत इत्यधिकृतम्। अतोऽसम्भवादैर्यापथिकशैल्पस्थानिकानन्तरं प्रायोगिकं नोत्पद्यते। तदन्याभिसंस्करणप्रवृत्तत्वादित्यभिप्रायः। यस्मादैर्यापथिकमीर्यापथाभिसंस्करणे प्रवृत्तम् गमनाद्याकारत्वात्। शैल्पस्थानिकं च शिल्पाभिसंस्करणे प्रवृत्तम्। इदमेवं करोमीदमेवं करोमीतीत्येवमाकारप्रवृत्तत्वात्। **दुर्बलानभिसंस्कार-**

---

1 Tib. supports त्रिधातुकानि॰ : ཁམས་གསུམ

2 A नैमित्ता॰ ; C. नेम्यित्ता॰ ; V नैर्चित्ता॰

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वाहित्वाच्च विपाकजानन्तरं प्रायोगिकं नोत्पद्यते। तद्धि विपाकजमव्याकृतत्वाद्दुर्बलम्। पूर्वकर्मापत्तयात्[1]। अयत्नेन च प्रवृत्तेरनभिसंस्कारवाहीति। अथ वा ईर्यापथशिल्पाभिसंस्करणप्रवृत्तत्वात्। ऐर्यापथिकशैल्पस्थानिकानन्तरं न प्रायोगिकमुत्पद्यते। दुर्बलानभिसंस्कारवाहित्वाच्च ऐर्यापथिकशैल्पस्थानिकविपाकजानन्तरं प्रायोगिकं नोत्पद्यते। सर्वेषामव्याकृतत्वेन दुर्बलत्वात्। अनभिसंस्कारवाहित्वाच्च विपाकजस्यैवैकस्य ऐर्यापथिकशैल्पस्थानिकयोरपि वा प्रायोगिकाभिसंस्काराभावात्। अन्यव्यापारपरत्वमात्राद्धि तयोरभिसंस्करणप्रवृत्तत्वमुक्तम्। अथ वायमेवास्य वाक्यस्याभिसम्बन्धः। ईर्यापथशिल्पाभिसंस्करणप्रवृत्तत्वात्। दुर्बलानभिसंस्कारवाहित्वाच्चैतानि विपाकजैर्यापथिकशैल्पस्थानिकानि **न प्रायोगिकानुकूलानि। अतो** न तदनन्तरं प्रायोगिकमुत्पद्यत इति सम्बन्धनीयम्। **निष्क्रमणचित्तं त्वनभिसंस्कारवाहीति।** प्रायोगिकचित्तप्रवाहाद् यदन्यच्चित्तं तन्निष्क्रमणचित्तम्। तेन ह्यसौ योगी ततः प्रवाहान्निष्क्रामति तदवसानत्वात्[2]। निष्क्रमणचित्तमनभिसंस्कारवाह्यनाभोगवाहीति युक्तोऽस्य निष्क्रमणचित्तस्य विपाकजादीनामन्यतमस्वभावस्य **प्रायोगिकचित्तानन्तरमुत्पादः। एवं तर्हीति।** यदि न प्रायोगिकानुकूलानीति विपाकजादिभ्योऽनन्तरं प्रायोगिकं नोत्पद्यते। **एवं तर्हि क्लिष्टेभ्योऽपि प्रायोगिकं नोत्पद्यते विगुणत्वात्।** विगुणो हि क्लिष्टो धर्मः कुशलस्य नानुकूल इत्यर्थस्तद्विरोधित्वात्। **तथापीति** विस्तरः। यद्यपि तद्विगुणं तथापि क्लेशसमुदाचारपरिखिन्नस्य योगिनस्तत्परिज्ञानात् क्लेशसमुदाचारपरिज्ञानाद् युक्तः प्रायोगिकसम्मुखीभावः। तत् परिज्ञानमेव हि प्रायोगिकं चित्तमिति। पटुत्वादिति। **कामावचरमुत्पत्तिप्रतिलम्भिकं** पटु तच्छैक्षादिभ्यो व्युत्थानचित्तं सम्भवति। अत एव च क्लिष्टसमाध्युत्पीडितस्य तदाश्रयणं भवति। **अनभिसंस्कारवाहित्वात्तु तस्य** तस्माच्छैक्षादीनि नोत्पद्यन्ते। **रूपावचरं तूपपत्तिप्रतिलम्भिकं न कामावचरवत् पटु।** तस्मात् क्लिष्टसमाध्युत्पीडितस्य तदाश्रयणं न भवति। प्रायोगिकमेवाश्रीयते। अन्योन्यानन्तरं चित्तानामुत्पादः।

---

1 To. कर्माक्षेपात्   2 To. तदवतारत्वात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तानि च मनस्कारवशादुत्पद्यन्त इत्यतो मनस्कारोपक्षेपः। **त्रयो मनस्कारा** इति विस्तरः। स्वलक्षणस्य मनसिकरणं **स्वलक्षणमनस्कारः**। **तद्यथा रूपणालक्षणं रूपमित्येवमादि**। आदिशब्देनानुभवनलक्षणा वेदनेत्येवमादि। अनित्यत्वादिमनसिकरणं **सामान्यलक्षणमनस्कारः षोडशाकारसम्प्रयुक्तः**। अनित्यतो यावन्नैर्याणिकत इति। अधिमुक्त्या न भूतार्थं मनसिकरणमधिमुक्तिमनस्कारः[1]। **अशुभायां यावत् कृत्स्नायतनादिषु**। आदिशब्देन ऋद्ध्यादीनामभिनिर्हारे लघुत्वाद्यधिमोक्षो गृह्यते, तद्यथा महर्धिको महानुभावः परीत्तां पृथिवीसंज्ञामधितिष्ठति[2]। अप्रमाणामप्संज्ञाम्[3]। स आकांक्षन्[4] पृथिवीं [5]चलयतीति विस्तरः। अशुभया गृहगतं सम्बद्धमशुभासहगतम्। एतदुक्तं भवति। अशुभामनस्कारानन्तरं **स्मृतिसम्बोध्यङ्गं भावयति** जनयत्युत्पादयतीति। स्मृतिसम्बोध्यङ्गं ह्यार्यमार्ग इत्यस्त्यधिमुक्तिमनस्कारानन्तरमार्यमार्गोत्पाद इति दर्शयति। आह, यदि सामान्यमनस्कारानन्तरमेव नाधिमुक्तिमनस्कारानन्तरमार्यमार्गं सम्मुखीकरोति, इदं कथं नीयते, अशुभासहगतं स्मृतिसम्बोध्यङ्गं भावयतीति। अत इदमुच्यते। **अशुभया तु चित्तं दमयित्वेति** विस्तरः। प्रयोगावस्थायामशुभया चित्तं दमयित्वा यावदवसाने **सामान्यमनस्कारानन्तरमार्यमार्गं सम्मुखीकरोति**, अतो न सूत्रविरोध इति। **आर्यमार्गानन्तरमपीति** विस्तरः। न केवलं सामान्यमनस्कारानन्तरमार्यमार्गं सम्मुखीकरोति, आर्यमार्गानन्तरमपि सामान्यमनस्कारमेव सम्मुखीकरोतीत्य**परे**। **स्यात्तावदिति** विस्तरः। **अनागम्यादीति**। आदिशब्देनानागम्यप्रथमध्यानध्यानान्तरत्रिभूमिसन्निश्रयेण **नियामावक्रान्तौ तन्मार्गानन्तरं** त्रिमार्गानन्तरं **कामावचरं सामान्यमनस्कारं** श्रुतमयं चिन्तामयं वा **सम्मुखीकुर्यात्** सन्निकृष्टत्वात्। **अथ द्वितीयादिध्यानसन्निश्रयेण** द्वितीयतृतीयचतुर्थध्यानसन्निश्रयेण **नियामावक्रान्तौ** कथमार्यमार्गानन्तरं कथं सामान्यमनस्कारं सम्मुखीकरोति। **न हि कामावचरः शक्यः** सम्मुखीकर्तुमिति वाक्यशेषः। कस्मात्, प्रथमध्यानव्यवहितत्वेनातिविप्रकृष्टत्वात्। ब्रूयास्त्वम्, द्वितीयादि-

1 Mss. °मनसिकार:
To. अप्रमाणामपि संज्ञाम्
A चलयतीति

2 To. °संज्ञामप्यधिष्ठति
4 Mss. आकाङ्चत्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ध्यानभूमिकमेव सम्मुखीकरिष्यतीति[1]। अत आह ' **न च तद्भूमिकः प्रतिलब्धोऽन्यत्र निर्वेधभागीयादिति**। द्वितीयध्यानादिभूमिकोऽनागम्यादिभूमिको वानास्रवो[2] मार्गोऽन्यत्र निर्वेधभागीयान्न प्रतिलब्ध आसीत्। अनाकारपतितस्तु लौकिको मार्गः प्रतिलब्ध आसीत्। न तु सः। तस्मायार्याय[3] व्युत्थानार्थं रोचते। निर्वेधभागीयं तर्हि सामान्यमनस्कारं सम्मुखीकरिष्यतीति। अत आह ' **न चार्यो निर्वेधभागीयमिति** विस्तरः। **किमर्थमिति** चेत्। अत आह '**न हि प्राप्तफलस्य तत्प्रयोगसम्मुखीभावो युक्त इति**' प्रयोगस्य कृतार्थत्वान्निहीनत्वाच्च निर्वेधभागीयानि चार्यमार्गस्य प्रयोग इति। **अन्योऽप्यस्य तज्जातीय** इति। यः सत्यालम्बनत्वान्निर्वेधभागीयजातीयः सामान्यमनस्कारो भावनां गच्छति। अनास्रवमार्गोत्पत्तिकाले प्राप्यत इत्यर्थः। कथम् ' शान्तं निर्वाणमिति सामान्यमनस्कारः सर्वनिर्वाणालम्बनत्वात्। **तत् सम्मुखीकरिष्यतीति**। **सर्वसंस्कारा अनित्या** इति वा **सर्वधर्मा अनात्मान** इति वा **शान्तं निर्वाणमिति** वार्यमार्गानन्तरं सम्मुखीकरिष्यतीति। **तदेतन्न वर्णयन्ति**। कस्मात् ' एषां तज्जातीयानां सामान्यमनस्काराणां निर्वेधभागीयप्रतिबद्धभावनत्वात्। न किलैषामनास्रवमार्गप्रतिबद्धाभावेनेति। **अनागम्यं निश्रित्येति**[4] विस्तरः। तद्भूमिकमिति। अनागम्यभूमिकम् ' **तद्भूमिकं भावाग्रिकं वेति**। आकिञ्चन्यायतनभूमिकं भावाग्रिकं वा यदि भवाग्रोपपन्नो भवति ' **शेषासु भूमिषु स्वभूमिकमेव व्युत्थानचित्तम्** ' नान्यभूमिकम्। अन्यभूमिकस्य प्रयोगसाध्यत्वात् ' स्वभूमिकमनभिसंस्कारेण भवतीति। **प्रयोगप्रतिबद्धत्वादिति**। कस्य ' आर्यमार्गस्य। मार्गानन्तरं तूपपत्तिप्रतिलम्भिकस्यापि कामावचरस्य सम्मुखीभाव इत्यधिकृतम् ॥७२॥

[क्लिष्टे त्रिधातुके लाभः षण्णां षण्णां द्वयोः शुभे।
त्रयाणां रूपजे शैक्षे चतुर्णां तस्य शेषिते ॥७३॥]

क्लिष्टे त्रिधातुके लाभः षण्णां षण्णां द्वयोः

इति। यथासंख्येन निर्देशः। कामावचरे क्लिष्टे षण्णां चित्तानां लाभः ' प्रतिलम्भ इत्यर्थः। रूपावचरे षण्णाम् ' आरूप्यावचरे द्वयोरिति। तेनाह ' **कामावचरे हि क्लिष्ट** इति विस्तरः। **तैरसमन्वागतस्येति**। तैः षड्भिश्चित्तै-

---

1 To. ०करोतीति
2 Mss. नागामिनोऽनागतो
3 To. तस्मादार्यस्य
4 Mss. निसृत्येति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रसमन्वागतस्य पुद्गलस्य । कथम् । इह कुशलप्रतिसन्धानं सम्यग्दृष्ट्या वा **विचिकित्सया** वा । तद्यदि विचिकित्सया प्रतिसन्धत्ते । तत्र विचिकित्सासम्प्रयुक्ते क्लिष्टे चित्ते सम्मुखीभूते[1] रूपधातोरारूप्यधातोर्वा कामधातुं प्रत्यागच्छति । तदास्यान्तराभवप्रतिसन्धिचित्तेऽवश्यक्लिष्टे तस्य कुशलस्य लाभस्तेनासमन्वागतस्येति । **अकुशलनिवृताव्याकृतयोरिति** विस्तरः । अकुशलं च निवृताव्याकृतं च कामावचरमेवाधिकाराद्रूपावचरस्य च निवृतस्य पृथक्पाठात् । तयोरकुशलनिवृताव्याकृतयो रूपावचरस्य क्लिष्टस्य । किम् । लाभ इति प्रकृतम् । कथं लाभ इत्याह । **धातुप्रत्यागमनात् परिहाणितश्चेति** । यदा रूपधातोरारूप्यधातोर्वा कामधातुं प्रत्यागच्छति तदास्यान्तराभवप्रतिसन्धिचित्तेऽवश्यं क्लिष्टेऽकुशलनिवृताव्याकृतयोरन्यतरस्मिन् सम्मुखीभूते तयोरकुशलनिवृताव्याकृतयोर्लाभो भवति पूर्वविहीनत्वात् तेनासमन्वागतस्य । परिहाणितश्च । यदा च कामवैराग्यात् परिहीयते तदास्य क्लिष्टे परिहाणिचित्ते सम्मुखीभूते तयोः क्लिष्टयोर्लाभस्तेनासमन्वागतस्य । रूपावचरस्य च क्लिष्टस्य धातुप्रत्यागमनात् । यदारूप्यधातोः कामधातुं प्रत्यागच्छति तदास्यान्तराभवप्रतिसन्धिचित्तेऽवश्यं क्लिष्टे[2] रूपावचरस्य क्लिष्टस्य पूर्वविहीनस्य लाभो भवति तेनासमन्वागतस्य । परिहाणितश्च । यदा रूपवैराग्यात् परिहीयते कामावचरेण चित्तेन तदास्य वैराग्यत्यक्तस्य रूपावचरस्य क्लिष्टस्य लाभो भवति तेनासमन्वागतस्य । **आरूप्यावचरस्य क्लिष्टस्य परिहाणितः** । यदा कामावचरेण चित्तेनारूप्यवैराग्यात् परिहीयते । तदास्यारूप्यावचरस्य क्लिष्टस्य लाभो भवति तेनासमन्वागतस्य । **शैक्षस्य च** । परिहाणित इत्यधिकृतम् । यदा कामावचरेण चित्तेनार्हत्त्वात् परिहीयते तदास्य शैक्षचित्तस्य लाभो भवति तेनासमन्वागतस्य । एवं तावत् कामावचरे क्लिष्टे चित्ते सम्मुखीभूते षण्णां चित्तानां लाभ उक्तस्तैरसमन्वागतस्य । **रूपावचरे क्लिष्टे चित्ते सम्मुखीभूते षण्णां लाभस्तैरसमन्वागतस्य** । **रूपावचराणामिति** विस्तरः । यदारूप्यधातो रूपधातुं प्रत्यागच्छति तदास्य रूपावचरान्तराभवप्रतिसन्धिचित्तेऽवश्यं[3] क्लिष्टे रूपावचराणां त्रयाणां कुशलस्योपपत्तिप्रतिलम्भिकस्य क्लिष्टस्यानिवृताव्याकृतस्य च निर्माणचित्तस्याग्रजप्राप्तिसद्भावात् । **कामावचरस्य [4]चानिवृताव्याकृतस्य निर्माणचित्त-**

---

1 To. following Tib. adds यदा.

2 Mss. क्लिष्ट

3 Mss. ०चित्तेनावश्य

4 Mss. वानिवृता०

स्यैव । आरूप्यावचरस्य क्लिष्टस्य शैक्षस्य च लाभः । परिहाणितो रूपावचरेण चित्तेनार्हत्त्वात् परिहीयमाणस्य तदसमन्वागतस्य । एवं रूपावचरेऽपि क्लिष्टे षण्णां लाभ उक्तः । आरूप्यावचरे तु क्लिष्टे द्वयोर्लाभस्ताभ्यामसमन्वागतस्य । परिहाणित आरूप्यावचरेण चित्तेनार्हत्त्वात् परिहीयमाणस्यैव क्लिष्टस्य यस्यैकदेशः सम्मुखीभूतः शैक्षस्य चेति ।

रूपावचरे कुशले त्रयाणाम्

इति । कुशल इति जातिनिर्देशः । कुशले कस्मिंश्चिद्रूपावचरे त्रयाणां लाभः सम्भवः । कथम् ' आद्ये तावद्रूपावचरे कुशले चित्ते सम्मुखीभूते तस्यैव कुशलस्य रूपावचरस्य लाभस्तेनासमन्वागतस्य । मौलध्यानसंगृहीते तु कुशले चित्ते सम्मुखीभूते कामावचररूपावचरयोरनिवृताव्याकृतयोर्निर्माणचित्तयोर्लाभस्ताभ्यामसमन्वागतस्य । इत्येवं कुशले रूपावचरे चित्ते सम्मुखीभूते त्रयाणां लाभ इत्युच्यते ' न तु युगपल्लाभ इति ।

शैक्षे चतुर्णाम्

इति । शैक्षे चित्ते सम्मुखीभूते दुःखे धर्मज्ञानक्षान्तिचित्ते तस्यैव शैक्षस्य दुःखे धर्मज्ञानक्षान्तिकलापस्वभावस्य लाभस्तेनासमन्वागतस्य । कामरूपावचरयोश्चानिवृताव्याकृतयोरारूप्यावचरस्य च कुशलस्य । कस्मिन् कलाप इत्याह । आर्यमार्गेण कामरूपवैराग्ये[1] । कथमिति ' यदायमनागम्यभूमिकेनार्यमार्गेण कामवैराग्यं करोति ' तदा नवमविमुक्तिमार्गसंगृहीते शैक्षे चित्ते सम्मुखीभूते कामरूपावचरयोरनिवृताव्याकृतयोर्निर्माणचित्तयोर्लाभस्ताभ्यामसमन्वागतस्य । यदा तु षड्भूमिकानामार्यमार्गाणामन्यतमेन रूपवैराग्यं करोति ' तदाद्यप्रकारचित्ते शैक्षे सम्मुखीभूतेऽतीतानागतप्राप्तिन्यायेनारूप्यावचरस्य कुशलस्य लाभस्तेनासमन्वागतस्य । आर्यमार्गग्रहणं सास्रवचित्तनिरासार्थम् । शैक्षे चित्ते सम्भूतेऽयं लाभो वर्ण्यते ।

अत्राचार्यगुणमतिर्व्याचष्टे ।

शैक्षे चतुर्णाम् ।

तस्यैव शैक्षस्य कामरूपावचरयोश्चानिवृताव्याकृतयोरारूप्यावचरस्य च कुशलस्येति । कथमित्यतो ब्रवीति । आर्यमार्गेण कामरूपवैराग्ये यदायमनागम्यभूमिकेनार्यमार्गेण कामधातुवैराग्यं करोति ' तदा यो नवमो

---

1 To. कामारूपधातुवैराग्ये

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विमुक्तिमार्गस्तस्मिन् मौलध्यानभूमिकमपूर्वकं शैक्षं लभत इति शैक्षस्य लाभ उच्यते। कामरूपावचरयोश्चानिवृताव्याकृतयोर्निर्माणचित्तयोरेव तस्मिन् लाभः। षड्भूमिकेन त्वार्यमार्गेण कामरूपवैराग्ये यो नवमो विमुक्तिमार्गस्तस्मिन्नारूप्यावचरं कुशलं प्रतिलभत इति। तच्छिष्योऽप्याचार्यवसुमित्रस्तमेवार्थं तेन वाक्येन तैरेव पदव्यञ्जनैर्लिखति। तदेतदयुक्तं व्याख्यानम्। न ह्येवमेकवाक्येन व्याख्यातार्थो घटते' वाक्यभेदेन घटते। तस्यैव शैक्षस्य लाभ इत्येतदेकं वाक्यम्' कामरूपावचरयोश्च यावत् कामरूपधातुवैराग्य इत्यपरं वाक्यम्। आर्यमार्गेण कामरूपधातुवैराग्य इत्येतेन विशेषेण तस्यैव शैक्षस्येत्येतत् पूर्वोक्तं न विशेष्यं वाक्यान्तरत्वात्। अतद्वतो ह्ययं[1] चित्तलाभो वर्ण्यते।

चित्तलाभो ह्यतद्वत

इति वचनात्। कथम्' नवमे विमुक्तिमार्गे शैक्षचित्तवतः पुद्गलस्य शैक्षचित्तलाभो व्यवस्थाप्यते। ननु चोक्तं मौलध्यानभूमिकमपूर्वं शैक्षं लभ्यत इति' नातिप्रसङ्गात्। रूपावचरमपि कुशलं चित्तं मौलध्यानभूमिकमपूर्वं प्रतिलभ्यत इति तस्यापि लाभ इति प्रसज्येत। आचार्यवसुमित्र आह। शैक्षचित्तस्थितस्य कामधातुवैराग्ये कुशलमुष्मगतावस्थायामेव रूपावचरं नियामावक्रान्तौ लब्धमिति कृत्वा न गणयत इति। तदयुक्तम्। शैक्षस्याप्यगणनाप्राप्तेः। शैक्षमपि हि दर्शनमार्गावस्थायां लब्धमिति न भवता तथा स्थापयितव्यमिति प्राप्नोति। अतश्चेदमपव्याख्यानमिति निश्चीयते' यस्मादाचार्येणैव मिश्रश्लोकव्याख्यान एवं लिखितम्। शैक्षस्याशैक्षस्य च [2]नियामावक्रान्त्यर्हत्त्वयोरिति।

शेषं कृतं[3] शेषितम्

इति। प्रातिपदिकधातुरूपमेतदिति दर्शयति' **यत्र चित्ते लाभो न व्याख्यातस्तत्र तस्यैव लाभ इति।** कथं कृत्वा' कामावचरे तावत् कुशलचित्त इयतां चित्तानां लाभ इति न व्याख्यातः। तत्र तस्यैव लाभो नान्येषाम्। तद्यथा सम्यग्दृष्ट्या कुशलमूलप्रतिसन्धाने कामावचरे कुशले चित्ते सम्मुखीभूते तस्यैव कुशलस्य चित्तस्य लाभस्तेनासमन्वागतस्य। [4]नान्येषां क्लिष्टानां

1 Mss. ह्युक्तं
2 To. नियमा०
3 To. कृतशेषितम्
4 Mss. नाप्येषां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्रैधातुकानामपि पूर्वप्रतिलब्धत्वात्। न कामावचरस्यानिवृताव्याकृतस्य विपाकजादीनां सहजप्राप्तित्वात्। निर्माणचित्तस्य प्राप्त्यभावात्। न रूपारूप्यावचराणां कुशलादीनां शैक्षाशैक्षयोश्च प्राप्त्यभावात्। अनिवृताव्याकृतेऽपि कामावचरे चित्ते लाभो न व्याख्यातः। तत्र तस्यैव लाभस्तेनासमन्वागतस्य।

अव्याकृताप्तिः सहजा[1]

इति कृत्वा। नान्येषां[2] कुशलादीनां पूर्वप्रतिलब्धत्वात्। तथैव केषाञ्चित् प्राप्त्यभावाच्च। निर्माणचित्ते तु सम्मुखीभूते न कस्यचिल्लाभ इति [3]न वक्तव्यम्। यत्र हि क्लिष्टेऽन्यत्र वा कस्यचिल्लाभो नास्ति। न तदुच्यते। क्लिष्ट एव हि त्रैधातुके षण्णां यावद्द्वयोर्लाभो न त्ववश्यमित्यवधारणम्। रूपावचरेऽप्यनिवृताव्याकृते सम्मुखीभूते तस्यैव लाभः। नान्येषाम्। पूर्ववद् वक्तव्यम्। तथारूप्यावचरे आकाशानन्त्यायतनसामन्तकाद्यप्रकारसंगृहीते कुशलचित्ते सम्मुखीभूते तस्यैव लाभस्तेनासमन्वागतस्य। नान्येषां केषाञ्चित्। पूर्वप्रतिलब्धत्वात् केषाञ्चित् प्राप्त्यभावात्। एवमनिवृताव्याकृते शैक्षे च।

अन्ये पुनरभेदेनाहुरिति। के। मिश्रककाराः। अभेदेनेति त्रैधातुकानां क्लिष्टादीनामपृथक्करणात्।

षण्णां तु कुशले चित्ते

इति यदुक्तं तन्न्यूनं लक्षणम्। कुशलं हि त्रैधातुकं सास्रवमनास्रवञ्च। तत्र सप्तानां कुशले चित्ते इति वक्तव्यं न षण्णामिति तद्दर्शयन्नाह। **कामावचरस्येति** विस्तरः। **कुशलमूलप्रतिसन्धानादिति** व्याख्यातमेतत्। **अनिवृताव्याकृतयोर्वैराग्यत इति।** लौकिकेन लोकोत्तरेण वा मार्गेण कामधातोर्वैराग्ये नवमे विमुक्तिमार्गे कामरूपावचरयोर्निर्माणचित्तयोर्लाभस्ताभ्यामसमन्वागतस्य। **रूपारूप्यावचरयोः कुशलयोस्ततस्त्यसमाधिलाभत इति।** यदा रूपावचरमनागम्यं प्रथमतो लभते तदा रूपावचरस्य कुशलस्य लाभः। यदाकाशानन्त्यायतनसामन्तकं प्रथमतो लभते तदारूप्यावचरस्य कुशलस्य लाभः। **शैक्षस्य चाशैक्षस्य च** [4]**नियामावक्रान्त्यर्हत्त्वयोरिति।** यदा [5]नियाममवक्रामति। तदा शैक्षस्य दुःखे धर्मज्ञानक्षान्तिकलापस्य लाभः। यदार्हत्त्वं प्राप्नोति। तदाशैक्षस्य क्षयज्ञानकलापस्य लाभः। इत्यास्रवस्थास्वमीभिश्चित्तैर्यथोक्तैः

---

1 Kārikā, II, 38.
2 Mss. अन्येषां
3 Mss. omit न.
4 Mss. & To. नियमा०
5 To. नियम०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सप्तभिरसमन्वागतः समन्वागमनं प्रतिलभते। शेषमत एव व्याख्यानादुपधार्यमिति। अत एव मदीयाद्व्याख्यानाच्छेषमवगन्तव्यम्।

क्लिष्टे चित्ते नवानां हि लाभ

इत्येकम्।

तस्यैवाव्याकृते खलु

इति द्वितीयम्। इत्येतच्छेषम्। कथम्। क्लिष्टे त्रिधातुके चित्ते नवानां लाभः। कामावचराणां चतुर्णां रूपावचराणां त्रयाणामारूप्यावचरस्य निवृतस्य शैक्षस्य चेति नवानां यथायोगं लाभस्तैरसमन्वागतस्य। कोऽयं यथायोगार्थः। कामावचरे च क्लिष्टे कुशलमूलप्रतिसन्धानेन वा धातुप्रत्यागमनेन[1] वा कामावचरस्य कुशलस्य लाभः। अकुशलनिवृताव्याकृतयोश्च धातुप्रत्यागमनेन परिहाण्या वा लाभः। रूपावचर एव क्लिष्टे रूपावचरस्य कुशलस्य कामावचररूपावचरयोश्चानिवृताव्याकृतयोर्निर्माणचित्तयोर्धातुप्रत्यागमनाल्लाभः। कामावचरे रूपावचरे वा क्लिष्टे रूपावचरस्य वा क्लिष्टस्य वा धातुप्रत्यागमनात् परिहाणितो वा लाभः। कामावचरे रूपावचरे आरूप्यावचरे वा क्लिष्टे आरूप्यावचरक्लिष्टशैक्षयोः[2] परिहाणितो लाभः। इति यथायोगार्थः।

तस्यैवाव्याकृते खलु

इति। यच्छेषं तत् तुल्यमिति पूर्ववत्। अव्याकृतानां हि त्रैधातुकानामन्यतमस्मिन् सम्मुखीभूते तस्यैवाव्याकृतस्य लाभस्तेन तेनासमन्वागतस्य।

अव्याकृताप्तिः सहजा[3]

इति सिद्धान्तात्। **संग्रहश्लोक** इति। सर्वम्

उपपत्तौ

धातुप्रत्यागमनादिति वचनात्।

समापत्तौ

तस्यैव। कुशलस्यैवमादिवचनात्। ततस्त्यसमाधिलाभत इति वचनात्।

वैराग्ये

कामरूपधातुवैराग्य इति वचनात्।

परिहाणौ

---

1 Mss. ०गमिन

2 To. ०वचरक्लिष्टाशचयोः

3 Kārikā, II, 39.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिहाणित इति वचनात् ।

कुशलप्रतिसन्धौ च

इति विचिकित्सया सम्यग्दृष्ट्या च कुशलमूलप्रतिसन्धानादिति वचनात् ।

चित्तलाभः

चित्तप्रतिलम्भः ।

अतद्वतः

पुद्गलस्य तैरसमन्वागतस्येति वचनादिति ॥७३॥

आचार्ययशोमित्रकृतायामभिधर्मकोशव्याख्यायामिन्द्रियनिर्देशो नाम द्वितीयं कोशस्थानं समाप्तम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्फुटार्थाभिधर्मकोशव्याख्यायाम्

तृतीयं कोशस्थानम्

इदमिदानीं वक्तव्यमिति। द्वितीयस्य तृतीयस्य च कोशस्थानस्य सम्बन्धप्रदर्शनार्थमिदमुक्तम्। **कामरूपारूप्यधातुनैयम्येन चित्तादीनां कृतो निर्देश इति।** नियमस्य भावो नैयम्यम्। नियम एव वा नैयम्यम्। तेन[1] चित्तादीनां कृतो निर्देशः।

कुशलाकुशलं कामे निवृतानिवृतं मनः।
रूपारूप्येष्वकुशलादन्यत्[2]

इति वचनात्। आदिशब्देन चैत्तादीनां ग्रहणम्।

सवितर्कविचारत्वात् कुशले कामचेतसि।
कौकृत्यमिद्धाकुशलान्याद्ये ध्याने न सन्त्यतः॥[3]
ध्यानान्तरे वितर्कश्च विचारश्चाप्यतः परम्।[4]

इति वचनात्। इन्द्रियाणां कामादिनैयम्येन कृतो निर्देशः।

कामाप्तममलं हित्वा रूपाप्तं स्त्रीपुमिन्द्रिये।
दुःखे च हित्वा रूपाप्तं सुखे चापोह्य रूपि च॥[5]

इति वचनात्। तेन कामरूपारूप्यधातवोऽनुक्तलक्षणा इत्यतः पृच्छति। **तत्र कतमे ते कामरूपारूप्यधातव इति।** अत इदमुच्यते

[नरक-प्रेत तिर्यञ्चो मानुषाः षड्दिवौकसः।
कामधातुः स नरक-द्वीपभेदेन विंशतिः॥१॥]

नरकप्रेततिर्यञ्चः

इति विस्तरः। **चतस्रो गतय इति।** नरकप्रेततिर्यग्मनुष्यगतयश्चतस्रः साकल्येन कामधातावन्तर्गताः। देवगतिस्तु न साकल्येन। किं तर्हि। **षड्देव-**

---

1 V येन
2 Kārikā II, 67.
3 Ibid., 28.
4 Ibid., 31.
5 Ibid., 12.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निकाया इति दर्शयति । तत्र नीर्यन्त[1] इति नृ नये । न रञ्जयन्तीति रञ्जेः । नरेरिति रि गतिरेषणयोः[2] इत्यस्य प्रतिषेधपूर्वस्य रूपम् । नीर्यन्तेऽस्मिन् सत्त्वा अपुण्येनेति नरकाः । न रञ्जयन्त इति नरका इत्यपरे । नरेरासादनार्थस्यैतद्रूपम् । रञ्जयति[3] प्रावन्ति ना स्पृहयन्ति त्राणमिति नरका इत्याचार्यसङ्घभद्रः । [4]भृशमितोऽपुनरावृत्तेरिताः प्रेताः । पिपासया परीता इत्यपरे तिर्यग्गमनात्तिर्यञ्चः । मनस उद्भूतत्वान्मनुष्याः । मनोरपत्या इति लौकिकाः । द्यौरोको येषामिति

दिवौकसः ।

कामप्रभावितो धातुः कामधातुरिति वक्ष्यति । चत्वारो महाराजानो लोकपाला विरूढको विरूपाक्षो धृतराष्ट्रो वैश्रवणश्च । तेषु भवाः **चातुर्महाराजिकाः** तन्मध्यगता इत्यर्थः । तद् यथा देवेषूपपद्यते देवमध्ये उत्पद्यत इत्यर्थः । चतुर्महाराजस्थाने भवाश्चातुर्महाराजिकाः मध्यपदलोपो गोरथवदित्यपरे । सहकृतसुकृतैरत्रोपपद्यन्त इति **त्रयस्त्रिंशाः** । समानपुण्यैरित्यर्थः । अष्टौ वसवो द्वावश्विनौ एकादश रुद्रा द्वादशादित्या इति । तावत्प्रमुखत्वात् त्रयस्त्रिंशा इति लौकिकाः । तदनुसारेण प्रवचनेऽपि तथा नामव्यवहार इत्यपरे । दुःखात् याताः पुण्येन नेति **यामाः** । दुःखानि वा यामयन्तीति यामाः । तुषा तुष्ट्या इताः । तुषो वा वियन्ते एषामिति **तुषिताः** । स्वयंकृते निर्माणे रतिरेषामिति **निर्माणरतयः** । परनिर्मितान् भोगान् वशे वर्तयितुं शीलमेषामिति **परनिर्मितवशवर्तिनः** । **स्थानानीति वाक्यशेष** इति । यानि विंशतिस्थानानि

स कामधातुः ।

यदि तु विंशतिस्थानो

विंशतिः

इति उत्तरपदलोपः क्रियेत । तद्यथा पीततोया अश्वाः पीता इति । सुतरां श्लिष्यति । **संजीवः** । यत्र सत्त्वान् म्रियमानान् वायवो जीवयन्ति । **कालसूत्रः** । यत्र कालसूत्राणि पातयित्वा सत्त्वास्तक्ष्यन्ते । **सङ्घातः** । यत्र

1 V निर्यन्त

2 Mss. रि गतिविशेषणयोः Cf. Dh., 9, 30, where the root is री.

3 V ०द्रूपं तां जयति

Mss. त्रीपा

4 Mss. भृष०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेषाकृतयः पर्वतादय उभयत आपतन्तः सत्त्वान् पीडयन्ति। **रौरवः**। यत्र सत्त्वा पात्यमानाः परमविकृतं रुदन्ति। यत्र तु विशेषेण स **महारौरवः**। **तपनः**। यत्राग्न्यादिभिस्तप्यन्ते सत्त्वाः। यत्र तु विशेषेण स **प्रतापनः**। **अवीचिः**। यत्रातिमात्राग्निज्वालालिङ्गितानां सत्त्वानां सुखवीचिरन्तरं नास्ति। **जम्बुद्वीपः**। जम्बुचिह्नद्वीपो द्वीपः। **पूर्वविदेहः** सुमेरोः पूर्वेण। **अवरगोदानीयः** पश्चिमेन। **उत्तरकुरु**रुत्तरेण। एवं नामान एते द्वीपा लोकप्रतीताः। **षट् चानन्तरोक्ता देवनिकायाः**। इत्येतानि विंशतिः स्थानानीति। अष्टौ नरकाश्चत्वारो द्वीपाः। षट् चानन्तरोक्ताश्चातुर्महाराजिकादयः। प्रेतास्तिर्यञ्चश्च। भिन्ना इति। विंशतिस्थानः कामधातुः। **यावद्वायुमण्डलमिति**। अधस्ताद् यत्राब्मण्डलं तिष्ठति ॥१॥

[ऊर्ध्वं सप्तदशस्थानो रूपधातुः पृथक् पृथक्।
ध्यानं त्रिभूमिकं तत्र चतुर्थं त्वष्टभूमिकम् ॥२॥]

रूपधातुः

इति रूपप्रभावितो धातुः।

पृथक् पृथक्।

ध्यानं त्रिभूमिकं तत्र चतुर्थं त्वष्टभूमिकम् ॥

इति। तत्र रूपधातौ सर्वेषामपि ध्यानानां मृदुमध्याधिमात्रभेदेन **प्रत्येकं त्रिभूमिकम्**। **ब्रह्मकायिका ब्रह्मपुरोहिता महाब्रह्माण** इति **प्रथमम्**। **परीत्ताभा अप्रमाणाभा आभास्वरा** इति **द्वितीयम्**। **परीत्तशुभा अप्रमाणशुभाः शुभकृत्स्ना** इति **तृतीयम्**। **अनभ्रकाः पुण्यप्रसवा बृहत्फला** इति **चतुर्थम्**। तस्य त्वधिमात्रस्यैवानास्रवध्यानव्यवकिरणेन मृदुमध्याधिमात्राधिमात्रतराधिमात्रतमभेदभिन्नेन पुनः पञ्च स्थानान्तराणि। **अबृहा अतपाः सुदृशाः सुदर्शना अकनिष्ठाश्चेति**। अतश्चतुर्थं ध्यानमष्टभूमिकमित्युच्यते। तत्र बृहत्कुशलमूलनिर्यातत्वात् ब्रह्मा। कश्चासौ। यो महाब्रह्मेत्युच्यते। ध्यानान्तरलाभात् पश्चात्पूर्वंच्युत्युपपत्तिलाभात् प्रमाणादिविशेषादिभिश्चास्य महान्। तस्य कायो निवास एषां विद्यते इति ब्रह्मकायिकाः। ब्रह्मा पुरोधीयते एषामिति ब्रह्मपुरोहिताः। आयुर्वर्णादिभिर्विशेषैर्महान् ब्रह्मा एषामिति महाब्रह्माणः। परीत्तैषामाभा [1]स्वभूमिमपेक्ष्येति परीत्ताभाः। नाभाप्रमाणमेषां शक्यं प्रमातुमित्यप्रमाणाभाः। कृत्स्नस्थानान्तरोद्भासनादाभास्वराः। मनोभूमिकं सुखं शुभमित्युच्यते। तदेषां [2]स्वभूमिमपेक्ष्य परीत्तमिति परीत्तशुभाः। अप्रमाणं शुभमेषामप्रमाणशुभाः। शुभं कृत्स्नमेषामिति शुभकृत्स्नाः। न तदुत्कृष्टतरमन्य-

1 To. आभास्वभूमि०　　2 To. अन्यभूमि०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्यस्ति सुखमित्यभिप्रायः। अभ्रवदेषां भूमिसम्बन्धो नास्तीत्यनभ्रकाः। सह सत्त्वेन तद्विमानोदयव्ययादिति वचनान्नैषामुपरि भूम्यन्तरमस्तीत्यनभ्रकाः। अभ्रमिव ह्युपरि न भूमिसम्बन्ध इत्यपरे। आनिञ्ज्यकर्मसम्भूतत्वात् पुण्येभ्यः प्रसव एषामिति पुण्यप्रसवाः। स्थानान्तरप्रतिबद्धं पार्थग्जनिकं सर्वोत्कृष्टं बृहदेषां फलमुद्भवतीति बृहत्फलाः। पृथग्जनामिश्रत्वाच्छुद्ध आवास एषामिति शुद्धावासाः। शुद्धावासान्तरेभ्योऽनुत्कृष्टत्वादवृंहिता इत्यवृहाः। नाल्पेन वा कालेनात्मनः स्थानं बृंहन्ति जहतीत्यबृहाः। विशिष्टसमाधिलाभान्नात्र क्लेशास्तपन्ती[1]त्यतपाः। कल्याणाशयत्वाद्वा न परांस्तापयन्तीत्यतपाः। परिशुद्धदर्शनत्वात् सुष्ठु पश्यन्तीति सुदृशाः। शोभनदर्शनत्वात् सुदर्शनाः। तदुत्कृष्टतरभूम्यन्तराभावान्नैते कनिष्ठा इत्यकनिष्ठाः। ज्येष्ठभूतत्वात्। स्थानिन एते निर्दिष्टाः। कथमिदमुच्यते **इत्येतानि सप्तदश स्थानानीति**। स्थानिशब्देन स्थाननिर्देशाददोष एव। एवं बहिर्देशकनयेन सप्तदशस्थानान्येव[2] रूपधातुः। **षोडशेति काश्मीराः**। षोडशस्थानानि रूपधातुरिति काश्मीराः। **परिगण इवेति**। परिषण्ड इव। आटविककोट्ट इत्यपरे। **न तु भूम्यन्तरमिति**। नतु भूम्यन्तरसम्बन्धमिति ॥२॥

[आरूप्यधातुरस्थान उपपत्त्या चतुर्विधः।
निकायं जीवितं चात्र निश्रिता चित्तसन्ततिः ॥३॥]

अतीतानागताविज्ञप्त्यरूपिणो हि धर्मा अदेशस्था इति। अतीतानागतारूपिणोऽप्यदेशस्थाः। अविज्ञप्तिः रूपिणी वर्तमानाप्यदेशस्था। अरूपिणो वेदनादयस्तथैव वर्तमाना अप्यदेशस्थाः। किमङ्गातीतानागताः।

उपपत्त्या चतुर्विध

इति। कर्मनिर्वृत्ता जन्मान्तरे स्कन्धप्रवृत्तिरुपपत्तिः। तया। **आरूप्यधातुश्चतुर्विधः**। चतुःप्रकारः। **यदुताकाशानन्त्यायतन**मिति विस्तरः। अनन्तमाकाशमिति[3] समापत्तिप्रयोगकालाकारादाकाशानन्त्यम्। तस्य तदेव चायतनम्। एवमनन्तं विज्ञानं नास्ति किञ्चिदिति तदाकाराद् **विज्ञानानन्त्यायतनमाकिञ्चन्यायतनं** चोच्यते। संज्ञागण्डः संज्ञाशल्यम् आसंज्ञिकं संमोह इति संज्ञामान्द्योत्पत्तेर्नैवसंज्ञानासंज्ञायतनमित्युच्यते। नत्वेषां **देशकृतमौत्तराधर्यमित्य**देशस्थत्वात्।

---

1 V स्तपयन्ती०

2 A, C, U ०स्थान्यं व ; V ०स्थान्येरूप० ; To ०स्थानानि रूप०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथारूपिणामिति विस्तरः। किं कृतेयमाशङ्का। इह नैरात्म्ये सति चित्तचैत्तानां कामरूपधात्वो रूपनिश्रयाप्रवृत्तिः कल्प्येत। आरूप्येषु तु रूपं नास्तीति। तत्र चित्तचैत्तप्रवृत्त्या न भवितव्यमित्याशङ्कानिवृत्त्यर्थमिदमुच्यते।

निकायं जीवितं चात्र निःश्रिता चित्तसन्ततिः

इति। चशब्देन पृथग्जनत्वासमन्वागमप्राप्तिजात्यादयः संगृह्यन्ते। **दुर्बलत्वादिति।** कस्यचित् सन्ततेः। रूपिणां सत्त्वानां दुर्बला चित्तसन्ततिरविभूतरूपसंज्ञत्वाद्विना रूपेण न वर्तते। ततो रूपं निश्रित्य वर्तते। **तस्याः केन बलवत्त्वमिति।** तस्या आरूप्यावचर्याः केन कारणेन बलवत्त्वमत आह। **समापत्तिविशेषजत्वादिति** विस्तरः। **विभूतरूपसंज्ञे**ति विगतरूपसंज्ञेत्यर्थः। अतस्तज्जा आरूप्या चित्तसन्ततिरपि रूपनिरपेक्षा प्रवर्तते। तत एव तर्हि बलवत्त्वात् समापत्तिविशेषजनितात् प्रवर्तिष्यते। किञ्चिदनिश्रित्येत्यभिप्रायः। **यथा रूपिणामिति** विस्तरः। **यथा रूपिणां रूपनिश्रिते निकायसभागजीवितेन्द्रिये। एवमरूपिणां किंनिश्रिते** इति वाक्यार्थः। **तदेतदेतद्द्वयमन्योन्यमिति।** निकायसभागो जीवितेन्द्रियं निश्रित्य प्रवर्तते। जीवितेन्द्रियं च निकायसभागमिति। **किमर्थं न तदेव द्वयमन्योन्यमिति।** किं रूपनिश्रयेणेत्यभिप्रायः। **तत्रेदानीमिति** तत्रारूप्यधातौ केन बलवत्त्वं **तयो**र्निकायसभागजीवितेन्द्रिययोः। **तदेतत् चित्तसन्ततौ समान**मिति। असावपि चित्तसन्ततिः समापत्तिविशेषाज्जाता भवतीति न द्वयं निश्रित्य प्रवर्तिष्यते। अनाश्रिते प्रवर्तिष्यत इति **चित्तचैत्तेषु वा समानमिति** प्रकृतम्। किं पुनः समानमन्योन्यनिश्रयत्वम्। यथा निकायसभागो जीवितेन्द्रियं निश्रित्य प्रवर्तते। जीवितेन्द्रियं च निकायसभागं निश्रित्य प्रवर्तते। तथा चित्तं निश्रित्य चैत्ताः प्रवर्तिष्यन्ते। चैत्तांश्च निश्रित्य चित्तं प्रवर्तिष्यत इति। तदन्योन्याश्रयकल्पना निष्प्रयोजनेति। **यस्याश्चित्तसन्ततेरिति** विस्तरः। चित्तसन्ततेराक्षेपाय **हेतुराक्षेपहेतुः** कर्मक्लेशलक्षणः। विगता तृष्णा अस्येति वीततृष्णः न वीततृष्णोऽ**वीततृष्णः**। क्व। **रूपे। तस्याः** चित्तसन्ततेः **सह रूपेण सम्भवाद्रूपं निश्रित्य प्रवृत्तिः। हेतोस्तद्विमुखत्वादिति** आक्षेपहेतो रूपविमुखत्वादित्यर्थः।

वज्रवालकवदिति वज्रेण प्रतिसंयुक्तो वालकोऽङ्गुलीयकः कटको वा वज्रवालकः। **मरिचपानकवच्च।** यथा मरिचैः प्रतिसंयुक्तं पानकं मरिचपानकं मध्यपदलोपात्। तद्वत्। कामप्रतिसंयुक्तो धातुः कामधातुरित्यादिः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपणीयो वेति बाधनीय इत्यर्थः। रूपयोगाच्च स शक्यते बाधितुम्. **तदभाव आरूप्यमिति**। यदा[1] धातूत्तरपदमेतद् भवति तदारूप्यधातुरिति युज्यते। यदा तु निरुत्तरपद आरूप्यशब्दप्रयोगः। तद् यथा अतिक्रम्य रूपाण्यारूप्या इति। तदा आरूपा एवारूप्या इति स्वार्थे तद्धितात्[2] परिग्रहः कार्यः। आरूप्ये वा साधव आरूप्या इति पश्यामः[3]। कामानां वा धातुरिति षष्ठीसमासेनैव साधयति विनापि प्रतिसंयुक्तशब्दलोपेन। कश्चासौ कामानां धातुरित्याह। **कामान् यो दधातीति**। **एवं रूपारूप्यधातू वेदितव्याविति**। रूपाणां धातुः रूपधातुरिति रूपाणि यो दधातीति। आरूप्यस्य धातुरारूप्यधातुरारूप्यं यो दधातीति। **कवडीकाराहारमैथुनोपसंहितो राग** इति। कवडीक्रियत इति कवडीकारः। स एवाहारः कवडीकाराहारः। मिथुने भवः[4] मैथुनं द्वन्द्वालिङ्गनादि। कवडीकाराहारमैथुनाभ्यामुपसंहितः सम्बन्धो जनित इति वा कवडीकाराहारमैथुनोपसंहितो रागः। कामः। काम्यतेऽनेनेति काम इति कृत्वा। कथमेवं गम्यत इति। स्थविरशारिपुत्रभाषितया गाथया तमर्थं दर्शयति।

न ते कामा यानीति

इति विस्तरः। आजीवकेन यदुक्तं गाथान्तरेण

भिक्षोः कामवितर्कं विकल्पयतः कामभोगित्वम्

इति तदभ्युपगतं[5] स्थविरेण। त्रिविधो हि[6] कामोपभोगः। कायेन वाचा मनसा च। तत्रावीतरागो मनसा कामोपभोगित्वेऽपि सति नाभिक्षुर्भवति। केवलं त्वस्यशीलमपरिशुद्धं वर्तते। यस्तु कायेन वाचा ताथागतीं शिक्षापदलेखां लंघयित्वा कामान् परिभुंक्ते। स कामोपभोग्यभिक्षुर्भवतीति। तस्मात् स दोषान्तरमाह।

ते चेत् कामा

इति विस्तरः। यदि तव

चित्राः

रूपादयो विषयाः

कामाः

इति पक्षः। शास्ता ते अवीतराग इत्यभ्युपगतः। तेन

शास्तापि ते भविता

भविष्यति।

---

1 A यथा 2 Mss. तद्धितोत् 3 A, To. पश्यामि
4 A&c भवं 5 V तदभ्युपगतं 6 V has भिक्षा for हि.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कामभोगी
दृष्ट्वैव रूपाणि मनोरमाणि ।

कायेनाप्युपभुंजानोऽपि तान् विषयान् इति प्रसक्तम् । न चैवमिष्यते । तस्मात्

सङ्कल्परागः पुरुषस्य कामः

इति सिद्धम् ।

केचनेति । केचिदित्यर्थः । नेत्याहेति । प्रतिषेधयति[1] । यस्माद् धात्वन्तरधर्माः धात्वन्तरे समुदाचरन्त्यधातुपतिताश्च । कामधातौ हि त्रैधातुकानास्रवा धर्माः समुदाचरन्ति । एवं रूपधातौ कामावचरं हि निर्माणचित्तं तत्र समुदाचरति । [2]आरूप्यधातावारूप्यावचरा अनास्रवाश्च । तस्मात् प्रतिषेधयति नेति । किं तर्हि येषु कामरूपारूप्यरागा अनुशेरते । येषु कामरागोऽनुशेते आलम्बनतः संप्रयोगतो वा यथासम्भवं ते कामप्रतिसंयुक्ताः । येषु रूपारूप्यरागावनुशयाते ते यथाक्रमं रूपारूप्यप्रतिसंयुक्ता इति । इदमिदानीं तदश्वबन्धीयमिति । अश्वश्चाश्वबन्धश्चाश्वबन्धम् । अश्वबन्धमिवाश्वबन्धीयम् । अथवाश्वबन्धस्येदमश्वबन्धीयमश्वबन्धीयमिति । कस्यायमश्वबन्ध इति कश्चित् पृच्छति । तस्येतरः कथयति । यस्यायमश्व इति । स पुनः पृच्छति । कस्यायमश्व इति । इतरः पुनः कथयति[3] । यस्यायमश्वबन्ध इति । उभयमपि न ज्ञायते अश्वबन्धोऽश्व इति च । यथेदमुभयमसिद्धेनान्योन्येन न परिच्छिद्यते । तथेहापि न रागैर्धातवः साध्यन्ते धातुभिश्च रागा इत्युभयमप्येतन्न सिध्यति ।

कृतनिर्देशानि हि स्थानानि कामधाताविति ।

नरकप्रेततिर्यञ्चो मनुष्याः षड्दिवौकसः ।
कामधातुः स नरकद्वीपभेदेन विंशतिः[4] ॥

इति कामधातौ कृतनिर्देशानि स्थानानि ।

तेषु स्थानेष्ववीतरागस्य यो रागः स कामराग इति । एवं रूपारूप्यरागाविति ।

कृतनिर्देशानि हि स्थानानि कामधातोः
ऊर्ध्वं सप्तदशस्थानो रूपधातुः[5] ।

इति । तेष्ववीतरागस्य यो रागः स रूपरागः । तथा कृतनिर्देशोपपत्तिरारूप्यधातोः ।

आरूप्यधातुरस्थान उपपत्त्या चतुर्विधः

इति । तेषु वीतरागस्य यो रागः स आरूप्यराग इति ।

1 A प्रतिबोधयति
2 V drops it.
3 C & V पृच्छति
4 Kārikā, III, 1.
5 Ibid., III, 2.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथायोगमिति । स्थाननिर्देशापेक्षम् । **ध्यानारूप्येषु राग** इति । समापत्त्युपपत्तिध्यानेषु रागो रूपरागः । एवमारूप्यरागः । **निर्माणचित्ते कथं कामराग** इति । कामावचरे निर्माणचित्ते ध्यानफले कथं कामवीतरागाणां कामरागः । यतस्तस्य कामावचरत्वम् । यदा ह्यसाववीतरागस्तदा निर्माणचित्तं न समुदाचरति । यदा निर्माणचित्तं समुदाचरति तदा न तस्य राग उत्पद्यते । कथमस्य कामरागेण विना कामावचरत्वं व्यवस्थाप्यत इत्यर्थः । **श्रुत्वा परिहाय च तदास्वादनादि**ति । श्रुत्वा तत् परतो निर्माणचित्तेऽस्य राग उत्पद्यते । परिहाय वा आत्मीयान्निर्माणचित्तात् । तस्यास्वादनादिति । एवंध्यायिनः कामावचरेण निर्माणचित्तेन कामावचरं निर्माणं निर्मिरावन्तीति श्रुत्वा तदालम्बनो राग उत्पद्यते । अनुस्मृत्य चात्मीयं तत्र राग उत्पद्यते । **निर्माणवशेने**ति । मनोहरं निर्माणं दृष्ट्वा निर्मापके चित्ते निर्मापकस्य वा चित्ते रागः । दर्शयतीत्थं निर्माणचित्तं यस्येदृशं निर्माणमिति । **गन्धरसनिर्माणाद्वे**ति । यत् कामावचरनिर्माणनिर्मापकं कामावचरं तच्चित्तम् । कामावचरधर्महेतुत्वाद् घटहेतुचित्तवत् । यत्तु न कामावचरं न तत् कामावचरधर्महेतुः । तद्यथा रूपावचरं चित्तम् । अत एवाह । **रूपावचरेण तयोरनिर्माणा**दिति । कस्मात् पुना रूपावचरेण चित्तेन तयोर्गन्धरसयोरनिर्माणम् । तयोर्गन्धरसयोः कवडीकाराहारस्वभावत्वात् । रूपधातूपपन्नं च तद्वीतरागत्वादिति ।

ईषाधार इति । ईषाप्रमाणवर्षाधारः । **नास्ति वीचिर्वा अन्तरिका वे**ति । नैरन्तर्यं दर्शयति **न तूक्तमूर्ध्वमधश्चे**ति । अतो लोकधातूनां तिर्यगेवास्थानमिति दर्शयति ॥३॥

[नरकादिस्वनामोक्ता गतयः पञ्च तेषु ताः ।

अक्लिष्टाव्याकृता एव सत्त्वाख्या नान्तराभवः ॥४॥]

पञ्चम्याश्च प्रदेश इति । देवगतेः षट् कामावचरा देवा उक्ताः । शेषा रूपारूप्यावचराः । **अन्यथा हि गतिसम्भेदः स्या**दिति । गतिमिश्रता । यदि कुशलक्लिष्टा अपि स्युर्गतिसम्भेदः स्यात् । मनुष्यो नरकसंवर्तनीयं कर्म करोति । यावद् देवोपपत्तिसंवर्तनीयम् । इत्यतो मनुष्यगतिर्नरकगतिरपि स्यात् । यावद् देवगतिरपि । तेषां कर्मणां तद्गतिपर्यापन्नत्वात् । कामधातूपपन्नश्चोर्द्धभूमिकैः क्लेशैः समन्वागतः कामावचरेण च सार्वगतिकेन क्लिष्टेन समन्वागत इति । स एव मनुष्यो नारको यावद् देव इति स्यात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्त्वाख्या एवेति कर्मानुरूपेणात्मभावतस्तद्गमनात् । अत एवोक्तं

यथाकर्म गमिष्यन्ति पुण्यपापफलोपगाः

इति । न भाजनस्वभावा इति । न चान्तराभवस्वभावा इति । अस्य प्रतिपादनार्थं ज्ञापकमानयन्ति । प्रज्ञप्तिसूक्तमिति विस्तरः । सहेतुकाः सगमना इति । हेतुः कर्मभवः । गमनमन्तराभवः । गम्यतेऽनेनेति कृत्वा । गतिस्तु गम्यत इति गतिः । तद्धेतोः कर्मभवस्य ताभ्यो बहिष्करणात् । कुशलाकुशलस्य कर्मभवस्य ताभ्यो गतिभ्यो बहिष्करणात् । कश्मीरे भवाः काश्मीरकाश्च सूत्रं पठन्तीति । मुक्तकं तत्सूत्रं त एव[1] पठन्ति नान्य इत्यभिप्रायः । नारकाणामिति विस्तरः । नरकानुकूला नारकाः । तेषामिति विस्तरः । कायवाङ्मनोवंकानां शाठ्यसमुत्थितानां कर्मणां दोषकषायाणां द्वेषरागसमुत्थितानाम् । अतोऽप्यनिवृताव्याकृता एव गतय इति । यस्मादुक्तं निर्वृत्ते विपाके नारक इति संख्यां गच्छतीति । गतिषु सर्वेऽनुशया अनुशेरत इति प्रकरणग्रन्थः परिहार्यः । वक्तव्यः परिहार इत्यर्थः । [2]विरोधप्रसङ्गात् । यदि हि पञ्चप्रकारा धर्मा गतिस्वभावा भवेयुः । एवं सर्वेऽनुशया अनुशयीरन् । यदि त्वव्याकृता[3] एव गतयः स्युरेवं वक्तव्यं स्यात् । भावनाप्रहातव्याः सर्वत्रगाश्चेति । अनिवृताव्याकृता हि संस्कृता धर्मा भावनाप्रहातव्या एव । तेषु च भावनाप्रहातव्या एव[4] सर्वत्रगाश्चानुशया अनुशेरते आलम्बनतः प्रयोगतो वा । नान्ये । तेन ज्ञायते नानिवृताव्याकृता एव गतय इति । सन्धिचित्तानि हि गतीनां पञ्चप्रकाराणीति । सन्धिचित्तानि गतीनां प्रवेशाः । तेषां पञ्चप्रकारत्वात् । दुःखदर्शनप्रहातव्यं यावद् भावनाप्रहातव्यमिति । तत्र सर्वेऽनुशया अनुशेरत इति युक्तम् । ग्रामोपविचारग्रहणवदिति । ग्रामपरिसामन्तकग्रहणवदित्यर्थः । पञ्चसु कषायेष्विति । पञ्चकषाया आयुःकषायः क्लेशकषायो दृष्टिकषायः कल्पकषायः[5] सत्त्वकषायश्च । तेषु । क्लेशदृष्टिकषायौ पृथगुक्तौ । [6]क्लेशकषायाद् दृष्टिकषायः पृथगुक्त इत्यर्थः । अनयोः पृथग्वचनं गृहस्थप्रव्रजितपक्षाधिकारात् । गतिहेतुज्ञापनार्थमिति । गतीनां कर्मोद्भवो हेतुरिति । अन्तराभवेऽप्येष प्रसंग इति । एवमन्तराभवोऽपि गतिश्च स्यात् । पृथक् चास्य वचनं स्यात् । गतिगमनज्ञापनार्थमिति । गच्छन्ति तामिति । कर्मसाधन-

---

1 V. drops ते एव.
2 U. विरामो
3 To. ०त्वनिवृताव्याकृता
4 To. omits एव.
5 A & V drops it.
6 B. क्लेशकषायो दृष्टि०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिग्रहः । **न चान्तराभव** एवं युज्यत इति न गतिः । **आरूप्या अपीति** विस्तरः । आरूप्या न गतिः स्युः । **च्युतिदेश एवोत्पादात्** । आरूप्यगा हि यत्र च्यवन्ते विहारे वा वृक्षमूले वा यावच्चतुर्थ्यां ध्यानभूमौ' तत्रैवोत्पद्यन्त इति । अन्तराभववन्न गतिः स्यात् । [1]**एवं तर्हीति** । पूर्वपक्षं परित्यज्य पक्षान्तरमाश्रीयते[2] । **गत्योरन्तरा**[3]अन्तराले भवतीति अन्तराभव इत्यन्वर्थसंज्ञाकरणान्नान्तराभवो गतिरिति । वैभाषिका आहुः' **यत्तर्हीति** विस्तरः[1] । **निर्वृत्ते विपाक** इति । विपाकशब्दवचनाद्विपाकस्वभावा गतिरिति तदभिप्रायः । **इतर आह** । निर्वृत्ते विपाके नारक इति नारको व्यवस्थाप्यते । **न तूक्तं विपाक एवेति** । न तूक्तं विपाकस्वभावैव गतिरिति । किं तर्हि' विपाकाविपाकस्वभावा गतिः । तस्मात् कुशलक्लिष्टा अपि गतयो भवन्तीत्यभिप्रायः । वैभाषिकः पुनराह । **यत्तर्ह्युक्तं तत्रेति** विस्तरः । **अन्यत्र तेभ्यो धर्मेभ्य** इति । विपाकजेभ्य इत्यभिप्रायः । **न तु स्कन्धान्तरप्रतिषेधं करोतीत्यधिकृतम्** । **ताश्चेति** विस्तरः । अव्याकृतत्वपक्षेऽपि द्वैविध्यम् । **औपचयिकस्वभावा अपीति** । अपिशब्दाद्विपाकस्वभावा अपीति । यथोक्तं

विपाको जीवितं द्वेधा द्वादश[4]

इति । नैष्यन्दिकास्तु न गृह्यन्ते । विपाकस्वभावा एवेत्याचार्यसङ्घभद्रः पूर्वमेव पक्षमिच्छति ॥४॥

[नानात्वकायसंज्ञाश्च नानाकायैकसंज्ञिनः ।
विपर्ययाच्चैककायसंज्ञाश्चारूपिणस्त्रयः ॥५॥
विज्ञानस्थितयः सप्त शेषं तत्परिभेदवत् ।]

कामावचराः षट् प्रथमध्यानिकाश्च । कतमे ते । बहिर्देशकनयेन ब्रह्मकायिकाः ब्रह्मपुरोहिता महाब्रह्माणश्च प्रथमाभिनिर्वृत्तवर्ज्याः । काश्मीरनयेन पुनर्ब्रह्मकायिका ब्रह्मपुरोहिताश्च प्रथमाभिनिर्वृत्तवर्ज्याः । ब्रह्मपुरोहितेष्वेव हि तेषां नयेन महाब्रह्माणो न स्थानान्तरनयाः । **अनेकवर्णलिंगसंस्थानत्वादिति** । वर्णो नीलत्वादिः । लिङ्गं वस्त्राभरणादि । संस्थानं दैर्घ्यादि । **आरोह** उन्नतता । **परिणाहस्तिर्यक्प्रमाणम्** । **आकृतिविग्रहः**'आकृतिलक्षणो विग्रह आकृतिविग्रहः ।

1...1 A drops the portion beginning with एवं तर्हीति and ending in विस्तरः.

2 To. and U ०श्रयन्ते

3 U गत्योरन्तराले V गत्यानन्तरा

4 Kārikā, II, 10

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं विशेषिते वेदनादीनां विग्रहः पर्युदस्तो भवति । नासावाकृतिलक्षण इति । विग्रहः पुनः शरीरम् । वाग्भाषा वागुच्चारणम् । कथमिदानीमिति विस्तरः । प्रथमध्यानप्रत्यागमनेन तैर्द्वितीयं त्यक्तम् । तद्भूमिकं द्वितीयध्यानभूमिकम् । पूर्वनिवासं कथमन्वस्मार्षुः । न तावत् प्रथमध्यानभूमिकेन चित्तेन[1] तदविषयत्वात्' न द्वितीयध्यानभूमिकेन तस्यालब्धत्वात् । पुनर्लब्धमिति चेत् । अतआह । लब्धायां चेति विस्तरः । शीलव्रतपरामर्षदृष्टिर्महाब्रह्मालम्बना प्रथमध्यानभूमिकैव युज्यते । सा च द्वितीयध्यानलाभात् प्रहीणा न समुदाचरति । द्वितीयध्यानभूमिकेति चेत्'न'अधरालम्बनत्वायोगात् । न ह्यधरभूम्यालम्बनः कश्चिदपि क्लेश इष्यते । अन्तराभवस्था अद्राक्षुरिति । अन्तराभवस्थास्ते तं महाब्रह्माणं दृष्ट्वैवमूचुः' इमं वयं सत्त्वमद्राक्ष्मेति । अयमपि पक्षो न घटते । तथाहि'तत्राप्यन्तराभवे दीर्घमध्वानमवस्थातुं न सम्भवो ह्युपपत्तुं[2] प्रतिबन्धाभावात्' शुक्रशोणितानपेक्षत्वात् । तेषां कथं भवतीयं बुद्धिरिमं वयं सत्त्वमद्राक्ष्म दीर्घायुषं दीर्घमध्वानं तिष्ठन्तमिति । दीर्घाध्वावस्थानावबोधो न प्राप्नोतीत्यर्थः । तस्मात्तत्रस्था एवेति विस्तरः । प्रथमध्यानभूमिष्ठा एव तस्य[3] महाब्रह्मणः पूर्ववृत्तान्तं समनुस्मरन्तः । उत्पद्यमानावस्थायामेव ते तं महाब्रह्माणं पूर्वोत्पन्नं दीर्घमध्वानं तिष्ठन्तं दृष्टवन्तो दृष्ट्वा च पश्चात् उत्तरकालमद्राक्ष्मेत्येषां बभूव' बुद्धिरिति वाक्यशेषः । एवं तु सतीदमपरिहृतं भवेत् । अस्य च सत्त्वस्यैवं चेतसः प्रणिधिः वयं चोपपन्ना इति ।- उपपत्तिप्रतिलम्भिकेन प्रथमध्यानभूमिकेन तस्य महाब्रह्मण एवं चेतसः प्रणिधिमन्वस्मार्षुः । समानभूमिकत्वादित्यदोष एव । तत्सकाशं श्रवणाद्वा ।

ननु च शुभकृत्स्नेष्वप्येष प्रसङ्गः । एकत्वकाया नानात्वसंज्ञिन इति । कथम्'यथोक्तम् । ते हि मौल्यां भूमौ सुखेन्द्रियपरिखिन्नाः सामन्तकोपेक्षेन्द्रियं संमुखीकुर्वन्तीति विस्तरेण वक्तव्यं स्यात् । ते चैकत्वकाया एकत्वसंज्ञिन इति पश्चाद्वक्ष्यते । तेन सुखेनेति तृतीयध्यानभूमिकेन । चेतस उत्प्लावकत्वादिति'औद्बिल्यकरत्वात् । [4]इन्द्रसुखेनेति'द्वितीयध्यान[4] आगमव्यपगमसंज्ञित्वात् । अचिरोपपन्नानामागमसंज्ञित्वाच्चिरोपपन्नानां व्यपगमसंज्ञित्वात् । अथवाऽचिरोपपन्नानामागमसंज्ञित्वाच्चिरोपपन्नानामागमव्यपगमसंज्ञित्वात् । भीता-

---

1 V drops it. 2 To. सम्भवत्युपपत्ति 3 A drops it.

4...4 This portion having no equivalent in Tib. has been put within bracket in To.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भीतसंज्ञित्वात्। यथाक्रममचिरचिरोपपन्नत्वात् ते नानात्वसंज्ञिनो न सुखा-दुःखासुखसंज्ञित्वात्। यथोक्तं वैभाषिकैरिति।

प्रथमे ध्याने क्लिष्टया संज्ञयेति। शीलव्रतपरामर्शसंप्रयुक्तया अकारणे कारणाभिनिविष्टत्वात्। **द्वितीये कुशलया संज्ञयेति**। सामन्तक-मौलसंगृहीतत्वात्। **तृतीये विपाकजया संज्ञयेति**। विपाकजसुखसम्प्रयोगात्।

आरूप्यास्त्रयो यथासूत्रमिति। अरूपिणः सन्ति सत्त्वा ये सर्वशो रूपसंज्ञानां समतिक्रमादनन्तमाकाशमित्याकाशानन्त्यायतनमुपसंपद्य विहरन्ति। तद्यथा देवा आकाशानन्त्यायतनोपगाः। इयं पञ्चमी विज्ञानस्थितिः। अरूपिणः सन्ति सत्त्वा ये सर्वश आकाशानन्त्यायतनं समतिक्रम्यानन्त्यं विज्ञानमिति विज्ञानानन्त्यायतन-मुपसंपद्य विहरन्ति। तद् यथा विज्ञानानन्त्यायतनोपगा देवाः। इयं षष्ठी विज्ञानस्थितिः। अरूपिणः सन्ति सत्त्वा ये सर्वशो विज्ञानानन्त्यायतनं समति-क्रम्य नास्ति किञ्चिदित्याकिञ्चन्यायतनमुपसंपद्य विहरन्ति। तद्यथा आकिंचन्याय-तनोपगा देवाः। इयं सप्तमी विज्ञानस्थितिरिति।

पञ्चस्कन्धाश्चत्वारश्च यथायोगमिति। आकाशानन्त्यायतनादि-त्रयप्रति-संयुक्ताश्चतुस्कन्धा अन्यप्रतिसंयुक्ताः पञ्चस्कन्धाः।

शेषं तत्परिभेदवत्

इति। परिभिद्यतेऽनेनेति परिभेदः तस्य विज्ञानस्य परिभेदस्तत्परिभेदः। सोऽस्मिन् विद्यत इति तत्परिभेदवत्। शेषं दुर्गत्यादि। **अपायेषु चोभयं नास्तीति**। नेहस्थानां गन्तुकामता। न[1]तत्रस्थानां व्युचलितुकामता। **अपटुप्रचारत्वादिति**। चित्तचैत्तानामत्र मन्दप्रचारत्वात्। अबलवद्विज्ञानं न[2] तिष्ठतीति युक्तं वक्तुम्।

[भवाग्रासंज्ञिसत्त्वाश्च सत्त्वावासा नव स्मृताः ॥६॥
अनिच्छावसनं नान्ये चतस्रः स्थितयः पुनः।]

भवाग्रासंज्ञिसत्त्वाश्च सत्त्वावासा नव

इति सूत्र उक्तम्। नव सत्त्वावासाः। कतमे नव। रूपिणः सन्ति सत्त्वा नानात्व-काया नानात्वसंज्ञिनः। तद्यथा मनुष्याः। तदेकत्याश्च देवाः। अयं प्रथमः सत्त्वावासः। द्वितीयतृतीयचतुर्था अपि यथा विज्ञानस्थितिषु तथा वक्तव्याः। अयं तु विशेषः। रूपिणः सन्ति सत्त्वा असंज्ञिनोऽप्रतिसंज्ञिनः। तद्यथा देवा असंज्ञिसत्त्वाः। अयं पञ्चमः सत्त्वावासः। आरूप्याणाञ्च सत्त्वावासानां त्रयो

1 V drops it.

2 A drops it

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विज्ञानस्थितिवद्[1] वक्तव्याः। चतुर्थस्त्वारूप्यः। अरूपिणः सन्ति सत्त्वाः सर्वश आकिञ्चन्यायतनं समतिक्रम्य नैवसंज्ञानासंज्ञायतनमुपसंपद्य विहरन्ति। तद्-यथा देवा नैवसंज्ञानासंज्ञायतनोपगाः। अयं नवमः सत्त्वावास इति।

असंज्ञिसत्त्वेभ्यो येऽन्ये चतुर्थध्यानोपगाः किं ते सत्त्वावासा उत नेति। नेत्याहुः[2]। कस्मादेवमुक्तमाचार्येण। **के पुनरन्ये। अपाया** इति। मुखमात्रमेत-दुक्तम्। [3]असंज्ञिसत्त्वाः सत्त्वावासासंगृहीताश्चतुर्थध्यानोपगा इत्यपि वक्तव्यम्। इहापि तदेव कारणं वक्तव्यं यद्विज्ञानस्थितिषूक्तम्। इहस्थानां ह्यपायगमनप्रार्थना नास्ति। तत्रस्थानाञ्च न वस्तुकामतेति। नापायाः सत्त्वावासाः। असंज्ञिसत्त्वासं-गृहीतेषु बृहत्फलेषु यद्यपीहस्थानां गमनप्रार्थनास्ति। तत्रस्थानां पृथग्जनाना-मासंज्ञिकप्रविविक्ता भवति। आर्याणां त्वनभ्रकपुण्यप्रसवेष्वपि शुद्धावासारूप्य-प्रविविक्ता। परिनिर्वातुकामता च शुद्धावासानामपीति न तेषां तत्रावस्थानबुद्धिः। अतो न ते सत्त्वावासा इत्याचार्यसङ्घभद्रः। अन्ये पुनर्व्याचक्षते। के पुनरन्ये। अपाया इति। अपायानामेव वचनादनभ्रकादयः सत्त्वावासा इष्टा आचार्य-स्येति। तैर्युक्तिरन्वेष्टव्या। **बन्धनस्थानवदिति**। यथा बन्धनस्थानानि न सत्त्वा-वासाः। **अनिच्छावसनात्**। एवमपाया इति।

[चत्वारः सास्रवाः स्कन्धा स्वभूमावेव केवलम् ॥७॥
विज्ञानं न स्थितिः प्रोक्तं चतुःकोटिस्तु संग्रहे।]

रूपोपगा विज्ञानस्थितिरिति। विज्ञानं तिष्ठत्यस्यामिति विज्ञानस्थितिः। उप गच्छतीति उपगा। विज्ञानस्य समीपचारिणी इत्यर्थः। रूपं च तदु-पगा च सा रूपोपगा। एवं यावत् संस्काराश्च ते उपगा च संस्कारोप-गेति। भगवद्विशेषस्तु व्याचष्टे। **रूपोपगा विज्ञानस्थितिर्यावत् संस्कारोपगे**ति। सौत्रान्तिकानां नयेनोच्यते। तत्र विज्ञानस्थितिर्भवसन्तत्यनुच्छेदः। रूपमुपगमस्या विज्ञानस्थितेः सेयं रूपोपगा। उपगमिति उपगम्यते तदात्मीयत इति। एवं यावत् संस्कारा उपगा अस्या विज्ञानस्थितेः सेयं संस्कारोपगा। अथवा तृष्णा स्थितिः। तिष्ठत्यनया विज्ञानं पुनर्भवसन्तत्यनुच्छेदादिति कृत्वा। विज्ञानस्य स्थिति-र्विज्ञानस्थितिः। सा रूपमुपगच्छति तदभिष्वङ्गत इति रूपोपगा। एवं यावत् संस्कारोपगा। वैभाषिकाणां पुनर्नयेन कारकार्थो न शक्यते योजयितुमिति दूषयति।

---

1 A drops all the words beween विज्ञानस्थितिषु and विज्ञानस्थितिवत्.

2 A नेत्याह 3 To. reads असंज्ञिसत्त्वासंगृहीता॰ dropping सत्त्वावासा.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत्र ब्रूमः ' द्विविधेऽप्यस्मिन् व्याख्याने रूपादिव्यतिरिक्ता विज्ञानस्थितिरुक्ता । ता हि

चत्वारः सास्रवाः स्कन्धाः

इति

चतुष्कोटिस्तु संग्रहे

इत्येतत् सर्वं निरस्तं भवतीति दोषान्तरम् । तस्मात् पूर्वकमेव व्याख्यानं साधु ' एतद्वैभाषिकव्याख्यानं वर्णयामो न तैरेवं व्याख्यातम् । रूपमुपगच्छतीति रूपोपगा विज्ञानस्थितिरित्यादि । अपरे पुनर्व्याचक्षते ' रूपोपगा विज्ञानस्थितिरिति ' रूपस्वभावेत्यर्थः । यथान्यल्लोके खक्खटखरगतमिति । स्वभावोऽर्थो गत्यर्थ इत्यभिप्रायः ।

स्थातुः परिवर्जनेन । अन्यो लोके स्थाता देवदत्तादिरन्या स्थितिः स्थानं गृहादिकमित्यर्थः । विज्ञानं वाहयति प्रवर्तयतीत्यर्थः । **नौनाविकन्यायेन** । यथा नाविको नावं वाहयति तद्वत् । **न तु विज्ञानं विज्ञानमेवाभिरुह्य वाहयती** त्यर्थः । एकसन्ताने विज्ञानद्वयासमवधानम् । परसन्तानविज्ञानं तु यद्यपि युगपद् भवति न तु तदितरस्य समीपे वर्तत इति न तत्तस्य स्थितिर्भवति । **नन्दी** सौमनस्यम् । **सप्त च विज्ञानस्थितयः पञ्चस्कन्धस्वभावास्तत् कथमिति** । सप्तसु विज्ञानस्थितिषु पञ्चस्कन्धस्वभावत्वेनेष्टासु । तत् कथं विज्ञानं न[1] विज्ञानस्थितिरिष्टमिति । **एवं तर्हीति** विस्तरः । **अभेदेनैकपिण्डरूपेण** रुपादीनां **स्कन्धानामुपपत्त्यायतनसंगृहीतेषु स्कन्धेषु** मनुष्यादिनिकायसभागसंगृहीतेषु ' **साभिरामायां** साभिरत्यां **विज्ञानप्रवृत्तौ विज्ञानं विज्ञानस्थितिः** सप्तविज्ञानस्थितिदेशनायामभिप्रीयते । **प्रत्येकं** त्वेकमेकं स्कन्धं प्रति । यथा **रूपादयो विज्ञानस्य संक्लेशाय भवन्ति** ' आश्रयसम्प्रयोगसहभूभावेनोपगतत्वात् । **नैवम् केवलम्** । पृथग् । **विज्ञानम्** किं संक्लेशाय भवतीत्यधिकृतम् । कस्मात् ' युगपदाश्रयत्वाद्ययोगात् । **तस्माच्चतुर्विज्ञानस्थितिदेशनायाम्** केवलम् । पृथग्

विज्ञानं न स्थितिः प्रोक्तम् ।

तथा विनेयजनापेक्षया ह्येकत्र सूत्रे अन्यथा विज्ञानस्थितिरुक्ता ' अन्यत्र चान्यथेति अत आह । **अपि च क्षेत्रभावेनेति** विस्तरः । विज्ञानस्य क्षेत्रभावेन चतस्रो विज्ञानस्थितयो रूपवेदनासंज्ञासंस्कारस्वभावा देशिताः । **विज्ञानं बीजभावेन** वपनीयरूपेण **सोपादानम्** । स्वभूमिकया तृष्णया सतृष्णम् । कृत्स्नमेव सन्तानगतं देशितमिति । न पुनर्बीजं बीजस्य क्षेत्रभावेन

---

1 Mss, omit न.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्यवस्थापयांबभूव भगवान्। नहि लोके बीजं क्षेत्रभावेन व्यवस्थाप्यते। **ये च धर्मा** इति विस्तरः। ये च धर्मा विज्ञानस्य सहवर्तिनो रूपादयः। **त एव क्षेत्रभावेन साधुतरा भवन्ति**। सहवर्ति हि बीजस्य क्षेत्रं लोके दृश्यते। विज्ञानं तु विज्ञानेन सह न वर्तते युगपदभावात्। अतीतानागतास्तर्हि रूपादयो न विज्ञानस्थितयः प्राप्नुवन्ति। तेऽप्यतीतानागता यथास्वमतीतानागतानां विज्ञानानां स्थितयो भवन्ति। तस्मात् स्वभूमौ सर्व एव सास्रवा रूपादयो विज्ञानस्थितयो भवन्तीत्यवगन्तव्यम्।

प्रथमा कोटिरिति विस्तरः। **सप्तसु यद्विज्ञानमिति**' पञ्चस्कन्धस्वभावत्वात् सप्तानां विज्ञानस्थितीनाम्। तत्र विज्ञानं संगृहीतं न चतसृषु' विज्ञानस्य तत्राग्रहणात्। **विज्ञानवर्ज्याः स्कन्धा** इति' अपायादिष्वपि विज्ञानं न चतसृषु संगृहीतं न सप्तस्वपायादिषु' विज्ञानपरिभेदेनाग्रहणात्। **सप्तसु चत्वारः स्कन्धा** इति। सप्तसु विज्ञानस्थितिषु ये विज्ञानवर्ज्याश्चत्वारः स्कन्धा उक्ताः ते चतसृष्वपि विज्ञानस्थितिषु संगृहीता [1]इत्युभयत्रापि संगृहीता इति **तृतीया कोटिः**। **चतुर्थ्येतानाकारान् स्थापयित्वेति**। अपायेषु चतुर्थे ध्याने भवाग्रे च यद्विज्ञानमनास्रवाश्च धर्माः।

[चतस्रो योनयस्तत्र सत्त्वानामण्डजादयः ॥८॥
चतुर्धा नरतिर्यञ्चो नारका उपपादुकाः।
अन्तराभवदेवाश्च प्रेता अपि जरायुजाः ॥९॥]

यच्चैतद् गत्यादिभेदभिन्नमिति। आदिशब्देन भाजनान्तराभवभूम्यादिर्गृह्यते। जरायुर्येन मातुः कुक्षौ गर्भो वेष्टितस्तिष्ठति तस्माज्जाता **जरायुजाः**। **भूतसंस्वेदजा** इति। भूतानां पृथिव्यादीनां संस्वेदाद् द्रवत्वलक्षणाज्जाता भूतसंस्वेदजाः।

अविकलाश्चक्षुरिन्द्रियाद्यवैकल्यात्। **अहीनेन्द्रियाः** काणविभ्रान्तादेरभावात्। **सर्वाङ्गरूपेता** हस्तपादादिभिः। सर्वैश्च प्रत्यङ्गैरङ्गुल्यादिभिरुपेताः। **सकृदुपजायन्ते** न कललाद्यनुपूर्व्या अण्डजादिवत्। **उपपादने** उपपत्तौ साधुकारित्वात्। शुक्रशोणिताद्यनुपादानेन सकृदुपजातत्वात्। **उपपादुका इत्युच्यन्ते**। **क्रौंचीनिर्जाताविति** विस्तरः। भिन्नयानपात्रौ किल वणिजौ समुद्रतीरे क्रौंचीं समभिगतौ। ततो निर्जातौ **शैलोपशैलौ स्थविराविति**। **पञ्चालराजस्येति**। तस्य महादेव्याः पञ्चाण्डशतानि जातानि। तेन राज्ञा मंजूषायां प्रक्षिप्य गङ्गायामव-

1 To. omits इति.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वाहितानि। लिच्छविराजेन सान्तःपुरेण स्नायता सा मंजूषोह्यमाना दृष्टा उद्घाटिता च। तस्यां पञ्चशतानि दारकाणां दृष्टानि गृहीतानि चेति। **मांधातृप्रभृतयः संस्वेदजाः।** कथम् उपोषधस्य किल राज्ञो मूर्ध्नि पिटको जातः' तस्य वृद्धेरन्वयात्परिपाकान्वयात् परिभेदान्वयाद्दारको जातः' सोऽयं मान्धातेति संस्वेदजो भवति। राज्ञः खल्वपि मान्धातुर्जानूपरि[1] पिटकौ जातौ' तयोर्वृद्धेरन्वयात् पूर्ववद्यावद्दारकौ जातौ ताविमो **चारूपचारौ**। ब्रह्मदत्तस्य किल राज्ञ उरसि पिटको जातः। तस्य वृद्धेरन्वयात् पूर्ववद्यावद्दारिका जाता'सेयं **कपोतमालिनीति। आम्रपाल्यपि** कदलीस्तंभाज्जातेति श्रूयते। **प्राथमकल्पिका** इति।

प्रागासं रूपिवत् सत्त्वाः[2]

इति वचनात्। **सुपर्णी**'गरुडः[3]। प्रेतानां जरायुजत्वसिद्धयर्थमुच्यते। **आयुष्मत** इति विस्तरः। कथं गम्यते जरायुजत्वसिद्धयर्थमिति। **रात्रौ पञ्चतां जनित्वेति** वचनात्। ननु च सुतरामुपपादुकत्वसिद्धयर्थमिति गम्यते। पञ्च रात्रौ

दिवापञ्च तथाऽपरान्। नास्ति तृप्तिस्तथापि मे

इति वचनात्। जरायुजैर्हि भक्षितैस्तृप्तिर्भवेत्। जरायुजसिद्धयर्थमेव नोपपादुकसिद्धयर्थम्। रात्रौ पञ्चानां सकृज्जन्म दिवा चापरेषां पञ्चानां न विरुध्यते। तावत्कालेन तदात्मभावपरिपूरितः। क्रमेणापि च रात्रौ पञ्चानां दिवापरेषां पञ्चानां जन्म न विरुध्यते। सत्त्वजातिः सा तादृशी कर्मणां चाचिन्त्यो विपाक इति। अभिप्रवृद्धजिघांसादोषत्वात्तु नापि तृप्तिरस्तीति।

प्राप्तोपपत्तिवशित्वोऽपीत्यनेन जरायुजोपपत्तौ कर्मबलात्कारायोगं दर्शयति। **यथान्यतीर्थ्या अपभाषन्त** इति। अन्यतीर्थ्या मस्करिप्रमृतयः। यथोक्तं निर्ग्रन्थशास्त्रे ऋद्धिं भदन्त को दर्शयति'मायावी गौतम इति। तथा भगवन्तमेवोद्दिश्यान्यत्लोक्तम्। **कल्पशतस्यात्ययादेवंविधो लोके मायावी प्रादुर्भूय मायया लोकं भक्षयतीति**' उपजीवतीत्यर्थः। **बाह्यबीजाभावादिति।** बाह्यस्य शुक्रशोणितकर्दमादेरभावादित्यर्थः। **आधिष्ठानिकीमिति**' यदधितिष्ठति इदमेवं भवत्विति तदधिष्ठानम्। तत्प्रयोजनमस्यास्तत्र वा भवा ऋद्धिराधिष्ठानिकी। **तामिच्छतां बौद्धानां न युक्त एष परिहार**[3] इति। कतमः। य उक्तः। शरीरधातूनामवस्थापनार्थमिति।

---

1 Mss. मान्धातुरूपरि

2 Kārikā, III, 96.

3 A सुपर्णी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रश्नात् प्रश्नान्तरमुत्पद्यत इति। अथ किमर्थं चरमभविको बोधिसत्त्व इति प्रश्न उक्तो विस्तरेण। तत्र चोक्तम्' शरीरधातूनामवस्थापनार्थमिति विस्तरः। तस्मात् प्रश्नादिदं प्रश्नान्तरमुत्पद्यते। **यद्युपपादुकानामिति** विस्तरः। **काय-निधनं** कायनाशः। उपपादुकः सुपर्णी उपपादुकं नागमिति विशेषणद्वयं[1] किमर्थम्' किमनुपपादुका अपि सुपर्णिनो नागाश्च सन्ति। सन्तीत्याहुः। चतुर्विधा हि गरुडा नागाश्चाण्डजादिभेदात्। तेषामुपपादुका उत्तमाः' संस्वेदजा उपोत्तमाः' जरायुजा मध्याः' अण्डजा जघन्याः। तत्रोपपादुकः सुपर्णी सर्वानुपपादकादीनुद्धरति भक्षार्थम्' संस्वेदजस्त्रीन् संस्वेदजादीन्' जरायुजो द्वौ जरायुजाण्डजौ' अण्डजोऽण्डजमेवेति वर्णयन्ति। **यावन्न-मृत** इति' यदा जीवति तदा तन्मांसादि नान्तर्धीयत इति निदर्शितं भवति। **न पुनर्मृतस्यास्य तृप्यतीति**। न पुनर्मृतेनानेन तृप्यतीत्यर्थः। तृपिपूर्यो विभाषेति' विभाषा षष्ठीष्यते। तस्य मृतस्याकाशस्येव भक्षितस्य मांस-पिण्डान्तर्धानान्न तृप्यतीत्यवगन्तव्यम्।

सा हि द्वे गती इति' नरकगतिर्देवगतिश्च। **तिसृणां च प्रदेश** इति' तिर्यक्प्रेतमनुष्य गत्यन्तरालत्वात्॥

[मृत्यूपपत्तिभवयोरन्तरा भवतीह यः।
गम्यदेशानुपेतत्वान्नोपपन्नोऽन्तराभवः ॥१०॥]

गत्योरन्तरालत्वात्। ननु चाव्याकृतैव गतिरिष्यते। उपपत्तिभवश्चै-कान्तेन क्लिष्टः। मरणभवोऽपि कदाचित् कुशलः क्लिष्टो वा भवति न गतिः। कथं तयोर्गतिशब्दमध्यारोप्य गत्यन्तरालत्वादित्युच्यते। नैष दोषः। मरणोप-पत्तिभवयोरनिवृताव्याकृतानां निकायसभागजीवितेन्द्रियजात्यादीनां गतिस्वभावानां तत्काले विद्यमानत्वात्। कामरूपधात्वोश्च कायेन्द्रियस्याप्यवश्यम्भावात्। न चोपपत्तिवन्मरणभवोऽवश्यं क्लिष्टो नाप्यवश्यं कुशलः। [2]तस्मात्तेषु गतिशब्द-मारोप्य गत्यन्तरालत्वादित्युक्तम्। **पदे गत्यर्थत्वादिति**। [3]पदगताविति पठ्यते। तेनोपपन्नशब्दस्योपगतार्थं दर्शयति'

---

1 Mss. ०षणं द्वितीयं
2 A गामात्तेषु
3 Dhā., 4, 60.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपपन्नोऽन्तराभवः।

किं तर्हि' उपपद्यमान इति। **अभिव्यक्तिः समाप्तिश्चेति**। आक्षेपकेण कर्मणा निकायसभागस्याभिव्यक्तिः परिपूरकैः परिसमाप्तिः सर्वस्मिन् जन्मनि कर्मद्वयस्य व्यापारात्।

एकं जन्माक्षिपत्येकमनेकं परिपूरकम्[1]

इति वचनात्। अथवा यत्र देशे आक्षिप्तस्य कर्मणा नामरूपस्य विपाकस्य प्रादुर्भावोऽभिव्यक्तिः षडायतनपूरितश्च समाप्तिः स देशोऽवगन्तव्यः ॥१०॥

[व्रीहिसन्तानसाधर्म्यादविच्छिन्नभवोद्भवः।
प्रतिबिम्बमसिद्धत्वादसाम्याच्चानिदर्शनम् ॥११॥]

व्रीहिसन्तानसाधर्म्यात्

इति विस्तरः। संबध्नंस्तानः संतानो व्रीहेः संतानो व्रीहिसन्तानः। तेन साधर्म्यादविच्छिन्नस्य भवस्योद्भवो भवति' यतोऽपैति' यत्र चोत्पद्यते' तदन्तरालसन्तानवर्तिरूपपूर्वकमुपपत्तिभवरूपम्' स्वोपादानरूपसन्तानरूपस्वभावत्वात्' व्रीहिसन्तानपश्चात्तररूपवत्। **सन्तानवर्तिनां हि धर्माणामविच्छेदेन देशान्तरोत्पत्त्या** देशान्तरेषु प्रादुर्भावो दृष्टः। तद् यथा व्रीहिसन्तानस्य। व्रीहिसन्तानपश्चात्तररूपं हि यतो देशान्तरादपैति' यत्र च देशान्तर उत्पद्यते' तदन्तरालसन्तानवर्तिरूपपूर्वकमुत्पद्यते। क्षणिकवादिनां ह्ययमस्माकं सिद्धान्तः। यदा ग्रामाद्ग्रामान्तरं नीयते व्रीहिः' न स व्रीहिः पुर्वत्र ग्रामे निरुध्य तद्ग्रामान्तरालेऽनुत्पद्यमानोऽनेकयोजनान्तरितेऽपि ग्रामान्तर उत्पद्यते। किं तर्हि' निरन्तराकाशदेशोत्पादनिरोधक्रमेणोत्पद्यते ग्रामान्तरे। तच्च स्वोपादानरूपसन्तानरूपस्वभावम्। तथोपपत्तिभवरूपमप्युत्पद्यत इति। अत्राचार्यगुणमतिः सह शिष्येणाचार्यवसुमित्रेण स्वनिकायानुरागभावितमतिर्व्याख्यानव्यापारमपास्य प्रत्यवस्थानपर एव वर्तते। वयमिह शास्त्रार्थविवरणं प्रत्याद्रियामहे न तद्दूषणम्' निःसारत्वात् बहुवक्तव्यभयाच्च। **भविष्णुर्भवनशीलः**।

---

1 Kārikā, IV, 96.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विच्छिन्नोऽपीति विस्तरः। **आदर्शादिषु बिम्बात् प्रतिबिम्बमिति।** आदर्शोदकादिषु बिम्बान्मुखात् प्रतिबिम्बं मुखच्छायारूपं विच्छिन्नमुत्पद्यमानं दृष्टमित्यनेनानैकान्तिकतामुद्ग्राहयति। प्रतिसाधनं वा करोति। यतोऽपैति। यत्र चोत्पद्यते। न तदन्तरालसन्तानवर्तिरूपपूर्वकमुपपत्तिभवरूपम्। स्वोपादानरूपसन्तानरूपस्वभावत्वात्। प्रतिबिम्बरूपवदिति। प्रतिबिम्बं नामान्यदेवोत्पद्यते धर्मान्तरमित्यसिद्धमेतदिति। बिम्बसामर्थ्यादेव तत्रादर्शादिषु प्रतिबिम्बाकारं भ्रान्तं विज्ञानमुत्पद्यत इत्याचार्यस्याभिप्रायः। **न तत्र प्रतिबिम्बं नाम किञ्चिदस्तीत्यनेन** [1]धर्म्यसिद्धिर्नाम दृष्टान्तदोषं दर्शयति। तस्मान्नानैकान्तिकतास्ति। **न चैतत् प्रतिसाधनं साध्विति। सिद्धावपि च सत्याम्**

असाम्यादनिदर्शनम्

इति। प्रतिबिम्बस्य द्रव्यसत्त्वेन सिद्धावपि सत्यामसाम्याद्दार्ष्टान्तिकेन न निदर्शनमनुदाहरणं प्रतिबिम्बकमिति। **कथं तावदसिद्धमिति** तावच्छब्दः क्रमे ॥११॥

असिद्धतायुक्तिं तावत् दर्शयन्नाह

[सहैकत्र द्वयाभावादसन्तानाद्द्वयोदयात्।
कण्ठोक्तेश्चास्ति गन्धर्वः पञ्चोक्तेर्गतिसूत्रतः ॥१२॥]

सहैकत्र द्वयाभावात्

इति विस्तरः। तत्रैव हि आदर्शदेशे आदर्शरूपं दृश्यते पार्श्वस्थितेन न प्रतिबिम्बकम्। प्रतिबिम्बकं च तत्रैव दृश्यतेऽभिमुखावस्थितेन नादर्शरूपम्। **न चैकत्र देशे** उपादाय-**रूपद्वयस्यास्ति सहभावः।** किं कारणम्। **आश्रयभूतभेदात्।** आश्रयभूतानि हि तयोर्भिन्नानीति। नास्त्यादर्शरूपाश्रयभूतैरवष्टब्धे[2] देशे प्रतिबिम्बकरूपाश्रयभूतानां [3]तत्रावकाशः। अतो नोपादाय-

---

1 Mss. धर्मसिद्धि ; To. धर्मासिद्धिं नाम   2 U ०रवस्तब्धे

3 U यत्रा०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपद्वयस्यास्ति सम्भवः। तदेवं युगपद्विज्ञानद्वयस्याभावात्' उपादायरूपद्वयस्य चैकत्र सहभावाभावात्' न तत् किञ्चिदस्तीति दर्शयति। यत्रैव हि देशे आदर्शरूपं दृश्यत इति बिम्बकं च तत्रैव'न त्वन्यत्र। को दोष इत्याह। **न चैकत्र रूपद्वयस्यास्ति सहभाव** इति पूर्ववद्वाच्यम्। अथवा सहैकत्र द्वयाभावादित्यस्य सूत्रस्यायमर्थः। एकत्र रूपे पुरुषद्वयस्य पश्यत एवाभावात्। सहदर्शनस्य प्रतिबिम्बमसिद्धमिति वाक्याध्याहारः। कथमित्याह' **दिग्भेदव्यवस्थितैः** पुरुषैरेकैरुत्तरदिग्व्यवस्थितैरितरैर्दक्षिणादिग्व्यवस्थितैः' **एकस्मिन् वाप्यम्बुदेशे** एकस्मिंस्तटाकजलदेशे' **स्वाभिमुखदेशस्थितानां रूपाणां** दक्षिणतटोर्ध्वस्थितानि रूपाण्युत्तरदिग्व्यवस्थितपुरुषस्वाभिमुखस्थान्युत्तरतटोर्ध्वस्थितान्यपि रूपाणि दक्षिणादिग्व्यवस्थितपुरुषस्याभिमुखस्थानि' तेषामुभयेषाम्। किम्' **प्रतिबिम्बकमन्योन्यमुपलभ्यते** 'उत्तरदिग्व्यवस्थितैर्दक्षिणतटाधः प्रतिबिम्बकमुपलभ्यते'दक्षिणादिग्व्यवस्थितैरप्युत्तरतटाधः प्रतिबिम्बकमुपलभ्यते। एवमन्योन्यमुपलभ्यते न तूभयं युगपदुपलभ्यत इति वाक्यार्थः। न हि स्वतटाधः प्रतिबिम्बकमेकतटस्थैः समन्ततोऽपि वापीजलं पश्यद्भिरुपलभ्यते। ततः किमिति चेदत आह। **न त्वेकत्र रूपे** घटे पटे वा **द्वयोः पश्यतोः पुरुषयोः सहदर्शनं न भवति**' भवत्येवेत्यर्थः। इह तु **न भवति सहदर्शनमित्यतो न तत्र रूपान्तरोत्पत्तिर्युक्तेति**। अथवास्यायमर्थः। **छायातपयोश्च द्वयोः सहैकत्र भावो न दृष्टो लोके**। यत्र छाया भवति मण्डपेऽन्यत्र वा न तत्रातपो यत्र वातपो भवत्यभ्यवकाशे न तत्र छाया' **उपलभ्यते च छायास्थ आदर्शे सूर्यस्य प्रतिबिम्बकमिति**। कथम्' तटाके सूर्यप्रतिबिम्बकमुत्पद्यते। तत्तटाकतटस्थे च छायावति मण्डपे आदर्शः स्थाप्यते। तत्रादर्शके तटाकस्थस्य सूर्यप्रतिबिम्बकस्यापरं प्रतिबिम्बकमुत्पद्यते। तटाके च यत् सूर्यप्रतिबिम्बकं तत् सूर्यसमुत्थमित्यवश्यमातपस्वभावमित्यभ्युपगन्तव्यम्। यच्चापरमादर्शे प्रतिबिम्बकं तदातपस्वभावप्रतिबिम्बकसमुत्थमित्येतदप्यवश्यं आतपस्वभावमभ्युपगन्तव्यम्। एवं सति छायातपयोः सहस्वभावः स्यात्। न चान्यत्र लोके छायातपयोः सहभाव इति। **न युक्तोऽस्य प्रतिबिम्बकस्य तत्र प्रादुर्भावः। कूप इवोदकमिति**। यथा कूपे दूरान्तर्गतमुदकं दृश्यते। तथा चन्द्रप्रतिबिम्बकमप्यत्रैवान्तर्गतं[1] दृश्यते। न चादर्शस्तावत् वस्तुफलोऽस्ति।

1 Mss. ०मन्यत्रं वा०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तच्च तत्रोत्पद्यमानम्' तच्च प्रतिविम्बकमादर्श[1] एवोत्पद्यमानम्। नान्यत्राधस्ता दुपलभ्यते। उपलभ्यते च अतो नास्त्येव तत् किञ्चित्। सामग्र्यास्तु 'विम्बादर्शादिलक्षणायाः। स तस्याः[2] प्रभावो यत्तथा दर्शनं भवति। अचिन्त्यो हि धर्माणां शक्तिभेदः' अयसोऽयस्कान्ताभिगमनदर्शनान्न काष्ठादीनां यथा' चन्द्रकान्ताच्चन्द्रोदयेऽसंभवप्रक्षरणदर्शनं नाङ्गारादीनामित्येवमादि वक्तव्यम्। आदर्शसन्तानसम्बद्धत्वादिति। न विम्वसन्तानभूतं प्रतिविम्वमादर्शसम्वन्धत्वादादर्शरूपवत्। सहभावाच्च विम्वसमानकालरूपान्तरवत्। तदेवं यथा मरणभवस्योपपत्तिभवः[3]सन्तानभूतो नैवं विम्बस्य प्रतिविम्बकमिति' साधनानन्वितः प्रतिविम्वकदृष्टान्तः। व्रीहिसन्तानपश्चात्तररूपदृष्टान्तस्तु स्वसन्तानपूर्वरूपसन्तानभूत इति। तस्मादसाम्यं दृष्टान्तस्य प्रतिविम्बस्य चेति।

द्वयोदयात्

इति विस्तरः। द्वयेनोदयो द्वयोदयः। तस्माद्बिम्बाच्चादर्शाच्चेत्यर्थः। यत् प्रधानं कारणमादर्शादि तदाश्रित्योत्पद्यते प्रतिबिम्बम्। आदर्शादि हि प्रतिबिम्बस्य प्रधानं कारणं तदनुविधानात्। तद् यथा यद्यसिस्तिर्यगवस्थितो भवति प्रतिविम्बमपि तिर्यगायतं च दृश्यते। यद्यूर्ध्वमवस्थितो भवति प्रतिविम्बमपि तथैव दृश्यते। न चैवमुपपत्तिभवस्यापि द्वाभ्यां कारणाभ्यां सम्भवो मरणभवाच्चान्यतश्च प्रधानभूतादादर्शस्थानीयात्। बाह्यं शुक्रशोणितं प्रधानकारणमिति चेत्' न अचेतनत्वात्। उपपादुकानां च तदभावादतोऽप्ययमसमानो दृष्टान्तः। किमनेन दर्शितं भवति। [4]उत्कालितविशेषणे हेतावयमतुल्यो दृष्टान्त इति। कथमिति' यतोऽपैति यत्र चोत्पद्यते तदन्तरालसन्तानवर्तिरूपपूर्वकमुपपत्तिभवरूपम्। अद्वयोत्पन्नस्वोपादानरूपसन्तानरूपस्वभावत्वात्। व्रीहिसन्तानपश्चात्तररूपवदिति। तदेवं सति नास्य साधनस्यानैकान्तिकता शक्यमुद्ग्राहयितुं नापि प्रतिसाधनं कर्तुमित्युक्तं भवति। आगमेनान्तराभवस्यास्तित्वं साधयन्नाह'

कण्ठोक्तेश्चास्ति

इति। स्वशब्दाभिधानादित्यर्थः' नैतत् सूत्रं तैराम्नायत इति। तैर्निकायान्त-

---

1 Mss. ०बिम्बकदादर्शे 2 U एतस्याः
3 C ०स्योपपत्तिभवः 4 To. उत्क्वालित०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रीयैः। कस्मान्नाम्नायते। तदागमेष्वभावात्। निकायान्तरागमप्रसिद्धं किमिति न प्रमाणं क्रियते। मूलसंगीतिभ्रंशेन समारोपितसूत्राशंकितत्वात्[1]। त्रयाणां स्थानानामिति। त्रयाणां हेतूनां माता कल्या माता नीरोगा। ऋतुमती रजस्वला। तदेतदुभयं प्रथमं स्थानं भवति। रक्तौ सन्निपतिताविति। मैथुनधर्मं कुर्वन्तौ। इदं द्वितीयं स्थानम्। गन्धर्वश्च प्रत्युपस्थित इति तृतीयम्। स्कन्धभेदश्च प्रत्युपस्थित इति मरणभवः। पञ्चानागामिनः सप्त सत्पुरुषगतयः पुद्गलनिर्देशकोशस्थाने वक्ष्यन्ते। उपपद्यादयोपीति। उपपद्या नाम ते देवा इत्येवमादयः संप्रसज्यन्ते। सप्त सत्पुरुषगतय इति। एत एव [2]पञ्चान्तरापरिनिर्वायिणं त्रिधा भित्त्वा सप्त भवन्ति तेनाह। अन्तरापरिनिर्वायिणस्त्रय उक्ताः। कालप्रकर्षभेदेनेति। कालप्रकर्षभेदेन देशप्रकर्षभेदेन च यथायोगम्। [3]सूत्रं चात्र पठ्यते। श्रावस्त्यां निदानम्। तत्र भगवान् भिक्षूनामन्त्रयते स्म। सप्त वोऽहं भिक्षवः सत्पुरुषगतीर्देशयिष्याम्यनुपादाय च परिनिर्वाणम् तच्छृणुत[4] साधु च सुष्ठु च मनसिकुरुत भाषिष्ये। सप्त सत्पुरुषगतयः। कतमाः। इह भिक्षुरेवं प्रतिपन्नो भवति। नो च स्यां नो च मे स्यात् न भविष्यामि न मे भविष्यति यदस्ति यद् भूतं तत् प्रजहामीत्युपेक्षां प्रतिलभते। स भवेऽस्मिन्न रज्यते। स भवेऽस्मिन्न सज्यते।

अथोत्तरं पदं शान्तं प्रज्ञया प्रतिविध्यति।

तच्चानेन पदं कायेन साक्षात्कृतं भवति। एवं प्रतिपन्नस्य भिक्षोः का गतिः स्यात् कोपपत्तिः कोऽभिसंपराय इति स्युः प्रष्टारः[5]। तद् यथा भिक्षवः परीत्तशकलिकाग्निरभिनिवर्तमान एव निर्वायात्। एवमेव तस्य तावन्मानावशेषमप्रहीणं भवत्यपरिज्ञातम्। तस्य तावन्मानावशेषस्याप्रहाणादपरिज्ञानात् पञ्चानामवरभागीयानां संयोजनानां प्रहाणादन्तरापरिनिर्वायी भवति। इयं प्रथमा सत्पुरुषगतिराख्याता। पुनरपरं भिक्षुरेवं प्रतिपन्नो भवति। नो च स्यामिति पूर्ववत् यावत् स्युः प्रष्टार इति। तद् यथा ऽयोगुडानां वायस्फालानां वा प्रदीप्ताग्निसंप्रतप्तानामयोघनेन हन्यमाना-

---

1 Mss. ०शङ्कितफलयोनि
2 Mss. पंचानन्तरा०
3 See Aṅguttara N., VII, 6, 2,
4 Mss. तच्छृणु च
5 Mss. प्रस्तार:

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नामयस्प्रपाटिका उत्पतन्त्येव निर्वायात्। एवमेव तस्य पूर्ववत् यावत् पञ्चानामवरभागीयानां संयोजनानां प्रहाणादन्तरापरिनिर्वायी भवति। इयं द्वितीया सत्पुरुषगतिः। पुनरपरं भिक्षुरेवं प्रतिपन्नो भवति। पूर्ववद्यावदयस्प्रपाटिका उत्प्लुत्यापतित्वैव पृथिव्यां निर्वायात्। एवमेव तस्य पूर्ववद् [1]यावदन्तरापरिनिर्वायी भवति। इयं तृतीया सत्पुरुषगतिः। पुनरपरं भिक्षुरेवं प्रतिपन्नो भवतीति पूर्ववद् यावदयस्प्रपाटिका उत्प्लुत्य पतितमात्रैव पृथिव्यां निर्वायात्। एवमेव तस्य पूर्ववद् यावत् पञ्चानामवरभागीयानां संयोजनानां प्रहाणादुपपद्यपरिनिर्वायी भवति। इयं चतुर्थी सत्पुरुषगतिः। पुनरपरं भिक्षुरेवं प्रतिपन्न इति पूर्ववद् यावदयस्प्रपाटिका उत्प्लुत्य परीत्ते तृणकाष्ठे निपतेत्। सा तत्र धूममपि कुर्यादर्चिरपि संजनयेत्। सा तत्र धूममपि कृत्वाऽर्चिरपि संजनय्य तदेवं परीत्तं तृणकाष्ठं दग्ध्वा पर्यादाय निरुपादाना[2] निर्वायात्। एवमेव तस्य पूर्ववद्यावत् पञ्चानामवरभागीयानां संयोजनानां प्रहाणादनभिसंस्कारपरिनिर्वायी भवति। इयं पञ्चमी सत्पुरुषगतिः। पुनरपरं भिक्षुरेवं प्रतिपन्न इति पूर्ववद् यावदयस्प्रपाटिका उत्प्लुत्य महति विपुले तृणकाष्ठे निपतेत्। सा तत्र धूममपि कुर्यादर्चिरपि संजनयेत्। सा तत्र धूममपि कृत्वाऽर्चिरपि संजनय्य तदेव महद् विपुलं तृणकाष्ठं दग्ध्वा पर्यादाय निरुपादाना परिनिर्वायात्। एवमेव तस्य पूर्ववद् यावत् पञ्चानामवरभागीयानां संयोजनानां प्रहाणात् साभिसंस्कारपरिनिर्वायी भवति। इयं षष्ठी सत्पुरुषगतिः। पुनरपरं भिक्षुरेवं प्रतिपन्न इति पूर्ववद् यावदयस्प्रपाटिका उत्प्लुत्य महति विपुले तृणकाष्ठे निपतेत्। सा तत्र धूममपि कुर्यादर्चिरपि संजनयेत्। सा तत्र धूममपि कृत्वार्चिरपि संजनय्य तदेव महद् विपुलं तृणकाष्ठं दग्ध्वा ग्राममपि दहेद् ग्रामप्रदेशमपि नगरमपि नगरप्रदेशमपि जनपदमपि जनपदप्रदेशमपि कक्षमपि दावमपि द्वीपमपि षण्डमपि दहेत्। ग्राममपि दग्ध्वा यावत् षण्डमपि दग्ध्वा [3]मार्गं वागम्य उदकान्तं वाऽल्पहरितकं वा पृथिवीप्रदेशमागम्य पर्यादाय निरुपादाना निर्वायात्। एवमेव तस्य[4] यावत् पञ्चानामवरभागीयानां संयोजनानां प्रहाणादूर्ध्वस्रोता भवति। इयं सप्तमी सत्पुरुषगतिराख्याता। अनुपादाय परिनिर्वाणं कतमत्। इह भिक्षुरेवं प्रतिपन्न इति पूर्ववद् यावत् स्युः प्रष्ठार इति। तस्यैवं प्रतिपन्नस्य भिक्षो-

---

1 U यावदनन्तरा०

2 Mss. drop ना

3 To. मार्गान्तमागम्य

4 To. adds पूर्ववत्.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न पूर्वस्यां दिशि गतिं वदामि न दक्षिणस्यां न पश्चिमायां नोत्तरस्यां नोर्ध्वं नाधो नानुविदिक्षु नान्यत्र दृष्ट एव धर्मे निश्छायं परिनिर्वृतं शीतीभूतं ब्रह्मीभूतमिति। इदमुच्यतेऽनुपादाय परिनिर्वाणम् । सप्त वोऽहं भिक्षवः सत्पुरुषगतीर्देशयिष्यामि । अनुपादाय च परिनिर्वाणमिति यदुक्तम्' इदमेतत् प्रत्युक्तम्[1] । **अन्ये पुनराहु**रितिविस्तरः । आयुषः प्रमाणं तस्यान्तरं तस्मिन् **आयुःप्रमाणान्तरे**ऽपरिसमाप्त आयुषीत्यर्थः । **देवसमीपान्तरे वा** । देवानामन्तिकं[2] देवसमीपं गतस्यान्तरे यः **क्लेशान् प्रजहाति सोऽन्तरापरिनिर्वायी । स पुनर्धातुगतो वा परिनिर्वाति** यः क्लेशबीजावस्थायामुपपन्नमात्र असमुदाचारक्लेश इत्यर्थः । **संज्ञागतो** विषयसंज्ञासमुदाचारावस्थायां यः परिनिर्वाति । धातुगताच्चिरतरेणायं परिनिर्वाति । **वितर्कगतो वा** वितर्कसमुदाचारावस्थायां यः परिनिर्वाति । अयमपि संज्ञागताच्चिरतरेण परिनिर्वाति । **तेन त्रिविधो भवत्यन्तरापरिनिर्वायी** यथोक्तेन दृष्टान्तत्रयेण । **प्रथमो वा निकायसभागपरिग्रहं कृत्वा** जातमात्र इत्यर्थः । यं प्रत्येष परीत्तः शकलिकाग्निरिति दृष्टान्तः । **द्वितीयो देवसमृद्धिं चानुभूय परिनिर्वातीति** ' यं प्रत्येष दृष्टान्तः । तद् यथाऽयस्प्रपाटिकेति । **तृतीयो धर्मसंगीतिमनुप्रविश्य** धर्मसांकथ्यमनुप्रविश्य **परिनिर्वाति** ' यं प्रत्येष दृष्टान्तः । तद् यथाऽयस्प्रपाटिका उत्प्लुत्य पृथिव्यामपतितैव परिनिर्वायात्[3] । तदेवं विनाप्यन्तराभवेन यथान्तरापरिनिर्वायी भवति । यथा च तस्य दृष्टान्तत्रयेण त्रिविधो भेदस्तथा साधितं निकायान्तरीयैः । तस्मिन् साधिते इदं चोद्यते । यदि धर्मसङ्गीतिमनुप्रविश्य यः परिनिर्वाति' सान्तरापरिनिर्वायीष्यते । **कीदृश उपपद्यपरिनिर्वायी भविष्यतीत्यत** आह । **उपपद्यपरिनिर्वायी पुनः प्रकर्षयुक्तां सङ्गीतिमनुप्रविश्य परिनिर्वातीति** । प्रकर्षयोगादुत्पत्त्यर्थो भवतीत्यभिप्रायः । सङ्गीत्यनुप्रवेशसामान्यान्नैष भेदो युज्यत इति वचनावकाशं मत्वा पुनराह' **भूयसा वायुरुपहत्येति**' आयुषो बहु क्षयित्वा परिनिर्वातीत्यर्थः ।

त एत इति विस्तरः' त एते सर्वेऽपि धातुगतादयस्त्रयः शकलिकादिभिर्दृष्टान्तैर्न सम्बध्यन्ते । कस्मात्' **देशगतिविशेषाभावात्**' देशगतेर्विशेषस्याभावात् ' न ह्येषां देशगतिविशेषोऽस्ति ' तत्रैव देशे परिनिर्वाणात् ' सूत्रोक्तानां त्रयाणां दृष्टान्तानां देशगतिविशेषोऽस्तीति नैभिरेते सम्बध्यन्ते ।

---

1 To. & U प्रयुक्तं

2 To. adds देवानां समीपं.

3 To. ०पतित्वैव परिनिर्वायात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आरूप्येष्वपि चेति विस्तरः। यदि चैवमुपपद्यपरिनिर्वायिण एवान्तरापरिनिर्वायित्वेन व्यवस्थाप्येरन्। आरूप्येष्वपि ते तथैव पठ्येरन्। तत्रायुःप्रमाणान्तरे परिनिर्वाणात्' न चैवम्' अतो नैवं सूत्रार्थः। आयुःप्रमाणान्तरे वेत्यादिः। कथं पुनर्गम्यते' नारूप्येष्वन्तरापरिनिर्वायी पठ्यत इत्याह ' **ध्यानैश्चतस्रो दशिका** इति विस्तरः। ध्यानैश्चतुर्भिश्चतस्रो दशिकाः सूत्रार्थानाम्। प्रथमस्य ध्यानस्यैका दशिका यावच्चतुर्थस्यैका दशिका' ताः कृत्वा **आरूप्यैः सप्तिकात्रयम्**[1]' आकाशविज्ञानाकिञ्चन्यायतनैस्तिस्रः सप्तिकाः' तासां त्रयमन्तराभवाभावादुपपत्तिस्थानत्रयाभावेन च द्वयाभावात्' तत् कृत्वा नैवसंज्ञानासंज्ञायतनेन **षट्किका**। तेषामेव त्रयाणामूर्ध्वं स्रोतसश्चाभावात्। तां च कृत्वा वर्गो भवति **समुदितो** बद्ध इत्यर्थः। कथमिह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैर्विविक्तं कामैर्विविक्तं पापकैरकुशलैर्धर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमध्यानमुपसम्पद्य विहरति। स न हैव तानाकारान् तानि लिङ्गानि तानि निमित्तानि मनसिकरोत्यपि तु यत्तत्रोपलभते रूपगतं वा वेदनागतं वा संज्ञागतं वा संस्कारगतं वा विज्ञानगतं वा स तान् धर्मान् रोगतो मनसिकरोति गण्डतः शल्यतोऽघतोऽनित्यतो दुःखतः शून्यतोऽनात्मतो मनसिकरोति। स तान् धर्मान् रोगतो मनसिकृत्य यावदनात्मतो मनसिकृत्य तेभ्यो धर्मेभ्यश्चित्तमुद्वेजयत्युत्त्रासयति प्रतिवारयति। स तेभ्यो धर्मेभ्यश्चित्तमुद्वेज्योत्त्रास्य प्रतिवार्यामृते धातावुपसंहरति। एतच्छान्तमेतत् प्रणीतम्। यदुत सर्वोपधिप्रतिनिसर्गस्तृष्णाक्षयो विरागो निरोधो निर्वाणमिति(१)। एतदेव च सूत्रमुक्त्वाऽयं विशेषः। तस्यैवं जानत एवं पश्यतः कामास्रवाच्चित्तं विमुच्यते भवास्रवादविद्यास्रवाच्चित्तं विमुच्यते। विमुक्तस्य विमुक्तोऽस्मीति ज्ञानदर्शनं भवति' क्षीणा मे जातिरुषितं ब्रह्मचर्यं कृतं करणीयं[2] नापरमस्माद् भवं प्रजानामीति(२)। एतदेव च सूत्रमुक्त्वा नो तु विमुच्यत अपि तु तेन धर्मच्छन्देन तेन धर्मस्नेहेन तेनैव धर्मप्रेम्णा तयैव धर्माभिरत्या अन्तरापरिनिर्वायी भवति(३)। न हैवान्तरापरिनिर्वायी भवत्यपि तूपपद्यपरिनिर्वायी भवति(४)। न हैवोपपद्यपरिनिर्वायी भवत्यपि त्वनभिसंस्कारपरिनिर्वायी भवति(५)। न हैवानभिसंस्कारपरि-

---

1 To. adds इति.

2 A नावरं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निर्वायी भवत्यपि तु साभिसंस्कारपरिनिर्वायी भवति(६)। न हैव साभिसंस्कारपरिनिर्वायी भवत्यपि तूर्ध्वस्रोता भवति(७)। न हैवोर्ध्वस्रोता भवति' अपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्या महाब्रह्मणां देवानां सभागतायामुपपद्यते(८)। न हैव महाब्रह्मणां देवानां सभागतायामुपपद्यते' अपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्या ब्रह्मपुरोहितानां देवानां सभागतायामुपपद्यते(९)। न हैव ब्रह्मपुरोहितानां देवानां सभागतायामुपपद्यते' अपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्या ब्रह्मकायिकानां देवानां सभागतायामुपपद्यते(१०)। इह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैर्वितर्कविचाराणां व्युपशमादध्यात्मसंप्रसादाच्चेतस [1]एकोतीभावादवितर्कमविचारं समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसम्पद्य विहरति। स न हैव तानाकारान् तानि लिङ्गानि तानि निमित्तानि मनसिकरोत्यपि तु [2]यत्तत्रोपलभते पूर्ववद्ग्रन्थो यावद्विरागो निरोधो निर्वाणम्(१)। एतदेव सूत्रमुक्त्वा तस्यैवं जानत एवं पश्यतः कामास्रवाच्चित्तं विमुच्यते भवास्रवादविद्यास्रवात् पूर्ववद् यावत् कृतं करणीयं नापरमस्माद् भवं प्रजानामीति(२)। एतदेव सूत्रमुक्त्वा नो तु विमुच्यत अपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्या अन्तरापरिनिर्वायी भवति(३)। न हैवान्तरापरिनिर्वायी भवत्यपि तूपपद्यनिर्वायी भवति(४)। न हैवोपपद्यपरिनिर्वायी भवत्यपि त्वनभिसंस्कारपरिनिर्वायो भवति(५)। न हैवानभिसंस्कारपरिनिर्वायी भवत्यपि तु साभिसंस्कारपरिनिर्वायी भवति(६)। न हैव साभिसंस्कारपरिनिर्वायी भवत्यपि तूर्ध्वस्रोता भवति(७)। न हैवोर्ध्वस्रोता भवत्यपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्याभास्वराणां देवानां सभागतायामुपपद्यते(८)। न हैवाभास्वराणां देवानां सभागतायामुपपद्यत अपि तु तेनैव धर्मच्छन्देन यावत्तयैव धर्माभिरत्याप्रमाणाभानां देवानां सभागतायामुपपद्यते(९)। न हैवाप्रमाणाभानां देवानां सभागतायामुपपद्यत अपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्या परीत्ताभानां देवानां सभागतायामुपपद्यते(१०)। इह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैः प्रीतिविरागादुपेक्षको विहरति'स्मृतः सम्प्रजानन् सुखं च कायेन प्रतिसंवेदयते। यत्तदार्या आचक्षते उपेक्षकः स्मृतिमान्

1 V एकतो० 2 Mss. substitute स for यत् while To. omits it.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुखविहारो तृतीयं ध्यानमुपसम्पद्य विहरतीति[1]। स न हैव तानाकारांस्तानि लिङ्गानि तानि निमित्तानि मनसिकरोति पूर्ववत् सर्वाणि सूत्राणि। केवलं तु निकायसभागतायां विशेषः। न हैवोर्ध्वस्रोता भवति। अपि तु तेनैव धर्मच्छन्देन पूर्ववद्यावच्छुभकृत्स्नानां देवानां सभागतायामुपपद्यते(८)। न हैव शुभकृत्स्नानां देवानां सभागतायामुपपद्यत अपि तु तेनैव पूर्ववदप्रमाणशुभानां देवानां सभागतायामुपपद्यते(९)। न हैवाप्रमाणशुभानां देवानां सभागतायामुपपद्यत अपि तु तेनैव पूर्ववत् परीत्तशुभानां सभागतायामुपपद्यते(१०)। इह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैः सुखस्य च प्रहाणात् दुःखस्य च प्रहाणात् पूर्वमेव सौमनस्यदौर्मनस्ययोरस्तंगमात्। अदुःखासुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्य[2] विहरति। स न हैव तानाकारांस्तानि लिङ्गानि विस्तरेण सर्वाणि सूत्राणि पूर्ववद्वक्तव्यानि। देवनिकायोपपत्तयस्तु विशेष्यन्ते। यावत्तयैव धर्माभिरत्या बृहत्फलानां देवानां सभागतायामुपपद्यते। न हैव पूर्ववत् पुण्यप्रसवानां देवानां सभागतायामुपपद्यते। न हैव पूर्ववदनभ्रकाणां देवानां सभागतायामुपपद्यते(१)। इह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैः सर्वशो रूपसंज्ञानां समतिक्रमात्। प्रतिघसंज्ञानामस्तंगमात्। नानात्वसंज्ञानाममनसिकारात्। अनन्तमाकाशमित्याकाशानन्त्यायतनमुपसम्पद्य विहरति। स न हैव तानाकारानिति पूर्ववत्। केवलं तु रूपगतमिति न पठितव्यम्। तत्र रूपाभावात्। यावन्निरोधो निर्वाणमिति(१)। एतदेव सूत्रमुक्त्वायं विशेषः। तस्यैवं जानत इति पूर्ववद् यावन्नापरमस्माद्भवं प्रजानामीति(२)। एतदेवोक्त्वा नो विमुच्यत अपि तु तेनैव धर्मच्छन्देन यावत्तयैव धर्माभिरत्योपपद्यपरिनिर्वायी भवति(४)। न हैवोपपद्यपरिनिर्वायी भवति। [3]तेनैव यावदनभिसंस्कारपरिनिर्वायी भवति(५)। न हैवानभिसंस्कारपरिनिर्वायी भवति[4]। सर्वमुक्त्वा यावदूर्ध्वस्रोता न भवत्यपि तु तेनैव पूर्ववत्। यावत्तयैव धर्माभिरत्या आकाशानन्त्यायतनोपगानां देवानां सभागतायामुपपद्यते(७)। इह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैः सर्वश आकाशानन्त्यायतनं समतिक्रम्यानन्तं विज्ञानमिति विज्ञानानन्त्यायतनमुपसम्पद्य विहरति। स न हैव तानाकारा-

---

1 To. omits इति.

2 C ०मुपपद्य

3 To. adds अपि तु.

4 To. adds इति.

नित्याकाशानन्त्यायतनवत् सप्तसूत्राणि वक्तव्यानि। केवलं तु विज्ञानानन्त्यायतनोपगानां देवानां सभागतायामुपपद्यत इति विशेषः[1]। पुनरपरमिह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैः सर्वशो विज्ञानानन्त्यायतनं समतिक्रम्य नास्ति किञ्चिदित्याकिञ्चन्यायतनमुपसम्पद्य[2] विरहति ' स न हैव तानाकारानिति पूर्ववत् सप्तसूत्राणि(७)। पुनरपरमिह भिक्षुर्यैरिति यावत् सर्वश आकिञ्चन्यायतनं समतिक्रम्य नैवसंज्ञानासंज्ञायतनमुपसम्पद्य विहरति।' पूर्ववत् सर्वाणि सूत्राणि वक्तव्यान्यूर्ध्वस्रोतसं त्वेकमपनीय(६)। तदेवं चतुर्भिर्ध्यानैरमृतधातुचित्तोपसंहारचित्तविमुक्त्यन्तरोपपद्यानभिसंस्कारसाभिसंस्कारपरिनिर्वाणोर्ध्वगमन--त्र्युपपत्तिस्थानोपपत्तिस्वभावाश्चतस्रः सूत्रार्थदर्शिका उक्ताः। त्रिभिस्त्वाद्यैरारूप्यैरमृतधातुचित्तोपसंहारचित्तविमुक्त्युपपद्यानभिसंस्कारसाभिसंस्कारपरिनिर्वाणोर्ध्वगमनोपपत्तिस्थानोपपत्तिस्वभावास्तिस्रः सूत्रार्थसप्तिकाः। नैवसंज्ञानासंज्ञायतनेनोर्ध्वगमनं परिहाय षट्किका चोक्ता। अतो योऽसावन्तरापरिनिर्वायी नासावायुष्प्रमाणान्तरापरिनिर्वायीति युज्यते वक्तुम्। आरूप्येष्वपि ह्यन्तरामरणसम्भवः

कुरुवर्ज्योऽन्तरामृत्युः[3]

इति वचनात्। तस्मात् आगमतोऽपि सिद्धोऽन्तराभवो न केवलं युक्तित इत्यपिशब्दः। दूषीमार इति' ककुच्छन्दस्य तथागतस्य विदुरं नाम श्रावकं दूषी नाम मारस्तदानीं शिरसि मुष्टिनाऽभिघ्नन् [4]तेनाङ्गीकृतस्तत्क्षण एव च स्वशरीरेणावीचौ महानरके प्रपतित इति' स्वशरीरेणैवेति वचनान्नास्त्यन्तराभव इत्यभिप्रायः। स हि जीवन्नेव नारकीभिर्ज्वालाभिरिति। जीवन्नेवासौ मारो नरकोत्थिताभिरग्निज्वालाभिरालिङ्गितत्वात् स्वशरीरावस्थादुःखोत्पत्तेः स्वशरीरेणैव प्रपतित इत्युक्तः' न तु कालमकृत्वा अन्तराभवावस्थां[5] नरकोपपत्तिभवावस्थां च न गतवानित्यभिप्रायः। अत्युदीर्णपरिपूर्णानीति। चेताशयविक्षेपयोगादत्युदीर्णान्युपचितत्वात् परिपूर्णानि। समनन्तरं नरकेषूपपद्यत इति। समनन्तरवचनान्नास्त्यन्तराभव इत्यभिप्रायः। अन्यां गतिमगत्वेति' उपपत्त्यन्तरप्रतिषेधपरमेतद्वाक्यम्' नान्तराभवप्रतिषेधपरमित्यभिप्रायः। पञ्चैवेति' यदि यथारुतं कल्पयते' पञ्चभिरेवानन्तर्यैः कृतैः न त्वेकेन द्वाभ्यां वा नरकगमनं

1 Mss. शेषः
2 C °मुपपद्य
3 Kārikā. III. 85.
4 Mss. तेनङ्गकृत
5 To. °स्थानं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवतीत्येतत् प्राप्नोति । पश्चेति रुतात् क्रियानन्तरं चानन्तर्यक्रियानन्तरं च नरकेषूपपन्न इति प्राप्नोति । यानि कृत्वोपचित्य समनन्तरं नरकेषूपपद्यत इति रुतान्न कालान्तरं जीवित्वा को वान्तराभवस्योपपद्यमानत्वं नेच्छतीति । विप्रकृतावस्थवचनादुपपत्त्यभिमुखो ह्युपपद्यमान इत्यभिप्रायः । न तु ब्रूम उपपन्नो भवतीति । न तूपपद्यत इत्येतत् पदमुपपन्नार्थमिति ब्रूमः । तस्माददोष एषः ।

उपनीतवया इति विस्तरः । मृत्युसमीपमुपनीतं वयोऽनेन सोऽयमुपनीतवयाः । द्विजेत्यामन्त्रणम् । कश्चिद् जीर्णो ब्राह्मण आमन्त्रितः । वासोऽपि हि नास्ति तेऽन्तरेति । इदमत्र ज्ञापकम् । अन्तराभवाभाव इत्यभिप्रायः । पाथेयं पथ्योदनं च न विद्यते तव पारलौकिकः कुशलसम्भारस्तव नास्तीत्यभिप्रायः । मनुष्येष्वन्तरावासो नास्तीति । मरणगतस्य ते सतो मनुष्येष्वन्तरावासो नास्ति । यथेह कस्यचित् प्रतिष्ठमानस्येत्यभिप्रायः । गमनाधिष्ठानादिति गमनाविरामात् । अयमत्राभिप्रायः । यथा त्वया वर्ण्यतेऽस्त्यन्तराभव इति । नायमभिप्रायो यथा मया वर्ण्यते नास्त्यन्तराभव इति । कुत एतत् । कुतो हेतोरेतद्भवति । तुल्य एष भवतोऽप्यनुयोगः । समान एष भवतोऽपि प्रश्न इत्यर्थः । यथोक्तसूत्राविरोधादिति । दूषीमारसूत्राद्यविरोधात् । न भवत्येतत् सूत्रमन्तराभवस्याभावे ज्ञापकम् । ज्ञापकं हि नामागतिका गतिरिति । यस्यागतेरन्या गतिर्नास्त्यसावगतिका गतिः । एतदुक्तं भवति । यदि यज्ज्ञापकं सूत्रं गाथा वा यस्यार्थस्य द्योतनार्थमुच्यते यदि तमेवार्थं द्योतयति नान्यदप्यर्थान्तरं तद्विरुद्धम् । तज्ज्ञापकमनन्यगतिकमिति ॥१२॥

[एकाक्षेपादसावैष्यत्पूर्वकालभवाकृतिः ।
स पुनर्मरणात् पूर्वं उपपत्तिक्षणात् परः ॥१३॥]

ऐष्यत्पूर्वकालभवाकृतिः

इति । आ एष्यदैष्यत् । ऐष्यतः पूर्वकालभवस्येवाकृतिरस्येति ऐष्यत्पूर्वकालभवाकृतिः । कस्मात् ।

एकाक्षेपात् ।

यस्मादैष्यन्ती गतिस्तत्प्रापकश्चान्तराभवस्तेनैवैकेन कर्मणाक्षिप्यते । शुनीप्रभृतीनामिति । शुनीशूकरीप्रभृतीनाम् । पञ्चगतिक इति । पञ्चगतिगामीत्यर्थः । यदि गर्भस्थोऽपि म्रियेत तस्य नारकोऽन्तराभवो मातुः कुक्षिं निर्दहेत । नारको

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि प्रदीप्तो भवति तद्रूपश्चान्तराभव इति । पूर्वकालभवेऽपीति विस्तरः । नारक-पूर्वकालभवावस्था अपि नारका न नित्यं प्रज्वलिता भवन्त्युत्सदेषु कुकूलादिषु भ्रमन्तः । किमङ्गान्तराभविकाः । अस्तु वा प्रज्वलित इति । नारकोऽन्तराभवः । कुक्षावसंश्लेषादिति । अन्तराभवानामच्छत्वादात्मभावस्यान्योन्यमसंश्लेषान्न[1] दाहः । कर्मप्रतिबन्धाच्च । तत्कर्मप्रतिबन्धान्न[2] दाह इति कृत्वा । अत एव शुनीप्रभृतीनां कुक्षेरदाहः । कोटीशतं चातुर्द्वीपकानामवभासितमिति । यतः पूर्णयून इव बोधिसत्त्वस्यान्तराभवः सलक्षणानुव्यञ्जनश्चातोऽन्तराभवस्थेन तेन मातुः कुक्षिं प्रवेष्टुमिच्छता त्रिसाहस्रमहासाहस्रो लोकधातुः स्वद्योतमिति कृत्वाऽवभासितः ।

पाण्डरं गजपोतमिति । यद्यैष्यत्पूर्वकालभवाकृतिरन्तराभवः । कस्माद्-बोधिसत्त्वस्य माता गजपोतमेवंरूपमद्राक्षीत् । निमित्तमात्रं तत् । तस्य बोधिसत्त्वस्य तिर्यग्योनेश्चिरव्यावर्तितत्वात् । यतः प्रभृति लक्षणविपाकानि कर्माण्यारभते कर्तुं कल्पशते शेषे ततः प्रभृति तस्य सर्वा दुर्गतयो व्यावृत्ताः । तद् यथा कृकी राजा दश स्वप्नानद्राक्षीत् । भविष्यतोऽर्थस्य निमित्तमात्रमिति । दश स्वप्ना विनये पठ्यन्ते । कृकिना किल राज्ञा दश स्वप्ना दृष्टाः । हस्ती वातायनेन निर्गत्य पुच्छे सक्तः । कूपस्तृषितस्य पृष्ठतोऽनुधावति । सक्तुप्रस्थेन मुक्ताप्रस्थो लभ्यते । चन्दनं काष्ठार्घेण विक्रीयते । आरामाः पुष्पफलसम्पन्नाः । सर्वैश्च पुष्पफलमदत्तादायिभिर्ह्रियते । कलभैर्गन्धहस्तिनस्त्रास्यन्ते । अशुचिम्रक्षितो मर्कटः परानुपलिम्पति । मर्कटाभिषेको वर्तते । पटकोऽष्टादशभिर्जनैराकृष्यते । महाजनकाय एकत्र कलहभण्डनविग्रहविवादेनान्योन्यविघातमापन्न इति । तेन च ते भगवते काश्यपाय तथागताय निवेदिताः । भगवता च व्याकृताः । भवि-ष्यत्यनागतेऽध्वनि शाक्यमुनिर्नाम तथागतः । तस्य श्रावका विस्तीर्णस्वजनबन्धुवर्गं प्रहाय प्रव्रजिता विहारेषु गृहसंज्ञामुत्पाद्य सङ्गं करिष्यन्ति । हस्तिनो वातायन-निर्गमनपुच्छलग्नवत् । कूपस्वप्नेन तच्छ्रावका एव ब्राह्मणगृहपतीनामभ्युपेत्य धर्मं देशयिष्यन्ति । तेषां[3] श्रोतुकामता न संस्थास्यत इत्येतद्दर्शयति । सक्तुमुक्ता-प्रस्थस्वप्नेन तच्छ्रावका एव सक्तुभिक्षाया अप्यर्थायेन्द्रियबलबोध्यङ्गादीनि प्रकाश-

---

1 Mss. संक्लेशान्न 2 Mss. °प्रतिबन्धः स

3 Mss. ते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यिष्यन्ति। चन्दनस्वप्नेन तच्छ्रावका एवाभावितकायशीलप्रज्ञास्तीर्थ्यमतानि गृहीत्वा बुद्धवचनेन समानीकरिष्यन्तीत्येतद्दर्शयति। आरामस्वप्नेन तच्छ्रावका एवावासमाश्रयं कृत्वा यत्तद् भविष्यति सङ्घस्य पुष्पं वा फलं वाऽधिकं वा तद्विक्रीय विक्रीय जीविकां कल्पयिष्यन्ति। तेन च गृहिणः प्रतिसंस्तरिष्यन्तीत्येतद्दर्शयति। कलभस्वप्नेन तच्छ्रावका एव दुःशीलाः पापधर्माणो भविष्यन्ति' ये ते भिक्षवः स्थविराः शीलवन्तः कल्याणधर्माणस्तानावासेभ्यः प्रवासयिष्यन्तीत्येतद्दर्शयति। अशुचिम्रक्षितमर्कटस्वप्नेन तच्छ्रावका एव दुःशीलाः पापधर्माणः सन्तो ये ते भिक्षवः कल्याणास्तानसद्भिर्दोषैश्चोदयिष्यन्तीत्येतद्दर्शयति। मर्कटाभिषेकस्वप्नेन तच्छ्रावका एव सामन्तिकाभिषेकं विहारेषु करिष्यन्ति' लोकेऽपि च पण्डका अधिराज्यं कारयिष्यन्तीत्येतद्दर्शयति। पटस्वप्नेन तच्छासनमेवाष्टादशधाभेदं गमिष्यति। न च विमुक्तिपटः[1] स्फाटयिष्यत[2] इत्येतद्दर्शयति। कलहस्वप्नेन तच्छ्रावका एव निकायपरिग्रहात् परस्परं विवादमापत्स्यन्त इत्येतद्दर्शयतीति। संग्रहश्लोकः'

करिकूपसक्तुचन्दनकलभारामास्तथा कपेरभिषेकः।
अशुचिकपिः पटकलहाविति दश दृष्टा नृपेण कृकिणा स्वप्नाः॥

अपत्राप्योत्सदत्वात्' अपत्राप्योत्कटत्वात्। उपपत्तिभवः प्रतिसन्धिक्षण एव। तस्मात् परेण प्रतिसन्धिक्षणादन्यो भवः पूर्वकालभवः। **रूपिषु चेत् सत्वेषूपपद्यत इति।** आरूप्यधातावन्तराभवादिदं विशेषवचनम् ॥१३॥

[सजातिशुद्धदिव्याक्षिदृश्यः कर्मर्द्धिवेगवान्।
सकलाक्षोऽप्रतिघवानिवर्त्यः स गन्धभुक् ॥१४॥]

समानजातीयैरिति' नारकोऽन्तराभवो नारकैरेवान्तराभवैर्दृश्यते। एवं यावद्देवान्तराभवः। देवान्तराभवैरेवेति। **सुविशुद्धमिति।** एकादशदिव्यचक्षुरपक्षालवर्जितम्। ते पुनरपक्षाला विचिकित्सामनसिकारो कायदौष्ठुल्यं स्त्यानमिद्धमौद्बिल्यमभ्यारभ्य[3]वीर्यमौद्बिल्यं छम्भितत्वं नानात्वसंज्ञा अभिजल्पो अभिध्यायितत्वं ज्ञेयेषु यथासूत्रम्। **अभिज्ञामयमिति।** अभिज्ञास्वभावभावनामयमित्यर्थः। उपपत्तिप्रतिलम्भिकमपि देवादीनां दिव्यमिष्यते' न तु सुविशुद्धम्।

देवान्तराभविकमिति विस्तरः। अपर आहुः। न समानजातीयैरे-

---

1 Mss. ०पटा: 2 To. खण्डयिष्यत

3 A omits; Prof. Poussin. अत्यारभ्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वान्तराभवो दृश्यते। किं तर्हि। देवान्तराभविकः सर्वान् देवान्तराभविकादीन् पश्यति। मनुष्यप्रेततिर्यङ्नारकान्तराभविकाः पूर्वं पूर्वमपास्य। कथम्। मनुष्यान्तराभविको देवान्तराभविकं पूर्वमपास्य मनुष्यप्रेततिर्यङ्नारकान्तराभविकान् पश्यति। प्रेतान्तराभविको देवमनुष्यान्तराभविकौ पूर्वावपास्य प्रेततिर्यङ्नारकान्तराभविकान् पश्यति। एवं यावन्नारकान्तराभविको देवान्तराभविकादीन् पूर्वानपास्य नारकान्तराभविकानेव पश्यति। गतीनामुत्तरोत्तरनिकृष्टत्वादिति।

अत एव गन्धर्व इति। यतो गन्धगतो गन्धर्वः। गन्धमर्वति भक्षयति गन्धर्व इत्यर्थः। धातूनामनेकार्थत्वात्। अयमर्वतिर्न[1] केवलं गत्यर्थे वर्तते। किं तर्हि भोजनार्थेऽपीति। गत्यर्थपरिग्रहेऽप्यदोषः। गन्धमर्वति गच्छति भोक्तुमिति गन्धर्व इति। ह्रस्वत्वं शकन्धुकर्कन्धुवदिति। कृदन्त इति पररूपनिपातनात्। शकन्धुकर्कन्धुरिति पररूपसिद्धिर्यथा तथेहापि गन्धर्व इति। अल्पेशाख्यः। अनुदारो हीनजातीय इत्यर्थः। ईष्ट इतीशः अल्प ईशोऽल्पेशः। अल्पेश इत्याख्या यस्य सोऽल्पेशाख्यः। विपर्ययान्महेशाख्यः।

एकनिकायसभागत्वादिति। यश्च पूर्वकालभवो यश्चान्तराभवस्तत्प्रापकः। तयोरेक एव निकायसभागः। अत एकनिकायसभागत्वात्। येनैव कर्मणायुष्येण पूर्वकालभवस्यायुराक्षिप्यते। तेनैवान्तराभवस्य। इतरथा हि। यदि तस्यान्तराभवायुषः पृथगाक्षेपः स्यात्। तस्याप्यायुषः अन्तराभविकस्य क्षयान्मरणभवः प्रसज्येत पूर्वकालभववत्। तस्मान्नास्ति नियम इति भदन्तः। ते तं गन्धं घ्रात्वा गन्धरसाभिगृद्धा इति विस्तरः। ते क्षुद्रजन्तवस्तं गन्धं घ्रात्वा तत् सहचरं चानुभूतं रसमनुस्मृत्य गन्धरसाभिगृद्धाः कालं कुर्वन्तः क्रिमि-निकाय-सभागोत्पादकं कर्म विबोध्य तया गन्धरस-तृष्णया विपाकाभिमुखं कृत्वाऽन्तराभवसन्तत्या क्रिमिषूपजायन्त इति। तत्प्रत्ययप्रचुर एव काल इति। क्रिमिप्रत्ययप्रचुरे काले तत्संवर्तनीयानि कर्माणि क्रिमिसंवर्तनीयानि विपाकाभिनिर्वृत्तौ वृत्तिं लभन्ते। विपाकदानायाभिमुखीभवन्तीत्यर्थः।

सामग्रीं प्राप्य कालं च फलन्ति खलु देहिनाम्

इति वचनात्। नान्यत्र। नातत्प्रचुरे काले। नान्यस्यामिति। नाल्पायुषि

चक्रवर्तिसमुत्पत्तिर्नाधोऽशीतिसहस्रकात्

इति वचनात्। अत एवेति। यस्माद् विद्यमानान्यपि

1 Mss. °मर्वति न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्रवर्तिसंवर्तनीयानि कर्माणि विपाकाभिनिर्वृत्तौ कदाचिदेव वृत्तिं लभन्ते ' बहुप्रत्ययापेक्षित्वात् । सम्भवैषित्वादुपपत्त्यभिलाषित्वात् । कर्माण्येव प्रत्ययानां सामग्रीमावहन्तीति । कर्माधिपत्येनाश्वादीनां प्रसिद्धं कालमतिक्रम्य कालान्तरेऽपि मैथुनं भवतीति । एककर्माक्षेपादिति । येनैव कर्मणा गवादिनिकायसभाग आक्षिप्यते' तेनैव कर्मणा तदन्तराभव आक्षिप्यत इत्यतो वक्तव्यमेतत् । यदुक्तं येनान्यत्र काले [1]गोषूपपत्तव्यं स गवयेषूपपद्यत इति विस्तरेण । न निकायभेदादेकाक्षेपकत्वं हीयते ' तत्कर्मण एकजातीयत्वात् ' गत्याकृतिसंस्थानान्तरापरित्यागाच्च । गतिनियतानां हि कर्मणामुपपत्तिवैचित्र्यं दृष्टम् । कल्माषपादादिवदिति । नास्त्येष दोष इत्याचार्यसङ्घभद्रः ॥१४॥

[विपर्यस्तमतिर्याति गतिदेशं रिरंसया ।
गन्धस्थानाभिकामोऽन्य ऊर्ध्वपादस्तु नारकः ॥१५॥]

विपर्यस्तमतिः

इति ' अनुनयसहगतेन वा प्रतिघसहगतेन वा चित्तेन यथा विपर्यस्तमतिर्भवति · तद्दर्शयन्नाह । तत्रास्य पित्रोरिति विस्तरः । मातापित्रोस्तां विप्रतिपत्तिं द्वीन्द्रियसमापत्तिलक्षणाम् । पुंसः सतः पुरुषस्यान्तराभवस्य [2]पुंसोऽयं पौंस्नो राग उत्पद्यते मातरि भार्यायामिव । स्त्रिया अयं स्त्रैणो राग उत्पद्यते पितरि भर्तरीव । विपर्ययात् प्रतिघ इति ' पुंसः सतः पौंस्नः प्रतिघ ईर्ष्योत्थानभूत उत्पद्यते पितरि प्रतिसपत्नपुरुष इव ' स्त्रियाः सत्याः स्त्रैणः प्रतिघ उत्पद्यते मातरि प्रतिसपत्नयामिव । स ताभ्यामेव विपर्यस्ताभ्यां चित्ताभ्यां विपर्यस्तो रन्तुकामतया[3] मैथुनकर्मकामतया[3] तं देशमिन्द्रियद्वयस्थानमाश्लिष्य तामवस्थां विप्रतिपत्त्यवस्थामात्मन्यधिमुच्यते ' मयैतत् कर्म क्रियत इति । तस्मिंश्चाशुचौ शुक्रशोणिते गर्भस्थानसम्प्राप्ते आमाशयपक्वाशयान्तर[4]-स्थानसम्प्राप्ते ' अभिनिविशते प्रतितिष्ठतीत्यर्थः । पृष्ठाभिमुख उत्कुटुक इति । मैथुनक्रियात्माभिमानक्रियायोगात् । आप्यायमानो वर्धमानः । [5]एतान्येवेति ' शुक्रशोणितमहाभूतानि । भूतान्तराण्येवेति ' शुक्रशोणितव्यतिरिक्तानि बीजा-

1 Mss. गोषूपपत्तव्यं, To. गोष् उपपत्तव्य:
2 To. पुं मा
3 To. & U ०कामनतया
4 To. ०न्तरा०
5 C & U न तान्येवेति

५

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ङ्कुरनिरोधोत्पादन्यायेनैकस्मिन्नेव क्षणे बीजं निरुध्यतेऽङ्कुरश्चोत्पद्यते । तुलादण्डनामोन्नामवन्नाशोत्पादयोः समकालत्वात् । यत्तत् कललमित्याख्यायत इति । कललं प्रथमं भवति कललाज्जायतेऽर्बुदमित्यादिवचनात् । एवं च कृत्वा सूत्रपदमिति । वल्मीक इति भित्तौ अस्य कायस्यैतदधिवचनम् । रूपिण औदारिकस्य चातुर्महाभूतस्य ओदनकुल्माषोपचितस्य मातापित्रशुचिकललसम्भूतस्येति विस्तरः । मातापित्रशुच्येव कललं ततः सम्भूतस्येत्यर्थः । [1]कटसिरिति । श्मशानम् । रुधिरबिन्दुरुपात्त इतीदमुदाहरणम् । अस्य कायेन्द्रियभावापत्तितः । भूतान्तराण्येव शुक्रशोणितव्यतिरिक्तानि । तद् यथा पर्णक्रिमेरिति । यथा पर्णक्रिमेः पर्णमहाभूतान्युपनिश्रित्य भूतान्तराणि कर्मभिर्जायन्ते । यानीन्द्रियस्वभावमापद्यन्ते । न पर्णमहाभूतानि । बहुत्वात्तत्क्रिमीणाम् । खण्डशः पत्रस्यादर्शनाच्च । सूत्रपदं कथं तर्हि नीयते । मातापित्रशुचिकललसम्भूतस्येति । अत आह । **अशुचिसंनिश्रयोत्पत्त्यभिसन्धिवचनात्तु कललस्य सूत्राविरोध** इति । अशुचिसंनिश्रयेणोत्पत्तिर्भूतान्तराणाम् । तत्राभिसन्धिरभिप्रायः । तेन वचनं कललस्य । तस्मान्मातापित्रशुचिकललसम्भूतस्येत्यस्य सूत्रस्याविरोधः । एतदुक्तं भवति । शुक्रशोणितसंनिश्रयेण कललाख्यानि भूतान्तराणि शुक्रशोणितसमकालान्युत्पद्यन्ते सेन्द्रियाणि । यथा पर्णसंनिश्रयेण पर्णसमानकालानि सेन्द्रियाणि क्रिमिमहाभूतान्युत्पद्यन्त इति ।

अन्यत्र तु यथायोगं वक्तव्यमित्याहुरिति । अन्यत्र संस्वेदजौपपादुकयोर्योन्योर्यथायोगं व्याख्येयमित्याहुरभिधर्माचार्याः । **तत्र चायं योगो दृश्येत** इत्याचार्यो ब्रवीति । **शैत्यश्च नरकेष्विति** । शीतनरकोपपत्तिकाले । यद्वस्थ इति । औरभ्रिकाद्यवस्थः । [2]यथाभूतेन तद्वेद्यं कृतं प्राक्कर्म तादृशान् सत्त्वान् स्वप्न इव प्रेक्ष्य नरके स धावति[2] । पूर्वाचार्याः । योगाचारा आर्यासङ्गप्रभृतयः ।

आमनादिवोत्तिष्ठन्निति । ऊर्ध्वोपपत्तिस्थानगमनात् । **मनुष्यादिवदिति** । यथा मनुष्यस्तिर्यक् प्रेतश्च गच्छति । तद्वत् । **ऋषीणामनिवक्तार** इति । अधिक्षेप्तारोऽपवदितार इत्यर्थः ॥१५॥

---

1 To. कटसी॰

2...2 This sentence is found in the Mss. misplaced at the next page, l. 12, just before कश्चित् कस्मैचित् etc.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[सम्प्रजानन् विशत्येकस्तिष्ठत्यप्यपरोऽपरः।
निष्क्रामत्यपि सर्वाणि मूढोऽन्यो नित्यमण्डजः ॥१६॥]
[गर्भावक्रान्तयस्तिस्रश्चक्रवर्तिस्वयंभुवौ।
कर्मज्ञानोभयेषां वा विशदत्वाद्यथाक्रमम् ॥१७॥]

नित्यमण्डजः

इति नित्यग्रहणात्

सर्वाणि मूढः

इत्यत्र नास्ति नियमः। भवति तु सम्प्रजानन्नपि, प्रतिलोमं निर्दिष्टा इति। सूत्रे हि यः सर्वाण्यसम्प्रजानन् करोति, एषा प्रथमा गर्भावक्रान्तिरुक्ता, तिस्रस्तु यथानिर्दिष्टानुपूर्विका एवेति। योऽपि जनिष्यते सोऽप्यण्डज इति। अण्डाज्जनिष्यते अण्डज इत्यभिप्रायः। आवश्यको ह्यभूतार्थो भूतवदुच्यते, तथा वर्तमानसामीप्ये वर्तमानवद्वा, आशंसायां भूतवच्चेति[1]। [2]कश्चित् कस्मैचिद्वक्ता भवेत् आगच्छन्तमेव [3]तथा आगतमेव मां विद्धीति। तस्माददोष एषः। अण्डाज्जातो जनिष्यते जायते चेत्यण्डजः। [4]अन्येभ्योऽपि दृश्यत इति वचनात्। तस्माददुष्टमेतदित्याचार्यसङ्घभद्रः। अथवा भाविन्यापि संज्ञयेति भविष्यन्त्यापि संज्ञया निर्देशः क्रियते। तद्यथा संस्कृतमभिसंस्करोतीति। जनितावस्थायां संस्कृतं भवति, न जन्यमानावस्थायाम्। न हि संस्कृतस्य पुनः संस्कारो युज्यते। भविष्यन्त्या तु संज्ञया तथा निर्देशः क्रियते। एवमोदनं पचतीत्यादि योज्यम्, कथं पुनरसम्प्रजानन मातुः कुक्षिं प्रविशतीति विस्तरः। सन्निकृष्टावस्था उपपत्तिदेशस्य।

विपर्यस्तमतिर्याति[5]

इति, विप्रकृष्टावस्था अभिमोक्षोऽधिमुक्तिः। तथा तिष्ठामि निर्यामीति। कथं तथा तिष्ठतोऽप्येषु तिष्ठामीति, निष्क्रामतोऽप्येभ्यो निर्यामीति। अयमनयोर्विपर्यासयोर्विशेष इति। अपरे पुनराहुः, न केवलं रागद्वेषाभ्यामेव विपर्यस्तमतिरुत्पत्तिदेशं गच्छति, किं तर्हि, अन्यथापि। कथमिति, वातो वाति देवो वर्षतीत्यादि। तथा आरामं प्रविशाम्युद्यानं चेत्यादि। सम्प्रजानंस्तु सम्यक्

---

1 Pā, III. 3. 131, 132. 2 Mss. add. यथाभूतेन तद्वेदं कृतं प्राक् कर्म तादृशान् सत्त्वान् स्वप्न इव प्रेक्ष्य नरके स धावति। We have put the sentence at the previous page, l. 22., which is evidently the proper place.

3 To. following Tib. omits तथा. 4 Pā., III. 3. 130.

5 Kārikā, III. 15.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चित्तेन प्रजानाति मातुः कुक्षिं प्रविशामीत्येवमादि। यदि सम्यक् प्रजानाति, कथं क्लिष्टेनैव प्रतिसन्धिबन्धो व्यवस्थाप्यते। मातृस्नेहादियोगात् क्लिष्टं चित्तं भवति। अपर आह, मातुः कुक्षिं प्रविशत एवं विपरीतौ संज्ञाधिमोक्षाविति। उपपन्नमात्रावस्थायामेतद् भवति वातो वाति यावद्वृक्षमूलं चोपसर्पामि, कुड्यमूलं चेति। तिष्ठतोऽप्येषु तिष्ठामीति। निष्क्रामतोऽप्येभ्यो निर्यामीत्येवमादि। तत्र प्रथमेति विस्तरः। प्रथमा चक्रवर्तिनः। येयं

सम्प्रजानन् विशत्येकः

इति, द्वितीया प्रत्येकबुद्धस्य। येयं

तिष्ठत्यपरः

इति। तृतीया बुद्धस्य। येयम्

अपरः।

[1]निष्क्रामत्यपि

इति, अत्रापि भाविन्येति, ते न चक्रवर्त्यादयस्तदानीमिति कृत्वा। त एवं त्वेते चक्रवर्त्यादय इति। पर्यायमात्रमेतदुक्तम्। अर्थस्तु स एवेत्यभिप्रायः ॥१६-१७॥

[नात्मास्ति स्कन्धमात्रं तु कर्मक्लेशाभिसंस्कृतम्।
अन्तराभवसन्तत्या कुक्षिमेति प्रदीपवत् ॥१८॥]
[यथाक्षेपं क्रमाद् वृद्धः सन्तानः क्लेशकर्मभिः।
परलोकं पुनर्यातीत्यनादिभवचक्रकम् ॥१९॥]

सङ्केतो[2] हेतुफलसम्बन्धव्यवस्था[3]।

क्लेशकर्माभिसंस्कृतम्

इति, क्लेशकर्मपरिभावितमित्यर्थः।

प्रदीपवत्

इति। सन्ततिन्यायसञ्चारि स्कन्धपञ्चकम्, क्षणिकत्वात् प्रदीपवदिति दर्शयति।

यथाक्षेपम्

इति, आक्षेपस्तावत् कालप्रबन्धः। एतच्च विशेषणमायुष्यस्यायुःसंवर्तनीयस्य कर्मणो भेदात्। व्यञ्जनान्यनुपूर्वश इति। व्यञ्जनानि चक्षुराद्यधिष्ठानानि, तैर्हि चक्षुरादीन्यभिव्यज्यन्ते। यस्मिन् वर्चःकूप इवेति। तस्मिन्[4] कायनाडीव्रणे, निन्दावचनमेतत्। नाडी व्रण इव नाडीव्रण इति। उग्रो दुर्गन्धः उग्रदुर्गन्धः।[5]अन्धकारश्चासावालोकरहितत्वात्। समलानां च पल्वलोऽसौ पल्वल इवेति कृत्वा, तस्मिन् सततप्रतिक्रिये नित्यकर्तव्यशौचे। शुक्रेण पौंस्नेन। शोणितेन स्त्रैणेन, लसीकया द्रवविशेषलक्षणया, मलेन च संक्लिन्ने समन्तात् क्लिन्ने,

1 Mss. निष्क्रामतीत्यपि

2 The words occurs in धर्मसङ्केत: (Tib. *chos barda*) in the Bhāṣpa. To• सङ्केता

3 To. ०व्यवस्था: 4 To. महा 5 To. ०दुर्गन्धि:

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विक्लिन्ने विशेषेण क्लिन्ने क्वथिते पूतौ पिच्छिले च तस्मिन हस्तौ संप्रवेश्याङ्गमङ्गं हस्तपादादिकं निकृत्य छित्त्वा [1]अभ्याहरन्ति [2]अभ्याकर्षयन्ति । तरुणं व्रणं सरुजम्' तरुणव्रणमिवात्मानमाचरंस्तरुणव्रणायमानः[3] । तरुणव्रणायमान आत्माऽस्येति तरुणव्रणायमानात्मानं बालकम् ' शस्त्रं च क्षारश्च शस्त्रक्षारम्' तदिवात्मानमाचरन् शस्त्रक्षारायमाणः' शस्त्रक्षारायमाणः संस्पर्शोऽनयोरिति शस्त्रक्षारायमाणसंस्पर्शौ पाणी' ताभ्यां परिगृह्य स्नापयन्ति' तस्य वृद्धेरन्वयादनुगमात् '

तस्याहेतुकत्वमिति' आदेरहेतुकत्वम् । सति चास्याहेतुकत्वे । तद्वदेव सर्वमहेतुकं प्रादुःस्यात । दृष्टं चाङ्कुरादिषु बीजादीनां सामर्थ्यम् । अङ्कुरनालकाण्डपत्रादिषु बीजाङ्कुरनालकाण्डादीनां सामर्थ्यमुत्पादनाय । कस्मात्' देशकालप्रतिनियमात्' देशकालयोस्तु प्रतिनियमात् । तत्र देशप्रतिनियमो बीजादिसम्बद्ध एव देश उत्पत्तेः ' कालप्रतिनियमो बीजानन्तरमुत्पत्तेः । अग्न्यादीनां वाग्निशीतोष्णाभिघातचक्षुरादीनां पाकजादिषु पाकजसुखदुःखशब्दचक्षुर्विज्ञानादिषु दृष्टं सामर्थ्यं देशकालप्रतिनियमात् । यदि हि निर्हेतुकः प्रादुर्भावः स्यात् । बीजादीनामङ्कुरादिषु अग्न्यादीनाञ्च पाकजादिषु देशकालप्रतिनियमेनोत्पत्तिं प्रति सामर्थ्यं न स्यात्' सर्वं सर्वत्र सर्वदोत्पद्येत । न चैवं दृष्टमित्यतो नास्ति निर्हेतुकः प्रादुर्भावः । नित्यकारणास्तित्ववादः प्रागेव पर्युदस्तः

नेश्वरादेः क्रमादिभिः[4]

इति वचनात् ॥१८-१९॥

[स प्रतीत्यसमुत्पादो द्वादशाङ्गस्त्रिकाण्डकः ।
पूर्वापरान्तयोर्द्वे द्वे मध्येऽष्टौ परिपूरिणः ॥२०॥]

शेषाण्यष्टौ मध्य इति' विज्ञाननामरूपषडायतनस्पर्शवेदनातृष्णोपादानभवाङ्गानि । नापि रूपारूप्यावचर इति' रूपावचरस्य विज्ञानाङ्गकाल एव नामरूपषडायतनाङ्गयोः सद्भावात् । न मध्येऽष्टावङ्गानि' आरूप्यावचरस्य च नामरूपषडायतनाङ्गयोरभावात् । महानिदानपर्यायसूत्रे विज्ञानं चेदानन्द मातुः कुक्षिं नावक्रामेदपि तु[5] तन्नामरूपं कललत्वायाभिसंमूर्च्छेत[6]' नो भदन्तेत्यादि तत् सूत्रं पठ्यते मातुः कुक्ष्यवक्रमणं हि कामधातावेवेति । सफलहेतुकयोः

---

1 To. प्रत्याहरन्ति 2 To. प्रत्याकर्षयन्ति 3 To. ०मानः 4 Kārikā, II 65
5 A & V नु 6 Cf. Pali (Dīgha. p. 63) : समुच्छिस्सथ.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्वापरान्तयोः

ग्रहणादिति। यथाक्रममेतत्। पूर्वान्तस्य सफलस्य ग्रहणादपरान्तस्य च सहेतुकस्य ग्रहणादिति। तत्र पूर्वान्ते हेतुरविद्या संस्काराश्च तस्य फलं पञ्चाङ्गानि। विज्ञानं यावद्वेदनेति। अपरान्ते जातिर्जरामरणं चेति फलम्। तस्य त्रीण्यङ्गानि हेतवस्तृष्णोपादानभवाः। तदेवं सप्ताङ्गानि पौर्वान्तिकः पञ्चाङ्गान्यपरान्तिक इति व्याख्यातं भवति ॥२०॥

[पूर्वक्लेशदशाविद्या संस्काराः पूर्वकर्मणः।
सन्धिस्कन्धास्तु विज्ञानं नामरूपमतः परम् ॥२१॥]

अथ क इमेऽविद्यादय इति। किमविद्यैव केवला उताहो सर्वे क्लेशाः आहोस्वित् क्लेशावस्थेति सन्देहे पृच्छति। साहचर्यादिति। यस्मादविद्यासहचारिणः क्लेशाः। तद्वशेन तेषां समुदाचाराच्च। यस्माच्चाविद्यावशेन तेषां क्लेशानां समुदाचारः स पुनस्तदनुवृत्तिः। मूढस्य हि क्लेशसमुदाचारो नामूढस्य। राजागमनवचन इति विस्तरः। यथा राजागच्छतीत्युक्ते तदनुयातृकाणां भृत्यानामागमनसिद्धिः। साहचर्यात् तद्वशेन तेषां समुदाचारात्। तद्वदेतत्। तदेवमविद्यावशादविद्याङ्गः क्लेशदशेत्यर्थः। तस्मादुक्तं

पूर्वक्लेशदशाविद्या

इति। न तूक्तं पूर्वाविद्यादशाविद्येति। पुण्यादिकर्मावस्थेति। पुण्यापुण्यकर्मावस्थेत्यर्थः ॥२१॥

[प्राक् षडायतनोत्पादात्तत् पूर्वं त्रिकसङ्गमात्।
स्पर्शः प्राक् सुखदुःखादिकारणज्ञानशक्तितः ॥२२॥]

प्राक् चतुरायतनोत्पादादिति वक्तव्य इति। मनःकायायतनयोरुपपत्तिभव एवोत्पादात्। तदा तद्व्यवस्थापनादिति। [1]चक्षुराद्यायतनोत्पत्तिकाले कायमनआयतनयोर्व्यवस्थापनादित्यर्थः।

ततपूर्वं त्रिकसङ्गमात्

इति। तत् षडायतनाङ्ग[2] प्राक् त्रिकसङ्गमात्। प्रागिन्द्रियविषयविज्ञानत्रिकसन्निपातादित्यर्थः।

---

1 U. चक्षुराय०

2 Mss. omit anusvāra.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्पर्शः प्राक्

इति । षडिन्द्रियविषयविज्ञानसन्निपातः स्पर्शो जातावस्थायां व्यवस्थाप्यते । परिपूर्णषडायतनसन्निपातसद्भावात् । आ' कुतः[1] । प्राक्[2]सुखदुःखादुःखासुख-[2] वेदनाकारणेषु

ज्ञानशक्तितः ।

स बालो यावत् सुखाया वेदनाया एतत् कारणं [3]दुःखाया एतत् कारणम्[3] अदुःखासुखायाश्चैतत् कारणमिति परिच्छेदे न शक्तो भवति सावस्था स्पर्श इत्युच्यते । तथा हि बालकोऽग्निमपि स्पृशेद् दुःखस्यैतत् कारणमित्यपरिच्छिन्दन् ॥२२॥

[वित्तिः प्राङ्मैथुनात्तृष्णा भोगमैथुनरागिणः ।
उपादानं तु भोगानां प्राप्तये परिधावतः ॥२३॥]

परिच्छेदे सामर्थ्ये सति

वित्तिः

वेदनेत्यर्थः । आ' कुतः

प्राङ्मैथुनात्

यावन्मैथुनरागो न समुदाचरति । सावस्था वेदनेत्युच्यते । वेदनाप्रकर्षिणी हि सावस्था वेदेना कारणवेदनात्[4] ।

तृष्णा भोगमैथुनरागिणः[5]

इति । भोगेपु रूपादिकामगुणलक्षणेषु मैथुने च लोकप्रतीते रागिणः पुद्गलस्य तद्रागसमुदाचारावस्था तृष्णेत्युच्यते । पर्येष्टिमापन्न इति । एष इत्येतस्य धातोरेतद्रूपम् । उपादीयते विषय आत्मभावोऽनेनेत्युपादानम् । चतुर्विधः क्लेशः सावस्थोपादानमित्युच्यते ॥२३॥

[स भविष्यद्भवफलं कुरुते कर्म तद्भवः ।
प्रतिसन्धिः पुनर्जातिर्जरामरणमा विदः ॥२४॥]

स भविष्यद्भवफलम्

इति । स परिधावतो निर्देशः । भविष्यद्भवः फलमस्येति भविष्यद्भवफलं

---

1 C. in the margin suggests हुत. 2...2 A सुखदुःखासुखं

3...3 Omited in A. 4 C adds आ कुतः । प्राङ् मैथुनात्.

5 C ०भोगमैथुनकर्तृरागिणः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्म

पौनर्भविकमित्यर्थः ।

तद्भवः

इति । भवत्यनेनेति भवः कर्मपर्यायः ।

जरामरणमा विदः

इति आ विद आ वेदनाङ्गात् । जरामरणं नामरूपादिचतुरङ्गस्वभावम् । विनेयजनोद्वेजनार्थं भगवता जरामरणशब्देन चत्वार्यङ्गान्युक्तानि । यो भिक्षवो रूपस्योत्पादः स जरामरणस्योत्पादः । एवं यावद् विज्ञानस्येति ॥२४॥

क्षणिकः । क्षणे भवः क्षणोऽस्यास्तीति वा क्षणिकः । प्रकर्षेण दीव्यति चरति वा **प्राकर्षिकः** । प्रबन्धयुक्त इत्यर्थः । एवं **साम्बन्धिकः** हेतुफलसम्बन्धयुक्त इत्यर्थः । एवम **आवस्थिकः** द्वादशपञ्चस्कन्धिका अवस्था इत्यर्थः । **विज्ञानसहभुव** इति विस्तरः । **रूपमत्र** [1]सहभूर्विज्ञप्त्यविज्ञप्त्यादि । [2]संज्ञादिस्कन्धत्रयं **नाम** । **नामरूपव्यवस्थितानीन्द्रियाणि** तत्प्रतिबद्धवृत्तित्वादिन्द्रियाणाम् । आश्रयत्वेन वा तानि नाम्नि व्यवस्थितानीति । **षडायतनाभिनिपातः स्पर्श** इति । चक्षुरादीनां स्वस्मिन् विषये प्रवृत्तिरभिनिपातः । स तु सम्भवतः । यस्य तदानीमभिनिपातः सम्भवति स तस्य स्पर्श इति वेदितव्यः । **तत्सम्प्रयुक्तानि पर्यवस्थानान्युपादानम्** । तया तृष्णया सम्प्रयुक्तान्याह्रीक्यानपत्राप्यादीनि[3] पर्यवस्थानानि तदुपादानम् । तत्समुत्थमिति । तृष्णासमुत्थम् । चेतनासमुत्थमित्यपरे । उन्मज्जनमुत्पादः **परिपाको जरेति** । फलाक्षेपसामर्थ्योपघातः । पूर्वक्षणापेक्षया वा । **भङ्गो मरणमिति** । तत्क्षणविनाशः । भङ्गाभिमुख्यं भङ्ग इत्यपरे । **क्षणिकः साम्बन्धिकश्च यथाप्रकरणेष्विति** । कथं प्रकरणेषु प्रतीत्यसमुत्पादः कतमः । **सर्वे संस्कृता धर्मा इति** । तत्र संस्कृतानां धर्माणां प्रतिक्षणं विनाशयोगात् क्षणिकः प्रतीत्यसमुत्पादः । हेतुफलभूतोभयक्षणसम्बन्धात् साम्बन्धिकः । **निरन्तरजन्मत्रयसम्बद्धा इति** । **द्वादशपञ्चस्कन्धिका अवस्था** अतीतानागतप्रत्युत्पन्नजन्मसम्बद्धाः । **आवस्थिकः** प्रतीत्यसमुत्पादः । निरन्तरग्रहणं त्रिकाण्डप्रसिद्ध्यर्थम् । **स एव प्राकर्षिक इति** । स एवावस्थिकः प्रकर्षयोगात् प्राकर्षिकः अनेकक्षणिकत्वादनेकजन्मिकत्वाद्वा ।

---

1 To. सहभूविज्ञप्त्या॰ 2 Mss. वेदनादि॰

3 A ॰ह्रीरपत्राप्यादीनि, U ॰ह्रीस्थानवपत्रा॰, V ॰ह्रीष्ठानप॰

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

**[आवस्थिकः क्लिष्टोऽयं प्राधान्यात्त्वङ्गकीर्तनम् ।
पूर्वापरान्तमध्येषु सम्मोहविनिवृत्तये ॥२५॥]**

आभिप्रायिक इति। अभिप्राये भव आभिप्रायिकः। विनेयाभिप्रायवशात्तथा देशित इत्यर्थः। **लाक्षणिकोऽ**भिधर्मे लक्षणप्रधानत्वात्। प्रकरणेषु हि सर्वसंस्कृतग्रहणात् सत्त्वासत्त्वाख्यः प्रतीत्यसमुत्पाद उक्तः। सर्वसंस्कृतहेतुत्वयोगात्। विनेयसम्मोहविनिवृत्तिहेतुः सत्त्वाख्य एव द्वादशाङ्गः प्रतीत्यसमुत्पादो देशितः। अत आह

पूर्वापरान्तमध्येषु सम्मोहविनिवृत्तये

इति। **अत एव च त्रिकाण्ड** इति। काण्ड इति भागः। **को न्वहमभूवमिति**। देवो मनुष्य इति वा। **कथं न्वहमभूवमिति**। केन प्रकारेण कया युक्त्येत्यर्थः। **किं नु भविष्याम्यनागतेऽध्वनीति** विस्तरः। किं नु भविष्याम्यनागतेऽध्वनि। **आहोस्विन्न भविष्यामि** [1]को नु भविष्यामि[1]कथं नु भविष्यामीति। केन प्रकारेण कया युक्त्येत्यर्थः। **किं स्विदिदमिति**। आत्मभावद्रव्यमन्वेषते। **कथं स्विदिदमिति**। केन प्रकारेण कया युक्त्येति। तदेवात्मभावद्रव्यं नावधारयति। **के सन्त** इति। के वयमिदानीं विद्यमानाः। **के भविष्याम** इति। एवं नावधारयति। **सूत्रे यथाक्रममिति**। **अविद्या संस्काराश्च** पूर्वान्तसम्मोहव्यावर्तनार्थम्। **जातिर्जरामरणं** चापरान्तसम्मोहव्यावर्तनार्थम्। विज्ञानं यावद्भवश्च मध्यसम्मोहव्यावर्तनार्थमिति। **तथाहि सूत्र एवोक्तमिति** विस्तरः। सूत्रेऽप्येवमेवं दर्शितमिति। सूत्रेण स्वव्याख्यानं समर्थयति। **स न पूर्वान्तं प्रतिसरति। किं न्वहमभूवमतीतेऽध्वनीति विस्तरः**। स न पूर्वान्तं प्रतिधावति। किं न्वहमभूवमतीतेऽध्वनीति प्रतीत्यसमुत्पादयथाभूतदर्शनेन नैवमतीतेऽध्वनि संमुह्यत[2] इत्यर्थः। विस्तरशब्देन स नापरान्तं प्रतिसरति। किं नु भविष्याम्यनागतेऽध्वनीति विस्तरः। तथा न स मध्यान्तं प्रतिसरति। किं स्विदिदमिति विस्तरः।

तृष्णोपादानभवा अपीति। सर्वे तृष्णोपादानभवा **अपरान्तसम्मोहव्यावर्तनार्थं** न मध्यसम्मोहव्यावर्तनार्थम्। यथा पूर्वमुपदिष्टं विज्ञानं यावद्भवश्चेति। का पुनरत्र युक्तिरित्याह। **तस्यैव ह्येते हेतव** इति। यस्मादपरान्तस्यैवैते हेतव इति ॥२५॥

1...1 V drops it.

2 V समयुह्यत

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[क्लेशास्त्रीणि द्वयं कर्म सप्त वस्तु फलं तथा ।
फलहेत्वभिसंक्षेपो द्वयोर्मध्यानुमानतः ॥२६॥]

क्लेशकर्माश्रयत्वादिति' विज्ञानादीनि सप्ताङ्गानि वस्तून्यधिष्ठानानि क्लेशकर्मणामित्यर्थः ।

फलं तथा

इति' सप्तैवाङ्गानि विज्ञाननामरूपषडायतनस्पर्शवेदनाङ्गान्यविद्यासंस्काराणां फलानि । जातिर्जरामरणं च तृष्णोपादानभवानां फलानि । पञ्चहेतुभूतानीति । अविद्यासंस्कारतृष्णोपादानभवाः । कर्मक्लेशस्वभावत्वादिति' अविद्यातृष्णोपादानानि क्लेशस्वभावानि' संस्कारा भवाश्च कर्मस्वभावाः ।

वस्तुनः पञ्चधा भेदादिति । विज्ञाननामरूपषडायतनस्पर्शवेदना इति' क्लेशस्य च द्विधेति । तृष्णोपादानमिति । अनागतेऽध्वनि फलं संक्षिप्तं द्विधा भेदादिति । जातिर्जरामरणमिति । अतीतेऽध्वनि हेतुः संक्षिप्त एकमुखक्लेशोपदेशात्' अविद्यामुखक्लेशोपदेशादित्यर्थः । न पुनरनागतेऽध्वनि फलमेवं पञ्चधा विशालितम्' अतीते चाध्वनि नैवं द्विधा हेतुर्विशालित इति ॥२६॥

[क्लेशात् क्लेशः क्रिया चैव ततो वस्तु ततः पुनः ।
वस्तु क्लेशाश्च जायन्ते भवाङ्गानामयं नयः ॥२७॥]

यस्मादुपदर्शितोऽत्र भगवतेति ' कः

क्लेशात् क्लेशः

इत्येवमादिकः ।

भवाङ्गानामयं नयः

ततो वस्तु

इति ' ततः क्रियायाः

ततः पुनः

वस्तु

इति ' ततो वस्तुनः वस्तु ।

क्लेशाश्च जायन्ते

इति' वस्तुन इत्यधिकृतं जायन्त इत्यत्रेतिकरणोऽध्याहार्यः' वस्तुनः क्लेशाद्वेति ज्ञापितमिति । इति क्लेशो वस्तुन उत्पद्यमानो दृष्टो वेदनायास्तृष्णेति । क्लेशादपि तथा[1] दृष्टस्तृष्णाया उपादानमिति । अविद्या च पूर्वान्त[2]-सर्वक्लेशस्वभावाख्याता ।

---

1 To. supplies from Tib. क्लेशः which is evidently understood here.

2 V. पूर्वोत्पन्नसर्व०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद् यद्युपादानं तृष्णायास्तुदुत्पद्यत इति गम्यते। अथ तृष्णा तद्वस्तुन उत्पद्यत इति गम्यते। तस्मादविद्या क्लेशस्वभावा सती वस्तुनः क्लेशाद्वेति ज्ञापितं भवति। जरामरणं चतुरङ्गस्वभावं वस्त्विति व्याख्यातम्। वस्तुनश्चेह क्लेश उत्पद्यमानो दृष्टो वेदनाप्रत्यया तृष्णेति। **तस्मात् ततः क्लेशो भावी** भविष्यतीति ज्ञापितं भवति। **नात्र पुनः किञ्चिदुपसंख्येयमेवं** ज्ञापितत्वात्। कथं पुनरेवं नयो दर्शित इति गम्यत इत्याह। **एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवतीति वचनात्। अन्यथा हि किमस्य सामर्थ्यं स्यादिति।** यद्ययं यथोक्तो नयो न स्यात्।

क्लेशात् क्लेशः क्रिया चैव ततो वस्तु ततः पुनः।
वस्तु क्लेशाश्च जायन्ते

इत्येतावदेव ब्रूयात्। अविद्याप्रत्ययाः संस्कारा यावज्जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः सम्भवन्तीति। इदं न ब्रूयात्। एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवतीति। समुदय उत्पाद इत्यनर्थान्तरम्। तस्माद्यथोक्तप्रकाराभिद्योतकमस्य सामर्थ्यमिति गम्यते। **अयोनिशोमनस्कारहेतुकाऽविद्योक्ता सूत्रान्तर** इति। सहेतुसप्रत्ययसनिदानसूत्रे। कथमविद्या भिक्षवः सहेतुका सप्रत्यया सनिदाना। कश्च भिक्षवोऽविद्याया हेतुः कः प्रत्ययः किं निदानम्। अविद्याया भिक्षवोऽयोनिशोमनस्कारो हेतुरयोनिशोमनस्कारः प्रत्ययोऽयोनिशोमनस्कारो निदानमिति सूत्रे वचनात्। **अविद्याहेतुकश्चायोनिशोमनस्कार** इति। सूत्रान्तर उक्त इत्यधिकृतम्। चक्षुः प्रतीत्य रूपाणि चोत्पद्यते। आविलो मनस्कारो मोहज इति सूत्रे वचनात्। किमर्थं तस्येहावचनम्। कथं [1]च नाङ्गान्तरं[1] भवतीत्यत आह। **स चेहाप्युपादानान्तर्भूतत्वादुक्तो भवतीति**। स इत्याविलो मनस्कारः। इहेति प्रतीत्यसमुत्पादसूत्रे। कथमुक्त उपादानान्तर्भूतत्वात्। तथाह्युपादानं भोगानां प्राप्तये क्लेशसमुदाचारावस्थाः। तत्र चायोनिशोमनस्कारो विपरीतचेतस आभागोऽन्तर्भूत इत्युक्तो भवत्यतो नास्त्यहेतुकत्वमविद्यायाः। न चाङ्गान्तरमुपसंख्यातव्यं द्वादशभ्योऽविद्यादिभ्यः। न चानवस्थाप्रसङ्गोऽविद्याहेतुकत्वादयोनिशोमनस्कारस्येति। **अपर इति**। स्थविरो वसुबन्धोराचार्यो[2] मनोरथोपाध्याय एव-

1...1 Mss. वचनाङ्गान्तरं but with a cross on व ; To. न भवाङ्गान्तरं।

2 Mss. and To. वसुबन्धुराचार्य ; Ywan Chwang took Manoratha to be a teacher of Vasubandhu. Yaśomitra evidently believes in the same tradition and takes the word *apara* occurring in the Bhāṣya to refer to Manoratha. Cf. Kārikā, III, 59 : अपर इति स्थविर मनोरथः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

माह । आचार्य आह ' **कथमिति** विस्तरः । **कथमयोनिशोमनस्कारस्योपादानेऽन्तर्भावः** । न ह्ययोनिशोमनस्कार उपादानस्वभावः' **यदि संप्रयोगतः** । यद्ययोनिशोमनस्कार उपादानेन संप्रयुज्यते इत्यतो [1]भगवतोऽस्योपादानेऽन्तर्भाव इष्यते । **तृष्णाविद्ययोरपि** प्रतीत्यसमुत्पादाङ्गयोस्तस्यायोनिशोमनस्कारस्यान्तर्भावः **प्राप्नोति** । तृष्णाविद्याभ्यामपि **ह्यसौ सम्प्रयुज्यत** इति । ततश्चैवं वक्तव्यं स्यात्'स चेहाप्यविद्यातृष्णोपादानान्तर्भूतत्वादुक्तो भवतीति । नत्वेवं वक्तव्यम्'स चेहाप्युपादानान्तर्भूतत्वादुक्तो भवतीति । नैवमुपादानान्तर्भावावधारणं कर्तव्यमित्यभिप्रायः । **सत्यपि चान्तर्भाव** इति । असम्भवन्तमप्यन्तर्भावमभ्युपेत्य ब्रूमः । **कथमयोनिशोमनस्कारो हेतुरविद्याया** [2]इति विज्ञापितं भवति[2] । न हि तथा सूत्रे वचनमस्ति । **यदि ह्यन्तर्भावेनेति** विस्तरः । यदि यस्मादुपादानेऽन्तर्भवत्ययोनिशोमनस्कारः तस्मादयोनिशोमनस्कारो हेतुरविद्याया इति विज्ञापितं भवति । न च तदङ्गान्तरं वक्तव्यम्'उपादानवचनादेव तत्सिद्धेः । **तृष्णाविद्ये अपि** तर्ह्युपादानेऽन्तर्भवतः । **अतस्तयोरपि तत्रान्तर्भावादङ्गान्तरत्वं शक्यमकर्तुम्'** उपादानवचनादेव तत्सिद्धेः । उक्ते च पृथक् तृष्णाविद्याङ्गे'तस्मादपरिहार एषः ।

अन्यः पुनराहेति' भदन्तश्रीलाभः[3] । **अयोनिशोमनस्कारो हेतुरविद्याया उक्तः सूत्रान्तर** इति । सहेतुसप्रत्ययसनिदानसूत्रे । अविद्यापि भिक्षवः सहेतुका सप्रत्यया सनिदानेति विस्तरेण । **स चापीति** विस्तरः । **स चाप्ययोनिशोमनस्कारः स्पर्शकाले निर्दिष्टः** । कथमित्याह' **चक्षुः प्रतीत्य रूपाणि चोत्पद्यते आविलो मनस्कारो मोहज** इति । स्पर्शकालो योऽयं चक्षुर्विज्ञानोत्पत्तिकालः । आविलो मनस्कारः' अयोनिशःप्रवृत्तत्वान्मोहजत्वाद्वा । मोहाज्जातो मोहज इति । **अविद्यासंस्पर्शजं वेदितमिति** । अविद्यासम्प्रयुक्तात् [4]संस्पर्शाज्जातमविद्यासंस्पर्शजं वेदितम्'यत्र वेदितमविद्यासंस्पर्शजम्[5] 'अवश्यं तत्राविद्या सम्प्रयुज्यते । न हि वेदितमसम्प्रयुक्तमविद्यया तृष्णाहेतुर्भवतीति । **तदेवं स्पर्शकाले भवन्नयोनिशोमनस्कारो वेदनासहवर्तिन्या अविद्यायाः प्रत्ययभावेन सिद्ध** इति । ज्ञापितमिदं भवत्ययोनिशोमनस्कारहेतुकाऽविद्येति । **अतो नास्त्यहेतुकत्वमविद्यायाः** । अयोनिशोमनस्कारहेतुकत्वात् । **न चाङ्गान्तरमुपसंख्येयं द्वादशभ्योऽन्यत्**' यस्मात् स्पर्शकाले भवन्नयोनिशोमनस्कारो वेदनासहवर्तिन्या अविद्यायाः प्रत्ययभावेन सिद्ध इति ।

---

1 To. भवता
2...2 V उक्त इति
3 To. ०श्रीलातः throughout
4 Mss. संस्पर्शजाज्ज्ञा०, To. स्पर्शाज्जा०
5 Mss. संस्पशम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न चाप्यनवस्थाप्रसङ्गः। तस्याप्ययोनिशोमनस्कारस्य पुनर्मोहजवचनात्। आविलो मनस्कारो मोहज इति। तदेतच्चक्रकमुक्तं भवति। अयोनिशोमनस्कारादविद्या। अविद्यायाश्चायोनिशोमनस्कार इति।

एवं पुनः परिहारमाचार्यः सदोषं पश्यंस्तस्य दाषस्याभिव्यक्त्यर्थं प्रसङ्गमारभते। **तत्तर्हीति** विस्तरः। तद्यथोक्तमयोनिशोमनस्कारो हेतुरविद्याया इति विस्तरेण सूत्रतो युक्त्या वा। तर्हीत्यर्थान्तरविवक्षायाम्। इदानीमर्थ इति भगवद्विशेषः। **एतदन्यत्र सूत्र उक्तमिह पुनः** प्रतीत्यसमुत्पादसूत्रे **वक्तव्यम्। न वक्तव्यमिति** भदन्तश्रीलाभः। **कया युक्त्येति** पृष्टो भदन्तश्रीलाभ आह। **न हीति** विस्तरः। **अर्हतामस्ति वेदना।** न च सा तृष्णायाः प्रत्ययीभवतीति साविद्यैव वेदना तृष्णाप्रत्यय इति गम्यते। **न चाविपरीतस्पर्शः क्लिष्टाया वेदनायाः प्रत्ययीभवती**ति प्रकृतम्। **न च पुनर्निरविद्यस्यार्हतो विपरीतः स्पर्श** इति। स्पर्शोऽपि साविद्य एवेति गम्यते यो वेदनायाः प्रत्यय उक्तः प्रतीत्यसमुत्पादसूत्रे। अविद्या चास्य स्पर्शस्य हेतुरिति गम्यते। इत्यनया युक्त्या प्रतीत्यसमुत्पादसूत्रे साविद्यस्पर्शप्रत्यया वेदना साविद्यवेदनाप्रत्यया च तृष्णेति गम्यते **अतो युक्त्या** यथोक्तया। स चापि स्पर्शकाले निर्दिष्ट इति विस्तरेणात्र प्रतीत्यसमुत्पादे सिद्धं भवत्ययोनिशोमनस्कारो हेतुरविद्याया इति। अत्र चोद्यते। यदि तर्हि निरविद्या वेदना तृष्णायाः प्रत्ययो न भवतीत्यादिवचनेन स्वगतयैव युक्त्या अयोनिशोमनस्कारो हेतुरविद्याया अविद्या चायोनिशोमनस्कारस्य हेतुरिति गम्यते। किं सूत्रान्तरापाश्रयेणाविद्यायोनिशोमनस्कारयोरन्योन्यहेतुकत्वप्रदर्शनेन प्रयोजनमिति। अत्रोच्यते। सत्यमस्त्येतत्। किन्तु युक्तिमात्रमिदं प्रतीत्यसमुत्पादसूत्रे। न कण्ठोक्तिः। अतः सूत्रान्तरे कण्ठोक्त्येयं युक्तिर्व्यवस्थाप्यत इति तत् सूत्रान्तरोपन्यासप्रयोजनमवगन्तव्यम्। **अतिप्रसङ्ग एवं प्राप्नोतीति** शास्त्रकारः। कथमतिप्रसङ्ग इत्याह। अविद्यास्पर्शजं वेदितम् प्रतीत्योत्पन्ना तृष्णेति सूत्रान्तरे निर्दिष्टम्। न च निरविद्यवेदितस्यार्हतो वेदना तृष्णायाः प्रत्ययो भवति। न चाविपरीतः स्पर्शः क्लिष्टाया वेदनायाः। न च निरविद्यस्यार्हतो विपरीतः स्पर्श इत्यनया युक्त्या एतदप्यङ्गद्वयं स्पर्शवेदनाख्यमिह प्रतीत्यसमुत्पादसूत्रेऽनुच्यमानमप्यन्यत्रोपदिष्टत्वाद्गम्यते इत्येतस्याप्यङ्गद्वयस्यावचनं प्राप्तम्। तथा सूत्रान्तर उपदिष्टम्। स पुण्यांश्चेत् संस्कारानभिसंस्करोति पुण्योपगमस्य विज्ञानं भवति। एवमपुण्योपगमानिञ्ज्योपगं च। न च निरविद्यसंस्कारस्यार्हतः पुण्योपगं विज्ञानं यावदानिञ्ज्योपगं विज्ञानमिति। एतदपि संस्काराङ्गं युक्त्या सिद्धम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न वक्तव्यमत्रेति प्राप्तम्' तथा जातिमन्तरेण जरामरणं न भवतीति युक्त्या गम्यत इति । जात्यङ्गं न वक्तव्यं स्यादित्यादिप्रसङ्गः प्राप्नोति ।

अचोद्यमेव त्वेतदिति विस्तरेणाचार्यः स्वमतमाह' **कथं परलोकादिहलोक** इति विस्तरः । तत्राविद्यासंस्काराभ्यामिहलोकः संबध्यते ' स चेहलोको विज्ञाननामरूपषडायतनस्पर्शवेदनाङ्गानि । तृष्णोपादानभवैः परलोकः संबध्यते' स च परलोको जातिर्जरामरणं च । **इत्येतावतोऽर्थस्यात्र** प्रतीत्यसमुत्पादसूत्रे विनेयेभ्यो **विवक्षितत्वात्** । **एतस्य चार्थस्य पूर्वमेवोक्तत्वात्** ।

[1]पूर्वापरान्तमध्येषु सम्मोहविनिवृत्तये[2]

इत्यनेन उक्तत्वात् । अचोद्यमेव त्वेतत् विस्तरेण यावत् न ह्यपरिपूर्णो निर्देश इत्यभिसम्बन्धः । **उभयं हि सर्वे संस्कृता धर्मा** इति । त्रैयध्विकाः सर्वे संस्कृता धर्माः प्रतीत्यसमुत्पादः । अत एव च प्रतीत्यसमुत्पन्ना इति न कश्चिद्विशेषः । **कथं तावदकृता** इति'भाविन्या संज्ञया यथानागताः संस्कृता उच्यन्ते'तथा प्रतीत्यसमुत्पन्ना इत्यभिप्रायः । **आभिसंस्कारिकया चेतनयेति** । सर्वचेतनानां स्वलक्षणमभिद्योतयन्नाभिसंस्कारिकयेत्याह । सा हि विपाकाभिसंस्करणादाभिसंस्कारिका तया **चेतितत्वात्** प्रणिहितत्वात् । देवो भविष्यामि मनुष्यो भविष्यामीत्येवमादि । अतोऽनागताः **संस्कृता उच्यन्ते** । न तु भाविन्या संज्ञयेति तमभिप्रायं विहन्ति । **अनास्रवाः कथमिति** 'ये सास्रवा अनागता एवं चेतयितुं युज्यन्ते । ये त्वनास्रवा अनागतास्ते कथं चेतयितुं युज्यन्ते । चोदक आह'**तेऽपि चेतिताः कुशलया चेतनया** ' **प्राप्तिं प्रति** अनास्रवा धर्माः प्राप्येरन्निति । **निर्वाणेऽपि प्रसङ्ग इति**' निर्वाणमपि संस्कृतत्वं प्रसज्यते । प्राप्तिं प्रति चेतितत्वान्निर्वाणं प्राप्येतेति । तदेवमनेनार्थेनानागतानां संस्कृतत्वव्यवस्थापने दोष इति विध्यन्तरमुपन्यस्यते । **तज्जातीयत्वात्त्विति**[3] विस्तरः । **यथा न च तावद्रूप्यते** यदनागतं रूपं रूप्यमाणरूपजातीयत्वाद्रूपमित्यतिदेशः । तथा प्रतीत्यसमुत्पन्नधर्मजातीयत्वा**दनागता** अपि धर्माः प्रतीत्यसमुत्पन्ना इत्यतिदेश एषामनागतानां भवतीति ॥२७॥

[हेतुरत्र समुत्पादः समुत्पन्नं फलं मतम् ।
विद्याविपक्षो धर्मोऽन्योऽविद्यामित्रानृतादिवत् ॥२८॥]

हेतुफलभावादिति 'यस्मात्तदेवाङ्गं हेतुस्तदेव फलम् । **न चैवं सत्यव्यवस्थानं भवतीति** । पारापारवत् । **हेतुफलवदिति** । नाव्यवस्थितः प्रतीत्यसमुत्पादः प्रतीत्य-

---

1 Kārikā, III, 25   2 To. ०विनिवर्तये   3 To. ०त्वादिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समुत्पन्नो[1] **भिन्नापेक्षत्वात् । हेतुफलवत् पितृपुत्रवद्वा ।** तत्र हेतुफलम् ' तद् यथा बीजाङ्कुरादि ' यथा यदपेक्ष्य हेतुर्व्यवस्थाप्यते न तदपेक्ष्य फलं यदपेक्ष्य फलं व्यवस्थाप्यते न तदपेक्ष्य हेतुः । किं तर्हि ' फलमपेक्ष्य हेतुर्व्यवस्थाप्यते ' हेतुञ्चापेक्ष्य फलमिति । यथा च यमपेक्ष्य पिता न तमपेक्ष्य पुत्रः । यमपेक्ष्य पुत्रो न तमपेक्ष्य पिता । किं तर्हि ' तत्पुत्रमपेक्ष्य पितेति ' पितरं चापेक्ष्य पुत्र इति । न च तदव्यवस्थितम् ' तद्वदेतत् ।

क्लिष्टेत्यसंभावनायाम् । प्रथमा कोटिरनागता धर्मा इति । अन्यधर्महेतुत्वात् प्रतीत्यसमुत्पादः समुत्पद्यतेऽस्मादिति कृत्वा । न प्रतीत्यसमुत्पन्ना अनुत्पन्नत्वात् । **द्वितीयार्हतश्चरमा** इति ' उत्पन्नत्वात्ततः फलानुत्पत्तेश्च । **तृतीया तदन्य** इति । अर्हतश्चरमेभ्योऽन्येऽतीतप्रत्युत्पन्ना **धर्माः । चतुर्थ्यसंस्कृता** इति । तत्फलाभावादनुत्पत्तिमत्त्वाच्च। **किं खल्वेता इष्टय उच्यन्त** इति । आवस्थिकः प्रतीत्यसमुत्पादः स्यात् प्रतीत्यसमुत्पादो न प्रतीत्यसमुत्पन्ना इत्येवमाद्याः । **पूर्वान्तेऽज्ञानमिति** ' यस्मादविद्यैवोक्ता नान्ये स्कन्धास्तस्मादविद्यैवाङ्गमिति । नीतार्थमेतदिति दर्शयति ' **नीतार्थमिति** विभक्तार्थं [2]हस्तिपदोपमे सूत्रे[2] । **सन्ति च तत्रान्येऽपि रूपादय** इति । तेषु केशरोमादिषु । न पृथिवीधातुमात्रमेवेति । **एवमत्रापि यथाप्रधानं निर्देशः** स्यादिति । एवमत्रापि प्रतीत्यसमुत्पादसूत्रे द्वादशसु पञ्चस्कन्धिकास्ववस्थासु यत्र यस्य प्राधान्यं तत्र तस्य तस्य निर्देशः स्यात् ' अविद्याप्रधानायामविद्येति निर्देशः स्यात् ' संस्कारादिप्रधानास्ववस्थासु संस्कारादीनां निर्देशः स्यात् । सन्ति च तत्रान्येऽपि रूपवेदनादयो धर्मा इति । **नहि तत्रेति** विस्तरः । नहि तत्र सूत्रे **केशादयः पृथिवीधातुना निर्दिश्यन्ते** । केशादयः कतमे । पृथिवीधातुरिति । यत एषां केशादीनाम**परिपूर्णो निर्देशः स्यात्** । सन्ति हि तत्रान्येऽपि रूपादय इति । रूपादिस्वभावा अपि केशादयो न केवलं पृथिवीधातुस्वभावा इति । अपि तु केशादिभिरेव **पृथिवीधातुर्निर्दिश्यते** । पृथिवीधातुः कतमः केशरोमाणीति । **न च केशादीनभ्यतीत्याप्यतिक्रम्याप्यस्ति पृथिवीधातु**राध्यात्मिक इति । **संपूर्ण एवास्य** पृथिवीधातोर्निर्देशः । **एवमिहाप्यविद्यादीनाम्** ' एवमिहापि सूत्रेऽविद्यासंस्कारविज्ञानादीनां परिपूर्ण एव निर्देशोऽयं[3] न सावशेषः । **अश्रुसिंघाणकादिष्विति** । अश्रुसिंघाणकादीनि न[4] तत्र सूत्रे पठ्यन्ते तस्मान्न तद्गतः

1 To. °त्पन्नश्च°
2...2 To. हस्तिपदोपमा सूत्रम्
3 Mss. निर्देशोम ; To. निर्देशो
4 Mss. omit न.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पृथिवीधातुरुक्त इति सावशेष एवेति दर्शयति। **भवतु वा तथैवेति** विस्तरः। यथा पृथिवीधातोरश्रुसिंघाणकादिष्ववशेषमनुक्तत्वात्। **तथैवाविद्यावशेषमस्तु यदि शक्यते दर्शयितुम्**। न शक्यते दर्शयितुमिति मन्यमानो यदि शब्दं प्रयुङ्क्ते पूर्वान्तेऽज्ञानमपरान्तेऽज्ञानं मध्यान्तेऽज्ञानं बुद्धेऽज्ञानं धर्मेऽज्ञानं संघेऽज्ञानं इत्येवमादीनां सर्वेषामज्ञानस्थानानामुक्तत्वात्। **जात्यन्तरस्य तु वेदनादेरविद्यायां किं कृतः प्रक्षेपः। पञ्चस्कन्धिकावस्थाविद्ये**ति। न हि वेदनादीनामविद्यात्वं युज्यत इति। **भावाभावनियम** इति। यस्य भावाभावयोर्यस्य भावाभावौ यथासंख्येन नियतौ तदेवाङ्गम्। अविद्याभावे संस्काराणां भावस्तदभावे तेषामभाव इत्यविद्यैवाङ्गं न वेदनादि। न हि वेदनादिसद्भावेऽर्हतां संस्कारा भवन्ति। ये विज्ञानाङ्गजनका इत्यर्थः। तस्मादाह। **सत्यपि च पञ्चस्कन्धके संस्कारा न भवन्तीति** विस्तरः। सत्यपि च पञ्चस्कन्धके अर्हत्त्वावस्थायाम्। **पुण्योपगं यावदानिञ्ज्योपगं च विज्ञानं न भवति।** प्रतिसन्धिविज्ञानं न भवतीत्यर्थः। [1]अन्तामुपपत्तिं गच्छतीत्युपगम्। पुण्योपगं विज्ञानं पुण्योपगम्। एवं यावदानिञ्ज्योपगम्। तथा सत्यपि पञ्चस्कन्धके निरविद्यावस्थायां तृष्णोपादानादयश्च न भवन्तीति। **यथानिर्देश एव सूत्रार्थः**। यथा संकीर्तितानामेवाविद्यादीनां ग्रहणमित्यर्थः। अतो विद्यमाना अप्यन्ये स्कन्धा न प्रत्ययाः संस्कारादीनामिति न तेऽङ्गम्।

एवं मया श्रुतमित्यादि। भगवान् राजगृहे विहरति गृध्रकूटे पर्वते [2]महता भिक्षुसङ्घेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैः संबहुलैश्च बोधिसत्त्वैरिति। आयुष्मान् शारिपुत्रो मैत्रेयं बोधिसत्त्वमेतदवोचत्। [3]शालिस्तम्बमवलोक्य भिक्षुभ्यः सूत्रमिदमुक्तम्। यो भिक्षवः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति। यो धर्मं पश्यति स बुद्धं पश्यति। इत्युक्त्वा भगवांस्तुष्णीम्बभूव। तदस्य भगवता भाषितस्य सूत्रस्य कोऽर्थः। प्रतीत्यसमुत्पादः कतमः। धर्मः कतमः। बुद्धः कतमः। कथं च प्रतीत्यसमुत्पादं पश्यन् धर्मं पश्यतीत्यादि। तत्र प्रतीत्यसमुत्पादो नाम यदिदमविद्येत्यादि। इदं चाभिसन्धायेदमुक्तं तत्र सूत्रे। **उत्पादाद्वा तथागतानामनुत्पादाद् वा तथागतानां स्थितैवेयं धर्मता** धर्मस्थितिता धर्मनियामता तथता अवितथता अनन्यतथता भूतता सत्यता तत्त्वमविपरीतता अविपर्यस्ततेत्येवमादि भगवन्मैत्रेयवचनम्। **यद्यनागता न[4] प्रतीत्यसमुत्पन्ना** इति। यदुक्तं प्रथमा कोटिरनागता धर्मा इति **सूत्रं**

---

1 To. तान्तामुप॰ 2 To. omits महता.
3 To. शालिस्तम्भ॰ 4 Mss. omit न.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विरुध्यत इति। जातिजरामरणयोः प्रतीत्यसमुत्पन्नत्वं न स्यात्' उक्तं च **अविद्या यावज्जातिजरामरण**मिति। **अथ वे**ति विस्तरः। अथ **जातिजरामरणाङ्गे**ऽपि प्रतीत्यसमुत्पन्ने इष्टे। **तयोरनागताध्वव्यवस्थानं नैष्ठ्य**मिति कृत्वा **त्रिकाण्ड-व्यवस्था भिद्यते**।

पूर्वापरान्तयोर्द्वे द्वे मध्येऽष्टौ[1]

इति' **निकायान्तरीया** इत्यार्यमहीशासकाः। **उत्पादस्य संस्कृतलक्षणत्वा**दिति। योऽयमुत्पादः प्रतीत्यसमुत्पाद इति निकायान्तरीयैर्नित्यः परिकल्प्यते स संस्कृतलक्षणमुक्तम्। त्रीणीमानि संस्कृतस्य संस्कृतलक्षणानि' संस्कृतस्योत्पादोऽपि प्रज्ञायते व्ययोऽपि स्थित्यन्यथात्वमपीति। संस्कृतलक्षणत्वाच्चानित्यमित्यभिप्रायः। ब्रूयास्त्वं लक्षणमपि नित्यं भवतीति। अत आह' **न च नित्यं भावान्तरमनित्यस्य लक्षणं युज्यत** इति। न हि निर्वाणमाकाशं वा कस्यचिदनित्यस्य लक्षणं भवति। प्रागुत्पत्तेर्हि लक्ष्यस्य तदस्तीति कस्य लक्षणम्' विनष्टे च लक्ष्ये कस्येति न युज्यते। **उत्पादश्चे**ति विस्तरः। उत्पादश्च **नामाभूत्वा भावलक्षणः**। सौत्रान्तिकनयेनोत्पत्तिर्धर्मस्य[2] तदानीमेव[3] भवतीति। **कोऽस्योत्पादस्यासंस्कृतस्य** [4]**तन्मतेनाविद्यादिभिरभिसम्बन्धः**' यथौदनेन पाकस्यास्ति सम्बन्धः कर्तृक्रियालक्षण इत्योदनस्य पाक इत्युच्यते। न ह्याकाशरूपयोरभिसम्बन्ध उत्पत्त्युत्पत्तृलक्षणोऽस्ति' येन रूपस्याकाशमित्युच्यते। एवं कोऽस्याविद्यादिभिरभिसम्बन्धः। **यतस्तेषामविद्यादीनां प्रतीत्यसमुत्पाद इत्युच्यते' पदार्थश्चासम्बन्धो भवतीति'** प्रत्ययं प्राप्य समुद्भवः प्रतीत्यसमुत्पाद इति पदार्थः। **स कथं** नित्यश्च नाम **प्रतीत्यसमुत्पादश्चे**ति। **प्रतिः प्राप्त्यर्थ** इति। प्राप्तिद्योतक इत्यर्थः। **इ गताविति**[5] [6]**धात्वर्थपरिणामा**दिति।[7] अनेकार्था हि धातवः। प्रतिश्चोपसर्गः प्राप्तिद्योतक इत्ययमिः[8] गत्यर्थमुज्झित्वा प्राप्त्यर्थमापद्यते। **पदिः**[9] **सत्तार्थ** इति' [10]पद सत्तायामिति। **तेने**ति कारणेन। **पूर्वकालायां क्रियायां क्त्वाविधे**रिति। समानकर्तृकयोः पूर्वकाले[11] इति वचनात्। **न चासौ पूर्वमुत्पादात् कश्चिदस्ती**ति सौत्रान्तिकमतेन। **न चाप्यकर्तृकास्ति क्रिये**ति कर्तरि सति क्रियाया व्यवस्था-

---

1 Kārikā, III, 20. 2 Mss. ०त्पत्तेर्धर्मस्य
3 To. तदानीन्तनैव 4 To. following Tib. तन्मते०
5 Mss. इ अ ताविति, To. following Tib. इतिर्गताविति 6 To. धात्वर्थः
7 Mss. add येन रूपस्याकाशमित्युच्यते. 8 Mss. इत्ययमि To. इत्ययमितिः.
9 Mss. पदि 10 To. पदिः सत्तायाम्. 11 Pā., III, 4, 21.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पनात्। **आह चात्रेति**। एतद्वैयाकरणचोद्यं श्लोकेनोपनिबध्नात्याचार्यः।

यदि पूर्वमुत्पादात् प्रत्येति।

प्राप्नोति।

असत्त्वान्न युज्यते।

न ह्यविद्यमानः कर्ता स्नानादिक्रियां कुर्वन् दृष्ट इति।

सह चेत्।

अथ मन्यसे प्रतीत्यक्रियां समुत्पादक्रियां च सहकरोतीत्येवम्।

क्त्वा न सिद्धोऽत्र

[1]प्रत्ययः। कस्मात्।

पूर्वकालविधानतः।

पूर्वस्मिन् काले विधानं क्त्वाप्रत्ययस्य। समानकर्तृकयोः पूर्वकाल इति वचनात्। अतः[2] क्त्वाप्रत्ययो न सिद्धो भवेत्। **पुनरुत्पत्ताविति**। उत्पन्नस्य **पुनरुत्पत्तौ** कल्प्यमानाया**मनवस्थाप्रसङ्गः**। द्वितीये तृतीये क्षणे पुनः पुनरुत्पद्यत इत्यनिष्ठाप्रसङ्गः। **अथानागत** इति विस्तरः। अलब्धात्मकोऽनागत इति **कथमसतो**ऽलब्धात्मलाभस्य **कर्तृत्वं सिध्यति**। **अकर्तृका वा क्रिया कथं सिध्यति**। **यत एवमतो यदवस्थ उत्पद्यते शाब्दिकस्य** शब्दविदः। **तदवस्थ एव मम प्रत्येति**। **किमवस्थश्चेति**। कावस्थास्येति किमवस्थः। **उत्पादाभिमुखोऽनागत** इति। न सर्वोऽनागत उत्पद्यते। किं तर्हि। उत्पादाभिमुखः। उत्पादेऽभिमुख उत्पित्सुरित्यर्थः। तदवस्थ एव। उत्पादाभिमुखावस्थ एव प्रत्येतीत्युच्यते। **अनिष्पन्नं चेदमिति** विस्तरः। शाब्दिकानामिदं **शाब्दिकीयम्**[3]। **कर्तुः क्रियायाश्च व्यवस्थानम्**। कस्मात्। **भवितुः** कर्तृरूपकल्पिता**दर्थात्** क्रियारूपकल्पितताया **भूतेरन्यत्वादर्शनात्**। **तस्मादच्छलं भवत्युत्पद्यते** प्रत्येतीत्येवमादिषु। **आह चात्रेति**। तत् सिद्धान्तेन प्रक्रियां दर्शयति। **असन्नुत्पद्यते यद्वदिति** विस्तरः। असन्नभावोऽलब्धात्मक उत्पद्यते यथा **प्रत्येत्यपि तथा**। असन्नित्यर्थः। **अथ सन्**। अथ लब्धात्मक उत्पद्यत इति कल्प्यते। **उत्पन्न उत्पद्यते इत्यनिष्ठा**। उत्पन्नोऽपि पुनरुत्पद्यत इत्यनवस्थानादन्यदनिष्ठा प्राप्नोति। तथाहि सांख्यमतानुसारेण सत एवोत्पादो नासत इति तदेतदधिकृत्य ब्रवीति। **सन् पुरापि वेति**। वा शब्दो मतविकल्पार्थः। यदि

1 To. adds क्त्वा. 2 To. omits अतः.
3 Mss. and To. शाब्दकीयम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवतां सन्नुत्पद्यते इति पक्षः। अस्माकमपि सन्नुत्पद्यते। वैभाषिकनयेनानागतानामस्तित्वात् सौत्रान्तिकनयेन च जनकधर्मबीजसद्भावात्। ततः किमिदमुच्यते। न चासौ पूर्वमुत्पादात् कश्चिदस्ति यः प्रतीत्योत्तरकालमुत्पद्यत इति। अथवा यदि तर्हि सन्नेवोत्पद्यते। पूर्वमेव घटो मृत्पिण्डादीननपेक्ष्य स्वतः प्रसिद्धोऽस्तीति प्राप्नोति। अपरे पुनर्व्याचक्षते। **अनिष्ठाऽसन् पुरापि वेति**। अथ माभूदनिष्टेति। असन्नुत्पद्यत इति प्रतिपद्यसे[1]। पुनस्तदेव वोपतिष्ठते। असन्नुत्पद्यते यद्वत् प्रत्येत्यपि तथेति सिद्धो नः पक्ष इति पूर्ववद्वाच्यम्। यदप्युक्तमेकस्य हि कर्तुर्द्वयोः क्रिययोः पूर्वकालायां क्रियायां क्त्वाविधिर्भवतीति तद्व्यभिचारयन्नाह। **सहभावेऽपि च क्त्वास्तीति** विस्तरः। समानकालायामपि क्रियायां क्त्वाविधिर्दृष्टः तद्यथा दीपं प्राप्य तमो गतमिति। अत्र न पूर्वं तमो दीपं प्राप्नोति पश्चाद्गच्छति विनश्यतीत्यर्थः। किं तर्हि। तस्मिन्नेव काले तमो दीपं प्राप्नुवद् विनश्यति। अथ मतम्। समनन्तरमेव तन्न युगपदिति। अतः पुनरिदमुच्यते। **आस्यं व्यादाय शेते वेति**। न ह्यसौ पूर्वं मुखं व्याददाति विदारयति पश्चाच्छेते। किं तर्हि। यो मुखं व्याददच्छेते स मुखं व्यादाय शेत इत्युच्यते। अथ मतम्। पूर्वमसौ मुखं व्याददाति पश्चाच्छेत इति। अत आह। **पश्चाच्चेत् किं न संवृते।** यः कश्चिन्मुखं व्यादायानन्तरं च संवृत्य शेते स मुखं व्यादाय शेत इत्युच्येत। न चोच्यते। तेन ज्ञायते यो मुखं व्याददच्छेते स मुखं व्यादाय शेत इत्युच्यत इति। **अन्ये पुनरिति**। भदन्तश्रीलाभः। **प्रतिर्वीप्सार्थ** इति। नानावाचिनामधिकरणानां सर्वेषां क्रियागुणाभ्यां व्याप्तुमिच्छा वीप्सा। तामयं प्रतिर्द्योतयति। इतौ गतौ साधव इत्याः। तत्र साधुरिति[2] यत्प्रत्ययः। इतौ विनष्टौ साधवः। **अनवस्थायिन** इत्यर्थः। **समुपसर्गः समवायार्थं** द्योतयति। **उत्पूर्वः पदिः प्रादुर्भावार्थः**। धात्वर्थपरिणामात्। **तां तां सामग्रीं प्रतीति**। प्रतेर्वीप्सार्थतां दर्शयति। इत्यानां विनश्वराणां **समवायेनोत्पादः प्रतीत्यसमुत्पादः**। न कश्चिद्धर्म एक उत्पद्यते सहोत्पादनियमात्। रूपादीनाम्

कामेऽष्टद्रव्यकोऽशब्दः परमाणुः[3]

यावत्

चित्तचैत्ताः सहावश्यम्[4]

इति नियमात्। **एषा तु कल्पनेति** विस्तरः। प्रतिर्वीप्सार्थ इत्येवमादिका कल्पनाऽत्रैव प्रतीत्यसमुत्पादसूत्रे **युज्यते। इह कथं भविष्यति चक्षुः प्रतीत्य**

---

1 To. प्रतिपद्यते
2 Pā., IV, 4, 98.
3 Kārikā, II, 23.
4 Ibid., II, 24.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपाणि चोत्पद्यते चक्षुर्विज्ञानमिति। न हि प्रतीत्यानां चक्षूंषि प्रतीत्यचक्षूंषीति समासः सम्भवत्यर्थायोगात्। चक्षुर्हि प्रतीत्य प्राप्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानमित्ययमर्थो गम्यते। तेन तदवस्थमेव तच्चोद्यं न युक्त एष पदार्थ इति विस्तरेण यदुक्तम्। कथम्। एकस्य हि कर्तुर्द्वयोः क्रिययोः पूर्वकालायां क्रियायां क्त्वाविधिर्भवति। स्नात्वा भुङ्क्त इति। न च पूर्वमुत्पादाच्चक्षुर्विज्ञानमस्ति यच्चक्षुः पूर्वं प्रतीत्य रूपाणि चोत्तरकालमुत्पद्यते। न चाप्यकर्तृका क्रियेति।

अवधारणार्थं पर्यायद्वयमाह। **अस्मिन् सतीत्येतावत्युच्यमाने।** न केवलमविद्यायां सत्यां संस्कारा भवन्ति। अन्यस्मिन्नपि सतीति गम्येत। यथा चक्षुषि सति चक्षुर्विज्ञानं भवत्विति[1] न चक्षुष्येव सतीत्यवधार्यते। तेन रूपेऽपि सतीति गम्यते। **द्वितीयेन तु पर्यायेणास्योत्पादादिदमुत्पद्यत** इत्यनेन पूर्वपर्यायमेवावधारयति। अस्यैवोत्पादादिदमुत्पद्यते। **नान्यस्मादिति। अङ्गपरम्परां वा दर्शयितुमिति। अस्मिन्नङ्गे सति।** अविद्याङ्गे सतीदं संस्काराङ्गं **भवति। अस्य पुनरङ्गस्य** संस्काराङ्गस्योत्पादादिदं विज्ञानाङ्ग**मुत्पद्यत** इति। एवमितरेषामप्यङ्गानां परम्परा वक्तव्या। **जन्मपरम्परां वा।** किम्। दर्शयितुं पर्यायद्वयमाहेति वर्तते। **साक्षादिति** विस्तरः। साक्षात् **पारम्पर्येण च** सन्तत्याऽविद्यादीनां प्रत्ययभावं दर्शयितुं पर्यायद्वयमाह। अस्मिन् सतीदं भवतीति साक्षात् प्रत्ययभावं दर्शयति। अस्योत्पादादिदमुत्पद्यत इति पारम्पर्येण। तत्र साक्षाद् यदा अविद्यायाः समनन्तरं क्लिष्टाः संस्कारा उत्पद्यन्ते। पारम्पर्येण तु यदा कुशला उत्पद्यन्ते कुशलावस्थायामविद्याया अभावात्। किञ्च अविद्या संस्काराणां साक्षात् प्रत्ययो विज्ञानादीनां पारम्पर्येण। तदुक्तं भवति। अविद्याङ्गे सति संस्काराङ्गं भवत्यस्य संस्काराङ्गस्योत्पादादिदमुत्पद्यते विज्ञानाङ्गं साक्षादविद्याप्रत्ययं पारम्पर्येणेति। एतत् सर्वमाचार्यमतम्। **प्रतिषेधार्थमित्यपर** इति स्थविरवसुवर्मा। **नासति हेतौ भावो भवतीत्यहेतुवादप्रतिषेधार्थं** प्रथमेन पर्यायेण। **नित्यहेतुवादप्रतिषेधार्थं न चानुत्पत्तिमतो नित्यात् प्रकृतिपुरुषादिकात् किञ्चिदुत्पद्यत** इति द्वितीयेन। आचार्य आह। **अस्यान्तु कल्पनायामिति** विस्तरः। **पूर्वपदस्य ग्रहणमनर्थकमिति। अस्मिन् सतीदं** भवत्यस्य। **उभयवादप्रतिषेधसिद्धेरिति।** अस्योत्पादादिदमुत्पद्यत इत्यनेनैव पर्यायेण। हेतोरस्तित्वमुत्पत्तिमतश्च हेतुत्वमित्युभय-

---

1 To. भवतीति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्याहेतुत्वनित्यहेतुत्वलक्षणस्य वादस्य प्रतिषेधसिद्धितः पूर्वपर्यायस्यानर्थक्यं प्राप्नोति। **सन्ति तर्हि केचिदिति** विस्तरः। सन्ति केचिद्वादिनः। **य आत्मनि सत्याश्रयभूते।** अविद्याया आश्रयभूते। **संस्कारादीनां** संस्कारविज्ञाननामरूपादीनां **भावमुत्पादं कल्पयन्ति। अविद्यादीनां** चाविद्यासंस्कारादीनामुत्पादात्तदुत्पत्तिं संस्काराद्युत्पत्तिं कल्पयन्तीत्यधिकृतम्। **अतः कारणात्तेषां वादिनां कल्पनां पर्युदासयितुं** प्रतिषेद्धुमिदं **निर्धारयाम्बभूवा**न्वेडयाम्बभूव। **किमित्याह।** यस्यैवोत्पादात् यावत् स्कन्धस्य समुदयो भवतीति। **यस्यैवोत्पादाद् यदुत्पद्यते। तस्मिन्नेव सति तद् भवति नान्यस्मिन्नात्मनि। यदुताविद्याप्रत्ययाः संस्काराः।** अविद्यायामेव सत्यां संस्कारा भवन्ति नान्यस्मिन् **यावदेवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति।** कथम्। जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति। एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति। जात्यामेव सत्यां जरामरणादयः संभवन्ति नान्यस्मिन्नात्मनि। अन्यथा ह्यस्मिन् सतीदं भवतीत्युच्यमाने वक्तारः स्युः। आत्मनि सत्याश्रयभूते अविद्यादिषु सत्सु संस्कारादयो भवन्तीति। अथ पुनर्द्वितीयमेव पर्यायं ब्रूयात्। अस्योत्पादादिदमुत्पद्यत इति। एवमपि तथैव कल्पेयुः। सत्यम्। अविद्यादीनामुत्पादात् संस्कारादय उत्पद्यन्ते। आत्मनि तु सत्याश्रयभूत इति। अतः पर्यायद्वयेन निर्धारयति। यस्योत्पादाद्यदुत्पद्यते तस्मिन्नेव सति तद्भवति। नान्यस्मिन्नात्मनि सत्याश्रयभूत इति। **आचार्या** इति। पूर्वाचार्याः। **अप्रहीणज्ञापनार्थमुत्पत्तिज्ञापनार्थं च। अविद्यायां** सत्यामप्रही**णायां संस्कारा भवन्ति। न प्रहीयन्त** इति प्रथमेन पर्यायेण दर्शयति। **तस्या एवोत्पादादुत्पद्यन्त** इति द्वितीयेन दर्शयति। एवं यावज्जात्यां सत्यामप्रहीणायां जरामरणादयो भवन्ति न प्रहीयन्ते। तस्या एवोत्पादादुत्पद्यन्त इति। **स्थित्युत्पत्तिसन्दर्शनार्थमित्यपर** इति भदन्तश्रीलाभः। तदर्थं **पर्यायद्वयमाहेति। यावत् कारणस्रोतस्तावत् कार्यस्रोतो भवतीति** प्रथमेन पर्यायेण। **कारणस्यैवोत्पादात् कार्यमुत्पद्यत** इति द्वितीयेन। **उत्पादे त्वधिकृत** इति। प्रतीत्यसमुत्पादं वो भिक्षवो देशयिष्यामीत्यधिकृते **कः प्रसङ्गः** कः प्रस्तावः **स्थितिवचनस्य।** अस्मिन् सतीदं भवतीत्यनेन यावत् कारणस्रोतस्तिष्ठति तावत् कार्यस्रोतस्तिष्ठतीति। एवमस्य स्थित्यर्थो वर्ण्येत इति। **भिन्नक्रमं च भगवान् किमर्थमाचक्षीत।** उत्पत्तिर्हि प्रथमं भवति पश्चात् स्थितिः। उत्पत्तिप्रतिबद्धा स्थितिरिति कृत्वा अस्योत्पादादिदमुत्पद्यत इति पूर्वं वक्तव्यं स्यात्। पश्चादिदमस्मिन् सतीदं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवति । नत्वेवम्' अतो नायमर्थ इति । **पुनराहेति** ' स एव भदन्तश्रीलाभः । आचार्यः प्रत्याह । **एष चेदिति** विस्तरः । **अस्मिन् सतीदं न भवतीत्येवावक्ष्यदिति**[1] । नन्वेवाभावनिर्देशो युक्तरूप इति दर्शयति । **पूर्वं च कार्यस्योत्पादमिति** । अस्योत्पादादिदमुत्पद्यते इति पूर्वमवक्ष्यत्' उत्पादपूर्वकत्वाद्विनाशस्य ।

सूत्र उक्तं जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः सम्भवन्तीति जरामरणसंगृहीता एवं ते । नाङ्गान्तरमित्यवगन्तव्यम् । तत्र सत्त्वासत्त्वसंख्यातस्य विषयस्य परिणामादात्मभावपरिणामाच्चैते भवन्ति । दौर्मनस्यसम्प्रयुक्तो वितर्कः शोकः । शोकसमुत्थितः प्रलापः परिदेवः । दुःखदौर्मनस्ये व्याख्याते । विच्छिन्नवेगं दौर्मनस्यमुपायासः । शोकपरिदेवपूर्वकः श्रम उपायास इत्यपरे । **बालो हीति** विस्तरः । बालः **पृथग्जनः संस्कारमात्रमिति** । मात्रग्रहणमात्मप्रतिषेधार्थम् । **अप्रजानन्नित्यावेणिकीमविद्यां** दर्शयति । **आत्मदृष्ट्यस्मिमानाभिनिविष्टः** प्रतिष्ठितः **कायादिभिः** कायवाङ्मनोभि**स्त्रिविधं कर्म** पुण्यापुण्यानिञ्ज्यलक्षण**मारभते** । **आणिञ्ज्यमिति** । इगिः प्रकृत्यन्तरं तस्यैवैतद्रूपम् । एजतेरेतद्रूपमानेञ्ज्यमिति वा पाठः । **आयतिसुखार्थं पुण्यमिति**' अनागतजन्मसुखार्थम् । किम्' कामावचरं कुशलं कर्म । **सुखादुःखासुखार्थमानिञ्ज्यमिति** । रूपारूप्यावचरं कुशलम् । सुखार्थमा तृतीयाद्ध्यानात्' तस्मादूर्ध्वमदुःखासुखार्थम् । **ऐहिकसुखार्थमपुण्यमिति** । इहसुखापेक्षया तत् कृतं नायतिसुखापेक्षयेत्यर्थः । **कर्माक्षेपवशाद्** यथोक्तं कर्मविधवशात्' **तां तां गतिं नरकादिकां गच्छति** ' **ज्वालागमनयोगेन**' यथा दीर्घा तृणानुषक्ता ज्वाला गच्छतीत्युच्यते' तथा **विज्ञानसन्ततिभिरन्तराभवसम्बन्धादन्तराभव**सम्बन्धेनातिविप्रकृष्टदेशामपि तां तां गतिं गच्छति । **एवञ्च कृत्वेति** । यदि संस्कारप्रत्ययमन्तराभवप्रतिसन्धिचित्तमुपादाय यावदुपपत्तिक्षणः' सर्वासौ विज्ञानसन्ततिः षण्णां विज्ञानकायानां संस्कारप्रत्ययं विज्ञानमभिप्रेतं **तदुपपन्नं भवति** । **विज्ञानाङ्गनिर्देशे** ' विज्ञानाङ्गस्य तृतीयस्य निर्देशे । विज्ञानं कतमत्' षड्विज्ञानकाया इति । अन्यथा हि यदि षण्णां विज्ञानकायानां सन्ततिर्नाभिप्रेता स्यात्'संस्कारप्रत्ययं विज्ञानं प्रतिसन्धिचित्तमेवाभिप्रेतं स्यात्' अत्र षड्विज्ञानकाया इति नोक्तं स्यात्'एवं तु वक्तव्यं स्यात् । विज्ञानं कतमत्'मनोविज्ञानमिति ।

1 V °वक्ष्यदिति.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न हि प्रतिसन्धिक्षणे पञ्चविज्ञानकायसम्भवोऽस्ति । मनोविज्ञानेनैव प्रतिसन्धिबन्धात् ।

छेदसन्धानवैराग्यहानिच्युत्युपपत्तयः ।
मनोविज्ञान एवेष्टाः[1]

इति वचनात् । **विभङ्ग एवं निर्देशादिति** । प्रतीत्यसमुत्पादसूत्रे नामरूपविभङ्ग एवं निर्देशात् । नाम कतमत् । चत्वारोऽरूपिणः स्कन्धा इति । रूपं कतमत् । यत्किञ्चिद्रूपमिति विस्तरेण । यावद्यच्चेदं रूपं यच्च नाम तदुभयं नामरूपमित्युच्यत इति । **कामतृष्णेति** । कामावचरी तृष्णा । **रूपतृष्णेति** । या **सुखायां** त्रिषु ध्यानेषु । **अदुःखासुखायां** चतुर्थे । **अदुःखासुखायामारूप्यतृष्णेति** । आरूप्यावचरी । **कामादीनामुपादानमिति** । कामदृष्टिशीलव्रतात्मवादानामुपादानमित्यर्थः । **पञ्च कामगुणा** इति । काम्यन्त इति कामाः । गुणयन्त इति गुणाः । कामा एव गुणाः कामगुणाः । के पुनस्ते । रूपशब्दगन्धरसस्प्रष्टव्यानि । **दृष्टयो द्वाषष्टिर्यथा**[2] **ब्रह्मजाल** इति । ब्रह्मजालसूत्रदर्शनेन ता दृष्टयो बोद्धव्याः । **कुक्कुरगोव्रतादीनी-ति** । आदिशब्देन मृगव्रतादीनि[3] गृह्यन्ते । **निर्ग्रन्थादीनामिति** । आदिशब्देन पाण्डरभिक्ष्वादीनां ग्रहणम् । **ब्राह्मणेत्यादिविस्तरः** । ब्राह्मणानां **दण्डाजिनम्** । **पाशुपतानां जटाभस्म** । **परिव्राजकानां त्रिदण्डमौण्ड्यम्** । आदिशब्दद्वयेन कापालिकादीनां कपालधारणादीनि[4] गृह्यन्ते । **तत्समादानं** शीलव्रतोपादानम् । **आत्मेति वादोऽस्मिन्नित्यात्मवादः** । यथोक्तम् । ये केचिच्छ्रमणा ब्राह्मणा वा आत्मेति समनुपश्यन्तः । समनुपश्यन्ति सर्वे त इमानेव पञ्चोपादानस्कन्धानिति विस्तरः । **आत्मदृष्ट्यस्मिमानावित्यपर आत्मवादमाहुः** । **आत्मनो ह्यसत्त्वादात्मवादोपादानमिति**[5] । वादशब्दोपन्यासे प्रयोजनं दर्शयति । **बालोऽश्रुतवान् पृथग्जन** इति । यस्य पूर्वाभ्यासवासनानिर्जातोपपत्तिलाभिका प्रज्ञा नास्ति स बालः । यस्यागमजा नास्ति सोऽश्रुतवान् । यस्याधिगमजा सत्याभिसमयजा नास्ति स पृथग्जनः । **प्रज्ञप्तिमनुपतित** इति । यथा संज्ञा यथा च व्यवहारस्तथानुगत इत्यर्थः । **तेषामिति** । कामादीनाम् । **छन्दराग** इति । अप्राप्तेषु विषयेषु प्रार्थना छन्दः । प्राप्तेषु रागः । तेषु कामादिषु यश्छन्दरागस्तदुपा**दानम्** । न तु

1 Kārikā, III, 42. 2 To. द्वार्षष्टि यथा 3 Mss. add मृगादीनि·
4 Mss. ०धारणादि 5 To. ०दानामिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]यथोक्ता एव साविद्या द्विधा दृष्टिविवेचनात्।

उपादानानि

इत्यभिप्रायः। पौनर्भविकमिति' पुनर्भवफलम्। इदमत्र भवस्येति। इदमत्र भवस्य स्वलक्षणं स्वभाव इत्यर्थः। विज्ञानावक्रान्तियोगेनेति। ज्वालागमनयोगेनान्तराभवसम्बन्धादनागतं जन्म जातिः पञ्चस्कन्धिका नामरूपस्वभावत्वात्। जरामरणं यथानिर्दिष्टं सूत्र इति। जरा कतमा' यत्तत् [2]खालित्यं पालित्य-[2] मिति विस्तरः। मरणं कतमत्' या तेषां तेषां सत्त्वानां तस्मात्तच्च्युतिश्च्यवनमिति विस्तरः। केवलस्यात्मरहितस्येत्यर्थं दर्शयति' महत इत्यनाद्यन्तस्य दुःखस्कन्धस्येति' दुःखसमूहस्य। स एव तु वैभाषिकन्यायो यः पूर्वमुक्त इति। द्वादश पञ्चस्कन्धिका अवस्था द्वादशाङ्गानीति'

या न विद्या। चक्षुरादिष्वपि प्रसङ्ग इति। चक्षुःश्रोत्रादीन्यविद्या प्रसज्यन्ते' तान्यपि हि न विद्येति कृत्वा। न किञ्चित् स्यादिति' यदि विद्याया अभावोऽविद्या अद्रव्यं स्यादित्यर्थः। न चैतद् युक्तमिति' प्रत्ययभावेनोपदेशात्। तद्विपक्ष इति' विरोधे नञिति दर्शयति। न तु यः कश्चिदन्यो मित्रादिति। न पर्युदासमात्र इति दर्शयति। नापि मित्राभाव इति। नाभावार्थ इति दर्शयति' अधर्मानर्थाकार्यादयश्चेति। आदिशब्देनायुक्तव्यवहारामनुष्यादयो गृह्यन्ते। धर्मादिप्रतिद्वन्द्वभूता इति' धर्मार्थकार्ययुक्तिव्यवहारमनुष्यादिप्रतिद्वन्द्वभूताः। न तु ये केचिदन्ये धर्मादिभ्यश्चक्षुरादयः' नापि धर्माद्यभावः। एवमविद्यापीति विस्तरः। कुत एतत्' प्रत्ययभावेनोपदेशात्। अविद्याप्रत्ययाः संस्कारा इति। न चाविद्याया अन्येषां चक्षुरादीनां प्रत्ययभावेनोपदेशो युक्तः' अर्हतां संस्कारासम्भवात्। न चाभावस्य' शशविषाणादीनां प्रत्ययत्वात् ॥२८॥

[संयोजनादिवचनात् कुप्रज्ञा चेन्न दर्शनात्।
दृष्टेस्तत्सम्प्रयुक्तत्वात् प्रज्ञोपक्लेशदेशनात् ॥२९॥]

संयोजनं यावद्योगश्चाविद्योच्यत इति। अविद्यासंयोजनं यावदविद्यायोग इति सूत्रेषूच्यते। न चाभावमात्रं तथा भवितुमर्हतीति। न संयोजनादि भवितु-

1 Kārikā, V, 38.

2...2 Mss. कालित्यं फलित्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मर्हतीत्यर्थः । न चापि चक्षुरादयस्तथा भवितुमर्हन्तीत्यधिकृतम् । सा च दृष्टिस्वभावेति नाविद्यां युज्यत इति । दृष्ट्यविद्ययोः संयोजनादित्वेन पृथक् पाठात् । या तर्हि न दृष्टिरिति । या क्लिष्टा प्रज्ञा रागादिसम्प्रयुक्ता ।

दृष्टेस्तत् सम्प्रयुक्तत्वात्

इति' अविद्यासम्प्रयुक्तत्वादित्यर्थः । कथञ्च दृष्टिरविद्यया सम्प्रयुक्ता । यस्मादविद्यालक्षणो मोहः क्लेशमहाभूमौ पठ्यते । क्लेशमहाभूमिकाश्च सर्वेऽपि महाभूमिकैः सह सम्प्रयुज्यन्त इति । दृष्ट्या सत्कायदृष्ट्यादिकया प्रज्ञास्वभावया अविद्या सम्प्रयुज्यत इति गम्यते । तस्मान्नाविद्या प्रज्ञा' द्वयोः प्रज्ञाद्रव्ययोरसम्प्रयोगात् । अविद्योपक्लिष्टा प्रज्ञा न विशुध्यतीति । एतदुदाहरणम् । येनाविद्या प्रज्ञाया अर्थान्तरभूतेति । न च सैव प्रज्ञा तस्याः प्रज्ञाया उपक्लेशो युक्त इति । प्रज्ञोपक्लेशदेशनायां प्रज्ञाया अर्थान्तरभूता अविद्या ' उपक्लेशत्वेन निर्दिष्टत्वात् ' रागवत् । अत आह । यथा चित्तस्यान्य इति विस्तरः । व्यवकीर्यमाणा न विशुध्यतीति । अन्तरान्तरोत्पद्यमानया क्लिष्टया प्रज्ञया व्यवकीर्यमाणा क्षणान्तरोत्पन्ना कुशला प्रज्ञा न विशुध्यतीत्यर्थः । किं तदवश्यं रागपर्यवस्थितमिति । रागसम्प्रयुक्तमित्यर्थः । उपहतन्तु तत्तथा रागेणेति । [1]समुदाचरता रागेण वासनाधानेन तदुपहतं भवति । तां भावनां[2] तद्दौष्ठुल्यं व्यावर्तयतो योगिनस्तच्चित्तं विमुच्यते । एवमविद्योपहता क्लिष्टा प्रज्ञा न शुध्यतीति । अतः प्रज्ञा चाविद्या' [3]न च[3] दोष इति दर्शयति । को हि परिकल्पयन्वार्यत इति । परिकल्पनामात्रमेतदागमनिरपेक्षमिति कथयति ।

योऽपि मन्यते सर्वक्लेशाविद्येति । भदन्तश्रीलाभ एवं मन्यते ' अविद्येति सर्वक्लेशानामियं सामान्यसंज्ञा । न रागादिक्लेशव्यतिरिक्ताऽविद्या नामास्तीति । कस्मात् स एवं मन्यते' बुद्धसूत्रात् । न[4] प्रजानाति न[4] प्रजानातीत्यायुष्मन् महाकौष्ठिल तस्मादविद्येत्युच्यत इति' सत्कायदृष्ट्यादयोऽपि [5]क्लेशा अज्ञानस्वरूपा विपरीतग्रहणात इति । तस्याप्यत एवेति विस्तरः । तस्य भदन्तस्यात एव प्रतिषेधवचनाद्व्युदासः । प्रतिषेधस्तन्मतस्येत्यध्याहार्यम्[6] । कथमित्याह । सर्वक्लेशस्वभावा हि सती संयोजनादिषु पृथग् नोच्येत । [7]अनुशयसंयोजनादिष्वविद्यासंयोजनमिति पृथग् नोच्येत' शेषसंयोजनाव्यतिरेकात् । रागो बन्धनं द्वेषो

---

1 To. adds न.
2 To. वासनां
3...3 To. च न.
4...4 To. adds च.
5 Mss. क्लेशात्मज्ञान०
6 Mss. ०त्यध्याहार्यं
7 Mss. & To. अनुनय०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बन्धनमित्युक्त्वा मोहो बन्धनमिति। कामरागानुशयः इत्याद्युक्त्वा। अविद्यानुशय इति। ओघेष्वविद्यौघ इति। योगेष्वविद्यायोग इति पृथग्नैवोच्येत। कस्मात्। परस्परासंप्रयोगात्। **न हि दृष्टिर्दृष्ट्या संयुज्यते। रागो वा रागेण।** दृष्ट्यादिसंप्रयुक्ता चाविद्योक्ता। क्लेशमहाभूमिकत्वेन महाभूमिकसम्प्रयोगनियमात्। **चित्तमपि चाविद्योपक्लिष्टमेवोक्तं भवेत्।** रागोपक्लिष्टं चित्तं न विमुच्यत इति नोक्तं भवेत्। अविद्योपक्लिष्टत्ववचनेनैव रागाद्युपक्लिष्टत्वसिद्धेः। अथ मतम्। **विशेषणार्थं तथोक्तमिति।** रागलक्षणयाविद्ययोपक्लिष्टचित्तं न विमुच्यत इति। **प्रज्ञायामपि विशेषणं कर्तव्यं स्यात्।** रागेण प्रतिघेन मानेन वेति। माभूत् सर्वक्लेशग्रहणप्रसङ्ग इति। इष्ट इति चेत्। चित्तेऽपि न विशेषणं कर्तव्यं स्यात्। अविद्योपक्लिष्टं चित्तं न विमुच्यत इत्येवमेव तु वक्तव्यं स्यात्।

संप्रख्यानं [1]प्रज्ञानमित्येकोऽर्थः। **तथैव दोषो यथाविद्यायामिति।** अथा-**संप्रख्यानमिति** कोऽर्थः। **यन्न संप्रख्यानम्।** चक्षुरादिष्वपि प्रसङ्गः। संप्रख्यानाभावस्तर्हि। एवं सति न किञ्चित् स्यात्। न चैतद् युक्तमिति। **अथ संप्रख्यानविपक्षभूतं धर्मान्तरम्। तदिदं तथैव न ज्ञायते यथैवाविद्या। किं तदिति। एवं जातीयकोऽपीति** विस्तरः। एवं जातीयकः। कर्मप्रभावित इत्यर्थः। तस्मादविद्यायाः [2]कर्मणा कारित्रेण स्वभावो विज्ञातव्यः। अस्त्यसौ कश्चिद्धर्मो यो विद्याविपक्ष इति। विद्याविपक्षत्वं तस्याः कर्मेति। **तद् यथा चक्षुः कतमत्। यो रूपप्रसादश्चक्षुर्विज्ञानस्याश्रय** इति। ननु च रूपप्रसाद इति स्वभावप्रभावितोऽस्य निर्देश इति। न। अप्रत्यक्षत्वान्नित्यं चक्षुर्विज्ञानमेयत्वाच्च। **अस्मीति सत्त्वमयतेति।** अविज्ञातार्थमेतत्। न तेन स्थविरेणास्याभिधेयमवधारितम्। मयता पुनः सौत्रान्तिकैरविद्या प्रकारभिन्ना वर्ण्यते। मानो वा। [3]**यासौ सूत्र उक्तेति** विस्तरः। मयतानामित्यविद्यानां [4]प्रकारभिन्नानाम् नामेति ग्रहणम्। तृष्णादीनां पृथगुपदेशादिति भदन्तधर्मत्रातस्याभिप्रायः। आचार्य आह। **अस्त्येषा मयता।** अस्ति सूत्रे उक्ता मयता। तत्र जातिनिर्देशादेकवचनम्। सा त्वविद्येति। **कुतःकारणादेतत् परिच्छिद्यते। साविद्येति।** भदन्तधर्मत्रातः स्वाभिप्रायं विवृणोति। **यत एषा नान्यः क्लेशः शक्यते वक्तुमिति।** कस्मान्न शक्यते। तृष्णादृष्ट्यस्मिमानानां पृथगुक्तेः। आचार्य आह। **ननु चान्यो मान एव स्यादिति।** अस्मिमानादन्यः षन्नामन्यतमः। स[5] च मयता। नाविद्येत्यभि-

1 To. प्रज्ञा ज्ञानम् 2 To. कर्मणः
3 Mss. नामौ 4 Mss. प्रकारभिन्ना 5 Mss. सा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रायः । अत्र तु पुनर्विचार्यमाणे बहु वक्तव्यं जायत इति । अत्र पुनर्विचार्यमाणेऽविद्याङ्गे बहुरयं ग्रन्थो जायते' यथोक्तमिति । तस्मात्तिष्ठत्वेतत् 'एतावदेवास्त्विति ' अथवाऽन्यो मान एव स्यात् 'न पुनरविद्येति । कुत एतदित्येवमादिके पुनर्विचारे क्रियमाणे उत्तरप्रत्युत्तरवचनेन बहु वक्तव्यं जायते । तस्मात्तिष्ठत्वेतदलं विचारान्तरेणेत्यर्थः ॥२६॥

[नाम त्वरूपिणः स्कन्धाः स्पर्शाः षट् सन्निपातजाः ।
पञ्च प्रतिघसंस्पर्शाः षष्ठोऽधिवचनाह्वयः ॥३०॥]

अथ नामरूपमिति । अविद्याङ्गनिर्देशानन्तरं संस्काराङ्गं निर्देष्टव्यम् । तदनु विज्ञानाङ्गम्' किमित्येतदतिक्रम्योपन्यस्यते । एतदर्थमत्र वक्ष्यत्याचार्यः ।

उक्तं च वक्ष्यते चान्यत्[1]

इति । रूपं विस्तरेणोक्तमिति ।

रूपं पञ्चेन्द्रियाण्यर्थाः पञ्चाविज्ञप्तिरेव च[2]

इत्यत्र । नामेन्द्रियार्थवशेनेति विस्तरः । नामवशेन इन्द्रियवशेन अर्थवशेन चार्थेषु रूपादिषु नमतीति नाम । कतमस्य नाम्नो वशेनेति' नामद्वैविध्यात् पृच्छति । आचार्यस्त्वाचष्टे । यदिदं लोके[3] [4]प्रतीतमिति विस्तरः । गौरश्व इति' समुदायप्रत्यायकम् । रूपं रस इति 'एकार्थप्रत्यायकम् । तदेतद् वेदनादिस्कन्धचतुष्कं नामशब्देनोच्यते । यस्मात्तन्नामवशेन संज्ञाकरणवशेनार्थेष्वप्रत्यक्षेषु प्रत्यक्षेष्वपि वा नमति प्रवर्तते । अस्य नाम्नोऽयमर्थ इति । इन्द्रियार्थवशेन तु प्रत्यक्षेषु रूपादिषु नमत्युत्पद्यत इत्यर्थः । नाम्नि चाप्यर्थवशेन नमति' अस्यार्थस्येदं नामेति । एतस्य पुनः केन नामत्वमिति । एतस्य संज्ञाकरणलक्षणस्य[5] नाम्नः केन कारणेन नामत्वम् । तेषु तेष्वर्थेषु तस्य नाम्नो नमनादिति । यस्मात्तेष्वर्थेषु चतुःस्कन्धलक्षणं नाम' तन्नाम नमयति प्रवर्तयति' तस्मात् एतस्य नामत्वम्' नमयतीति नामेति कृत्वा । इह निक्षिप्त इति विस्तरः । मरणकाले निक्षिप्ते काय उपपत्त्यन्तरे नमनाद् गमनादरूपिणो वेदनादयः स्कन्धा नामेत्युच्यन्ते । यथोक्तम् । मृतस्य खलु कालं गतस्य ज्ञातय इमं पूतिकायमग्निना वा दहन्ति 'उदके वा[6] प्लावयन्ति 'भूमौ वा निखनन्ति'

1 Kārikā, III,36.
2 Kārikā, I,9.
3 Mss. लोकं
4 To. प्रतीतिमिति
5 Mss. संज्ञाकरणस्य लक्षणस्य
6 Mss. चा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वातातपाभ्यां वा परिशोषं परिक्षयं पर्यादानं गच्छति। यत् पुनरिदमुच्यते चित्तमिति वा मन इति वा विज्ञानमिति वा श्रद्धापरिभावितं शीलत्याग-श्रुतप्रज्ञापरिभावितं तदूर्ध्वगामि भवति' विशेषगाम्यायत्यां स्वर्गोपगमिति।

षडायतनमुक्तमिति।

तद्विज्ञानाश्रया रूपप्रसादाश्चक्षुरादयः[1]।

विज्ञानं प्रतिविज्ञप्तिर्मनआयतनं च तत्[2]

इत्यत्र। **मनइन्द्रियस्य पुनर्निरुद्धस्यानागतेन धर्मेण** रूपादिनोत्**पत्स्यमानेन** वर्तमानेन **मनोविज्ञानेन कथं सन्निपातः**। यः कार्य-**कारणभावः**' कार्यं मनोविज्ञानम्' कारणं मनइन्द्रियम्' धर्मश्च रूपादिः। **एककार्यार्थो वेति**। एककार्यमेवार्थ एककार्यार्थः' एककार्यत्वमित्यर्थः' कथमेककार्यार्थ इत्याह' **सर्वे च ते त्रयोऽपि** मनइन्द्रियादयः। **स्पर्शोत्पत्तौ प्रगुणा अनुकूला भवन्तीति**।

षट्षट्को धर्मपर्याय इति' षट् षट्कान्यस्मिन्निति षट्षट्कः। **आध्यात्मिकबाह्यविज्ञानस्पर्शवेदनातृष्णाषट्कसम्भवात्**। **षट्स्पर्शकाया** इति ज्ञापकम्। अनन्यत्वे हि सतीन्द्रियार्थविज्ञानेषूक्तेषु[3] स्पर्शकायवचनं पुनरुक्तं स्यात्। ततश्च षट्षट्कत्वं हीयते। **माभूत् धर्मायतनाद्वेदनातृष्णयोः पृथग्भाव** इति। यदि पृथङ्निर्देशात् पृथग्भावो भवेत्' वेदनातृष्णे अपि धर्मायतनात् पृथङ्निर्दिष्टे। तयोरपि वेदनातृष्णयोर्धर्मायतनात् पृथग्भावः स्यात्। न च तयोः पृथग्भाव इष्यते' धर्मायतनान्तर्भावात्। **नैष दोष** इति विस्तरः। नैष दोष इति यथोक्तस्तद्व्यतिरिक्तस्यापि वेदनातृष्णाव्यतिरिक्तस्यापि **धर्मायतनस्य** [4]तज्ञादिस्वभावस्य **भावादस्तित्वात्**। **न चैवमिति** विस्तरः। न चैवं भवतस्त्रयाणां सन्निपातः स्पर्श इत्येवं ब्रुवाणस्य' स्पर्शभूता-दिन्द्रियार्थविज्ञानत्रयादन्यदस्पर्शभूतं त्रयमिन्द्रियार्थविज्ञानत्रयमस्ति' **यस्य शेषस्यात्र सूत्रे ग्रहणं स्यात्**। षट् स्पर्शकाया इति प्रयोजनवशादपृथग्-भावेऽपि स्पर्शभूतात्त्रयात्। तस्मादपृथग्भावेऽपि वेदनातृष्णयोः पृथङ्निर्देशो-युक्तो विनेयकार्यवशात्। न तु भवतः सन्निपातमात्रस्पर्शवादिनः केनचिदपि प्रयोजनेन षट् स्पर्शकाया इति पृथङ्निर्देशो युक्तः। यस्मात् षट् स्पर्शकाया इति

1 Kārikā, I,9.
2 Kārikā, I,16.
3 Mss. ०षूक्तं
4 To. संज्ञादि०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वचनेनेन्द्रियार्थविज्ञानत्रयमुक्तमिति तद्वचनं प्राप्तमित्यतः षट्षट्को धर्मपर्याय इति न सिध्येत्। मम तु सिध्यति। स्पर्शवेदनातृष्णाषट्कवचनेऽपि तद्व्यतिरिक्तधर्मायतनायर्थेन्द्रियविज्ञानषट्कसम्भवात्। तस्मात् षट् स्पर्शकाया इति पृथङ् निर्देशादस्ति चित्तसम्प्रयुक्तं स्पर्शाख्यं धर्मान्तरमिति सिद्धम्। अथ ब्रूयादसौ इन्द्रियार्थावविज्ञानकौ निर्दिष्टावस्मिन् सूत्रे, षडाध्यात्मिकानि षड् बाह्यानीति वचनात्। अत इन्द्रियविषयविज्ञानत्रयं स्पर्शभूतमित्यस्य शेषस्य ज्ञापनार्थमत्र ग्रहणं स्यात् षट् स्पर्शकाया इति। अस्य समाधेः प्रतिषेधार्थमिदमारभ्यते। **यद्यपीन्द्रियार्थौ स्यातामविज्ञानकौ**। तत् सभागावित्यर्थः। **न तु पुनर्विज्ञानमनिन्द्रियार्थकम्**। अवश्यं हि विज्ञानं सेन्द्रियार्थकं भवति। तच्च विज्ञानमपदिष्टमत्र षड्विज्ञानकाया इति, **तस्मात्त्रिषु निर्दिष्टेषु** इन्द्रियार्थविज्ञानेषु षड्विज्ञानकायवचनेन **पुनः स्पर्शग्रहणमनर्थकं प्राप्नोति**, षट् स्पर्शकाया इति। अतः सन्निपातादन्यः स्पर्श इति सिद्धम्। अत्र भदन्तश्रीलाभ आह, **न खल्विति** विस्तरः। पूर्वोत्पन्ने **चक्षूरूपे कारणम्**, न तु विज्ञानसहोत्पन्ने, **नापि सर्वचक्षुर्विज्ञानमिति**। पश्चादुत्पन्नं पूर्वयोश्चक्षूरूपयोर्न सहोत्पन्नयोः। **अतो येषां कार्यकारणभावस्ते** विज्ञानेन्द्रियविषयाः **स्पर्शभावेन व्यवस्थिताः**, षट् स्पर्शकाया इत्यस्मिन् सूत्रे। तदिदमन्यथा न ज्ञापितं स्यात्।

न वा एवं पठन्ति, वै इति निपातः, न वै एवं [1]पठन्तीत्यर्थः, कथं[1] पुनः पठन्ति। य एषां धर्माणां [2]सङ्गतिः सन्निपातः समवायः[2] स स्पर्श इति पठन्ति। **कारणे वा कार्योपचारोऽयमिति**। सङ्गतौ सन्निपाते समवाये कारणे कार्योपचारः स्पर्श इति। **यथा सुखो बुद्धानामुत्पाद** इति, अतिबहुविस्तरेण प्रकारेण विसर्तुं शीलमस्या इति **अतिबहुविस्तरप्रकारविसारिणी**।

अधिवचनमुच्यते नामेति। अध्युच्यतेऽनेनेत्यधिवचनम्। वाङ् नाम्नि प्रवर्तते, नामार्थं द्योतयति इत्यधिवचनं नाम। **तत्र किल नामार्थे**[3] मनोविज्ञानसम्प्रयुक्तस्याधिकं बाहुल्येनालम्बनम्। अतोऽधिवचनं **संस्पर्श** इति। स्पर्शः संस्पर्श इत्येकोऽर्थः। **मनोविज्ञानेन नीलं विजानातीति**, अभिधेयं विजानातीत्यर्थः। **नीलमिति च विजानातीति** अस्यार्थस्येदं नामेति विजानाति। **एक आश्रयप्रभावित** इति,

1...1 Mss. पठन्तीत्यर्थताफलं। 2...2 Mss. & To. सङ्गतिः सन्निपातात् समवायात्; To. adds उत्पन्नः. 3 To. नामास्य.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रथम आश्रयेण प्रभावितः प्रतिघाश्रयः संस्पर्शः। प्रतिघस्य वा संस्पर्शः प्रतिघसंस्पर्शः। आलम्बनप्रभावितः इति। अधिवचनादालम्बनसंस्पर्शः। अधिवचने वा संस्पर्शः अधिवचनसंस्पर्श इति। वचनमधिकृत्येति।[1] वचनमवधार्य। अर्थेषु रूपादिषु मनोविज्ञानस्य प्रवृत्तिः। न चक्षुर्विज्ञानादीनां वचनमधिकृत्यार्थेषु प्रवृत्तिः। अतस्तदेवाधिवचनं मनोविज्ञानं वचने प्रवर्ततेऽधिवचनमिति। तेन सम्प्रयुक्तस्तस्य वा संस्पर्शस्याधिवचनसंस्पर्शः। तेन चायं द्वितीयः संस्पर्शः सम्प्रयोगप्रभावित इत्युच्यते ॥३०॥

[विद्याविद्येतरस्पर्शा अमलक्लिष्टशेषिताः ।
व्यापादानुनयस्पर्शौ सुखवेद्यादयस्त्रयः ॥३१॥]

विद्याविद्येतरस्पर्शाः

इति। विद्या अविद्या इतरश्च विद्याविद्येतरे। त एव स्पर्शा[2] विद्याविद्येतरस्पर्शाः। विद्या चाविद्या चेति। विद्याह्वः[3] अविद्याह्वः[3]। ताभ्यामितरश्चेत्यर्थः। विद्येत्यनास्रवा प्रज्ञा अविद्या क्लिष्टमज्ञानम्। नैवविद्यानाविद्या[4] कुशलसास्रवा[5] प्रज्ञा। तत् संप्रयुक्ता एते यथाक्रमं संस्पर्शा वेदितव्याः। पुनरविद्यासंस्पर्शस्येति विस्तरः। अविद्यासंस्पर्शस्य सर्वक्लेशसंप्रयुक्तस्य अभीक्ष्णसमुदाचारी नित्यसमुदाचारी। एकदेशः। तस्य ग्रहणाद् द्वौ स्पर्शौ भवतः।

व्यापादानुनयस्पर्शौ सुखवेद्यादयस्त्रयः

इति। सुखस्य वेदः[6] सुखवेदे साधुः[7] सुखवेद्यः। सुखं वा वेद्यमस्मिन्निति सुखवेद्यः। स आदिरेषामिति सुखवेद्यादयः। सुखवेदनादिहितत्वादिति। सुखवेदनायै[8] हितः। सुखवेदनीयः। प्राक्क्रीताच्छः[9]। वेद्यते तद्वेदयितुं वा शक्यमिति। वेद्यत इति कर्ममात्रे कृत्य इति दर्शयति। वेदयितुं शक्यमिति।[10] अर्हे कृत्यतृचश्चेत्यस्मिन्नर्थे कृत्य इति दर्शयति। त एते षोडशेति। चक्षुःसंस्पर्शो यावन्मनःसंस्पर्श इति षट्। पुनः प्रतिघसंस्पर्शोऽधिवचनसंस्पर्शो विद्यासंस्पर्शोऽविद्या-

---

1 To. omits इति ; Mss. add वचनमधिकृत्य.
2 Mss. स्पर्श
3...3 V. विद्याङ्गः अविद्याङ्गः
4 To. adds या.
5 To. adds या चानिवृताव्याकृता.
6 To. adds सुखवेदः.
7 Mss. साधु
8 To. सुखवेदनायै
9 Pā., V,1,1.
10 Pā., III,3, 169.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संस्पर्शो नैवविद्यानाविद्यासंस्पर्शो व्यापादसंस्पर्शोऽनुनयसंस्पर्शः सुखवेदनीयो दुःखवेदनीयोऽदुःखासुखवेदनीयश्च स्पर्श इति षोडश ॥३१॥

उक्तः स्पर्शो वेदना वक्तव्येति। ननु च वेदनाप्युक्ता

वेदनानुभवः[1]

इति।[2]अन्यथोक्तमप्युच्यते। न तर्हीदं वक्तव्यं यच्चोक्तं यच्च वक्ष्यमाणम्। तत्र वक्ष्यामीति।

उक्तं च वक्ष्यते चान्यत्[3]

इति वचनात्। प्रकारनिर्देशाददोषः। पूर्वं लक्षणमुक्तं इदानीं प्रकार इति।

[तज्जाः षड्वेदनाः पञ्च कायिकी चैतसी परा।

पुनश्चाष्टादशविधा सा मनोपविचारतः ॥३२॥]

जाते हीति विस्तरः। जाते हि जन्ये **धर्मे धर्मस्य** जनकस्य **नास्ति सामर्थ्यं** सहोत्पन्नत्वात्। **प्रतिज्ञाविशिष्टमिति**। प्रतिज्ञाया अविशिष्टमेतत् साधनमित्यर्थः। यदि प्रतिज्ञाविशिष्टं साधनं नेष्यते। **अन्योन्य-जनकप्रसङ्गात्तर्हि**। किं कथं सहोत्पन्नयोर्जन्यजनकभावः सिध्यतीत्यधिकृतम्। अनेन प्रतिज्ञादोष उद्ग्राह्यते। अस्ति सहोत्पन्नयोर्जन्यजनकभाव इति प्रतिज्ञा पूर्वाभ्युपगमविरोधिनीति। **इष्टत्वाददोष** इति। पूर्वाभ्युपगमं दर्शयति। **इष्टमिदं सूत्रे त्वनिष्टमिति**। इष्टमिदमभिधर्मे।

सहभूर्ये मिथःफलाः[4]

इति। सूत्रे त्वनिष्टम्। तत् प्रतिपादयन्नाह। **चक्षुःसंस्पर्शं प्रतीत्योत्पद्यते चक्षुःसंस्पर्शजा वेदनेति**। सूत्रप्रामाण्येनान्योन्यफलत्वं भंक्त्वा सहोत्पन्नकार्यकारणभावविभंक्तया आह। **जनकधर्मातिक्रमाच्चायुक्तमिति**। **जनकस्यायं धर्मः प्रसिद्धो या भिन्नकालता तद्यथा पूर्वं बीजं पश्चादङ्कुर** इत्यादि। **तत्रापि पूर्वमिन्द्रियार्थौ पश्चाद्विज्ञानमिति**। प्रथमक्षणोत्पन्नाविन्द्रियार्थौ विज्ञानं तु द्वितीये क्षण इति। **यथा तर्हि छायाङ्कुरयोरिति**। किम्। सहोत्पन्नयोर्जन्यजनकभावः। उत्पन्न एव ह्यङ्कुरश्छायां जनयति। न प्रथमे क्षणेऽङ्कुरो निश्छायो भवति द्वितीये सच्छाय इति। **एवं स्पर्शवेदनयोरपीति**। अनयोरपि छायाङ्कुरयोः पूर्वसामग्रीहेतुरिति शक्यं वक्तुम्। सहभूहेतुनिर्देशे त्वयमर्थ उक्त इति न पुनरुच्यते।

---

1 Kārikā, I,14.

2 To. अथोक्त॰

3 Kārikā, III, 36.

4 Kārikā, II,50.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्पर्शादुत्तरकालं वेदनेत्यपर इति भदन्तश्रीलाभः। सोऽसौ त्रयाणां सन्निपातः स्पर्श इति। योऽयं जनकजनितभावः। वेदनातृतीये क्षणे इति। इन्द्रियार्थक्षणः प्रथमः विज्ञानोत्पत्तिक्षणो द्वितीयो वेदनोत्पत्तिक्षणस्तृतीय इति। न सर्वत्र विज्ञाने वेदना प्राप्नोतीति। विज्ञानक्षणे द्वितीये वेदनाया अभावात्। न च सर्वविज्ञानं स्पर्शः। वेदनाक्षणे तृतीये विज्ञानं न स्पर्शः। पूर्वद्वितीयक्षणयोः स्पर्श एव विधीयते। पूर्वस्पर्शहेतुका [1]ह्युत्तरत्र स्पर्शे वेदना। योऽयमिदानीं द्वितीयः क्षणः स्पर्शभावेनोक्तस्तत्र पूर्वस्पर्शहेतुका प्रथमक्षणविज्ञानहेतुका वेदनोत्पद्यते। तत् स्पर्शपूर्विकाऽप्यन्यस्मिन्नित्येवं सर्वत्र विज्ञाने वेदना प्राप्नोति। सर्वं च विज्ञानं स्पर्श इति। ते च स्पर्शाः सवेदनका इति। भिन्नालम्बनयोरिति विस्तरः। भिन्नमालम्बनमनयोस्तौ भिन्नालम्बनौ। पूर्वस्य [2]रूपमालम्बनमुत्तरस्य शब्दः। तयोर्भिन्नालम्बनयोः पूर्वस्पर्शहेतुका रूपालम्बनस्पर्शहेतुका उत्तरत्र स्पर्शे शब्दालम्बने यद् वेदनोत्पद्यते। इत्येतदयुक्तम्। कथं हि नामेति दोषमाविष्करोति। अन्यजातीयालम्बनस्पर्शसम्भूता रूपप्रकारालम्बनात् स्पर्शात् सम्भूता वेदना अन्यालम्बना भविष्यति। शब्दालम्बना भविष्यति। विधुरकारणत्वात् कार्यस्यासम्भावना। यदा हि रूपालम्बनात् स्पर्शात् सम्भूता वेदना रूपालम्बनैव वेदना भविष्यति। तदा पूर्वस्पर्शहेतुकोत्तरत्र स्पर्शे वेदनेति युक्तम्। यदा तु रूपालम्बनात् स्पर्शात् शब्दालम्बना वेदनोत्पद्यते। तदा कथं तद्योक्ष्यते। कारणानुरूपं हि लोके कार्यं दृश्यते। अथ मतम्। रूपालम्बनात् स्पर्शात् सम्भूता वेदना शब्दालम्बनस्पर्शसंप्रयुक्तापि रूपालम्बना भवतीति। अत इदमाह। येन वा चित्तेन सम्प्रयुक्ता ततो भिन्नालम्बनेति। ततः शब्दालम्बनाच्चित्ताद्भिन्नालम्बना यत उत्पन्ना रूपालम्बना। तेन समालम्बनेत्यर्थः। कथं चासौ तेन सम्प्रयुक्तेत्युच्यते। समं प्रयुक्ता हि सम्प्रयुक्ता। यद्यभिन्नाश्रयत्वात् कथं श्रोत्राश्रयोत्पन्ना सती रूपालम्बना भविष्यति। कथं न भविष्यति। चित्तचैत्तानामाश्रयेणैकविषयप्रवृत्तत्वात्। तस्मादन्यतरालम्बनत्वेऽपि वेदनाया दोषः। स दोषः प्रदर्श्यते। यदि तावत् रूपालम्बनात् स्पर्शादुत्पन्ना वेदना शब्दाद्यालम्बनान्तरमालम्बते। स रूपालम्बनः स्पर्शः सुखवेदनीयो यावत् दुःखासुखवेदनीय इति न प्राप्नोति। एकालम्बनय तु वेदनया तथा निर्देशो युक्त इति। अस्तु तर्हीति विस्तरः। यद्येवं दोषोऽस्तु तर्हि तस्मिन् काले। कस्मिन् काले। शब्दालम्बनकाले। स्पर्शभूतं

1 To. ह्युत्तर

2 Mss. रूपालम्बनम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विज्ञानमवेदनकम्[1] । तस्माच्च शब्दालम्बनाद् **यत् पूर्वं विज्ञानं सवेदनकं तन्न स्पर्शः** । एवं हि निर्दोषं भवतीति । अन्यथा हि यदि पूर्वोत्पन्नं सवेदनकं विज्ञानं स्पर्शः स्यात् । तदैवं स्पर्शप्रत्यया वेदनेति यथोक्तो दोषः स्यात् । किं[2] पुनः कारणम् । किञ्चिद्**विज्ञानमवेदनकम्**[3] । किञ्चिच्च न स्पर्शः । **प्रत्ययवैधुर्यात्** । विधुरा हि प्रत्यया विप्रतिबन्धेनावस्थिताः । न हि सर्वः समनन्तरप्रत्ययो वेदनाप्रत्ययं स्पर्शभूतं विज्ञानं जनयितुं समर्थ इति । तदेवं तस्य भिन्नालम्बनं विज्ञानमेकान्तेनावेदनकम् । तदुत्पादकं चास्पर्शभूतम् । यदि तु रूपालम्बनाच्चक्षुर्विज्ञानादनन्तरं रूपालम्बनमेव चक्षुर्विज्ञानमेवमुत्पद्यते[4] । मनोविज्ञानं [5]तत् सवेदनकं पूर्वोत्पन्नं स्पर्श इति । एवं सतीति । **महाभूमिकनियमो भिद्यत इति** । स्पर्शवेदनयोः पर्यायेण नियमात् । **तिस्रो भूमय** इति । **सवितर्का सविचारा** कामधातुः प्रथमं च ध्यानम् । **अवितर्का विचारमात्रा** ध्यानान्तरम् । **अवितर्का अविचारा** द्वितीयाद्ध्यानात् प्रभृति यावद्भवाग्रम् । **कुशला भूमिः** कुशला धर्माः । **एवमकुशला अव्याकृताः** । **शैक्षी भूमिः** शैक्षस्यानास्रवा धर्माः । **अशैक्षी** अशैक्षस्यानास्रवा धर्माः । **नैवशैक्षीनाशैक्षी भूमिः** सास्रवा धर्माः । असंस्कृता इह नोच्यन्ते । चैत्तसम्बन्धात् । **तद् य एतस्यामिति** विस्तरः । तदिति वाक्योपन्यासे । य इति ये चैतसिकाः । एतस्यां सर्वस्यां भूमाविति । सवितर्कसविचारायां भूमौ । यावन्नैवशैक्षीनाशैक्ष्यां भूमौ । **ते महाभूमिकाः** । वेदनाचेतनादयो यथोक्ताः । **ये कुशलायामेव भूमौ ते कुशलमहाभूमिकाः** श्रद्धादयः । **ये क्लिष्टायामेव ते क्लेशमहाभूमिका** अविद्यादयो यथोक्ता एव । **ते पुनर्यथासम्भवमिति** विस्तरः । ते पुनर्महाभूमिकादयो ये यस्यां सम्भवन्ति ते तस्यां **पर्यायेण** । **न तु सर्वे युगपदित्यपरे** । तद् यथा वेदना सर्वासु भूमिषु भवन्त्यपि[6] न युगपत् संज्ञाचेतनास्पर्शमनस्कारादिभिर्भवति । तथा स्पर्शो वेदनादिभिः[7] । तथा कुशलायां वितर्कादय इत्येवमादिकम्[8] । अपरे पुनरेवं व्याचक्षते । यथा पञ्चस्कन्धके लिखितं तथेदं ग्रहीतव्यमिति । तद्यथा छन्दः कतमः । अभिप्रेतवस्तुन्यभिलाषः । अनभिप्रेते नास्ति

---

1 Mss. मवेदकं
2 To. omits किं.
3 Mss. मवेदकं
4 To. ॰विज्ञानमुत्पद्यते
5 To. adds वा.
6 To. भवत्यपि
7 Mss. ॰दिति
8 Mss. इत्येकादिकम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

छन्द इत्यभिप्रायः । अधिमोक्षः कतमः ' निश्चिते वस्तुनि तथैवावधारणम् । स्मृतिः कतमा ' संस्तुते वस्तुन्यसम्प्रमोषश्चेतसोऽभिलपनता । समाधिः कतमः ' उपपरीक्ष्ये वस्तुनि चित्तस्यैकाग्रता । प्रज्ञा कतमा ' तत्रैव प्रविचयो योगायोगविहितोऽन्यथा च । इत्येवमादिः पञ्चस्कन्धकग्रन्थो द्रष्टव्यः । तत्र ह्युक्तं पञ्च सर्वत्रगा वेदनासंज्ञास्पर्शमनस्कारचेतनाः । पञ्च प्रतिनियतविषयायाश्छन्दाधिमोक्षस्मृतिसमाधिप्रज्ञा इत्येवमादि । **अकुशलमहाभूमिकास्तु पाठप्रसङ्गेनासंहिता** इति सूत्रादिषु पाठात् । कुशलमकुशलमव्याकृतमित्येवं पाठप्रसङ्गेनासंहिताः ' अध्यारोपिताः पश्चादित्यर्थः । **पूर्वं न पठ्यन्ते स्म** ' प्रकरणपादे महाभूमिकाः कुशलमहाभूमिकाः क्लेशकुशलमहाभूमिकाः परीत्तक्लेशमहाभूमिकाश्चेति चतुर्विधाः[1] पठ्यन्ते । **सहजाता इत्युच्यन्ते** ' **न स्पर्शसहजाता** इति । अविशेषितत्वादेते वेदनादयः परस्परसहजाताः । न तु स्पर्शेनेत्यर्थपरिग्रहेण[2] परिहर्तव्यं सूत्रमित्यर्थः । **मैत्रीसहगतमिति** ' अयं सहशब्दो नावश्यं युगपद्भावे ' समनन्तरेऽपि दृष्टः । न हि मैत्र्याः स्मृतिसम्बोध्यङ्गस्य च समवधानमस्ति ' मैत्र्या एकान्तसास्रवत्वात् ' स्मृतिसम्बोध्यङ्गस्य चैकान्तानास्रवत्वात् । **तस्मादज्ञापकमेतत्** । **संसृष्टा** इति ' सहोत्पन्ना इत्यभिप्रायः । **तत्र हि सूत्र** इति । यत्रैवोक्तम् । **या वेदना या चेतना**[3] **या च संज्ञे**ति विस्तरेण ' तत्र सूत्र इत्यर्थः । **तन्न विज्ञायत** इति विस्तरः । **किं तावदयमेषां वेदनादीनमालम्बननियमः** । आलम्बने नियमः । यदेवालम्बनं वेदयते ' तदेव चेतयते यावद्विज्ञानं विजानातीति ' **उताहो क्षणनियमः** ' यस्मिन्नेव क्षणे वेदयते तस्मिन्नेव यावद् विजानातीति । वयं ब्रूमः ' आलम्बननियमोऽयमिति । तस्मान्न सूत्रविरोध इत्यभिप्रायः । आचार्य आह ' तत्रैव सूत्रे **आयुरुष्मणोः सहभाव्ये संसृष्टवचनात् सिद्धः क्षणनियम** इति । आयुरुष्मा च संसृष्टौ ' इमौ धर्मौ न विसंसृष्टावित्यायुरुष्मणोः सहोत्पन्नतोक्ता भवति ' तयोरनालम्बनत्वात् । तदेवं साधितं भवति ' अवश्यं सहोत्पन्नानि वेदनासंज्ञाचेतनाविज्ञानानि ' तत्र सूत्रे संसृष्टवचनेनोक्तत्वात् ' आयुरुष्मवदिति । **तत् कथमिति** विस्तरः । तत् कथं **विज्ञानं चास्ति** । **न च त्रयाणामिन्द्रियविषयविज्ञानानां सन्निपातः** ' तस्मादवश्यं विज्ञानास्तित्वे सन्निपातोऽभ्युपगन्तव्यः ।

---

1 Mss. and To. चतुर्विधा. 2 Mss. ०त्यर्थः परिग्रहेण

3 Mss. omit या चेतना. Tib, *sems pa gan.*

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सन्निपातश्च ते स्पर्शइति' तेनेदं ते विरुध्यते **न सर्वविज्ञानं स्पर्श** इति' **सन्निपातो वा न स्पर्श** इति ।

पुनः सन्धिकरणं चात्र द्रष्टव्यमिति । [1]पूर्वत्रासिद्धमिति सकार-लोपस्यासिद्धत्वात् गुणो न प्राप्नोति । परिहारस्तु ' ईषदर्थेऽयं नञ् द्रष्टव्यः' ईषत्सिद्धमसिद्धमित्यतः सिद्धत्वात् सकारलोपस्य गुणो भवति' सैष दाशरथी राम इति यथा । **षट्सौमनस्योपविचारा** इति विस्तरः । चक्षुषा रूपाणि दृष्ट्वा सौमनस्यस्थानीयानि रूपाण्युपविचरति' श्रोत्रेण शब्दान् श्रुत्वा सौमनस्यस्थानीयान् शब्दानुपविचरति ' एवं यावन्मनसा धर्मान् विज्ञाय सौमनस्यस्थानीयान् धर्मान् उपविचरति' एवं चक्षुषा रूपाणि दृष्ट्वा दौर्मनस्य-स्थानीयान्युपेक्षास्थानीयानि चेति विस्तरेण योज्यम् । **त्रयो भविष्यन्तीति**' सौमनस्यदौर्मनस्योपेक्षास्वभावत्रैविध्यात् । **एक** इति' **मनोविज्ञानमात्रसम्प्रयोगात्** । **षडिति** ' रूपादिविषयषट्कभेदात् । **त्रिभिरपि स्थापनेति** । यद्वेदनाद्रव्यं मनोविज्ञानमात्रसम्प्रयुक्तमेकम् ' तत् सौमनस्यादिस्वभावत्रयभेदात्त्रिधा भिद्यते । तत् पुनः प्रत्येकं विषयषट्कभेदात् षोढा भिद्यते ' **इत्यष्टादश** भवन्ति' स्वभावव्यवस्थापनायामसत्यां सौमनस्यदौर्मनस्योपेक्षोपविचारा इति न स्यात् । सम्प्रयोगव्यवस्थापनायामसत्यां मनोपविचारा इत्येव न स्यादष्टादशव्यतिरिक्ताश्च स्युः ' रूपादिविषयषट्कालम्बनव्यवस्थापनायामसत्यां प्रत्येकं सौमनस्यादि-षोढाभेदेनाष्टादश मनोपरिचारा इति न स्यात् । तस्मात्त्रिभिरपि व्यवस्थापनेति सिद्धम् । **असम्भिन्नालम्बना** इति' असम्मिश्रालम्बनाः । **त्रयो धर्मोपविचारा उभयथेति**' ये रूपादिविषयपञ्चकव्यतिरिक्तधर्मालम्बनास्ते धर्मोपविचारा अस-म्भिन्नालम्बनाः । ये तु रूपादीनां षण्णां विषयाणां द्वौ त्रीन् यावत् षडपि विषयानालम्बन्ते ते सम्भिन्नालम्बनाः।

मनः किलेति । किलशब्दः परमतद्योतकः' मनः किल **प्रतीत्या-श्रित्य** **विषयानुपविचरन्त्यालम्बन्त** इत्यर्थः ' **उपविचारयन्तीति** प्रवर्तयन्ति । कथमित्याह ' **वेदनावशेन मनसो विषयेषु पुनः पुनर्विचा-रणादिति**' पुनःपुनरित्युपशब्दस्यार्थः । **नाप्युपविचारिकेति** 'असन्तीरिकेत्यर्थः' **अयोग** इत्यसम्भवः । यदि मन एवाश्रिता वेदना मनोपविचारः' **तृतीये ध्याने** यत् सुखं तन्मन एवाश्रितम् । न चक्षुरिन्द्रियाद्याश्रितमिति' **तस्य कस्मान्मनोप विचारेष्वग्रहणम्**' **आदितः किलेति** विस्तरः । आदावादितः' किलेति परमते'

1 Pā., VIII, 2,1.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कामधातौ मनोभूमिकं सुखं नास्ति । तस्मान्न तन्मनोपविचारः । अतः पश्चादपि तृतीये ध्याने सुखेन्द्रियस्य मनआश्रितत्वेऽपि मनोपविचारेष्वग्रहणम् । यथा [1]चास्योपविचारस्य प्रतिद्वन्द्वेन दौर्मनस्योपविचारः । नैवं सुखोपविचारस्य प्रतिद्वन्द्वेन दुःखोपविचारोऽस्ति । मनोविज्ञानाश्रितत्वाद्दुःखस्य । अतः सर्वत्र तत् सुखं न मनोपविचार इति ।

सौमनस्यस्थानीयानीति । सौमनस्यजनकानि । **पञ्चेति** विस्तरः । पञ्चभिर्विज्ञानकायैरभिनिर्हृतत्वमुत्पादितत्वमभिसन्धाय चेतसिकृत्वा एतदुक्तं चक्षुषा रूपाणीति विस्तरेण । **मनोभूमिकास्त्वेते** । तद् यथा अशुभा चक्षुर्विज्ञानाभिनिर्हृता च । पूर्वं विलीनकादिदर्शनात् । मनोभूमिका च समाहितत्वात् । **अपि त्विति** । चक्षुषा रूपाणि दृष्ट्वा यावत् कायेन स्प्रष्टव्यानि स्पृष्ट्वेति वचनादचोद्यमेतत् । यदि चक्षुषा रूपाणि पश्यन् सौमनस्यस्थानीयानि [2]रूपाण्युपविचरतीत्युक्तं स्यात् । यावत् कायेन स्प्रष्टव्यानि स्पृशन्निति । स्याच्चोद्यम् । न त्वेवमुक्तमित्यचोद्यमेवैतत् । **योऽप्यदृष्ट्वेति** विस्तरः । योऽपि श्रुत्वा परतो मनसोपविचरत्यालम्बते । तेऽपि तस्य मनोपविचाराः । **इतरथा हीति** विस्तरः । रूपधात्वालम्बना रूपाद्युपविचारा न स्युः । कामधातूपपन्नेन रूपावचराणां रूपादीनामप्रत्यक्षीकृतत्वात् । कामधात्वालम्बनाश्च गन्धरसस्प्रष्टव्योपविचारा रूपधातूपपन्नस्य न स्युः । तस्य गन्धादीनामविपयत्वात् । **यथा तु व्यक्ततरं [3]तथोक्तमिति** । प्रत्यक्षीकृतरूपाद्यालम्बनानां मनोपरिचाराणां व्यक्ततरत्वात् । **योऽपि रूपाणि दृष्ट्वा** तत्सहचराञ्छब्दा[4]नुपविचरति **सोऽपि तस्य मनोपविचारः** । **यथा त्वनाकुलं तथोक्तम्** । कथं चानाकुलमित्याह । **इन्द्रियार्थव्यवच्छेदत इति** । चक्षुरादीन्द्रियव्यवच्छेदेन । रूपाद्यर्थव्यवच्छेदेन चोक्तमिति । अन्यथा ह्याकुलं स्यात् । चक्षुषा रूपाणि दृष्ट्वा सौमनस्यस्थानीयाञ्[5]छब्दानुपविचरतीत्येवमादि । **अस्ति सन्तानं [6]नियम्येति** । कस्यचित् सत्त्वस्य सन्तानमवेक्ष्य । यदस्य किञ्चित् सौमनस्यस्थानीयमेव । यावदुपेक्षास्थानीयमेव । न त्वालम्बनम् । किम् । नियम्य । किम् कारणम् । तदेव ह्यालम्बनम् कस्यचित् सौमनस्यस्थानीयम् । कस्यचिन्नेति ॥३२॥

---

1 To. सौमनस्योपविचारस्य 2 Mss. रूपाण्युपविचारो विचरति०
3 To. यथोक्तम् ; Tib. *de' ltar' bsad' de*
4 To. ०चरांछन्दा ; Tib. *sgra. rnams* 5 Mss. & To. छन्दा०
6 Mss. नियपममम्येति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[कामे स्वालम्बनाः सर्वे रूपी द्वादशगोचरः ।
त्रयाणामुत्तरो ध्यानद्वये द्वादश कामगाः ॥३३॥]

एवं यावदारूप्यप्रतिसंयुक्ता इति । कति रूपप्रतिसंयुक्ताः । तेषां च कति [1]रूपालम्बनाः । कत्यारूप्यप्रतिसंयुक्तास्तेषां च कति किमालम्वना इति ।

कामे स्वालम्बनाः सर्वे

इति । कामे [2]कामावचरा मनोपविचाराः । सर्वेऽष्टादश सन्ति । स एव च कामधातुस्तेषां सर्वेषामालम्बनम् । स्वो धातुरालम्बनमेषामिति स्वालम्बना इति कारिकापदविग्रहः ।

रूपी द्वादशगोचरः

इति । रूपी धातुः कामावचराणां द्वादशानां मनोपविचाराणां गोचरः । षड्-गन्धरसोपविचारानपास्येति । द्वौ गन्धरसावालम्बनौ सौमनस्योपविचारौ हित्वा द्वौ गन्धरसालम्बनौ दौर्मनस्योपविचारौ हित्वा द्वौ तदालम्बनावेव चोपेक्षोप-विचारौ हित्वेति । कस्मात् । तत्र रूपधातौ तयोर्गन्धरसयोरभावात् ।

विना गन्धरसघ्राणजिह्वाविज्ञानधातुभिः[3]

इति वचनात् ।

त्रयाणामुत्तरः

इति । त्रयाणां सौमनस्यदौर्मनस्योपेक्षाधर्मोपविचाराणां कामावचराणा-मुत्तरो धातुरारूप्यधातुरालम्बनम् । तत्र रूपाद्यभावात् ।

ध्यानद्वये द्वादश

इति । दौर्मनस्योपविचाराणां षण्णामभावात् ॥३३॥

[स्वोऽष्टालम्बनमारूप्यं द्वयोर्ध्यानद्वये तु षट् ।
कामः षण्णां चतुर्णां स्व एकस्यालम्बनं परः ॥३४॥]

स्वोऽष्टालम्बनम्

इति । अष्टानामालम्वनमष्टालम्बनम् । गन्धरसोपविचारांश्चतुरो हित्वेति । सौम-नस्योपेक्षोपविचारौ गन्धालम्बनौ द्वौ रसालम्बनौ च द्वौ हित्वेत्यर्थः । तत्र तयोरभावात् ।

आरूप्यं[4] द्वयोः

इति । सौमनस्योपेक्षाधर्मोपविचारयोः । प्रथमद्वितीयध्यानभूमिकयोरारूप्य-

---

1 To. क्रिमालम्बनाः
2 To. कामावचराणां
3 Kārikā, I, 30.
4 Mss. & To. आरूप्या

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धातुरालम्बनम् । रूपाद्यभावात् । षडुपेक्षोपविचारा एव सन्ति नान्य इति । रूपशब्दगन्धरसस्प्रष्टव्यधर्मालम्बना उपेक्षोपविचारा एव सन्ति । सौमनस्योपविचाराणामपि तृतीये चतुर्थे चाभावात् । गन्धरसालम्बनौ तु तत्र कामावचरगन्धरसालम्बनावित्यवगन्तव्यम् ॥३४॥

[चत्वारोऽरूपिसामन्ते रूपगा एक ऊर्ध्वगः ।
एको मौले स्वविषयः सर्वेऽष्टादश सास्रवाः ।]॥३५॥

तत्र चत्वार इति । आकाशानन्त्यायतनसामन्तकानन्तर्यमार्गस्य चतुर्थध्यानालम्बनत्वात् । तत्र च रूपशब्दस्प्रष्टव्यधर्मसद्भावात् । **येषां तद्व्यवच्छिन्नालम्बनमस्तीति** । येषामाचार्याणां मतेन तदाकाशानन्त्यायतनसामन्तकं व्यवच्छिन्नालम्बनं पृथक् पृथग्रूपाद्यालम्बनमसमस्तालम्बनमित्यर्थः । औदारिकादिभिराकारैस्तच्चतुर्थध्यानमालम्बत इत्येकेषामाचार्याणां मतम् । **येषामाचार्याणां मतेन परिपिण्डितालम्बनमेव** तदाकाशानन्त्यायतनसामन्तकं चतुर्थध्यानभूमिकस्कन्धपञ्चकालम्बनमिति मतम् । तेषामाचार्याणां **तत्रैक एव सम्मिश्रालम्बनो धर्मोपविचार** इति ।

एक ऊर्ध्वगः

इति । केषां पक्षे । येषाम्

चत्वारोऽरूपिसामन्ते

इति पक्षः । न हि मौलानामिति विस्तरः । मौलानामारूप्याणामधरो धातुर्नालम्बनमधरभूमिकं सास्रवं वस्तु नालम्बनमित्यर्थः । पश्चात् प्रवेदयिष्यामीति ।

न मौलाः कुशलारूप्याः सास्रवाधरगोचराः[1]

इति ।

प्रथमेति विस्तरः । **प्रथमद्वितीयध्यानभूमिकैरष्टाभिः समन्वागतस्तृतीयचतुर्थध्यानभूमिकैश्चतुर्भिः** । कतमैरित्याह । **क्लिष्टैः** । **गन्धरसालम्बनान् पर्युदस्य** । तत्र गन्धरसाभावात् । कथम् । प्रथमद्वितीययोर्ध्यानयोर्द्वादशोपविचाराः सन्तीत्युक्तम्[2] । सौमनस्योपेक्षोपविचाराणां षड्विषयालम्बनव्यवस्थापनात् । तत्र स्वभूम्यालम्बना रूपशब्दस्प्रष्टव्यधर्मालम्बनाः सौमनस्योपविचाराश्चत्वारः क्लिष्टाः । ये चोपेक्षोपविचाराः क्लिष्टा एव चत्वारः

1 Kārikā, VIII, 2I,

2 Mss. ०त्युक्ताः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तैः कामधातूपपन्नो रूपावचरकुशलालाभी समन्वागतः। अधरभूम्युपपन्नो ह्यूर्ध्वभूमिकैः क्लिष्टैः समन्वागतो भवति, न तु विशिष्टैश्चतुर्भिर्गन्धरसालम्बनैः, तेषामक्लिष्टत्वात्, रूपावचरकुशलालाभित्वाच्च। नास्त्यक्लिष्टरूपावचर-धर्मलाभ इति, न तैः समन्वागतः। तृतीयचतुर्थध्यानभूमिका अपि षडेवोपेक्षोपविचारा उक्ताः, तेषां ये स्वभूम्यालम्बनाः क्लिष्टाः, तैः समन्वागत स्तथा, यौ तु गन्धरसालम्बनौ न तौ क्लिष्टौ। अतः पूर्वोक्तेनैव न्यायेन न ताभ्यां समन्वागतः। क्लिष्टेनैवेति, नाक्लिष्टेन, कुशलस्याभावात्। **लाभी रूपावच-रस्येति विस्तरः।** कामधातूपपन्न[1] एव **लाभी रूपावचरस्य कुशलस्य चित्तस्या-नागम्यसंगृहीतस्यावीतरागः कामधातोः सर्वैः** कामावचरैरष्टादशभिरपि **समन्वा-गतः। प्रथमध्यानभूमिकैर्दशभिरिति।** कथं दशभिरित्याह, **सौमनस्योप-विचारैः क्लिष्टैर्गन्धरसालम्बनावपास्येति,** सौमनस्योपविचाराः सामन्तकेषु न भवन्ति, सामन्तकानामुपेक्षेन्द्रियसम्प्रयोगित्वात्। अतो मौलसंगृहीतैरेव सौमनस्योप-विचारैः क्लिष्टैः स्वभूम्यालम्बनैश्चतुर्भिः समन्वागतः, **न तु गन्धरसालम्बनाभ्यां** मौलकुशलालाभेनाक्लिष्टलाभाभावात्। न हि क्लिष्टं ध्यानमधरालम्बनमस्ति। **षड्भिरुपेक्षोपविचारैरनागम्यभूमिकैरिति।** अत्राविशेषाभिधानादुपेक्षोपविचारैः क्लिष्टैरपि चतुर्भिः समन्वागतः सामन्तकसंगृहीतैः, षड्भिश्चोपेक्षोपविचारैः कुशलैः कामधात्वालम्बनैः स्वभूम्यालम्बनैरपि। **द्वितीयतृतीयचतुर्थध्यानारूप्यजैः पूर्ववदिति।** कथम्। स एव कामधातूपपन्नो[1] लाभी रूपावचरस्य कुशलस्य चित्तस्यावीतरागो द्वितीयध्यानभूमिकैरष्टाभिर्यैरेवालाभी गन्धरसालम्बनानपास्य। तृतीयचतुर्थध्यानभूमिकैश्चतुर्भिः क्लिष्टैरेव गन्धरसालम्बनौ पर्युदस्यारूप्या[2]-वचरेणैकेन क्लिष्टेनैव। **अनया वर्तन्या मार्गेण शेषमनुगन्तव्यम्।** कथम्, प्रथम-ध्यानोपपन्नो द्वितीयध्यानभूमिकस्य कुशलस्य चित्तस्यालाभी प्रथमध्यानभूमिकैः सर्वैः समन्वागतः। द्वितीयध्यानभूमिकैः क्लिष्टैरष्टाभिस्तृतीयचतुर्थध्याना-रूप्यजैः पूर्ववत्, लाभी द्वितीयध्यानभूमिकस्य कुशलचित्तस्य तद्भूम्यवीत-रागः सर्वैः प्रथमध्यानभूमिकैः, द्वितीयध्यानभूमिकैरष्टाभिः। चतुर्भिः सौमनस्योपविचारैः क्लिष्टैः, गन्धरसालम्बनावपास्य। चतुर्भिश्चोपेक्षोप-विचारैर्द्वितीयध्यानसामन्तकसंगृहीतैः। तृतीयध्यानभूमिकैश्चतुर्भिः क्लिष्टैः, गन्धरसालम्बनौ पर्युदस्य। एवं चतुर्थध्यानभूमिकैरारूप्यावचरेणैकेन

1 To. कामधाताबुपपन्नो

2 Mss. ०दस्य रूप्यारूप्या

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्लिष्टै नैव। द्वितीयध्यानोपपन्नस्तृतीयध्यानभूमिकस्य कुशलस्य चित्तस्यालाभी द्वितीयध्यानभूमिकैः सर्वैः समन्वागतः' तृतीयध्यानभूमिकैश्चतुर्भिः क्लिष्टैः। चतुर्थध्यानारूप्यजैः पूर्ववत्। लाभी तृतीयध्यानभूमिकस्य कुशलचित्तस्य तद्भूम्यवीतरागः सर्वैर्द्वितीयध्यानभूमिकैः। तृतीयध्यानभूमिकैश्चतुर्भिरुपेक्षोपविचारैः क्लिष्टैर्गन्धरसालम्बनावपास्य। चतुर्भिश्चोपेक्षोपविचारैस्तृतीयध्यानसामन्तकसंगृहीतैश्चतुर्थध्यानारूप्यजैः पूर्ववत्। एषा दिक्। अनया दिशा तृतीयादिष्वपि ध्यानेषूपपन्नस्य स्वभूम्यूर्ध्वभूमिकैरुपेक्षोपविचारैरेव क्लिष्टैः कुशलैश्च समन्वागमो यथासम्भवं योज्यः। **उपेक्षाधर्मोपविचारेणेति**' कामावचरस्य निर्माणचित्तस्योपेक्षासम्प्रयोगित्वात्।

अपर आहेति' अयमेव शास्त्रकारः। **न हि यो यस्मादिति** विस्तरः। यः पुद्गलः' यस्माद्रूपादेर्वीतरागो न स तद्रूपाद्यालम्बनमुपविचरति। कथमुपविचरति' तत्रानुनीयते वा प्रतिहन्यते वा' अप्रतिसंख्याय वोपेक्षत इत्येवम्। यदा प्रतिसंख्यायोपेक्षते नाभुजति' तदाकुशलत्वम्' अतोऽप्रतिसंख्यायेति विशेषणम्। **अतः सास्रवा अपि न सर्वे**' किं तर्हि' **सांक्लेशिकाः**। संक्लेशे भवाः सांक्लेशिकाः संक्लेशानुकूलाः' यैः सौमनस्यादिभिर्मनो विषयानुपविचरति। **येषां प्रतिपक्षेण षट् सातता विहारा इति**। येषां सांक्लेशिकानां प्रतिव्यूहेन सततं भवाः सातता विहारा योगविशेषा भवन्ति' ते च षट्। कथमित्याह' **चक्षुषा रूपाणि दृष्ट्वा नैव सुमना भवति**' नानुनीयते। **न दुर्मना**' न प्रतिहन्यते। **उपेक्षको भवति**' नाभुजति। कथं नाभुजति' किमप्रतिसंख्यायाहोस्वित् प्रतिसंख्यायेति। विशेषयन्नाह' **स्मृतिमान् सम्प्रजानन्निति**' स्मृतिसम्प्रयुक्तया प्रज्ञया प्रतिसमीक्ष्यमाण इत्यर्थः। **एवं यावन्मनसा धर्मान् विज्ञायेति**। विषयषट्कभेदात् षट् सातता इति। **न ह्यर्हत** इति विस्तरः। **अर्हतो लौकिकं कुशलं** सास्रवं **धर्मालम्बनं** धर्मायतनालम्बनमधिगमधर्मालम्बनं[1] वा **सौमनस्यमस्ति**' तस्य हि बुद्धसान्तानिकान् गुणान् सम्मुखीकुर्वतः। कुशलं सौमनस्यमुत्पद्यते। न तस्यैष प्रतिषेधो युज्यते। कस्य तर्हि' **यत्तु तत् सांक्लेशिकं** मनस **उपविचारभूतम्। तस्यैष प्रतिषेधो लक्ष्यते**। तस्मात् सास्रवा अपि न सर्वे

---

1 Mss. ०मधिममागमधर्मा०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सौमनस्यादय उपविचारा इति। अत्र भदन्तानन्तवर्माह, अयुक्तमेतत्, कस्मात्, सूत्रेऽन्यथा निर्देशात्। सूत्रे हि भगवता न सांक्लेशिका एवोपविचारा उक्ताः। एवं ह्याह, तत्र भिक्षवो य इमे षट् सौमनस्योपविचारास्तानाश्रित्य तान् प्रतिष्ठाय य इमे षट् सौमनस्योपविचारास्तान् प्रजहीत, तत्र भिक्षवो य इमे षडुपेक्षोपविचारास्तानाश्रित्य तान् प्रतिष्ठाय य इमे षडुपेक्षोपविचारास्तान् प्रजहीत। द्वे भिक्षवो उपेक्षे, नानात्वसन्निश्रिता, एकत्वसन्निश्रिता च। तत्र भिक्षवो येयमेकत्वसन्निश्रितोपेक्षा तामागम्य[1] तामधिष्ठाय येयं नानात्वसन्निश्रितोपेक्षा तां प्रजहीतेति। एतस्मात् सूत्राज्ज्ञायते, न सांक्लेशिका एव सौमनस्यादय उपविचारा इति। तदेतज्ज्ञापकम्[2], प्रहाणवचनेऽपि सांक्लेशिकत्वाविनिवृत्तेः। न हीतरेणेतरस्य सन्निश्रयप्रहाणवचनेऽपि सत्येषां मनोपविचाराणां सांक्लेशिकत्वं विनिवर्तते, अन्यथासम्भवात्। एवमाह, मानं निश्रित्य मान एव प्रहातव्य इति। न तु जातु क्वचिन्मानो व्यवदानिकः सम्भवति। तस्मात् क्लेशानां परस्परविरोधेन वृत्तेर्वृत्त्यन्तरस्य[3] चापेक्षया गुणवत्त्वात्, गुरुलाघवमभिसन्धाय सूत्रे वचनाददोषः। नन्दादयोऽत्र निदर्शनम्। अतश्चैतदेवं यदुपेक्षोपविचाराणामुपेक्षोपविचारानेव[4] प्रहाणाय सन्निश्रयत्वेन दिदेश भगवान्, द्वे भिक्षव उपेक्षे इत्यादिवचनात्। ननु च [5]गर्धाश्रितनैष्क्रम्याश्रितभेदेन षट्त्रिंशच्छास्तृपदानीति वचनात् सिद्धमेषां सांक्लेशिकव्यवदानिकत्वं वैभाषिकमतानुसारात्। अदोषः, आचार्यस्यापि मनोपविचारव्यतिरिक्तास्तत्र सौमनस्यादयः सन्ति। पुनस्त एवेति विस्तरः। त एवाष्टादशोपविचाराः केचिद् भवाश्रिता अभिष्वङ्गाश्रिताः केचिन्नैष्क्रम्याश्रिताः। नैष्क्रम्यं निष्क्रमभावः संक्लेशात् संसारदुःखाद्वा। गर्धनैष्क्रम्याश्रितभेदेन द्वावष्टादशकौ षट्त्रिंशच्छास्तृपदानि। तद्भेदस्य तेषां मनोपविचाराणां, द्विधाभेदस्य, शास्त्रा बुद्धेन, गमितत्वाद्देशितत्वाद् यथासूत्रम् ॥३५॥

1 Mss. तानागम्य ; To. तामाश्रित्य

2 To. following Tib. तदेतदज्ञापकम्.

3 Mss. ०र्व्यक्त्यन्तरस्य

4 Mss. ०नेव

5 Mss. गवाश्रि०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[उक्तं च वक्ष्यते चान्यदत्र तु क्लेश इष्यते ।
बीजवन्नागवन्मूलवृक्षवत्तुषवत्तथा ॥३६॥
तुषितण्डुलवत् कर्म तथैवौषधिपुष्पवत् ।
सिद्धान्नपानवद्वस्तु तस्मिन् भवचतुष्टये ॥३७॥
उपपत्तिभवः क्लिष्टः सर्वक्लेशैः स्वभूमिकैः ।
त्रिधान्ये त्रय आरूप्येष्वाहारस्थितिकं जगत् ॥३८॥]

क्लेशकर्मवस्तूनीति प्रज्ञापितमिति ।

क्लेशास्त्रीणि द्वयं कर्म सप्त वस्तु[1]

इति वचनात् ।

एवं कर्माणि विपाकोत्पत्ताविति । आसन्नं कारणमित्यधिकृतम् । क्लेशोऽपि हि कारणं विपाकस्य 'तत्तु विप्रकृष्टम् ।

ते च व्याख्याता इति ।

मृत्यूपपत्तिभवयोरन्तराभवतीह यः[2] ।
स पुनर्मरणात् पूर्वमुपपत्तिक्षणात् परः[3]

इति वचनाद्व्याख्याताः । न पर्यवस्थानैः स्वतन्त्रैरिति 'ईर्ष्यामात्सर्यक्रोधम्रक्षैः स्वातन्त्र्यमेषाम् । अविद्यानिर्मुक्तैरन्यक्लेशैरसम्प्रयोगात् । अविद्या हि सर्वत्रैव विद्यत इति' न तत्संप्रयोगेनास्वातन्त्र्यम् । आह्रीक्यादिभिस्त्वन्यक्लेशसम्प्रयुक्तैः प्रतिसन्धिबन्धो न प्रतिषिध्यते । यद्यपि सावस्था मन्दिकेति विस्तरः । यद्यपि सा मरणावस्था मन्दिका[4] चित्तचैत्तसमुदाचारस्यापटुत्वात् ।

उपेक्षायां च्युतोद्भवौ[5]

इति वेदनामान्द्यात् । यस्तु पुद्गलो यत्र क्लेशेऽभीक्ष्णं सततं चरितः प्रवृत्तः ' आसन्नश्च मरणकालस्य पुद्गलस्य' तदानीं मरणकाले स एव क्लेशः समुदाचरति' समुत्थाय मिथ्यादृष्ट्यादिरपि ' पूर्वविधात् पूर्वाक्षेपात् पूर्वाभ्यासादित्यर्थः । अथवा योऽसौ तदानीं क्लेश उपतिष्ठते' तस्य पूर्वं फलभावेन परिग्रहावेधात्

---

1 Kārikā, III, 26.
2 Kārikā, III, 10.
3 Kārikā, III, 13.
4 To. omits मन्दिका.
5 Kārikā, III, 42.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आक्षेपात् । स तदानीमुपतिष्ठत इति । **कामरूपधात्वोरपरिसंख्यानात्** । **सर्व एव चत्वारो भवाः** सन्तीति । त्रय [1]एवारूप्येषु । आरूप्येष्वेव[1] च त्रय इत्यवधारणात् । अनयोरितरयोर्धात्वोर्भवचतुष्टयं तु ज्ञातं भवति । **निष्यन्दाभावादिति** । मूत्रपुरीषाभावादित्यर्थः । **सूक्ष्माणां वा सूक्ष्मा इति** । सूक्ष्माणां स सूक्ष्माहारः[2] । **बालका** जातमात्राः । **स्वेदजन्तुकादयो** यूकादयः । आदिशब्देन गर्भस्थाः ॥३६-३८॥

[कवडीकार आहारः कामे त्र्यायतनात्मकः ।
न रूपायतनं तेन स्वाक्षमुक्ताननुग्रहात् ॥३९॥]

कवडीकाराहारः

कामे

इति । कामधातावेव कवडीकाराहार इत्यवधारणम् । कस्मादित्याह । **तद्वीतरागाणां** कवडीकाराहारवीतरागाणाम् । **तत्र रूपारूप्यधात्वोरुपपत्तेः** । **कवडीकृत्याभ्यवहरणात्** पिण्डीकृत्य गिलनात् कवडीकारः । कवडीकृत्याभ्यवहरणं **पुनर्मुखेन नासिकया ग्रासव्यवच्छेदादिति** । गन्धरसस्प्रष्टव्यायतनानि सर्वाण्येव कवडीकार इत्युक्ते पृच्छति । **च्छायातपज्वालाप्रभासु तेषां** गन्धादीनां **कथमाहारत्वम्** । न हि तत्स्थानां गन्धादीनां कवडीकृत्याभ्यवहरणमस्तीति । **बाहुल्येन किलैष निर्देश** इति । न तत्स्थानां गन्धादीनां कवडीकारत्वमिति प्रतिपद्यते । बाहुलिकस्तु निर्देशः

कामे त्र्यायतनात्मकः

इति । किल शब्दः परमतेन [3]स्वाभिप्रायोऽधिक्रियते । **यान्यपि त्विति** विस्तरः । यान्यपि तु **नाभ्यवह्रियन्ते** छायादिषु **स्थितिं चाहरन्ति** यापनां **चाहरन्ति तान्यपि सूक्ष्म आहारः स्नानाभ्यङ्गवत्** । यथा स्नानं चाभ्यङ्गश्च न कवडीकृत्याभ्यवह्रियते । आहारश्च तद्वदिति ।

स्वाक्षमुक्ताननुग्रहात्

इति । स्वाक्षस्य [4]स्वेन्द्रियस्य तेनाननुग्रहात् मुक्तानाञ्च कामधातोरनागाम्यर्हताम-ननुग्रहात् । न रूपायतनमाहारः । **रूपायतनं चाभ्यवहारकाल इति** । यस्मिन् काले अन्तर्मुखप्रविष्ट आहारो भुज्यते चक्षुर्विषयातीतः । तस्मिन् काले । **स्वमिन्द्रियं**

1...1 Mss. एवारूप्ये ष्वेव

2 To. सूक्ष्म आहारः

3 Mss. स्वाभिप्राया विक्रियते

4 Mss. मुखेन्द्रियस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्षुरिन्द्रियम्। **तन्महाभूतानि च** तस्येन्द्रियस्य यानि महाभूतान्याश्रयस्तानि **नानुगृह्णाति तद्रूपायतनम्।** **कुत एवान्यानीन्द्रियाणि** श्रोत्रादीन्यनुग्रहीष्यति। **अविषयत्वात्।** अविषयो हि श्रोत्रादीनां रूपायतनम्। दृश्यमानं तर्हि भोजनकालेऽनुग्रहीष्यतीत्यत आह। **यदापि च दृश्यमान** इति विस्तरः। अथ कथमिदं गम्यते। तदापि तदालम्बनः सुखवेदनीयः स्पर्श आहारो न रूपमिति। अत आह। **मुक्तानामिति** विस्तरः। यदि तद्दृश्यमानमाहारकृत्यं कुर्यात्। मुक्तानामनागाम्यर्हतां कवडीकाराहारवीतरागाणां सुमनोज्ञमप्याहारं पश्यतामनुग्रहं कुर्यात्। यथा गन्धरसस्प्रष्टव्यायतनानीन्द्रियमहाभूतानामनुग्रहं कुर्वन्त्यभ्यवहारकाले। तस्मात्तदालम्बनः सुखवेदनीयः स्पर्श आहारो भवतीति सिद्धम् ॥३९॥

[स्पर्शसञ्चेतनाविज्ञा आहाराः सास्रवास्त्रिषु ।
मनोमयः सम्भवैषी गन्धर्वश्चान्तराभवः ॥४०॥
निर्वृत्तिरत्र वृद्ध्यर्थमाश्रयाश्रितयोर्द्वयम् ।
द्वयमन्यभवाक्षेपनिर्वृत्त्यर्थं यथाक्रमम् ॥४१॥]

स्पर्शसञ्चेतनाविज्ञा

इति। [1]विज्ञेत्यादन्तमेतत् प्रज्ञेति यथा। विज्ञानमित्यर्थः। कवडीकाराहारस्त्र्यायतनात्मकत्वात् सास्रव इति सिद्धः। त्रयस्तु स्पर्शादयः सास्रवाः अनास्रवाश्च सम्भवन्तीत्यतस्त एव विशेषिताः।

सास्रवाः

इति। **न चैवमनास्रवा धर्मा** इति। न चैवं ते भूतानां स्थितये यापनायै सम्भवैषिणां चानुग्रहायेति। **मनोनिर्जातत्वादिति।**

[3]निर्वृत्तिः

इति। उपपत्त्यभिमुखावधारणम्[2]। अत एव ब्रवीति। **शुक्रशोणितादिकं किञ्चिद्बाह्यमनुपादाय भावादिति।** आदिशब्देन कर्दमपुष्पादीनां ग्रहणम्। **उपपत्त्यभिमुखत्वादभिनिर्वृत्तिरिति।** उपपत्त्यभिमुखी निर्वृत्तिर्जन्मास्येत्यभिनिर्वृत्तिः। [3]सव्याबाधमिति। सदुःखम्[4]। अव्याबाधमभिनिर्वर्त्यति[5]। इदमत्र ज्ञापकम्।

1 Mss. विज्ञेत्यादान्त०
2...2 To. following Tib. निर्वृत्तेरिति न तूपपत्तेः मन इत्यवधारणम्
3 Mss. अव्याबाधमिति ; Tib. *gnod· pa. dan. bcas pa*
4 Mss. अदुःखम्
5 Mss. ०निवर्त्यति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवोऽभिनिर्वृत्तिरिति। **तथास्ति पुद्गल** इति विस्तरः। अस्मात् सूत्राच्चतुष्कोटिकादभिनिर्वृत्तिरन्तराभव इति। अस्ति पुद्गलो **यस्याभिनिर्वृत्तिसंयोजनं प्रहीणं नोपपत्तिसंयोजनम्।** अस्ति यस्योपपत्तिसंयोजनं प्रहीणं नाभिनिर्वृत्तिसंयोजनम्। अस्ति यस्याभिनिर्वृत्तिसंयोजनं च प्रहीणमुपपत्तिसंयोजनं च। अस्ति यस्य नवाभिनिर्वृत्तिसंयोजनं प्रहीणं नोपपत्तिसंयोजनम्। **द्विधातुवीतरागस्येति** कामरूपधातुवीतरागस्येति। **अनागामिन** इति विशेषणं पृथग्जनानामन्तराभवसंयोजनस्यात्यन्ताप्रहाणात्। तद्धि भिक्षवः प्रहीणं यदार्यया प्रज्ञया प्रहीणमिति वचनात्। तस्य च पुनर्भावित्वात्। तत्र प्रथमा कोटिर्द्विधातुवीतरागस्यानागामिनः। **द्वितीयान्तरापरिनिर्वायिणः।** **तृतीयार्हतः।** **चतुर्थी** तदन्येषामस्मादादेः पृथग्जनस्यार्यस्य चावीतरागस्य कामधातुवीतरागस्य रूपधातावुपपद्यमानस्य चेति। **भूता वार्हन्त** इति। पूर्वमेवोक्तः पर्यायः। भूता उत्पन्नाः सम्भवैषिणोऽन्तराभविका इति। इदानीमयमपरः पर्यायः। भूता अर्हन्तस्त्रैधातुकवीतरागत्वात्। **सम्भवैषिणः सतृष्णाः।** त्रैधातुके सम्भवैषित्वात्। **स्थितय** इत्यवस्थापनाय। **अनुग्रहायेति** पुनर्भवाय सम्भवायेत्यर्थः।

सर्वेऽप्युभयथेति। सर्वेऽपि चत्वार आहारा भूतानां सत्त्वानां स्थितयेऽनुग्रहाय च। तथा सम्भवैषिणामिति। युक्तं तावन्मनःसञ्चेतना कर्मस्वभावत्वात्। तत्प्रभावितं च विज्ञानं बीजम्। स्पर्शोऽपि तत्सम्प्रयुक्तो भवत्यनुग्रहायेति। कवडीकारस्तु कथं सम्भवैषिणामनुग्रहायेति। अत उच्यते। **कवडीकारोऽपि हीति** विस्तरः। **तद्रागिणामिति** कवडीकाररागिणाम्। **पुनर्भवाय संवर्तत** इति। अस्य ज्ञापनार्थमिदं सूत्रपदमुपन्यस्यते। **उक्तं हि भगवतेति** विस्तरः। तत्र रोगादिभिः पञ्च उपादानस्कन्धा उक्ताः। **तस्य रोगस्य चत्वार आहारा** [1]**मूलम्।** मूलं च हेतुरित्यनेन कवडीकारोऽपि तद्रागिणां पुनर्भवाय संवतत इति सिद्धम्। अन्ये पुन**जरामरणस्य प्रत्यय** इत्येतदेवोदाहरणं ब्रुवते। अस्माज्जन्मनः परेण जरामरणं व्यवस्थापितमित्यभिप्रायः। कवडीकारोऽपि भूतानां सत्त्वानामिह स्थितय इति युक्तं प्रत्यक्षत्वात्। तथा सुखवेदनीयः स्पर्शो विज्ञानं चानुग्राहकमित्युक्तम्। अथ मनःसञ्चेतना कथमिति। अत इदमुच्यते। **मनःसञ्चेतनापि चेति** विस्तरः। अत एव मनःसञ्चेतनाग्रहणेन

---

1 Mss. omit मूलम्.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्पर्शविज्ञाने अपि गृहीते भवतः । तत्सम्प्रयोगित्वात् । **प्रद्रुता** इति प्रसृताः । **सङ्गीतिपर्याय** इत्यभिधर्मशास्त्रे । **तेषां पुष्टये स्पर्श** इति सुखवेदनीयेनानुग्रहात् । यः कश्चिद् वेदनास्कन्धः संज्ञास्कन्धः । सर्वः स स्पर्शं प्रतीत्येति वचनात् । मनःसञ्चेतनायाः पुनर्भवस्य आक्षेप इति तस्याः कर्मस्वभावत्वात् । कथञ्च पुनस्तयोः पुनर्भव आक्षिप्यते । तदुत्पत्तिप्रत्ययपरस्परानुकूल्यावस्थानात् । **कर्मपरिभाविताद्विज्ञानबीजादभिनिर्वृत्तिरिति** । बीजादिवाङ्कुरस्य पुनर्भवस्योत्पाद इत्यर्थः ।

यः कवडीकारः सर्वः[1] **स आहार** इति प्रश्ने आह । **स्यात् कवडीकारो नाहारः** । स्यादाहारो न कवडीकारः । स्यादुभयं स्यान्नोभयम् । इति **चतुष्कोटिकम्** । **द्वितीया कोटिस्त्रय आहारा** इति । मनःसञ्चेतनास्पर्शविज्ञानानि । **चतुर्थ्येतानाकारान् स्थापयित्वेति** । शब्दो दुःखवेदनासम्प्रयुक्ताश्च सर्वे चित्तचैत्ताः । **एवं स्पर्शादिभिरपि यथायोगं चतुष्कोटिकानि कर्तव्यानीति** । यः कश्चित् स्पर्शः सर्वः स आहारः । स्यात् स्पर्शो नाहार इति चतुष्कोटिकम् । एवं या काचिन्मनःसञ्चेतना सर्वा सा आहारः । स्यान्मनःसञ्चेतना नाहार इति चतुष्कोटिकम् । तथा यत् किञ्चिद्विज्ञानं सर्वं तदाहारः । स्याद्विज्ञानं नाहार इति चतुष्कोटिकम् । स्पर्शस्य तावत् प्रथमा कोटिर्यं स्पर्शं प्रतीत्येन्द्रियाणामुपचयो भवति महाभूतानां च परिभेदः । द्वितीया त्रय आहाराः । तृतीया यं स्पर्शं प्रतीत्येन्द्रियाणामपचयो भवति महाभूतानाञ्च वृद्धिः । चतुर्थ्येतानाकारान् स्थापयित्वेति । एवं यावद्विज्ञानं चतुष्कोटिकम् । प्रथमा कोटिर्यद्विज्ञानं प्रतीत्येन्द्रियाणामपचयो भवति महाभूतानां परिभेदः । द्वितीया कोटिस्त्रय आहारा विज्ञानवर्ज्याः । तृतीया यद्विज्ञानं प्रतीत्येन्द्रियाणामुपचयो भवति महाभूतानां च वृद्धिः । चतुर्थ्येतानाकारान् स्थापयित्वा । **स्यात् स्पर्शादीन् प्रतीत्येति** विस्तरेणापरः प्रश्नः । स्पर्शादीनिति स्पर्शचेतनाविज्ञानधर्मानित्येवं नेतव्यम् । एवं च ग्रन्थः कर्तव्यः । स्यात् **स्पर्शादीन् प्रतीत्येन्द्रियाणामुपचयो भवति महाभूतानां च वृद्धिः । न च ते आहाराः । स्यात्** । **अन्यभूमिकाननास्रवांश्च** । प्रतीत्येत्यभिसम्बन्धाद् द्वितीयाप्रयोगः । **योऽपि** [2]हि

1 To. omits सर्वं ; Tib. supporting Mss. *khams. cad*.
2 To. omits हि.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिभुक्त इति विस्तरः। केन सम्बन्धेनेदमुक्तम्। अन्यभूमिकाननास्रवांश्च प्रतीत्यानाहार इत्युक्तेऽर्थादेतदुक्तं भवति स्वभूमिकान् सास्रवान् प्रतीत्याहार इति। **यं चेह परिभुक्त** इति। कवडीकारो **भोक्तुर्बाधामादधाति**। स किमाहारः। **सोऽप्याहारः**। **आपाते** भोजनवेलायामनुग्रहात्। **सर्वासु सर्वः**। **एवं योनिष्विति**। कामधातौ पञ्चानां गतीनां चतसृणां च योनीनां सद्भावात्। **चतुष्कोटिकं बाध्यते प्रकरणग्रन्थश्चेति**। प्रथमे चतुष्कोटिके येयं तृतीया कोटिः। यं कवडीकारं प्रतीत्येन्द्रियाणामुपचयो भवति महाभूतानां च वृद्धिरित्यस्या बाध। चतुष्कोटिकं बाध्यते न केवलमुपचयकरः। किं तर्हि। अपचयकरोऽपि कवडीकाराहार इति। प्रकरणग्रन्थश्च किं बाध्यते। कीदृशः प्रकरणग्रन्थ इति तद्दर्शयन्नाह। **कवडीकाराहारः कतमः। यं कवडीकारं प्रतीत्येन्द्रियाणामुपचयो भवति विस्तरेण यावद्विज्ञानमिति। उपचयाहाराभिसन्धिवचनादविरोध** इति। उपचयाहाराभिप्रायेण चतुष्कोटिकवचनं प्रकरणग्रन्थवचनं च तस्मात्तयोरविरोधः। यो ह्युपचयाय स मुख्यः। **आहारलक्षणप्राप्तत्वादिति**। कवडीकाराहारलक्षणप्राप्तत्वात्। कथमित्याह। **सोऽपि हि जिघत्सां पिपासां च प्रतिहन्तुं समर्थ** इति। [1]प्रदीप्तायष्पिण्डलक्षण आहारो जिघत्साप्रतिघाते समर्थः। क्वथितताम्रलक्षणः पिपासाप्रतिघाते इति योज्यम्। कवडीकाराहारप्रसङ्गेनेदमुच्यते। **उक्तं भगवता यश्च बाह्यकानामिति** विस्तरः। जम्बुद्वीपो **जम्बुषण्डः**। तथा ह्युक्तं भगवता याः काश्चित् जम्बुषण्डात् स्रवन्त्यः सर्वाः समुद्रनिम्नाः समुद्रप्रवणाः समुद्रप्राग्भारा इति। तन्निवासिनो **जम्बुषण्डगताः कुक्षिमन्तो** भोजनशक्त्युपेता अकललाद्यवस्था इत्यभिप्रायः। **तदेतदयुक्तमेकमिति वचनादिति**। यदि जम्बुद्वीपनिवासिनः कुक्षिमन्तो जम्बुषण्डगता इष्येरन्। यश्च जम्बुषण्डगतान् पृथग्जनानिति वक्तव्यं स्यात्। उक्तं च यश्चैकं जम्बुषण्डगतमिति। तस्मादयमर्थो न घटते। **कश्चात्र विशेष** इति। किमत्राश्चर्यं यद्बहून् भोजयित्वा बहु पुण्यं स्यात् न त्वल्पीयसः शतमात्रान् वीतरागानित्यर्थः। **सन्निकृष्टो बोधिसत्त्व** इति। आसन्नाभिसम्बोधिः।

---

1 Mss. प्रदीप्तायस्पिण्ड० ; To. प्रदीप्तायसगुड०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बोधिसत्त्वः कुतो यावद्यतो लक्षणकर्मकृत्[1]

इत्यभिप्रायः। **न त्वियमन्वर्था संज्ञेति** ' नार्थानुगता ' नार्थवाचकं पदमित्यर्थः। **नापि परिभाषिता** अर्थमनपेक्ष्य। **बोधिसत्त्व एव त्वेष जम्बुषण्डगत इति** ' कृषिग्रामकं व्यवलोकनाय निर्गतः सर्वार्थसिद्धो बोधिसत्त्वो जम्बुवृक्षमूले निषन्नः प्रथमं ध्यानमुत्पादितवान्। अत आह ' **स हि पृथग्जनः कामवैराग्यसम्बन्धेनेति**। स चापि हि बोधिसत्त्वः पृथग्जनः कामवीतरागश्च ' बाह्यकाश्च तथैव कामवीतरागाः पृथग्जनाश्चानेन सम्बन्धेन तेभ्यो बाह्यकेभ्यो बहुतरेण दानफलेन [2]विशिष्यमाण इत्येवमुक्तः। स तेभ्यो बाह्यकेभ्योऽनन्तेभ्यो[2] विशिष्यमाणो

बोधिसत्त्वाय चामेया अनार्येभ्योऽपि दक्षिणा

इति वचनात्। **शतग्रहणं तु पूर्वाधिकारादिति** ' तत्रैव सूत्रे शताधिकारोऽधिकृतः। यश्च तिर्यग्योनिगतानां शताय दानं दद्यात् ' यश्चैकस्मै दुःशीलाय मनुष्यभूताय दानं दद्यात् ' ततः शतगुणो विपाकः प्रतिकाङ्क्षितव्यः। यावद् यश्च बाह्यकानामिति विस्तरः। **इत्थं चैतदेवमिति** ' इत्थं चैतदेवं बोधिसत्त्व एव त्वेष जम्बुषण्डे निषण्णो युज्यत इति। **यदेनं बोधिसत्त्वमपास्य** ' **बाह्यकेभ्य एव स्रोतआपत्तिफलप्रतिपन्नकं विशेषयाम्बभूवेति**। बाह्यकेभ्यो वीतरागेभ्यः स्रोतआपत्तिफलप्रतिपन्नकाय दानमप्रमेयतरम् ' स्रोतआपन्नाय ततोऽप्रमेयतरम् सकृदागामिफलप्रतिपन्नकायेति विस्तरः। यदि निर्वेधभागी जम्बुषण्डगतोऽभविष्यद् जम्बुषण्डगतादेव व्यशेषयिष्यत् ' कथम् ' यश्च जम्बुषण्डगतानां शतं भोजयेद्यश्चैकं स्रोतआपत्तिफलसाक्षात्क्रियायै प्रतिपन्नकम् अतो दानादिदं महाफलतरमिति। न त्वेवम्। स्रोतआपत्तिफलप्रतिपन्नकादिभ्यो विशिष्टतरत्वादतो बोधिसत्त्व एव त्वेष जम्बुषण्डगतो युज्यते ' **आयुःक्षयादिभिरिति** ' अस्त्यायुःक्षयान्मरणं न पुण्यक्षयादस्ति पुण्यक्षयान्नायुःक्षयादित्यादि ॥४०-४१॥

[छेदसन्धानवैराग्यहानिच्युत्युपपत्तयः।
मनोविज्ञान एवेष्टा उपेक्षायां च्युतोद्भवौ ॥४२॥]

छेदसन्धानवैराग्य इति विस्तरः। कुशलमूलसमुच्छेदो मिथ्यादृष्ट्या। सा च

---

1 Kārikā, IV, 110. 2...2 Mss. omit this portion.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मानस्येव सन्तीरकत्वात्। कुशलमूलप्रतिसन्धानं सम्यग्दृष्ट्या विचिकित्सया वा। ते च मानस्यौ। धातुभूमिवैराग्यम्। धातुतो भूमितो वा वैराग्यं मनोविज्ञान एव। समाहित एव चित्ते लभ्यत्वात्। परिहाणिरयोनिशोमनसिकारप्रवर्तिता। मनोविज्ञानेन चायोनिशोमनसिकारो विकल्प इति। च्युतिः संक्षिप्तपञ्चेन्द्रियगोचरस्य प्रवाहच्छेदानुकूले विज्ञाने भवति। उपपत्तिरपि विपर्यस्तमतेर्भवतीति मनोविज्ञान एव युज्यते। अन्तराभवप्रतिसन्धिरप्युक्तरूप इति। प्रतिसन्धिसामान्यादनुक्तोऽप्युक्तकल्प इति नोच्यत इत्यभिप्रायः। च्युतिरेव च्युतम्। एकार्थतां दर्शयति। भावे क्तोत्पन्नत्वात्। इतरे हि वेदने पट्व्याविति सुखदुःखे।

विसभागभूमिकत्वादिति। समाहितं चित्तं समाहितभूमिकत्वाद्विसभागं कामधातोः। अतश्च्युतिचित्तमुपपत्तिचित्तं वा न युज्यते। यदा तर्हि रूपधातावेव म्रियते उपपद्यते वा। तदा समाहितभूमिकं चित्तं तद्भविष्यतीत्यत आह। आभिसंस्कारिकत्वादिति। अभिसंस्कारो यत्नः। अभिसंस्कारेण निर्वृत्तमाभिसंस्कारिकम्। तद्भावः। तस्मात्। न तदाभिसंस्कारिकं च्युतिचित्तमुपपत्तिचित्तं वा युज्यते। मरणावस्थाया अपटुत्वात्। अनुग्राहकत्वाच्च। यस्माच्च समाहितं चित्तमनुग्राहकं न च्छेदानुकूलमतोऽपि समाहितचित्तस्य च्युतिर्नास्ति। नाप्यचित्तकस्येति विस्तरः। नाप्यचित्तकस्य। किम्। च्युतिरुपपत्तिर्वेति प्रकृतम्। अचित्तको निरोधसमापत्तिसमापन्नोऽसंज्ञिसमापत्तिसमापन्नस्तद्विपाके वावस्थितः। सोऽचित्तक उपक्रन्तुं मारयितुं न शक्यते शस्त्रादिभिः। अतो नाचित्तकस्यास्ति च्युतिः। यदा चास्याश्रयो विपरिणन्तुमारभेतेति। शस्त्रेणाग्निना वोपक्रमान्निरोधसमापत्तिमसंज्ञिसमापत्तिं वा समापन्नस्यासंज्ञिसमापत्तेर्विपाके स्थितस्य विपाकावेधपरिसमाप्तेरवश्यमस्य तदानीमाश्रयप्रतिबद्धं चित्तमाश्रये बीजभावेनास्ति। तत् सम्मुखीभूय पश्चात् प्रच्यवेत। कः प्रच्यवेत। पुद्गलः। यदि पुद्गलोऽधिक्रियेत[1]। असमानकर्तृकत्वात् क्त्वाविधिर्न प्राप्नोति। चित्तं तर्हि प्रच्यवेत। अथवैवमभिसम्बन्धः। यदा चाश्रयो विपरिणन्तुमन्यथात्वमापत्तुमारभेत। अवश्यमस्य पुद्गलस्य तदाश्रयप्रतिबद्धं बीजभावेनावस्थितं चित्तं सम्मुखीभूय समुदाचर्य परिणन्तुमारभेत। पश्चात् प्रच्यवेत पुद्गल इति। अथवा सम्मुखीभूयेति सम्मुखीभाव्येत्यर्थे। णिलोपात्।

अस्ति पर्णरुहो वातो अस्ति पर्णमुखोऽपरः

इति यथा। उपपत्तौ त्वयुक्तमचित्तकत्वात्[2]। कस्मात्। चित्तच्छेदहेत्व-

1 To. ०धिक्रियेत् 2 To. चायुक्तमचित्तकत्व'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावात्। अवश्यं क्लिष्टतया प्रतिसन्धिचित्तस्य निरोधसमापत्त्याद्यसम्भवात्। विना च क्लेशेनानुपपत्तेः। सर्वक्लेशैर्हि तद्भूमिकैरुपपत्तिप्रतिसन्धिबन्धो[1] भवति। न च चित्तमन्तरेण क्लेशाः कदाचिदपि भवन्तीति। अतोऽपि नास्त्यचित्तकस्योपपत्तिः।

मरणभवस्त्रिप्रकार इत्युक्तमिति।

उपपत्तिभवः क्लिष्टः सर्वक्लेशैः स्वभूमिकैः[2]

इति। उपपत्तिभव एव क्लिष्ट इत्यवधारणात्। मरणपूर्वान्तकालान्तराभवास्त्रिप्रकाराः कुशलाकुशलाव्याकृता उक्ताः। अथवा

निरोधयत्युपरमो नारूप्ये जीवितं मनः।

उपेक्षां च[3]

इति विस्तरेण यावत्

शुभे सर्वत्र पञ्च च[4]

इत्युक्तम्' अतो मरणभवस्त्रिप्रकार इत्युत्सर्गः ॥४२॥

[नैकाग्राचित्तयोरेतौ निर्वात्यव्याकृतद्वये।

क्रमच्युतौ पादनाभिहृदयेषु मनश्च्युतिः ॥४३॥]

अर्हंस्तु

निर्वात्यव्याकृतद्वये

इत्येवमपवादः। अस्ति चेत् कामधातौ विपाक उपेक्षेति।

अधोऽपि मध्यमस्त्येके[5]

इत्येकीयमतेन। नास्ति चेदिति।

अतःपरम्।

अदुःखासुखवेद्यम्[6]

इत्यपरमतेन। ऐर्यापथिक एवेति। ऐर्यापथिकजातीयं[7] तद्यत्र निर्वाति।

विपाकजैर्यापथिकशैल्पस्थानिकनैर्मितम्[8]।

चतुर्धा व्याकृतं कामे[9]

---

1 C. ०रूपपत्तिः प्रति०

2 Kārikā, III, 38

3 Kārikā, II, 15

4 Kārikā, II, 16

5 Kārikā, IV, 48

6 Kārikā, IV, 47

7 Mss. ०जातीय

8 To. निर्मितं

9 Kārikā, II, 72

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति । नैतावदेवाव्याकृतमिष्यत इति व्याख्यातमेतत् । तद्धि चित्तच्छेदानुकूलमिति । अप्रतिसन्धिकचित्तच्छेदानुकूलम् । दुर्बलत्वात् । परमापटुत्वादित्यर्थः । [1]सप्रतिसन्धिकचित्तच्छेदे कुशलाकुशलमपि चित्तं सम्भवति ।

तेषां यथासंख्यमिति । पादयोरपायगामिनां विज्ञानं सन्निरुध्यते । नाभ्यां मनुष्यगामिनाम् । हृदये देवगामिनाम् । अरूपित्वाददेशस्थं विज्ञानं कथं तेषु निरुध्यत इति । अत आह । कायेन्द्रियस्य तेषु निरोधादिति । तेषु पादादिषु । कायेन्द्रियप्रतिबद्धवृत्ति हि कामधातौ रूपधातौ च विज्ञानमिति । तेषामपि हृदये विज्ञानं निरुध्यत इति । यथासंख्यनिर्देशादेवायमर्थो लभ्यते । कथम् । हृदयं च हृदयं च हृदये । पादश्च नाभिश्च हृदये चेति पादनाभिहृदयानीति चत्वारोऽर्थाः ॥४३॥

[अधोनृसुरगाजानां मर्मच्छेदस्त्वबादिभिः ।
सम्यङ्मिथ्यात्वनियता आर्यानन्तर्यकारिणः ॥४४॥]

अधोगश्च नृगश्च सुरगश्च अजगश्चेत्येतेऽपि चत्वारोऽर्थाः । तेन यथासंख्यसिद्धिः ।

प्रायेणेति ग्रहणं देवादीनां सुखमृत्युत्वात् । न तु पुनस्तानि काष्ठवच्छिद्यन्ते[2] । किं तर्हीति । तीव्राभिर्वेदनाभिश्छिद्यन्त इवेति । छिन्नवद्वा न पुनश्चेष्टन्त इति [3]छिन्नानीत्युच्यन्त इति । च्छिन्नाङ्गप्रत्यङ्गवत्[4] । न पुनश्चेष्टन्त इति छिन्नानीत्युच्यन्ते । सैषा काल्पनिकी । छेदवृत्तिर्मर्मणां द्विधाभावाकरणात् । अप्तेजोवायूनां अन्यतमेनेत्युक्ते पृच्छति । कस्मान्न पृथिवीधातुनेति । अप्तेजोवायुधातुप्रधाना यथायोगमिति । यथासम्भवम् अप्धातुप्रधानः श्लेष्मा । तेजोधातुप्रधानं पित्तम् । वायुधातुप्रधानो वायुशेष इति । भाजनलोकसंवर्तनीसाधर्म्येणेत्यपर इति । तिस्रो भाजनसंवर्तन्यः । [5]अप्संवर्तनी तेजःसंवर्तनी वायुसंवर्तनी च । तासां च साधर्म्येण अप्तेजोवायुधातूनामन्यतमेनेति विस्तरेणोक्तमिति ।

कथमारायाता आत्यन्तिकविसंयोगप्राप्तिलाभात् । पृथग्जनानां त्वस्ति विसंयोगप्राप्तिलाभः । न त्वात्यन्तिक इति ते नारायाता एवेति । ते हि मिथ्यात्वेऽपि

---

1 Mss. अप्रति०
2 To. काष्ठानीव छिद्यन्ते.
3 Mss. छिन्ना इत्यु०
4 Mss. छिन्नाभप्रत्यङ्गवत्
5 Mss. omit अप्संवर्तनी which To. puts after तेजःसंवर्तनी.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नियता भवेयुरिति । यथानन्तर्याणि कुर्युरित्यर्थः । न च त इति विस्तरः । न च ते मोक्षभागीयलाभिनः कालनियमेन सम्यक्त्वे नियताः । यथा सप्तकृत्वः-परमादयः । आदिशब्देन कुलंकुलैकवीचिकादयो गृह्यन्ते । कालनियमश्चैषां पुद्गलनिर्देशे वक्ष्यते । नियतेभ्यो द्वयेभ्य एभ्योऽन्येऽनियताः । प्रत्ययापेक्ष्यं हीति विस्तरः । यदि सम्यक्त्वे प्रत्ययं लभन्ते । सम्यक्त्वे नियताः । अथ मिथ्यात्वे । मिथ्यात्वे नियताः । अथोभयस्मिन्न प्रत्ययं लभन्ते अनुभयभाक्त्वेऽपि ॥४४॥

[तत्र भाजनलोकस्य संनिवेशमुशन्त्यधः ।
लक्षषोडशकोद्वेधमसंख्यं वायुमण्डलम् ॥४५॥

अपामेकादशोद्वेधं सहस्राणि च विंशतिः ।
अष्टलक्षोच्छ्रयं पश्चाच्छेषं भवति काञ्चनम् ॥४६॥]

उक्तः सत्त्वलोकः विद्यादिक्रमनिर्देशेन ।

उशन्ति

[1]इच्छन्तीत्यर्थः ।

लक्षषोडशकोद्वेधमसंख्यं वायुमण्डलम्

लक्षषोडशकं वेधनभावेन[2] । परिणाहेनासंख्यमिति । समन्तपरिक्षेपेणा-संख्यमित्यर्थः । कर्माधिपत्येन कर्मसामर्थ्येन । तत्र निदर्शनम् । यथा भुक्तं पीतं चान्नं पानं च यथासंख्येन नापक्वं पक्वाशयं पतति । पक्वमेव स पक्वस्थानं गच्छतीत्यर्थः । कुसूलन्यायेन कोष्ठन्यायेन । समन्तात् [3]प्राकारवदवस्थितमित्यर्थः । पक्वक्षीरशरीभावयोगेन । पक्वक्षीरशरीभावन्यायेन । यथा पक्वस्य क्षीरस्य शरी । स्त्रीलिङ्गनिर्देशः । शर इत्यर्थः । अथवा शरस्य भाव शरीभावः स्त्रीप्रयोगः । यथाऽसौ द्रवो[4] घनीभावेन भवत्येवं जलस्योपरिष्टात् काञ्चनमयी भूमिरिति । शेषं त्रयो लक्षाः सहस्राणि च विंशतिरिति । विंशतिसहस्रोत्तराणामेकादशानां लक्षाणामष्टावपनीयैतावच्छेषं भवति ॥४५-४६॥

---

1 To. adds इति.
2 Mss. वहनभावेन
3 Mss. प्राकारवदस्थित०, To. प्राकारवदास्थित०
4 To. शरी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[तिर्यक् त्रीणि सहस्राणि सार्धं शतचतुष्टयम् ।
लक्षद्वादशकं चैव जलकाञ्चनमण्डलम् ॥४७॥
समन्ततस्तु त्रिगुणं तत्र मेरुर्युगन्धरः ।
ईषाधरः खदिरकः सुदर्शनगिरिस्तथा ॥४८॥
अश्वकर्णो विनितको निमिन्धरगिरिस्ततः ।
द्वीपा बहिश्चक्रवाडः सप्त हैमाः स आयसः ॥४९॥
चतूरत्नमयो मेरुर्जलेऽशीतिसहस्रके ।
मग्न ऊर्ध्वं जलान्मेरुर्भूयोऽशीतिसहस्रकः ॥५०॥
अर्धार्धहानिरष्टासु समोच्छ्रायघनाश्च ते ।
सीताः सप्तान्तराण्येषामाद्याशीतिसहस्रिका ॥५१॥]

तिर्यक् त्रीणि सहस्राणि

इति विस्तरः । चतुर्द्वीपकस्य एतत्परिमाणमुच्यते । न त्रिसाहस्रमहासाहस्रस्य । समानं ह्येतदुभयम । एतदिति

जलकाञ्चनमण्डलम्

समन्ततस्तु त्रिगुणम्

इति । समन्तपरिक्षेपेण त्रिगुणमेतदुभयम् । सर्वस्य परिमण्डलस्येयं स्थितिः । यदस्य तिर्यक्प्रमाणं[1] त्रिगुणमेव समन्तपरिक्षिप्तस्य प्रमाणमिति । तेन चतुर्द्वीपकश्चक्रीकृत इति । चक्रं कृतश्चक्रीकृतः । चक्राकारतां गमितः । अत एव

चक्रवाडः

इत्युच्यते । शस्त्रकमित्ययोमयः । यथासंख्यं चतुर्षु पार्श्वेष्विति । उत्तरकुरुपार्श्वं[2] सुवर्णमयं पूर्वविदेहपार्श्वं रूप्यमयं जम्बुद्वीपपार्श्वं वैदूर्यमयमवरगोदानीयपार्श्वं स्फटिकमयम् ।

नानाविधबीजगर्भाः । नानाप्रकारसामर्थ्ययुक्ताः । बहुविधप्रकारभिन्नैर्वायुभिरिति । तदुत्पादने अनेकप्रकारसामर्थ्यभिन्नैर्वायुभिरित्यर्थः । असमाधानेनेति । अयुगपद्भावेनेत्यर्थः । न हि यदा कार्यं तदा कारणं तिष्ठति । [3]न ह्यवस्थितस्य द्रव्यस्येति । रूपरसाद्यात्मकस्य । धर्मान्तरनिवृत्ताविति ।

---

1 To. तिर्यक्प्रमाणस्य. 2 To. ०पार्श्व.

3 The passage न ह्यवस्थितस्य...दधि क्षीरम् (p. 85, l. 26...p. 86 l. 4) appears in the Mss. after the words एष इति (p. 87, l. 16). We have followed the Tibetan rendering.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षीरनिवृत्तौ । धर्मान्तरप्रादुर्भाव इति ' दधिजन्म । स एव धर्मी ' नेति । रूपाद्यात्मकक्षीरादिधर्मेभ्योऽन्यो [1]धर्म उत्पादव्यये[1] ऽप्यनुत्पन्नोऽविनष्टः ' परिणाम इति ' क्षीरनिवृत्तौ दधिभावः ' तदेव चेदमिति ' क्षीरमेव दधि ' न चेदं तथेति ' न चेदं दधि क्षीरम् । तदेवेदमिति ' यत् परिणामेनेत्युक्तम् । न चेदं तथेति । तस्यैव द्रव्यस्यान्यथीभावमात्रं परिणाम इति वचनात् । अपूर्वैषा वाचोयुक्तिरिति 'स्ववचनविरुद्धेत्यभिप्रायः । पूर्वोत्तरयोर्हि क्षणयोरन्यथात्वमिष्यते । ययोश्चान्यथात्वं[2] तयोरन्यत्वं दृष्टम् ' तद्यथा देवदत्तयज्ञदत्तयोः । तस्मात् कार्यकारणयोरन्यत्वेन भवितव्यम् ।

सुवर्णादय इति । सुवर्णरूप्यमणिमृदादयः । षष्टियोजनशतसहस्रसमुच्छ्राय इति । षष्ट्यधिको योजनलक्ष उच्छ्राय इत्यर्थः ॥४७-५१॥

[आभ्यन्तरः समुद्रोऽसौ त्रिगुणः स तु पार्श्वतः ।
अर्धार्धेनापराः सीताः शेषं बाह्यो महोदधिः ॥५२॥
लक्षत्रयं सहस्राणि विंशतिर्द्वे च तत्र तु ।
जम्बुद्वीपो द्विसाहस्रस्त्रिपार्श्वः शकटाकृतिः ॥५३॥
सार्धं त्रियोजनं त्वेकं प्राग्विदेहोऽर्धचन्द्रवत् ।
पार्श्वत्रयं तथास्यैकं सार्धत्रिशतयोजनम् ॥५४॥
गोदानीयः सहस्राणि सप्त सार्धानि मण्डलः ।
सार्धे द्वे मध्यमस्याष्टौ चतुरस्रः कुरुः समः ॥५५॥]

अष्टाङ्गोपेतस्येति ।

शीतलाच्छलघुस्वादुमृदुनिःपूतिगन्धिकम् ।
पीतं न बाधते[3] कुक्षिं न कण्ठं क्षिणोति तज्जलम् ॥

इति । अष्टाङ्गसंग्रहश्लोकः । पार्श्वतस्तु त्रिगुणो भवति युगन्धरतोरेण गण्यमान इति । स

आभ्यन्तरः समुद्रः

युगन्धरपार्श्वे नायामतः संख्यायमानः

त्रिगुण 52

इति कृत्वा चत्वारिंशद्योजनसहस्राधिकलक्षद्वयमायामो भवति युगन्धरपार्श्वे । अशीतिरेका तदुभयतश्चेतरयोर्दिशोरस्तत् [4]सीतानदीवैपुल्ययोगेनापरे द्वे [5]अशीती इति[5] तिस्रोऽशीतयः । चत्वारिंशदधिकं लक्षद्वयं भवतीति ।

1...1 Mss. धर्मोत्पाद० 2 Mss. ययोश्चान्यतम् 3 Mss. वा एत
4 To. सीमा० 5...5 Mss. & To. अशीतीति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लक्षत्रयं सहस्राणि विंशतिर्द्वे च

इति । निमिन्धरगिरिचक्रवाडयोरन्तरं एकस्यां दिशि बाह्यस्य समुद्रस्य तत् परिमाणमुक्तम् । अत्र सहस्रमेकं द्वे शते चान्ये अर्धाष्टाशीतिरेवेति वक्तव्यम् ' न्यूनत्वात् । एवमपरस्यां दिशि वक्तव्यम् । एवं द्वयोः सहस्रयोः पञ्चसु शतेषु पञ्चसप्ततौ च योजनानां प्रक्षिप्तेषु स [1]आधारः पूरितो भवति ' य उक्तः

तिर्यक् त्रीणि सहस्राणि सार्धं शतचतुष्टयम् ।
लक्षद्वादशकं चैव जलकाञ्चनमण्डलम् ॥[2]

इति 'अनया चतुर्द्वीपसंख्यया यथाविन्यासमतिरिच्यमानत्वात् । तदिदं परिह्रियते । नैष दोषः । चक्रवाडबहिर्जलकाञ्चनमण्डलस्य एतावतातिरिच्यमानत्वात् । न तर्हि चतुर्द्वीपकस्तेन चक्रवाडेन चक्रीकृतः । उपरिभूमिरनेन चक्रीकृता न जलमण्डलमित्यवगन्तव्यम् । अपर आह । न सुमेर्वादयः पर्वता [3]अत्यन्तच्छिन्नतटाः समुच्छ्रायघना भवन्ति । किं तर्हि' पर्वताकारन्यायेन किञ्चिदतिरिच्यमानाधरभागा दुर्लक्षविशेषत्वात्

समोच्छ्रायघनाश्च ते[4]

इत्युक्ताः[5] । अतस्तैस्तैः किञ्चिदतिरिच्यमानैरधोभागैस्तदाधेयं सुमेर्वादिकमाधारं जलकाञ्चनमण्डलात्मकं व्याप्नोतीत्यविरोध[6] एष इति ।

अन्य इति विस्तरः । न बोधिसत्त्वाश्रयादन्य **आश्रयो** वज्रासनाद्वान्यः प्रदेशस्तं वज्रोपमं समाधिं सोढुं समर्थ इति । **यश्च द्वीपो यदाकृतिरिति** ' प्रत्यक्षमेतत् भूमिवशात् सत्त्वानां वैचित्र्यम्' हिमवद्विन्ध्यवासिनां किरातशबराणां गौरश्यामते दृश्येते ॥५२-५५॥

[देहा विदेहाः कुरवः कौरवाश्चामरावराः ।
अष्टौ तदन्तरद्वीपाः शाठा उत्तरमन्त्रिणः ॥५६॥
इहोत्तरेण कीटाद्रिनवकाद्धिमवांस्ततः ।
पञ्चाशद्व विपुलागाधसरोऽर्वाग् गन्धमादनात् ॥५७॥
अधः सहस्रैर्विंशत्या तन्मात्रोऽवीचिरस्य हि ।
तदूर्ध्वं सप्त नरकाः सर्वेऽष्टौ षोडशोत्सदाः ॥५८॥

---

1 Mss. आचारः 2 Kārikā, III, 47 3 To. अत्यन्तच्छिन्नतटीसमु० 4 Kārikā, III, 51 5 To. इत्युक्ताः । 6 Mss. adds इति.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुकूलं कुणपञ्चैव क्षुरमार्गादिकं नदी ।
तेषां चतुर्दिशं शीता अन्येऽष्टावर्बुदादयः ॥५९॥
अर्धेन मेरोश्चन्द्रार्कौ पञ्चाशत् सैकयोजनौ ।
अर्धरात्रोऽस्तगमनं मध्याह्न उदयः समम् ॥६०॥]

देहा विदेहाः कुरवः

इति। स्थानिनां बहुत्वात् स्थानस्यापि बहुवचननिर्देशः। एको राक्षसैरिति। [1]चामरावरयोरन्यतरः।

कीटाद्रिनवकात्

इति। कीटाकृतीनां पर्वतानां नवकात्। **तदधिकारेणाऽयं जम्बुद्वीप** इति। जम्बुवृक्षाधिकारेण जम्बुवृक्षचिह्नो द्वीपो जम्बुद्वीपः। **फलाधिकारेण** वेति। जम्ब्वा[2] लुप् चेति[3] फलमपि जम्बु[4]। तत्फलचिह्नो जम्बुद्वीप इत्यर्थः। **चतुःस्कन्धा** इति। चतुःप्राकारा इत्यर्थः। चतुःसन्निवेश इत्यपरे। **अयःप्राकारपर्यन्ता** इति। अयःप्राकारपरिक्षिप्ता इत्यर्थः। **अयसा प्रतिकुब्जिता**[5] इति। अयसोपरिष्टाच्छादिता। अयसा पिहितद्वारा[6] इत्यपरे। **स्फुटेति** व्याप्ताः। **पूर्ववदिति** उत्क्षिप्ते पादे पुनरपि सञ्जायते त्वङ्मांसशोणितमित्यर्थः।

क्षुरमार्गादिकम्

त्रयमिति **क्षुरमार्गोऽसिपत्रवनं शाल्मलीवनं** चेति। लयः **श्यामलशबलाश्च श्वानो भक्षयन्तीति** असिपत्रवनान्तर्भूताः। **अयस्तुण्डाश्च वायसा** इति शाल्मलीवनान्तर्भूताः। **प्रासा** भिन्दिपालादयः। **अधिकयातनास्थानत्वादुत्सदा** इति। उच्छब्दोऽधिकार्थः। अधिकं सीदन्त्यत्रेत्युत्सदाः। [7]पुनर्यातनादाधिक्यमपरः[7]। **नरकेष्विति** विस्तरः। **अपर** इति स्थविरमनोरथः। स ऊर्ध्वार्थमुच्छब्दमिति। तेनाह। **आ नरकावरोधादवीच्यादिनरकावरोधात् ऊर्ध्वमेषु कुकूलादिषु सीदन्ति** अतस्तदुत्सदा इति। **प्रश्नात् प्रश्नान्तरमिति**। षोडशोत्सदाः कतम इत्युक्ता। चतुर्थ उत्सदो वैतरणी यस्यां सत्त्वा असिशक्तिप्रासहस्तैः पुरुषैरुभाभ्यां तीराभ्यां प्रतिवार्यमाणादूर्ध्वमपि गच्छन्तः खिद्यन्ते पच्यन्त इति। तस्मादिदं प्रश्नान्तरमुपजायते। **किं ते नरकपाला** इति विस्तरः। **विवर्तनीवायुवदिति** यथा विवर्तन्यां वायवो भाजनलोकाभिनिर्वृत्तये चेष्टन्ते। तद्वत्ते भूतभौतिकमाला नरकपाला इति। **यमराक्षसा** इति। पापकर्माणः सत्त्वा-

1 To. चामराबरचामरयोरन्य०
2 To. adds वा.
3 Pā., IV, 3, 66
4 To. जम्बूः
5 To. प्रतिवर्जिता.
6 Mss. & To. पिथितद्वारा
7...7 Mss. पुनर्यातनादाधिक्यापरः; To. कथं पुनर्यातनाधिक्यमित्याह

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नरकपाला जायन्त इत्यर्थः । ये ते यमेनेति । ये ते यमेन देवदूतीयसूत्रोक्ते-नानुशासनेनानुशिष्टास्तान् सत्त्वान् नरकस्थानेषु प्रक्षिपन्ति यमराजधानी-निवासिनः । त एते यमराक्षसा उक्ताः । न तु[1] ये कारणा यातनाः कारयन्ति असिशक्तिप्रासहस्तादयः । तस्येदानीं कर्मणः क विपाक इति । नरकपालानां नरककृतस्य कर्मणः क विपाकः । तेष्वेवेति विस्तरः । येष्वानन्तर्यकारिणां विपाकावकाशस्तेषु नरकेषु तेषां नरकपालानां को विप्रतिबन्धः । एतदुक्तं भवति । तेषामपि तावदानन्तर्यकारिणां महदानन्तर्यकर्मणो विपाक-स्यातिमहतो नरकेष्ववकाशोऽस्ति । किमङ्ग पुनर्नरकपालानां यत् कर्म तत् कारणाः कारयतामिति । कृतावधित्वात् कृतमर्यादत्वान्नरकपालान् प्रति । एते न दग्धव्या इति । भूतविशेषनिर्वृत्तेर्वा भूतविशेषास्तादृशास्तेषां कर्मभिरभिनिर्वृत्ताः । यत्तेनाग्निना न दह्यन्ते । कायशब्दविकारानुरूपाणीति । कायविकारानुरूपाण्यर्बुदो निरर्बुद[2] उत्पलः पद्मो महापद्मश्चेति नामान्यर्बुदाद्याकारकायत्वात्तत्रत्यानां सत्त्वानाम् । शब्दविकारानुरूपाण्य-ठठो[3] हहवो हुहुव इत्येतानि नामानि । अत एवेति । धान्यराशिवदधोविशाल-त्वात् । बहिरिति नान्तर्गतः ।

तैजसं सूर्यकान्तात्मकमाप्यं[4] चन्द्रकान्तात्मकं [5]यथासम्भवमिति । तदु-भयमण्डलं [6]दृष्ट्यादीनां देशकालावस्थान्तरानुरूप्येणानुग्रहार्थमुपघातार्थं च । एवमन्येष्वपि योज्यमिति । कथम् । [7]यदा पूर्वविदेहे[8]ऽर्धरात्रस्तदा जम्बुद्वीपे सूर्यास्तगमनमवरगोदानीये मध्याह्न उत्तरकुरावुदय इत्येवमन्यत्रापि योज्यम् ॥५९-६०॥

[प्रावृण्मासे द्वितीयेऽन्त्यनवम्यां वर्धते निशा ।
हेमन्तानां चतुर्थे तु हीयतेऽहर्विपर्ययात् ॥६१॥]

प्रावृण्मासे द्वितीयेऽन्त्यनवम्याम्[9]

इति । प्रावृण्मासाश्चत्वारः श्रावणो यावत्कार्त्तिकः । सर्वे च मासाः कृष्णपक्षाद्याः । तत्र भाद्रपदशुक्लपक्षनवम्यां रात्रिर्वर्धते । हेमन्तकानां चतुर्थे हीयते । हेमन्ता[10] मासाश्चत्वारो मार्गशीर्षाद्याः फाल्गुनान्ताः । तत्र फाल्गुनशुक्लपक्षनवम्यां हीयते ॥६१॥

---

1 Mss. omit न तु.
2 To. निर्बुदः
3 Mahāvyutpatti reads अटटो.
4 Mss. ०माप्यं
5 Mss. यथा सम्भवति
6 Mss. हृष्ट्यादीनां
7 Mss. यथा
8 To. रात्रः
9 Mss. omit अन्त्य.
10 To. हेमन्ती

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[लवशो रात्र्यहर्वृद्धी दक्षिणोत्तरगे रवौ ।
स्वच्छाययार्कसान्निध्याद् विकलेन्दुसमीक्षणम् ॥६२॥]

[¹लवशः

इ]ति लवं लवम्¹ । कालाध्वनोरत्यन्तसंयोगे द्वितीया² । अपरपार्श्वे छाया पतन्ती विकलमण्डलं दर्शयतीति' तद्यथा स्तम्भे प्रदीपच्छाया पतन्ती' यथा यथा स्तम्भ आसन्नो भवति तथा तथा स्तम्भः स्वच्छाययाच्छाद्यते' दूरे हि वर्तमाने प्रदीपे परिपूर्णस्तम्भो दृश्यते । किञ्चिदासन्ने किञ्चित् क्षीयते । यावदासन्ने स्तम्भो नष्टरूपो वर्तते तद्वदेतत् ' वाह्ययोगः स तादृश इति । पुनस्तिर्यगवनामोन्नामयोगेनाधोभागश्चन्द्रमण्डलस्य क्षीयते । ऊर्ध्वं वर्धते चेति योगाचाराः ॥६२॥

[परिषण्डाश्चतस्रोऽस्य दशसाहस्रिकान्तराः ।
षोडशाऽष्टौ सहस्राणि चत्वारि द्वे च निर्गताः ॥६३॥
करोटपाणयस्तासु मालाधराः सदामदाः ।
महाराजिकदेवाश्च पर्वतेष्वपि सप्तसु ॥६४॥]

चातुर्महाराजकायिका इति । चतुर्महाराजानां कायः ' तत्र भवाश्चातुर्महाराजकायिकाः । सुमेरुपरिषण्डादीनीति' आदिशब्देन युगन्धरादीनि ।

दशसाहस्रिकान्तराः

इति । योजनदशसहस्रप्रमाणान्तरा इत्यर्थः । अर्धमाक्षिप्तमिति । अर्धमवष्टब्धम्'

सदामदाः

इति 'सदामत्ता इति वक्तव्ये श्लोकबन्धानुगुण्येन सदामदा इत्युक्तम्' अर्थैकत्वात् । चतुर्थ्यां चत्वारो महाराजानः स्वयं प्रतिवसन्तीति । धृतराष्ट्रः पूर्वदिग्भागे' विरूढको दक्षिणे' विरूपाक्षः पश्चिमे ' वैश्रवण उत्तरस्मिन्नित्यनुक्रमोऽवगन्तव्यः । चातुर्महाराजिका देवा इत्युक्तमिति' यस्माच्चतुर्थ्यां परिषण्डायां चत्वारो महाराजानः स्वयं प्रतिवसन्ति ' अत एवमुक्तम् ।

महाराजिकदेवाः

इति । महाराजे भवा इति कृत्वा । महिष्ठो महत्तमः ॥६३-६४॥

[मेरुमूर्ध्नि त्रायस्त्रिंशाः स चाशीतिसहस्रदिक् ।
विदिक्षु कूटाश्चत्वार उषिता वज्रपाणिभिः ॥६५॥

1...1 Mss. निलवंल ; To. निलवंलवंल, but suggests इति लवं लवं.
2 Pā., II, 3, 5.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मध्ये सार्धद्विसाहस्रपार्श्वं मध्यर्धयोजनम् ।
पुरं सुदर्शनं नाम हैमं चित्रतलं मृदु ॥६६॥
सार्धद्विशतपार्श्वोऽत्र वैजयन्तो बहिः पुनः ।
तच्चैत्ररथपारुष्यमिश्रनन्दनभूषितम् ॥६७॥]

स विंशतिसहस्रदिगिति । यद्येवं कथमिदमुक्तं

समुच्छ्रायघनाश्च ते[1]

इति । [2]मध्यभागमेवाभिसमीक्ष्यैवमुक्तमिति तेषामभिप्रायः । **अध्यर्धमिति ।** अधिकमर्धमस्मिन्निति । अध्यर्धं योजनमस्येति

अध्यर्धयोजनम् ।

समुच्छ्रायेणेत्यध्याहार्यम् । **धातुशतेन** रङ्गशतेन । **नानारत्नस्थान-विधानसम्पदेति ।** नानारत्नविधानसम्पदा नानास्थानविधानसम्पदा च । **सर्वान्य-भवनानां श्रियस्तासां महिमानो** महत्त्वानि । **ह्रेपणो** लज्जनो लज्जाजनक इत्यर्थः । **दैर्घ्येणार्धतृतीये[3]योजनशते[4] पार्श्वमिति ।** एकं पार्श्वमेतत्प्रमाणम् । यावच्चतुर्थ-मप्येतत्प्रमाणमिति । [5]चैत्ररथादीन्यपि चतुरस्रसार्धद्विशतपार्श्वानि[5] ॥६५-६७॥

[विंशत्यन्तरितान्येषां सुभूमीनि चतुर्दिशम् ।
पूर्वोत्तरे पारिजातः सुधर्मा दक्षिणावरे ॥६८॥]

सुभूमीनि

इति । शोभना भूमय एषामिति सुभूमीनि क्रीडास्थानानि ।

चतुर्दिशम्

इति । चतस्रो [6]दिशा अस्येति[6] चतुर्दिशं क्रियाविशेषणम् । भागुरिमतेन [7]दिक्शब्द आकारान्तो[7] भवति । **विंशतियोजनान्यतिक्रम्येति[8]** । क्रीडास्था-नानि भवन्तीति । विंशतियोजनान्यन्तरितानीत्युच्यते ॥६८॥

[तत ऊर्ध्वं विमानेषु देवाः कामभुजस्तु षट् ।
द्वन्द्वालिङ्गनपाण्याप्तिहसितेक्षितमैथुनाः[9] ॥६९॥]

त्रायस्त्रिंशानामिति । त्रयस्त्रिंशास्तेषु भवास्त्रायस्त्रिंशाः । तेषाम् । **कामरतिप्रकर्षा-लयः ।** कामरतिविशेषस्थानम् । **वृक्षानतिक्रमं सन्धायोक्तमिति ।** तं कोविदारवृक्ष-

---

1 Kārikā, III, 51. 2 Mss. मध्यभागमेवमभि० 3 To. ०तृतीयं
4 To. ०शतं 5...5 Mss. ०पार्श्वानम् ; To. omits this portion.
6...6 Mss. & To. दिशोऽस्येति 7...7 Mss. and To. दिक्शब्दोऽकारान्तो
8 To. omits इति. 9 Poussin ०हेक्षणमैथुनाः, but see Sphuṭārthā.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनतिक्रम्य स गन्धो वर्तते। तस्य पञ्चाशद्योजनानि शाखापत्रपलाशमिति। एवं वृत्तानतिक्रमं सन्धायोक्तं **पञ्चाशद्योजनानि प्रतिवातं गन्धो वातीति।** अत्रोत्तरमाहुः 'न हि नाम प्रतिवातं वातो भवति' यत्रैवोत्पद्यते तत्रैव ध्वंस्यते' न देशान्तरे सन्तानं सन्तनोति। उक्तं च पञ्चाशद्योजनानि प्रतिवातमिति। तस्मादसमाधिरेषः। तस्मात् समाध्यन्तरमिदमाह। **तस्यैव त्विति** विस्तरः। किं पुनः कारणम् ' योजनशतमत्र वातं गन्धो वाति प्रतिवातन्तु पञ्चाशत्। न ततः परेणेत्यत आह। **मन्दतरतमसमारम्भात्त्विति** विस्तरः। मृदुमारुतप्रतिबध्यमानतया मन्दतरतमसमारम्भः। ततश्च स गन्धसन्तान आश्वेव समुच्छिद्यते। अतः कारणात् न तथा विप्रकृष्टमध्वानं योजनशतप्रमाणं प्रसर्पतीति। **उताहो वायुरधिवासितो जायत** इति। यथा तिलेषु पुष्पगन्धाद्गन्धान्तरमुत्पद्यतेऽन्यदेव' न स पौष्पो गन्ध इत्याह। यदि पञ्चाशद्योजनं प्रतिवातं गन्धो वाति। यत्तर्हि भगवतोक्तं[1] **न पुष्पगन्धः प्रतिवातमेतीति** विस्तरः। **मौलिको गन्धो** मुस्तादिः। **कृत्याकृत्यं समर्थयन्त** इति। कार्याकार्यं संप्रतीच्छन्ति संप्रधारयन्तीत्यर्थः।

समासेन येषां भाजनं प्रज्ञायत इति। भाजनं स्थानम् विस्तरेणान्येऽपि देवाः क्रीडाप्रमोषकप्रहासकादयः सन्तीति। अतः समासेनोक्तम् ' द्वन्द्वेन यावदीक्षितेन मैथुनमेषामिति

द्वन्द्वालिङ्गनपाण्याप्तिहसितेक्षितमैथुनाः।

सर्वेषां समापत्त्येति। षण्णामपि कामभुजां द्वन्द्वसमापत्त्या परिदाहविगमः। **कालपरिमाणं तु प्रज्ञप्तावुक्तमिति।** यावता कालेन द्वन्द्वालिङ्गनपाण्याप्तिहसितेक्षितानि भवन्ति तावता कालेन एषां **भूमिसम्बन्धवासिनां यामतुषितनिर्माणरतिपरनिर्मितवशवर्तिनां यथाक्रमं द्वन्द्वसमापत्तिरिति वैभाषिकाः।** **यावद्यावदिति** विस्तरः। यावद्यावत् **परेण परतरेण** विषयाणां तीव्रतरत्वात् **रागोऽपि** तीव्रतरस्तावत्तावन्मैथुनकार इत्यभिप्रायः ॥६९॥

[पञ्चवर्षोपमो यावद् दशवर्षोपमः शिशुः।
सम्भवत्येषु सम्पूर्णाः सवस्त्राश्चैव रूपिणः ॥७०॥
कामोपपत्तयस्तिस्रः कामदेवाः समानुषाः।
सुखोपपत्तयस्तिस्रो नव त्रिध्यानभूमयः ॥७१॥]

ते पुनश्चत्वारो देवनिकाया इति। चातुर्महाराजकायिका यावत्तुषिताः। यथोत्पन्नपरिभोगः। स एषामस्तीति **यथोत्पन्नपरि-**

1 Udānavarga, VI, 14.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भोगिनः । तदभावस्तस्मात् । यथेच्छयात्मनिर्मितम् । तस्य परिभोगः पूर्ववत् । यथेच्छात्मपरनिर्मितपरिभोगित्वादिति । आत्मना परेण च निर्मिते' यथेच्छयात्मपरनिर्मिते । तयोः परिभोगः पूर्ववत् । यथेच्छपरनिर्मितपरिभोगित्वादिति केचित् पठन्ति । तत्र [1]यावदेवं विग्रहः । परनिर्मितं यथेच्छं परनिर्मितं तस्य परिभोग इति पूर्ववत्' निर्माणरतीनां परनिर्मितान् कामान् परिभोक्तुं न सम्पद्यति । तदेवं परनिर्मितवशवर्तिनां निर्माणरतिभ्यो विशेषः प्रदर्शितो भवति । बाह्यरूपादिविषयनिर्माणं चात्र वेदितव्यम् । **विवेकजेन** प्रथमध्यानभूमिकेनाकुशलविविक्तत्वात् । **समाधिजेन** च द्वितीयध्यानभूमिकेन वितर्कविचारविगमात्' प्रीतिसुखेनेति । प्रीतिलक्षणेन सुखेन **निःप्रीतिकेन च सुखेन** सौमनस्यविगमात् । **सुखं विहरन्त** इति । सुखमिति क्रियाविशेषणम् । **सुखोपपत्तित्वं विचार्य**मिति । सुखाभावान्न ध्यानान्तरं सुखोपपत्तिरिति शक्यं वक्तुम् । कुशलविपाकत्वेन सुखकल्पत्वात् सुखोपपत्तिरिति न शक्यं व्यवस्थापयितुम् । चतुर्थेऽपि ध्याने सुखोपपत्तिप्रसङ्ग इति चेत् । न । तस्यां भूमौ सुखाभावात् । तस्माद्विचार्यं संप्रधार्यमेतदिति भावः ॥७०-७१॥

[स्थानात् स्थानादधो यावत्तावदूर्ध्वं ततस्ततः ।
नोर्ध्वं दर्शनमस्त्येषामन्यत्रर्धिपराश्रयात् ॥७२॥]

एवं शेषा इति । ऋद्धया वा यामास्तुषितां गच्छेयुः । यदि ऋद्धिमता नीयेरन् । देवेन वा तत्रत्येन । समानभूमिकास्तु चातुर्महाराजकायिकास्त्रयस्त्रिंशां गच्छन्ति । **आगतं तूर्ध्वोपपन्नं पश्येदिति** । समानभूमिकं नोर्ध्वभूमिकमिति । प्रथमध्यानोपपन्नो न द्वितीयध्यानोपपन्नमित्यादि । **तदिच्छयेति** । ऊर्ध्वोपपन्नेच्छया । इहत्यमिवेति । इह भव इहत्यः । अधोभूमिक इत्यर्थः । **इहत्यमिव पश्येदिति** निकायान्तरीयाः । **यथा स्त्रष्टव्यमित्युदाहरणमात्रमेतत्** । यथा शब्द इत्येतदपि गम्येत' **चतुर्णां** कामावचराणां यामादिस्थानानाम् । **द्विगुणोत्तरमिति** । यामस्थानाद् द्विगुणं तुषितस्थानमित्यादि । **चतुर्थं त्वपरिमाणमिति** । तारकावदतत्रवाटकप्रतिबद्धविमानत्वादपरिमाणत्वसम्भव इत्यभिप्रायः ॥७२॥

[चतुर्द्वीपकचन्द्रार्कमेरुकामदिवौकसाम् ।
ब्रह्मलोकसहस्रञ्च साहस्रश्चूडिको मतः ॥७३॥
तत् सहस्रं द्विसाहस्रो लोकधातुस्तु मध्यमः ।
तत्सहस्रं त्रिसाहस्रः समसंवर्तसम्भवः ॥७४॥]

---

1 To. पाठ एवं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सहस्रं ब्रह्मलोकानामिति । ब्रह्मकायिकब्रह्मपुरोहितमहाब्रह्मणामित्यर्थः । लोके तथा प्रतीतत्वात् ।

चूडिकः

इति । महतो लोकधातोश्चूडाभूतत्वाच्चूडिक इत्युच्यते । **सम्भवो हि विवर्त** इति । विविधवर्तनं विवर्तः । विविधा वर्तन्तेऽस्मिन्निति विवर्तः । संवर्तनं संवर्तः संवर्तन्ते वास्मिन्निति संवर्तः । तस्मिन् हि काले सत्त्वा एकस्मिन् ध्याने द्वितीये तृतीये चतुर्थे वा संवर्तन्ते संगच्छन्त इति ।

विवर्तते च संवृत्त आस्ते संवर्तते समम्[1]

इति । उत्तरत्र व्याख्यास्यामः ॥७३-७४॥

[जाम्बुद्वीपाः प्रमाणेन चतुःसार्धत्रिहस्तकाः ।
द्विगुणोत्तरवृद्ध्या तु पूर्वगोदोत्तराह्वयाः ॥७५॥]

जाम्बुद्वीपाः प्रमाणेन चतुःसार्धत्रिहस्तकाः

इति । सार्धत्रिहस्तप्रमाणशरीराः । केचित्तु चतुर्हस्तप्रमाणशरीराः ।

पूर्वगोदोत्तराह्वयाः

इति । पूर्वगोद उत्तर इति चाह्वय एषां ते पूर्वगोदोत्तराह्वयाः । तेषां यथासंख्य-मष्टहस्तप्रमाणाः पूर्वविदेहकाः षोडशहस्तप्रमाणा गोदानीया द्वात्रिंशद्धस्त-प्रमाणका औत्तरकौरवा इति ॥७५॥

[पादवृद्ध्या तनुर्यावत् सार्धक्रोशो दिवौकसाम् ।
कामिनां रूपिणां त्वादौ योजनार्धं ततः परम् ॥७६॥
अर्धार्धवृद्धिरूर्ध्वं तु परीत्ताभेभ्य आश्रयः ।
द्विगुणद्विगुणो हित्वाऽनभ्रकेभ्यस्त्रियोजनम् ॥७७॥]

पादवृद्ध्या

इति विस्तरः ।

यावत् सार्धक्रोशः

इति । वक्ष्यमाणत्वात् पाद इति क्रोशस्येति गम्यते । **क्रोशचतुर्थभागमात्रं च शरीरं चातुर्महाराजकायिकानाम् । द्विपादमात्रं त्रायस्त्रिंशानां यावदध्यर्ध क्रोशमात्रं परनिर्मितवशवर्तिनाम् । योजनत्रयेण हीनं द्विगुणमिति ।** द्विगुणं कृत्वा त्रीणि योजनान्यपनेयानि । **पञ्चविंशयोजनशतमनभ्रकाणां शरीरप्रमाणमिति । पुण्यप्रसवानामिति ।** पुण्यप्रसवानामर्धतृतीये[2]

---

1 Kārikā, III, 92.

2 To. ०तृतीयं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योजनशते[1] शरीरप्रमाणम् । बृहत्फलानां पञ्चयोजनशतानीति गणयितव्यम् ॥७६-७७॥

[सहस्रमायुः कुरुषु द्वयोरर्धार्धवर्जितम् ।
इहानियतमन्ते तु दशाब्दानादितोऽमितम् ॥७८॥
नृणां वर्षाणि पञ्चाशदहोरात्रो दिवौकसाम् ।
कामेऽधराणां तेनायुः पञ्चवर्षशतानि तु ॥७९॥
द्विगुणोत्तरमूर्ध्वानामुभयं रूपिणां पुनः ।
नास्त्यहोरात्र [2]आयुस्तु कल्पैः स्वाश्रयसम्मितैः ॥८०॥
आरूप्ये विंशतिः कल्पसहस्राण्यधिकाधिकम् ।
महाकल्पः परीत्ताभात् प्रभृत्यर्धमधस्ततः ॥८१॥]

कुमुदपद्मवदिति । यथेह कुमुदान्यहनि सङ्कुचन्ति रात्रौ विकसन्ति । पद्मानि तु विपर्ययेण । तथा तत्र केषाञ्चिदेव पुष्पाणां सङ्कोचादहनि च विकाशादहोरात्रव्यवस्थानम् । शकुनीनाञ्च कूजनाकूजनात् । अकूजनाद्रात्रिः कूजनात् प्रभातम् । विपर्ययेण वा यथा शकुनिजोति । मिद्धापगमोपगमाच्च । मिद्धोपगमाद्रात्रिः प्रज्ञायते । मिद्धापगमात् प्रभातमिति ।

अधिकाधिकम्

इति विंशतिरधिकम् । अधिकं भवतीत्यर्थः । तेनाह । **एवं तेषां यथाक्रमं चत्वारिंशत् षष्टिरशीतिः**

कल्पसहस्राणि

आयुःप्रमाणमिति । **विज्ञानान्त्यायतने** चत्वारिंशत् । **आकिञ्चन्यायतने** षष्टिः । **भवाग्रे**ऽशीतिरिति । **तस्मादधो महाकल्पस्यार्ध**मिति विस्तरः । अशीतिरन्तरकल्पा महाकल्पाः । तस्यार्धं चत्वारिंशदन्तरकल्पाः । तस्य महाकल्पार्धस्य कल्पीकृतस्य यदर्धं विंशतिरन्तरकल्पाः । तद्ब्रह्मकायिकानामायुःप्रमाणम् । यत्तदर्धकल्पीकृतं चत्वारिंशदन्तरकल्पास्तद् ब्रह्मपुरोहितानामायुःप्रमाणम् । तदेवमात्मीयार्धं महाब्रह्मण आयुःप्रमाणम् । स **ह्यध्यर्धः कल्प** इत्युच्यते षष्ट्यन्तरकल्पसंख्याः[3] । **महाब्रह्मादीना**मिति । आदिशब्देन ब्रह्मपुरोहितानां ब्रह्मकायिकानां च प्रातिलोम्येन ग्रहणम् ।

---

1 To. ०शतं.

2 Poussin मायु०

3 To. संख्या

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अर्धमधस्ततः[1]

परीत्ताभात् देवनिकायादिति निर्देशापेक्षणात् ॥७८-८१॥

[कामदेवायुषा तुल्या अहोरात्रा यथाक्रमम् ।

संजीवादिषु षट्स्वायुस्तैस्तेषां कामदेववत् ॥८२॥

अर्धं प्रतापनेऽवीचावन्तःकल्पः पुनः पुनः ।

कल्पस्तिरश्चां प्रेतानां मासाहःशतपञ्चकम् ॥८३॥

वाहाद्वर्षशतेनैकतिलोद्धरक्षयायुषः ।

अर्बुदा विंशतिगुणप्रतिवृद्ध्यायुषः परे ॥८४॥

कुरुवर्ज्योऽन्तरामृत्युः]

तेषामायुःप्रमाणमुक्तमिति । तेषां महाब्रह्मपुरोहितानां ब्रह्मकायिकानाम् ।

कामदेवायुषा तुल्याः

इति विस्तरः । चातुर्महाराजकायिकानां यदायुःप्रमाणमुक्तम् । स सञ्जीवे अहोरात्रः । एवं यावद्यत् परनिर्मितवशवर्तिनामायुःप्रमाणमुक्तं स तपने अहोरात्रः ।

कामदेववत्

इति कामदेवानामिव कामदेववत् । तत्र तस्येवेति वतिः[2] । तेन यावद् द्वादशमासकेनेति तेन [3]ततस्त्येनाहोरात्रेण तेषां त्रिंशद्रात्रकेण मासेन द्वादशमासकेन संवत्सरेण तत्रत्यानि दिव्यानि पञ्च वर्षशतान्यायुरित्यादि । एवमन्येष्वपि यथायोगं योज्यमिति । यद्यामानामायुःप्रमाणं तत् संघाते महानरके एकं रात्रिन्दिवम् तेन रात्रिन्दिवेन तस्मिन् वर्षसहस्रद्वयमायुःप्रमाणम् । एवमन्येष्वपि यथायोगं योज्यम् । अष्टाविमे भिक्षव इति । अष्टाविमे भिक्षवो नागा महानागाः कल्पस्था धरणीन्धरा अप्रत्युद्धार्याः सुपर्णिनः पक्षिराजस्य देवासुरमपि संग्राममनुभवन्त्यपि [4]प्रत्यनुभवन्त्यपि । ते पुनः कतमे । तद् यथा नन्दो नागराजः उपनन्दो नागराजः अश्वतरी नागराजः मुचिलिन्दो नागराजः मनस्वी नागराजः धृतराष्ट्रो नागराजः महाकारो[5] नागराजः एलपत्रो नागराज इति । चूडिकाबद्ध इति शिखाबद्धः ।

---

1 To. adds इति.
2 Pā., VI, I, 116.
3 To. तत्रत्येना०
4 Mss. & To. प्रत्यन्यभव०
5 To. ०कालो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकजातिप्रतिबद्धस्येति । एकजन्मप्रतिबद्धबुद्धत्वस्य । **चरमभविकस्येति** । अन्त्यजन्मनः । येन तस्मिन्नेव जन्मन्यर्हत्त्वं साक्षात् कर्तव्यम् । तस्य नास्त्यन्तरेण कालक्रिया यावदर्हत्त्वं न प्राप्नोति । **श्रद्धानुसारिधर्मानुसारिणोः** । नास्त्यन्तरेण कालक्रिया यावच्छ्रद्धाधिमुक्तदृष्टिप्राप्तौ न भवतः । **तद्गर्भयोरिति** । बोधिसत्त्वचक्रवर्तिगर्भयोः । तन्मात्रोर्नास्त्यन्तरेण कालक्रिया यावन्न तौ जायेते । **एवमादीनामिति** । आदिशब्देन निरोधासंज्ञिसमापत्तिसमापन्नानां मैत्र्यादिसमापन्नानां च नास्त्यन्तरेण कालक्रिया यावत्तस्मात् समाधेर्न व्युत्तिष्ठन्ते ॥

[परमाण्वक्षरक्षणाः ।
रूपनामाध्वपर्यन्ताः परमाणुरणुस्तथा ॥८५॥
लोहाप्शशाविगोछिद्ररजोलिक्षास्तदुद्भवाः ।
यवस्तथाङ्गुलीपर्व ज्ञेयं सप्तगुणोत्तरम् ॥८६॥
चतुर्विंशतिरङ्गुल्यो हस्तो हस्तचतुष्टयम् ।
धनुः पञ्चशतान्येषां क्रोशोऽरण्यं [तथा] मतम् ॥८७॥
तेऽष्टौ योजनमित्याहुः]

चतुर्विंशतिरङ्गुल्यो हस्तः

इति । अभिधर्मवचनकाले यः पुरुषहस्तः स ग्रहीतव्यः । येन चतुर्द्वीपकादि परिमाणव्यवस्थानम् ॥

[विंशतुक्षणशतं पुनः ।
ततुक्षणस्ते पुनः षष्टिर्लवस्त्रिंशद्गुणोत्तराः ॥८८॥
त्रयो मुहूर्ताहोरात्रमासा द्वादशमासकः ।
संवत्सरः सोनरात्रः]

हेमन्तानामिति । यथा वर्षा इत्येकस्मिन्नप्यर्थे बहुवचनं प्रसिद्धं [1]तथा हेमन्ता ग्रीष्मा इति द्रष्टव्यम् । प्रवचने त्रय एवर्तवो न यथा लोके षडिति । शिशिरो हि शीतसामान्याद्धेमन्त इत्युक्तः । वसन्तोऽप्यूष्मसामान्याद् ग्रीष्म इत्युक्तः । शरदपि वृष्टिसामान्याद्वर्षा इत्युक्तेति । **हेमन्तग्रीष्मवर्षाणामिति** । सर्वबौद्धानां हेमन्ताः प्रथम ऋतुः । ग्रीष्मा द्वितीयः । वर्षास्तृतीयः । तत्राधिकमर्धमस्येत्यध्यर्धो मासः । तस्मिन्नध्यर्धे [2]मासि निर्गते । मार्गशीर्षे सपौषार्धेऽधिक्रान्ते । शेषेऽर्धमासे । पौषस्यार्धेऽवशिष्टे कृष्णचतुर्दश्याम् । ऊनरात्रो विद्वद्भिर्बौद्धैर्निपात्यते

1 Mss. omit तथा To. ए.   2 To. अध्यर्ध०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्यज्यत इत्यर्थः। चातुर्दशिकोऽत्र भिक्षुभिः पोषधः क्रियते। एवं माघे फाल्गुनार्धेऽतिक्रान्ते शेषेऽर्धमासे फाल्गुनावशिष्टे पुनरपर ऊनरात्रो निपात्यते। तथा ग्रीष्मेषु वैशाखकृष्णचतुर्दश्यामाषाढकृष्णचतुर्दश्यां[1] चापरावूनरात्रौ निपात्येते। [2]वर्षास्वपि भाद्रपदकृष्णचतुर्दश्यां कार्त्तिककृष्णचतुर्दश्यां चापरावूनरात्रौ[3] निपात्येते॥

[कल्पो बहुविधः स्मृतः ॥८९॥
संवर्तकल्पो नारकासम्भवाद्भाजनक्षयः।
विवर्तकल्पः प्राग्वायोर्यावन्नारकसम्भवः ॥९०॥
अन्तःकल्पोऽमिताद्यावद्दशवर्षायुषस्ततः।
उत्कर्षा अपकर्षाश्च कल्पा अष्टादशापरे ॥९१॥
उत्कर्ष एकस्तेऽशीतिसहस्राद्यावदायुषः।
इति लोको विवृत्तोऽयं कल्पांस्तिष्ठति विंशतिम् ॥९२॥
विवर्तते च संवृत्त आस्ते संवर्तते समम्।
तेऽह्यशीतिर्महाकल्पस्तदसंख्यत्रयोद्भवम् ॥९३॥
बुद्धत्वम्]

गतिसंवर्तनीति। नरकाद्याः पञ्चगतयो गत्येकदेशे देवगतौ संवर्तन्त एकस्थीभवन्तीत्यर्थः। धातुसंवर्तनी चेति। कामधातू रूपधातौ संवर्तत इति। सत्त्वसंवर्तनी। यदा सत्त्वा एव संवर्तन्ते ध्यानेष्वेकस्थीभवन्ति। न तु तावद्भाजनानि संवर्तन्ते विनश्यन्तीत्यर्थः। भाजनसंवर्तनीति। यदा भाजनान्येव संवर्तन्ते न तु सत्त्वाः। एकस्यापि सत्त्वस्य तत्राभावात्। यदयं लोक इति विस्तरः। यदयं लोको विंशतिमन्तरकल्पान विवृत्तो जातः। यावन्नरकोत्पत्तिप्रवृत्ति[4] [5]निर्यातं तन्निष्ठितं वक्तव्यमित्यर्थः। तत्प्रतिपन्नं वक्तव्यमिति। तत्संवर्तनमारब्धं वक्तव्यमित्यर्थः। एवं तिर्यक्संवर्तनी प्रेतसंवर्तनीति च वक्तव्येति। यदा तिर्यक्ष्वेकसत्त्वोऽपि नावशिष्टो भवति। इयतायं लोकः संवृत्तो भवति। तिर्यक्संवर्तन्या यस्य तदानीं नियतं तिर्यग्वेदनीयं कर्म ध्रियते। स लोकधात्वन्तरतिर्यक्षु क्षिप्यते। एवं प्रेतसंवर्तनी योज्या यदा प्रेतेष्विति विस्तरेण। मनुष्यसहचरिष्णव इति। मनुष्यसहचरणशीला गोमहिषादयः। धर्मताप्रतिलम्भिक-

1 To. ०माषाढचतुर्दश्यां 2 To. वर्षस्वपि 3 Mss. पराधीनरात्रौ
4 To. ०प्रभृत्ति 5 Mss. न्निर्यातं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मिति । धर्मता नाम कुशलानां धर्माणां तदानीं परिणामविशेषः । तथा प्रतिलम्भोऽस्यास्तीति धर्मताप्रातिलम्भिकम् । यन्मनुष्येष्विति । जम्बुद्वीपमनुष्येष्वित्यभिप्रायः । एवं पूर्वविदेहगोदानीयसंवर्तन्यौ योज्यौ । उत्तरकुरुसंवर्तनी त्वेवं वक्तव्या भवति । स कालो यदुत्तरकुरौ मनुष्याश्च्यवन्त एव नोपपद्यन्ते । यदा तत्रैकसत्त्वोऽपि नावशिष्टो भवति । इयतायं लोकः संवृत्तो भवत्युत्तरकुरुसंवर्तन्येति । कस्मादेवं वक्तव्या । न तु जम्बुद्वीपसंवर्तन्यादिवदित्याह । तत्र वैराग्याभावात् । तत्रोत्तरकुरौ वैराग्याभावात् । इत एव सामन्तकादिति[1] । चातुर्द्वीपकसामन्तकादित्यर्थः । तदाक्षेपके कर्मणि परिक्षीण इति । भाजनाक्षेपके भाजनोत्पादके[2] परिक्षीण इत्यर्थः । ब्राह्मं विमानं निर्दहदर्चिः परैति । गच्छतीत्यर्थः । तच्च तद्भूमिकमेवार्चिरिति । प्रथमध्यानभूमिकम् । कस्मादित्याह । न हि विसभागा विसदृशा अपक्षाला उपद्रवा अग्न्यादयः क्रमन्ते तापयन्त इत्यर्थः । आह । यद्येवं किमिदमुच्यते । तस्मादेव चेति विस्तरेणोत्पत उच्यते । ततसम्बद्धसम्भूतत्वादिति विस्तरः । तेन कामावचरेणार्चिषा सम्बद्धं सम्भूतं रूपावचरमर्चिस्तद्भावस्तस्मादिति । एवमन्यस्यामिति । यथा तेजःसंवर्तन्यामुक्तमेवमन्यस्यामप्यप्संवर्तन्यां वायुसंवर्तन्यां च यथासम्भवं वेदितव्यम् । कथं कृत्वा नरकादिसंवर्तनी[3] । यां[4] पूर्ववदुक्त्वा यावदियताऽयं लोकः संवृत्तो भवति सत्त्वसंवर्तन्या । ततः शून्ये भाजने सहजोऽब्धातुः सम्भवति । यस्तं भाजनलोकं लवणमिव विलोपयति । स कामावचरोऽब्धातुः प्रथमध्यान[5]भूमिकमब्धातुं सम्बध्नाति । स च द्वितीयध्यानभूमिकं[5] सम्बध्नाति । स चाब्धातुस्त्रिभूमिकोऽपि स्वेन स्वेन भाजनेन सहान्तर्धीयते । एवं वायुसंवर्तन्यां सहजो वायुः सम्भवतीति वक्तव्यम् । कथमिति पूर्ववदुक्त्वा यावत् सहजो वायुधातुः सम्भवतीति । यस्तं भाजनलोकं कामावचरं यावत्तृतीयध्यानभूमिकं क्रमेण पांशुराशिमिव विकरति विध्वंसयति । यावत्तेनैव सार्धमन्तर्धीयते ।

विवर्तकल्पं विस्तरेण वक्तुकाम आह । तथाहि संवृत्तो लोक इति विस्तरः । तथेति यथा वर्णितम् । तदेति विस्तरः । यदाकाशे मन्दमन्दा वायवः स्यन्दन्ते तदा प्रभृति यदयं लोको विंशतिमन्तरकल्पान् संवृत्तोऽ-

1 Mss. सामन्तकादि
2 Mss. भावनोत्पादके
3 To. संवर्तनीं
4 To. omits यां.
5...5 Mss. भूमिकं कार्तिकक्षणचतुदर्थ्याम् चा०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थात् । तन्निर्यातं परिसमाप्तं वक्तव्यम् तदुपयातं वक्तव्यमिति । तदारब्धं वक्तव्यमित्यर्थः । यथोक्तक्रमविधानमिति । यथोक्तेन क्रमेण विधानेन च सर्वं जायते । यथोक्तः क्रमो वायुमण्डलमबूमण्डलं ततः काञ्चनमयी पृथिवी ततः सुमेर्वादयश्चेति । यथोक्तं विधानं यस्य यद्विधानमुक्तमायामोद्वेधपरिणाह-संस्थानलक्षणम् । तत्तथा सर्वं जायते । प्रथमं तु ब्राह्ममिति विस्तरः । यत् पश्चात् संवर्तते तत्पूर्वं विवर्त इति स्थितिः । तेनाह । प्रथमं तु ब्राह्मं विमानमुत्पद्यते । ततो यावद्यामीयमिति । यावच्छब्देन ब्रह्मविमानानन्तरं परनिर्मितवशवर्तिविमानं तदनन्तरं निर्माणरतिविमानं ततोऽनन्तरं यावद्यामीयं विमानमुत्पद्यते । ततो यामीयविमानोत्पत्त्यनन्तरं वायुमण्डलादीनीति । यदुत भाजनविवर्तन्येति । न सत्त्वविवर्तन्येति दर्शयति । शून्ये ब्राह्मे विमान उत्पद्यते इति महाब्रह्मा । अन्येऽपि च सत्त्वा इति तत्परिवाराः । ततश्च्युत्वा ब्रह्मपुरोहितेष्विति । तत आभास्वरेभ्यः । तन्निर्यातं भवतीति । तद्विवर्तनं लोकस्य परिसमाप्तं भवतीत्यर्थः । तदुपयातं भवतीति । आरब्धं [1]विवृत्तावस्थाना-येत्यर्थः । [2]एकोनविंशतिरन्तरकल्पा अपरिमितायुषामिति । [3]एकोऽन्तरकल्पो ब्रह्मलोकविमानादिभाजननिवृत्त्याऽतिक्रान्त इत्येकोनविंशतिरवशिष्टा अन्तर-कल्पा अपरिमितायुषां मनुष्याणामतिक्रामन्त्यानरकसत्त्वप्रादुर्भावात् । सा च विवर्तमानावस्थातिक्रान्तैवावगन्तव्या । प्रादूर्भूते नारके सत्त्वे विवृत्ता-वस्था प्रारब्धा । सेयमुच्यते अपरिमितायुषामेव ह्रसतां यावद्दशवर्षायुषा-मेको विवृत्तावस्थान्तरकल्पः । तेनाह । सोऽसौ विवृत्तानां तिष्ठतां प्रथमो-ऽन्तरकल्प इति । ततोऽष्टादश

उत्कर्षा अपकर्षाश्च ।

ततस्तु

उत्कर्ष एकः

इति । विंशत्यन्तरकल्पपरिमाणा विवृत्तावस्थावगन्तव्या ।

पञ्चस्कन्धस्वभावः कल्पः

त एवाधृा कथावस्तु[4]

इति । मुक्तकमिति । न चतुरागमान्तर्गतमित्यर्थः । अष्टकं मध्याद्विस्मृतमिति ।

---

1. To. विवृत्तावस्थानमित्यर्थः, Mss. विवर्तावस्थानायेत्यर्थः
2. Mss. and To. एकान्न०
3. Mss. एकोत्तर०
4. Kārikā, I, 7.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अष्टौ स्थानानि क्वापि प्रदेशे प्रमुषितत्वान्न पठितानि। तेनात्र द्वापञ्चाशत् स्थानानि भवन्ति। षष्ट्या च संख्यास्थानैर्भवितव्यम्। तान्यष्टकानि स्वयं कानिचिन्नामानि कृत्वा पठितव्यानि, येन षष्टिसंख्यास्थानानि परिपूर्णानि भवेयुः। [1]असंख्या इति, असंख्येयाः संख्यानेनासंख्येया असंख्या[1] इति। बहुवचननिर्देशादनुक्ता अपि तद्धिता भवन्ति। यद्येवं

तदसंख्यत्रयोद्भवम्

इति कथमुक्तम्। नैष दोषः। नास्ति संख्या परेणैष्वित्यसंख्याः, असंख्येयाः कल्पाः। असंख्याश्चासंख्याश्चासंख्याश्चेत्यसंख्याः, तेषां त्रयम्, तेषां कल्पाना-[2]मसंख्यत्रय उद्भवतीति[2] तदसंख्यत्रयोद्भवं बुद्धत्वमित्येवं तद्व्याख्यातव्यम्। तस्याभिमतत्वादिति। तस्य परार्थस्याभिमतत्वात्। यो ह्यभिमतः स स्वार्थो दृष्ट इति। तद्धेतोरिति, आत्मस्नेहहेतोः। आत्मस्नेहं तेभ्य इति विस्तरः। आत्मस्नेहं तेभ्यः स्वासान्तानिकेभ्यः संस्कारेभ्यो निवर्त्य अपेक्षां करुणा-लक्षणां वर्धयित्वा तद्धेतोरपेक्षाहेतोर्दुःखान्युद्वहन्तीति सम्भाव्यं प्रतिपत्तव्यम्। मध्यो दुःखनिवृत्तिमेवेति। प्रत्येकबुद्धः श्रावको दुःखनिवृत्तिमेव मोक्षमेव प्रार्थयते न सुखं सांसारिकम्। कुतः, दुःखास्पदं तद्यतः, यस्मात् तत् सांसारिकं सुखं दुःखस्थानं भवति। श्रेष्ठो बोधिसत्त्वः स्वसन्ततिगतैर्दुःखैः परेषां सुखमाभ्युदयिकं दुःखात्यन्तनिवृत्तिमेव च निःश्रेयसस्वभावां परेषां प्रार्थयते। अथवा परेषां सुखमाभ्युदयिकनैःश्रेयसिकं प्रार्थयते, दुःखात्यन्त-निवृत्तिमेव च बुद्धलक्षणामात्मीयां परहितक्रियोपायभूतां प्रार्थयते। कस्मा-दित्याह, यतस्तद्दुःखदुख्येव स इति। यस्मात् परदुःखैः स बोधिसत्त्वो दुःखी भवति। अतएव सुखं द्विप्रकारं प्रार्थयत इति॥

[अपकर्षे तु शताद्यावत्तदुद्भवः।
द्वयोः प्रत्येकबुद्धानां खड्गः कल्पशतान्वयः॥९४॥

अपकर्षस्याधस्तादिति विस्तरः। वर्षशतस्याधस्तात्, **पञ्चकषाया अभ्युत्सदा भवन्ति**, अभ्यधिका भवन्तीत्यर्थः। वर्षशतेऽप्युत्सदा न त्वभ्युत्-सदा यथाधस्तात्। **आयुःकषाय इति**, **किट्टभूतं प्रत्यवरं कषायः**, आयुरेव कषाय आयुःकषायः। एवं कल्पकषायादयः। **यथाक्रममिति**, **जीवितविपत्तिरायुःकषायेण**, **उपकरणविपत्तिः** कल्पकषायेण, **धान्यपुष्पफलौषधा-दीन्युपकरणान्यल्परसवीर्यविपाकप्रभावानि हि तानि भवन्ति**, **नैव वा भवन्ति।**

1...1 Mss. असंख्येया इति असंख्येया संख्याने न संख्येयाः। असंख्येया

2...2 Mss. & To. त्रयोद्भवतीति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वाभ्यां कुशलपक्षविपत्तिरिति । क्लेशकषायेण दृष्टिकषायेण च कुशलपक्षस्य विपत्तिः । कथमित्याह । कामसुखल्लिकात्मक्लमथानुयोगाधिकारादिति । कामसुखमेव कामसुखल्लिका । कामसुखलीनतेति वा कामतृष्णा वा कामसुखल्लिका । यथा कामसुखे सज्यते । आत्मक्लमथ आत्मोपताप आत्मपीडेत्यर्थः । कामसुखल्लिकात्मक्लमथयोरनुयोगोऽनुसेवनं तस्याधिकारस्तस्मात् । तदुक्तम् । कामसुखल्लिकानुयोगमात्मक्लमथानुयोगं वाधिकृत्यारभ्य क्लेशदृष्टिकषायाभ्यां कुशलपक्षविपत्तिर्भवतीति । एवं तावदविशेषेण । गृहिप्रव्रजितपक्षयोर्वा । गृहिपक्षस्य क्लेशकषायेण कुशलपक्षविपत्तिः । प्रव्रजितपक्षस्य दृष्टिकषायेण । यथाक्रमं कामप्रधाना गृहिणो दृष्टिप्रधानाः प्रव्रजिता इति । एकेनेति । सत्त्वकषायेण ।

द्विविधा हि प्रत्येकबुद्धा इति । यस्माद् वर्गचारिणोऽपि प्रत्येकबुद्धाः श्रावकपूर्विणो भवन्ति न केवलं खड्गविषाणकल्पाः । तस्मादुत्कर्षेऽपि तेषामुत्पत्तिर्न विरुध्यते । ये ह्युत्पादितस्रोतआपत्तिफलसकृदागामिफला अन्तर्हिते बुद्धशासने स्वयमर्हत्त्वमधिगच्छन्ति । ते वर्गचारिणः । ते[1] च [2]बुद्धोत्पादकाल एव प्राकृतसंवेगत्वान्न पुनः संवेजनीया इति । तदीर्यापथसन्दर्शनादिति । प्रत्येकबुद्धेर्यापथसन्दर्शनात् । पर्यङ्कबद्धसमाधिरूपसन्दर्शनात् । न चार्याः सन्तः कष्टानि तपांसि तप्येरन्निति । सत्यदर्शनकाल एव शीलव्रतपरामर्शदृष्टेः प्रहीणत्वात् । शीलव्रतपरामर्शदृष्टिपूर्वकत्वाच्च कष्टतपःक्रियायाः । खड्गविषाणकल्पा इति । यथा खड्गविषाणा अद्वितीया भवन्त्येवं ते गृहस्थप्रव्रजितैरन्यैश्च प्रत्येकबुद्धैरसंसृष्टविहारिण इति । खड्गविषाणकल्पा इत्युच्यन्ते ।

कल्पशतान्वयः

इति । कल्पशतकृतबोधिहेतुरित्यर्थः । अत एव व्याचष्टे । महाकल्पानां शतं बोधिसम्भारेषु शीलसमाधिप्रज्ञालक्षणेषु चरितः कृतप्रयोग इति । शक्यश्च तैरिति विस्तरः । अथापि ते प्रतिसंवित्प्राप्ता न भवेयुः । तथापि तैः प्रणिधिज्ञानेन पूर्वबुद्धानामनुशासनमनुस्मृत्य धर्मो देशयितुं शक्यते । ऋद्धेराविःकरणादिति । आकाशगमनादिकायाः सत्त्वानुग्रहार्थं प्रकाशनात् । नापि सत्त्वानामभव्यत्वात् । धर्मं न देशयन्तीति वाक्यशेषः । कस्मादित्याह । तथाहीति विस्तरः । यस्माद्धि लौकिकवीतरागास्तदानीं संविद्यन्ते । तस्माल्लोकोत्तरवीतरागा अपि सम्भवेयुरित्यभिप्रायः । यद्येते न हेतवो धर्मदेशनाया अकरणे । कस्तर्हि हेतु-

1 Mss. ये

2 To. prefixes पूर्वं.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रित्याह । किं तर्हीति विस्तरः । पूर्वाभ्यासवशेन असंसर्गाभ्यासवशेन [1]अल्पोत्सुकनाधिमुक्तत्वात् । तत्कृतरुचित्वादित्यर्थः । गणपरिकर्षण-प्रसङ्गपरिहार्यं च नोत्सहन्ते गम्भीरधर्मग्रहणाय परेषां व्यापर्तुम् । तथा व्यापारे हि सति गणः परिकृष्टव्यः स्यात् । गणपरिकर्षणप्रसङ्गं पुनः कस्मात् परिहरन्ति । व्याक्षेपसंसर्गभीरुत्वात् । व्याक्षेपसंसर्गाभ्यां भीरुत्वात् । व्याक्षेपो-ऽभिप्रेतसमाध्यादिकर्मण्यप्रवृत्तिः । संसर्गोऽन्यसम्पर्कः । व्याक्षेपसंसर्गभीरुत्वं पुनः पूर्वाभ्यासवशात् ॥९४॥

[चक्रवर्तिसमुत्पत्तिर्नाधोऽशीतिसहस्रकात् ।
सुवर्णरूप्यताम्रायश्चक्रिणस्तेऽधरक्रमात् ॥९५॥
एकद्वित्रिचतुर्द्वीपा न च द्वौ सह बुद्धवत् ।
प्रत्युद्यानस्वयंयानकलहास्त्रजितोऽवधाः ॥९६॥
देशस्थोत्तप्तपूर्णत्वैर्लक्षणातिशयो मुनेः ।]

एष प्राज्ञप्तिक इति । प्रज्ञप्तिशास्त्रनिर्देशः । चतुर्विधाश्चक्रवर्तिन इति । सूत्रे तु सुवर्णचक्रवर्त्येवोक्तः प्राधान्यात् । अस्थानं वर्तमानकालापेक्षया । अनवकाशोऽनागतापेक्षया । अनागतेऽप्यध्वनि सम्भवाद्युगपद्द्वयोरिति । अपूर्वाचरमाविति । नैकः पूर्वो नापरः पश्चात् । किं तर्हि । सहेत्यर्थः । समसम इति वीप्सा । अथवा समैः सर्वसत्त्वेषु बुद्धैर्भगवद्भिः सम इति समसमः । तावतोऽनभिसंस्कारेणेति । तावतो लोकधातोरनाभोगेन दर्शनात् । निकायान्तरीया इति । महासांधिकप्रभृतयः । न चैकत्रेति । लोकधातौ । पुरुषायुषमिति । पुरुषस्यायुः पुरुषायुषम् । तदूर्ध्वभ्रतेति वर्तते । इद-मिन्द्रियमिति श्रद्धादि । अस्याङ्गस्येति । अस्य प्रत्ययस्य । किमिदमेकं लोक-धातुमधिकृत्येति । एकचातुर्द्वीपकं त्रिसाहस्रमहासाहस्रं वा लोकधातुमधिकृत्यैत-दुक्तमित्यभिप्रायः । चक्रवर्तिनोऽपि चेति विस्तरः । अस्थानमनवकाशो यदपूर्वा-चरमौ द्वौ तथागतौ[2] उत्पद्येयातामिति नानेन वचनेन लोकधात्वन्तरोत्पाद-प्रतिषेधः । तथागतानां तथोक्तत्वात् । तद् यथा चक्रवर्तिनाम् । चक्रवर्तिनोऽपि हि तथोक्ताः । अस्थानमनवकाशो यदपूर्वाचरमौ द्वौ चक्रवर्तिनौ लोक उत्पद्येयाता-मिति । जनाः प्राकृतमनुष्याः । मनुष्यास्तु मतिमन्तः । शास्त्राण्यावहन्ति उत्क्षिपन्ति । गृहपतिरत्नं कोशाध्यक्षजातीयः । परिणायकरत्नं बलाध्यक्षजा-

1 To. अल्पोत्सुखताधि०   2 To. adds. लोक.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तीयः । [1]तत्सम्बद्धजातीयमिति । तेन चक्रवर्तिना सम्बद्धः' तत्सम्बद्धस्य तत्सम्बद्धेन वा संवर्तनं तस्मै हितं तदनुकूलं तत्सम्बद्धसंवर्तनीयमिति । येन सत्त्वेन कर्मोपचितं तस्मिन्नुत्पन्ने चक्रवर्तिन [2] स्वान्येवैनं सत्त्वं कर्माण्युत्पादयन्ति । न तु सत्त्वश्चक्रवर्तिकुशलविपाकोत्पत्तिप्रत्ययभावमापद्यते । स च कुशलविपाकश्चक्रवर्तिन एवेत्यवगन्तव्यम् । देशस्थनराणीति' अभ्रष्टस्थानानि । उत्तप्ततराणि [3]प्रभास्वरतराणि । संपूर्णतराण्यखण्डरूपाणि । चक्रवर्तिराजप्रस्तावेनेदं विचार्यते ॥

[प्रागासन् रूपिवत् सत्त्वा रसरागात्ततः शनैः ॥९७॥
आलस्यात् संग्रहं कृत्वा भागादैः क्षेत्रपो भृतः ।
ततः कर्मपथाधिक्यादपह्रासे दशायुषः ॥९८॥]

किं खलु यावत् सराजका इति' रूपावचरा इवासन्निश्यार्थस्य प्रतिपादनाय सूत्रमानयति । सूत्र उक्तमिति विस्तरः । दृश्यरूपत्वाद्रूपिणः । उपपादुकत्वान्मनोमयाः । हस्तपादतदङ्गुल्याद्युपेतत्वात् सर्वाङ्गप्रत्यङ्गोपेताः[4] ' समग्रेन्द्रियत्वादविकलाः । काणविभ्रान्ताद्यभावादहीनेन्द्रियाः । दर्शनीयसंस्थानत्वाच् शुभाः । रमणीयवर्णत्वाद् वर्णस्थायिनः । आदित्यादिप्रभानपेक्षत्वात् स्वयंप्रभाः । कर्मर्द्धिसंयोगेनाकाशचरत्वाद् विहायसंगमाः । कवडीकाराहारानपेक्षत्वात् प्रीतिभक्षाः प्रीत्याहारा इति पर्यायौ । तथा दीर्घायुषो दीघमध्वानं तिष्ठन्तीति । मधुस्वादुरस इति' मधुन इव स्वादुरसोऽस्य रस इति' अयोनिशोमनस्कारस्य ग्राहभूतस्य ग्रासतां गतानां सत्त्वानां काम एव ग्रहः । तेनावेशस्तस्यारम्भ इति । सायमाशार्थमिति । अपराह्णभोजनार्थम् । प्रातराशार्थमिति प्रातर्भोजनार्थम्' सन्निधिकारः संग्रहः । क्षेत्राणि विभज्य अकृष्टोप्तेन शालिना तद्वृत्तिकल्पनात् । क्षत्रियादिसंज्ञानां नैरुक्तेन विधिना सिद्धिः ॥

[कल्पस्य शस्त्ररोगाभ्यां दुर्भिक्षेण च निर्गमः ।
दिवसान् सप्त मासांश्च वर्षाणि च यथाक्रमम् ॥९९॥]

---

1 To. तत्सम्बन्ध०
2 To. चक्रवर्तिनि
3 To. प्रभास्वराणि
4 To. ०पेतः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निर्याणमिति परिसमाप्तिः। **अधर्मरागरक्ता** इति। काममिथ्याचाररागाध्यवसिताः। **विषमलोभाभिभूता** इति। विषमलोभः परकीयस्त्रीकरणेच्छा चौर्याद् बलाद्वा, तेनाभिभूताः। **मिथ्याधर्मपरीता** इति। विपरीतधर्मपरिदीपकाः। **अमातृज्ञा अपितृज्ञा** इति विस्तरः। **पुनः कल्पस्य निर्याणकाल** इति। इह कल्पस्य निर्याणानि त्रीण्युच्यन्ते शस्त्ररोगदुर्भिक्षाणि। किमेकस्य दशवर्षायुःकल्पस्य त्रीणि निर्याणानि क्रमेण भवन्ति, आहोस्विदेकैकस्यैकैकं क्रमेणेति। एके तावदाहुः, एकैकमिति। अपरे पुनराहुः, एकस्य क्रमेण त्रीणि भवन्ति, पूर्वं दुर्भिक्षं तदनन्तरो रोगस्तदनन्तरं शस्त्रमिति। पूर्वकस्तु पक्ष इष्ट इति पश्यामः। **तैरेव दोषैरिति**, अधर्मादिरागादिभिः। **अमनुष्याः** पिशाचादय इति व्याध्यादिक**मुत्सृजन्ति**, ओजो वा हरन्ति प्रभावतो वा पुष्पफलौषधिप्रभृतीनां महाभूतानि दूषयन्ति। **यतस्तेषामसाध्या व्याधयः प्रादुर्भवन्ति। यतो म्रियन्ते।** तदा चेति विस्तरः। यदेह जम्बुद्वीपे शस्त्रकः प्राणातिपातस्तदा **द्वयोर्द्वीपयोः** पूर्वविदेहावरगोदानीययो**र्व्यापाद उद्रेकप्राप्तो भवति**। यदेह रोगस्तदा तयो**र्दौर्बल्यम्**, यदेह दुर्भिक्षं[1] **तयोर्जिघत्सापिपासे** ॥९९॥

[संवर्तन्यः पुनस्तिस्रो भवन्त्यग्न्यम्बुवायुभिः।
ध्यानत्रयं द्वितीयादि शीर्षं तासां यथाक्रमम् ॥१००॥
तदपक्षालसाधर्म्यान्न चतुर्थेऽस्त्यनिञ्जनात्।
न नित्यं सह सत्त्वेन तद्विमानोदयव्ययात् ॥१०१॥]

तीर्थकाराः कणभुक्प्रभृतयः। **वायुर्बीजमुक्तमिति**। बहुविधप्रभावभिन्नै र्वायुभिरभिमथ्यमाना इति[2] वचनात्। **तस्य निमित्तमिति**। रूपावचरो वायुरविनष्टः। कामावचरस्य विवर्तकाले प्रथमक्षणोत्पन्नस्य वायोर्निमित्तम्। **बीजान्याह्रियन्त** इति। पञ्च बीजजातानि मूलबीजादीनि। मूलबीजं [3]फल्गुबीजं बीजबीजमग्रबीजं स्कन्धबीजम्। **एवमपीति**, यद्यप्याह्रियन्ते बीजानि **न ते स्थूलभावानां**[4]**बीजादिभ्यो** बीजाङ्कुरगण्डादिभ्यो**ऽङ्कुरादीना**मङ्कुरकाण्डादीना**मुत्पत्तिमिच्छन्ति**। बीजादीनि हि तेषां निमित्तकारणानि, न समवायिकारणानि। समवायिकारणैश्च भवितव्यम्। अत आह। **किं तर्हि, स्वेभ्य एवावयवेभ्य** इति विस्तरः। तद् यथाङ्कुराद्यवयवी अङ्कुराद्यवयवेभ्यः। तेषामप्यङ्कुराद्यवयवानां स्वेभ्य एवावयवेभ्यः। तेषामपि

1 To. adds तदा.

2 See commentary on Kā., III, 49 (p. 85, l. 23): बहुविधप्रकारभिन्नैः etc.

3 To. फलु

4 Mss. स्थूलाभावा०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वेभ्य एवेति । **एवं यावत् परमाणुभ्यः । अन्यत्र परमाणूपसर्पणादिति । न** जनने बीजादीनां **सामर्थ्यं किञ्चिदस्ति ।** अङ्कुरादिपरमाणूपसर्पणात्तु[1] तेषां सामर्थ्यमिष्यत इत्यभिप्रायः । **अनियमो हि स्यादिति ।** तन्त्वादिभ्योऽपि कटाद्युत्पत्तिः स्यादित्यर्थः । **शक्तिनियमादिति ।** यथा बीजादीनां सामर्थ्यनियमान्नानियमो भविष्यति । **शब्दपाकजोत्पत्तिवत् ।** यथा शब्दोऽभिघातादिभ्यो विजातीयेभ्य उत्पद्यते । अथ च न यतः कुतश्चिद् गन्धरसादेर्विजातीयादुत्पद्यते । अभिघातादीनामेव विजातीयानां तदुत्पादने सामर्थ्यात् । तथा पाकजा रूपादयो विजातीयादग्न्यादेरुत्पद्यन्ते । अथ च न यतः कुतश्चिद्विजातीयाच्चक्षुरादेरुत्पद्यन्ते । अग्न्यादेरेव तदुत्पादने सामर्थ्यात् । वैशेषिक आह । **चित्रो वै गुणधर्मः** स्वजातीयेभ्यो विजातीयेभ्यश्चोत्पद्यते । स्वजातीयेभ्यस्तावद्रूपरसगन्धस्पर्शादयः कारणपूर्वा रूपरसगन्धस्पर्शादिभ्य एवोत्पद्यन्ते । विजातीयेभ्योऽपि संयोगविभागपाकजादयः कर्मादिभ्यः । तदेवं गुणधर्मो द्रव्यधर्मं प्रत्यनुदाहरणम् । **त एव हि ते तथेति** विस्तरः । वीरणादय एव हि ते तथा तेन प्रकारेण कटादिरूपेण **सन्निविष्टा** व्यवस्थितास्तां कटसंज्ञां लभन्ते । **पिपीलिकादिपंक्तिवत् ।** यथा पिपीलिकास्तथा सन्निविष्टाः पंक्तिरिति संज्ञां लभन्ते । न च ताभ्योऽन्यत् पंक्तिद्रव्यमस्ति भवतामपि सिद्धान्ते । **कथं** गम्यते तानि वीरणादीनि तथा सन्निविष्टानि कटादिसंज्ञां लभन्ते न पुनस्तेभ्यो द्रव्यान्तराणीति । अत आह । **एकतन्तुसंयोगे पटस्यानुपलम्भात् ।** [2]आरब्धकार्ये ह्येकस्मिन् तन्तौ चक्षुःसंस्पर्शाभ्यां संयुक्ते [3]तत्समवेतः पटोऽपि च ताभ्यां सन्निकृष्ट इत्यसावपि तथैवोपलभ्येत । [4]यदि ब्रूयात् प्रतिबन्धात्तस्यानुपलब्धिरिति । अत आह । **को हि तदा सतो विद्यमानस्य पटस्योपलब्धौ प्रतिबन्ध** इति । नास्ति प्रतिबन्ध इत्यभिप्रायः । तस्मान्न पटो नाम द्रव्यान्तरमस्तीति । स्यान्मतम् । एकैकस्मिन् तन्तौ प्रदेशेन पटो वर्तते न सर्वात्मना वर्तत इति । अत उच्यते । **अकृत्स्नवृत्ताविति** विस्तरः । अकृत्स्नवृत्तौ पटस्य कल्प्यमानायां पटभागोऽस्यैकैकस्मिन् तन्तौ **स्यान्न पटः ।** ततः किमिति चेत् । अत आह । **समूहमात्रं च पटः स्यादिति** वर्तते । एकस्मिन् तन्तावेको भागो अपरस्मिन्नपर इति तन्तुवर्तिनां बहूनां भागानां समुदायः पट इति च प्राप्नोति । न चेष्यते । **कश्च तन्तुभ्योऽन्यः पटभाग** इति कणभुग्भक्ताः प्रष्टव्याः । येन भागेनायमिन्द्रियसन्निकृष्टे तन्तौ

---

1 V. °सर्पणेतु

2 Mss. आलब्ध°

3 To. भवन्मतेन

4 Mss. गुण

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वर्तेत। तस्मादेतामपि कल्पनां कल्पयित्वा नातोऽन्यः पटः सिध्यति। स्यान्मतम्, एकैकस्मिन्नपि तन्तौ पटो वर्तते। पटोपलब्धेस्तु पटेन्द्रियसन्निकर्षः **पटस्यानेकाश्रयसंयोगापेक्षो निमित्तमिति।** अतो[1]ऽनेकाश्रयसंयोगापेक्षायामुपलब्धौ[1] कल्प्यमानायां **दशामात्रसंघाते गृह्यमाणे पट उपलभ्येत**, न तूपलभ्यते, पटमध्यभागाद्यदर्शनात्। अथ मतम्, नैव तदानीमपीन्द्रियेण मध्यादिभागाः सम्प्रयुज्यन्त इति। अतो दशामात्रसंघाते[2] पटोपलब्धिर्न भवतीति। तत इदमभिधीयते। **न वा कदाचि**दिति विस्तरः, न वा कदाचित् **पटोपलब्धिः स्यात्। मध्यपरभागानामिन्द्रियेणासन्निकर्षात्**, नैव हि सम्भवोऽस्ति यत्तदारम्भका मध्यपरभागाः सर्व एवेन्द्रियेण सन्निकृष्येरन्। तथा च सति तन्त्वादिष्वप्येष प्रसङ्ग इति न च किञ्चिदपि कार्यमुपलभ्येत। **किञ्च क्रमसन्निकर्षे** चेति विस्तरः। यदा क्रमेण चक्षुः संस्पर्शनेन्द्रियं वा पटं गृह्णीयात्तदा पटग्रहणं न स्यात्, युगपदनेकाश्रयसंयोगाभावाच्चक्षुःस्पर्शनेन्द्रिययोः। एवमन्येषामप्यवयवानां ग्रहणं न स्यात्। **तस्मा**दिति विस्तरः। यस्मात् क्रमेण पटबुद्धिः कटबुद्धिर्वा **तस्मादवयवेष्वेव** पटावयवेषु कटावयवेषु[3] वा **तद्बुद्धिः** पटबुद्धिः कटबुद्धिर्वा विकल्पवशाद्भवति। **अलातचक्रवत्**, यथालाते शीघ्रसञ्चारात्तत्र तत्रोत्पद्यमाने अलातचक्रबुद्धिर्भवति तद्वत्। साधनं चात्र, न द्रव्यसत् पटः, अवयवग्रहणसापेक्षग्रहणत्वात्, अलातचक्रवत्। **भिन्नरूपजातिक्रियेष्वि**ति[4] विस्तरः। भिन्नरूपेषु तन्तुषु नीलपीतादिभेदात्, भिन्नजातिषु दुकूलकर्पासादिभेदात्, भिन्नक्रियेषूर्ध्वाधोगमभेदात्[5]। **पटस्य रूपाद्यसम्भवात्।** कीदृशं तत्र रूपं भवतु, जातिः क्रिया वा। स्यादेषा बुद्धिः, चित्रमस्य रूपादीति। तदेवं **चित्ररूपादित्वे** कल्प्यमाने **विजातीयारम्भोऽपि स्यात्**, तन्तुवीरणयोरपि कटारम्भः स्यात्। तथा सति धर्मविशेषविपर्ययः प्राप्नोति, अत्यन्तविजातीयारम्भकत्वं द्रव्याणां प्राप्नोतीत्यर्थः। **अविचित्रे च पार्श्वान्तरे** एकपार्श्वचित्रस्य[6] **पटस्यादर्शनं स्यात्**, तस्य चित्ररूपाभिमतत्वात्। रूपदर्शने हि तदाश्रयद्रव्योपलब्धिरिष्यते वैशेषिकैः। [7]महत्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिः। रूपसंस्कारा-

---

1...1 Mss. ऽनेकाश्रयसंयोगानुपलब्धौ
2 Mss. and To. ॰संहाते
3 Mss. omit कटावयवेषु.
4 To. क्रियास्विति
5 Mss. ॰धोसमभेदात्
6 To. पार्श्वविचित्रस्य
7 See Vaiśeṣikasūtra, IV, 1, 6.7.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावाद् [1]वायोरनुपलब्धिरिति वचनात्। **चित्ररूपदर्शनं वा** अचित्रे पार्श्वे **स्याद्** यदि पटो दृश्येत। चित्रं हि तस्य रूपमिष्यते। **क्रियापि च चित्रेत्यति-चित्रमिति**। एकं तद् द्रव्यं विचित्रक्रियमिति न युज्यते। क्रियावैचित्र्ये हि क्रिया-वदभिमतानां द्रव्याणामन्यत्वमिष्यते। **तापप्रकाशभेदे चेति** विस्तरः। अग्निप्रभा-लक्षणस्यावयविन आदिमध्यान्तेष्वारम्भकेषु तापप्रकाशभेदे स्पर्शनभेदो दृष्टः। स च तद्भेदस्तत्र यथाक्रमं तीव्रमध्यमन्दता। तस्यावयविनः प्रभाद्रव्यस्य तौ **रूपस्पर्शौ नोपपद्येते**। न ह्येकस्यावयविनोऽनेकं रूपं स्पर्शो वा युज्यते। तेन नावयवेभ्योऽवयविद्रव्यमन्यदस्तीति। अथ मतम्। यदि तन्त्वादिभ्योऽवयवेभ्यो न पटाद्यवयवी व्यतिरिक्तोऽस्ति। परमाणूनामतीन्द्रियत्वात्। न च तैरवयवैरैन्द्रियक आरब्ध इति। कृत्स्नं जगदप्रत्यक्षं स्यात्। प्रत्यक्षं च गवादि दृश्यते। तस्माद-तीन्द्रियैः परमाणुभिरर्थान्तरमन्यदैन्द्रियकमारब्धमिति सिद्धिरित्यत्रोच्यते। **परमाण्वतीन्द्रियत्वेऽपीति** विस्तरः। यथा भवतां वैशेषिकाणामतीन्द्रियत्वेऽपि **समस्तानां** कार्यारम्भकत्वं न व्यस्तानाम्। एवमस्माकमपि समस्तानामेव प्रत्यक्षत्वं न व्यस्तानामसत्यवयविन्यर्थान्तरभूते[2]। **यथा चक्षुरादीनां** चक्षूरूपालोक-मनस्काराणां समस्तानां चक्षुर्विज्ञानोत्पत्तौ **कारणत्वं नैकैकस्य**। एवं परमाणूनाम-तीन्द्रियत्वेऽपि समस्तानां प्रत्यक्षत्वं नैकैकस्य। **तैमिरिकाणां च पुरुषाणां विकी-र्णानामसंयुक्तानां केशानां समूह उपलभ्यते** अनारब्धेऽप्यवयविनि। न त्वेकैकः केशः। **तेषां** तैमिरिकाणां **परमाणुवदेकः केशोऽतीन्द्रियः**। इत्यतो नास्ति तेऽन्यद्द्रव्यम्।

तदेवमवयविनं प्रतिषिध्य रूपादिभ्यो गुणेभ्योऽर्थान्तरं गुणिनं[3] प्रतिषेद्धुकाम आह। **रूपादिष्वेव चेति** विस्तरः। रूपादिष्वेव **परमाणुरिति संज्ञाविनिवेशः**। **तद्विनाशे** रूपादिविनाशे सिद्धः **परमाणुविनाश** इति। वैशेषिका आहुः। **द्रव्यं** हि **परमाणुः। अन्यच्च रूपादिभ्यो** द्रव्यम्। रूपगन्धरसस्पर्शवती पृथिवी[4] इत्येवमादिसिद्धान्तवचनात्। **अप्रयुक्तमस्यान्यत्वम्**। यस्मान्न **केनचित् परिच्छिद्यन्ते** इमानि **पृथिव्यप्तेजांसि। इमे एषां** पृथिव्यादीनां **रूपादयो** रूप-रसगन्धस्पर्शा **गुणा** इति। ब्रूयादतीन्द्रियाणि तत्त्वतो[5] न निर्धार्यन्त इति। अत आह। **चक्षुःस्पर्शनग्राह्याणि च तानि पृथिव्यादीनि प्रतिज्ञायन्त** इति। **दग्धेषु चेति** विस्तरः। ऊर्णादीन्यवयविद्रव्याणि न पच्यन्त[6] इति पैलुकाः। तदुक्तं

1 Mss. वायावनुप०

2 To. following Tib. असत्यप्यवयविन्य०

3 Mss. & To. गुणिनां

4 Vaiśeṣikasūtra, II, 1, 1.

5 To. दृश्यन्त

6 To. following Tib. ताप्यन्तो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवति 'प्राक्तनगुणनिवृत्तौ पाकजगुणोत्पत्तौ तदाश्रयास्तु द्रव्याणि तदवस्थानान्येव भवन्तीति । तथैवोर्णादिबुद्धिः स्यात् । **न च भवति** '**तस्मात्तद्द्रव्यबुद्ध्यभावात्**' **रूपादिष्वेव तद्बुद्धिर्न** द्रव्येऽर्थान्तरभूत इति । यदि हि ऊर्णादिद्रव्यं[1] रूपादिभ्यो[2] [3]ऽन्यत् स्यात्तत्तदवस्थानं भवतीति रूपादीन्येवाग्निसम्बन्धादुष्णेन निरुद्धानीत्यूर्णादिबुद्धिः स्यात्' न च भवति' तस्माद्रूपादिष्वेवोर्णादिबुद्धिः । वैशेषिका आहुः ' यदि रूपादिमात्रं घटः स्यात्' अग्निसम्बन्धाद्रूपादीनि पाकजादीन्यन्यान्युत्पद्यन्त इति स एवायं घट इति न परिज्ञायेत । यस्य तु पाकाद्रूपादीन्येवोत्पद्यन्ते निरुध्यन्ते चेति स एव घटस्तदवस्थानो भवतीति तस्य तत्[3] परिज्ञानं[4] युज्यत इत्यत इदमुच्यते । **पाकजोत्पत्तौ घटपरिज्ञानं संस्थानसामान्यादिति** । रूपाद्याकृतिसामान्यादित्यर्थः । **पंक्तिवत्** । यथा न वस्तुत् पिपीलिकानां तद्व्यतिरिक्तं पंक्तिद्रव्यं नामास्ति' अथ च पूर्वपंक्तिसंस्थानसामान्यादन्यस्यामिति तत्परिज्ञानं भवति सैवेयं पिपीलिकानां पंक्तिरिति । आह' **कथमेतद्गम्यते** संस्थानसामान्यात् परिज्ञानं न तु तादवस्थ्यादिति । अत्रोच्यते ' **चिह्नमपश्यतोऽपरिज्ञाना**दिति' यस्मात् खण्डनिम्नोन्नतादि चिह्नमपश्यतस्तत्परिज्ञानं न भवत्यतः संस्थानसामान्यादिति सिद्धम् ।

सा चेति विस्तरः' सा च प्रीतिः **प्रश्रब्धियोगेन** । [5]प्रीतेर्मनसः प्रश्रब्धिर्जायत इति प्रश्रब्धियोगेना**श्रयमृदुकरणा**दपक्लपा[6] । **अत एव चेति** विस्तरः । आश्रयमृदुकरणात् । **तस्मिन्** द्वितीये **समापत्तिध्याने कृत्स्नस्य** [7]**कायस्थैर्यस्यापगमाद्दुःखेन्द्रियनिरोध**[8] **उक्तः** । सुखस्य च प्रहाणाद्दुःखस्य च प्रहाणात् । पूर्वमेव सौमनस्यदौर्मनस्ययोरस्तंगमाददुःखासुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसंपद्य विहरतीति वचनात् । **आध्यात्मिकापक्षालरहितत्वादिति** । ये वितर्कविचारादयोऽष्टावाध्यात्मिकापक्षालाः

[9]वितर्कविचारौ चासू[9] सुखादि च चतुष्टयम्[10]

इति ' तद्रहितत्वादित्यर्थः । **आनेञ्ज्यमिति** । एजृ कम्पन[11] इत्यस्य

---

1 Mss. द्रव्य 2 Mss. रूपादि

3...3 Mss. omit this portion which has been restored from Tibetan by Poussin and adopted in To.

4 Mss. विज्ञानं 5 Mss. प्रीतिं 6 Mss. ०दसत्कल्पा

7 Mss. कायकार्य० 8 Mss. दुःखनिरोध

9...9 Mss. वितर्कविचारयोश्चासौ च, To. वितर्कविचारौ चासू च

10 Kārikā, VIII, 11.

11 Mss. कम्पनम्, but see Dhā., 1, 253.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धातोरेतद्रूपमानेञ्जयमिति । यदा त्वानिञ्जयमिति पाठस्तदा इगेः[1] प्रकृत्यन्तरस्यै-तद्रूपं द्रष्टव्यम् । न तैः शुद्धावासकायिकैः शक्यमारूप्यान् प्रवेष्टुं विपश्यनाचरितत्वात् । शमथचरिताश्चारूप्याः । नाप्यन्यत्र गन्तुमधरां भूमिं विशेषगामित्वात् ॥१००-१॥

[सप्ताग्निनाद्भिरेकैवं गतेऽद्भिः सप्तके पुनः ।

तेजसा सप्तकः पश्चाद् वायुसंवर्तनी ततः ॥॥१०२]

एतेन क्रमेणेति । यथोक्तेन सप्तानां [2]तेजःसंवर्तनीनामनन्तरमद्भिः संवर्तनी भवत्येका । पुनः सप्तानां [2]तेजःसंवर्तनीनामनन्तरमद्भिः संवर्तनी भवति द्वितीया । एवं यावत् सप्तम्यद्भिः संवर्तनी ।

एवं गतेऽद्भिः सप्तके पुनः ।

तेजसा सप्तकः

ततः

पश्चात्

एका

वायुसंवर्तनी

भवति । किं कारणम् । यथावर्णितं बहुना कालप्रकर्षेणाप्संवर्तनी भवति । ततोऽपि बहुतरेण वायुसंवर्तनीत्यत इदमुच्यते । यथैव हि तेषामिति विस्तरः । यथा प्रथमध्यानाद् द्वितीयध्यानसमापत्तिविशेषादात्मभावानां द्वितीयध्यानभूमिकानां स्थितिविशेषः । अर्धमहाकल्पार्धं[3] प्रथमध्यानोपपन्नानामायुःप्रमाणम् । कल्पद्वयं द्वितीयध्यानोपपन्नानामिति । [4]तथा भाजनानामपि । किम् । स्थितिविशेष इति । एवं द्वितीयादपि तृतीयध्यानस्य विशेषो वक्तव्यः । एवं च कृत्वेति । यस्मादष्टकृत्व[5]स्तेजःसंवर्तनीसप्तका इति षट्पञ्चाशत्तेजःसंवर्तन्यो भवन्ति । सप्ताप्संवर्तन्य एका वायुसंवर्तनीति चतुःषष्टिः संवर्तन्यो भवन्ति । तस्माद् यदुक्तं प्रज्ञप्तिभाष्ये चतुःषष्टिः कल्पाः शुभकृत्स्नानामायुःप्रमाणमिति । तत् सूक्तं भवति । [6]यथा

ऊर्ध्वन्तु परीत्ताभेभ्य आश्रयः ।

द्विगुणद्विगुणाः[7]

इत्यत्रोक्तं शुभकृत्स्नानां चतुःषष्टियोजनानां शरीरप्रमाणम् । शरीरप्रमाणेन

1 C इञ्जेः, V. इञ्जे, see Dhā., I, 163.

2 Mss. ०संवर्तनीयानाम्

3 Mss. ०कल्पार्धस्य

4 Mss. यथा

5 Mss. दसप्तकृत्व

6 Mss. तथा

7 Kārikā, III, 77.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च तेषामायुःप्रमाणमुक्तम् ।

आयुस्तु कल्पैः स्वाश्रयम्[1]

इति वचनात् । एकैका संवर्तनी महाकल्प[2] इति कृत्वा । इयता हि कालेन तेषामायुषः परिसमाप्तिरिति ॥१०२॥

आचार्ययशोमित्रकृतायां स्फुटार्थायामभिधर्मकोशव्याख्यायां तृतीयं कोशस्थानम् ॥

---

1 Kārikā, III, 80.

2 Mss. ०कल्पम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh